गोपीनाथमिश्रकृत-

द्रव्यभाष्यभावग्रन्थस्य सम्पादनं समीक्षकात्मकमध्ययनञ्च



A CRITICAL STUDY AND EDITION OF DRAVYA - BHĀṢYA - BHĀVAH

BY

GOPĪNĀTHA MIŚRAH

अनुसन्धाता

डां मार्कण्ड दासः

गोपीनाथमिश्रकृत -
द्रव्यभाष्यभावग्रन्थस्य सम्पादनं
समीक्षकात्मकमध्ययनञ्च

A Critical Study and Edition
of
Dravya - Bhāṣya-Bhāvaḥ

By

GOPĪNĀTHA MIŚRAḤ

अनुसन्धाता

डां. मार्कण्ड दासः

प्रथमावृत्तिः -१९९६

मूल्यम्-
नवदिल्लीस्थ-राष्ट्रिय संस्कृत संस्थानस्य
धनराशिप्रदानेन प्रकाशितम्

मुद्रितम् -
श्रीप्रकाशनम् , वर्गः - ९ ,भुवनेश्वरम्

First Edition - 1996

Price:

Published with financial assistance from
Rastriya Sanskrit Sansthan, New Delhi.

Printed at
Sri Publication
Unit-IX, Bhubaneswar.

Dedicated to
my
Deceased Beloved Mother

प्राशस्त्यपुस्तकसमाहितकीर्णतत्त्वं
दव्यानुभाष्यमनुकृत्य तनोमि भावम् ।
तत्पुष्पकं बहु गृहाण वरं सश्रद्धं,
मातस्त्वदीयचरणाम्बुजमर्पयामि ॥

FOREWORD

The first systematic work of the Vaiśeṣika philosophy is the Vaiśeṣika-Sūtra of Kaṇāda. Praśastapāda's Padārtha-dharma-saṅgraha, usually known as the Bhāṣya, reads like an independent exposition of the Vaiśeṣika philosophy. Besides Praśastapāda's so called Bhāṣya there are five commentaries on Praśastapāda's Bhāṣya itself. They are: Vyomaśiva's Vyomavatī, Udayana's Kiraṇavalī, Śrīdhara's Nyāya Kandalī, Jagadīsa Tarkālankāra's Sūkti and Padmanābha's Setu. The present work is the sixth commentary on Praśastapāda's Bhāṣya and it has been brought to light by the young scholar Mārkanda Dāsa. After obtaining the degree of Sarva-darśanācarya, Śrī Dāsa continued his study on Vaiśeṣika philosophy. And the work now presented to the scholarly world is the dissertation for his degree of Vidyāvāridhi.

It was the eminent historian Śrī Kedār Nāth Mahāpātra who with his untiring zeal and effort has collected rare palm-leaf manuscripts lying uncared for in the different parts of our state. Credit goes to the author Śrī Mārkanda Dāsa who spotted this manuscript in the huge collection and edited the work.

For making a critical edition of the text of the author Śrī Gopīnātha Miśra, Śrī Dāsa has made use of three manuscripts, two manuscripts procured from Orissa State Museum and the other from the Government Oriental Manuscript Library, Madras. With the help of

these three manuscripts the author has edited the text which is free from any bias on blemish. What adds to the value of the work is an elaborate introduction to the text. In this part of the book the author discusses the life and date of Gopīnātha Miśra, further he makes a critical estimate of the commentary in great detail.

This printed edition of the commentary Dravya-bhāsya-bhāva on the Praśastapāda's Bhāṣya published for the first time by Śrī Mārkanda Dāsa should be an eye-opener to the young Sanskrit scholars, who should turn their attention to the wealth of manuscript materials deposited in the Palm-leaf manuscript library of the Orissa State Museum.

I hope this Sanskrit text Dravya-Bhāsya-Bhāva, a commentary on Praśastapāda Bhāṣya will contribute to further enrichment of unique vehicle of universal culture that Sanskrit is.

Vijayādaśamī
21-10-96

Professor Anama Charan Swain
Formerly Prof and
Head of the Department of Sanskrit
Utkal University, Bhubaneswar.

शोधप्रबन्धस्य कृते सूचीपत्रम्

प्रथमोऽध्याय:

दर्शनम्

असारे खलु सुखदु:खमोहात्मकेऽऽधिभौतिकाधिदैविकाध्यात्मिक-त्रिक्लेशाधिकरणे संसारे रोरुद्यमानानां नानातिर्य्यङ्.योनिसम्भूतेन विदह्यमानानां मनुष्याणां सकलदु:खनिवृत्तये श्रुतिशास्त्रादिभिरात्मतत्त्वलाभस्यैव हेतुत्वेन प्रतिपादितत्वात् किं तावच्छास्त्रमिति विषये उच्यते व्युत्पत्त्यर्थज्ञानमस्य आगमग्रन्थे-

[1]"शासनात् शंसनाच्छास्त्रम्, शास्त्रमित्यभिधीयते ।
शासनं द्विविधं प्रोक्तम्, शास्त्रलक्षणवादिभिः ।
शासनं भूतवस्त्वेकविषयं न क्रियापरम् ॥"

इतिपद्यात् शासुधातो: शसुधातोर्वा शास्त्रशब्दस्य व्युत्पत्तिलभ्यत्वात् तज्जन्यप्रवृत्तिलोकाभिव्यवहारसिद्धये, अगोचरप्रामाण्यादीनां विज्ञानाय शास्त्रत्वं प्रतिपादितम् । अतः चैतादृशशास्त्रस्वरुपं निरुप्यते-

[2]प्रवृत्तिर्वा निवृत्तिर्वा , नित्येन कृतकेन वा ।
पुसां येनोपदिश्येत , तच्छास्त्रमभिधीयते ॥

नित्यनैमित्तिककाम्यादिविहितकर्मसु प्रवृत्तिं, लोकेष्वनिष्टसाधकानि अथर्ववेदतन्त्रादिप्रतिपादितस्तम्भनमोहनोच्चाटनादिस्थूलाभिचारिकहिंसाकर्मभ्यां निवृत्तिञ्च शास्त्रं जनयति ।

शास्त्रपदनिरुपणादनन्तरमेव तस्येन्द्रियजन्यज्ञानानुभवात् किं तावत् शास्त्रकार्यत्वमिति चेत् । न । तस्य द्रष्टृत्व - श्रोतृत्व - मन्तृत्व - निदिध्या-सयितृत्वात्, यथा -[3]"आत्मा वाऽरे द्रष्टव्यो श्रोतव्यो मन्तव्यो निदिध्यासितव्य: । आत्मा वाऽरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विज्ञातं भवति ।" अपि च प्रोच्यते -

1. भा. द. इ. - पृ. 3.
2. स. द. कौ. - पृ. 3.
3. वृह ० उ. 8.5.5

[1] श्रोतव्यः श्रुतिवाक्येभ्यो , मन्तव्यश्चोपपदिभिः ।
मत्वा तु सततं ध्येयः, एते दर्शनहेतवः ॥

प्रत्यक्षानुमानादिप्रमाणान्तरानवगतवस्तुबोधकवेदपाठश्रवणेन तदुपपादिताप्तवचनानां मननेन पश्चादुभाभ्यां स्वमनसि प्रतिपादयितुं पदार्थानां ध्यानेन कृत्स्नजगज्जातवस्तूनां विषये ज्ञानं भवति । एतानि श्रवण-मनन-निदिध्यासनानि त्रीणि दर्शनशास्त्रस्य हेतवो भवन्ति । अत एव दर्शनशास्त्रविषया आलोचयितव्याः ।

दर्शनशास्त्रम् -

दर्शनं नाम दृश् धातोः ल्युट्प्रत्यय इति वैयाकरण सिद्धान्तनिष्टव्युत्पत्ति-लभ्यज्ञानलभ्यत्वात् अभिधया लोकजातपदार्थानां चक्षुषा ग्रहणमिति सिद्धत्वेऽपि लक्षणया वाक्पाणिपादादिपञ्चकर्मेन्द्रियैः श्रोत्रत्वक् चक्षु-रसनघ्राणाख्यपञ्चज्ञानेन्द्रियैः मनसा च रुपरसगन्धस्पर्शादिसूक्ष्मतत्त्वानि प्रदर्श्य समाप्तौ [2] निरस्ताखिलद्वैताद्वैत- विभ्रमखण्डात्मकं सच्चिदानन्दैकरसं [3]ब्रह्मस्वरुपदर्शनमेव सिद्ध्यते । एतज्ज्ञानप्रतिपादकशास्त्रमेव दर्शनशास्त्रमिति । अस्माद् दर्शनशास्त्राध्ययनेन सर्वमेव सम्भावयितुं सम्भवितुं वा शक्यते । प्रथमतः दुःखत्रयाणामात्यन्तिकनिवृत्तये दर्शनशास्त्राद्व्यतिरिक्तं किमपि नास्ति । एतदर्थं [4] ईश्वरकृष्णाचार्यविरचित-साङ्ख्यकारिकायां स्पष्टतया प्रतिपाद्यते-

दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ ।
दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात् ॥

इति संसारदुःखत्रयाणामत्यन्ताभावप्रतिपादनार्थं पुनरपि कौटिल्यशास्त्रे तारस्वरेणोक्तम् -

---

1. भा. द. इ. पृ. - 14.
2. सम्यग्दर्शनसम्पन्नः कमभिर्न निबध्यते ।
   दर्शनन विहीनस्तु संसार प्रतिपद्यते ॥ (म. स्मृ ० 6.74)
3. सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम् ।
   तद्ध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः ॥ (म. स्मृ. 12/85)
4. सां. का. - 1.

[1]प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां शाश्वदान्वीक्षिकी मता ।।

इतिवचनात् [2]आन्वीक्षिकीत्यपराभिधस्य न्यायतत्समानत्वाद् [3]वैशेषिकदर्शनस्यापि सिद्ध्यति ।

ननु योगशास्त्रमतानुसारम् - [4]नित्यशुचिसुखात्मख्यातिरूपाविद्याख्यस्य तत्कल्पितशरीरान्तवर्त्तित्वेन प्रतिष्टापितत्वात् तत्खण्डयितुं प्रतिपादयितुञ्च अशक्यमिति चेत् । न । तस्मिन् प्रतिष्ठापिततर्कमाध्यमेन सर्वसम्भवभावात् । अत एव अनुमानप्रमाणमङ्गीकुर्वच्छास्त्रमधुना वैशेषिकदर्शनमत्र सम्यगालोच्यते ।

द्वितीयोऽध्यायः

वैशेषिकदर्शनमिति सार्थकता

दर्शनं द्विविधम्, आस्तिकनास्तिकभेदात् । वेदप्रामाण्याभ्युपगन्तृत्वमास्तिकत्वम् । तत्र न्याय-वैशेषिक-सांख्य-योग-मीमांसा-वेदान्ताख्यानि षडिति भवन्ति । [5]नास्तिकत्वं नाम हेतुवादादिभिः वेदप्रामाण्यापलापकत्वम् । तदन्तर्गतानि चार्वाक्-जैन-बौद्धाख्यानि त्रीणि । [6]केचित्तु वैभाषिक-माध्यमिक-सौत्रान्तिक-योगाचारान् बौद्धपार्थक्येन स्वीकृत्य

1. कौ. अ - 1-2, न्या. भा. - 1.1.1 सूत्रे
2. (क) द्विधा चान्वीक्षिकी पूर्वोत्तरपक्षाभ्याम्, अर्हदभदन्तदर्शने लोकायतञ्च पूर्वः पक्षः । सांख्यं न्यायवैशेषिकौ च उत्तरः । त इमे षट् तर्काः । -का. मी . अ 1, पृ. 10.
   (ख) तर्कोऽपि द्विविधो वैशेषिकविन्यायभेदेन ।
3. नैयायिकमतादन्ये भेदं वैशोषिकैः सह ।
   न मन्यन्ते मते तेषां पञ्चवास्तिकवादिनः ।। - ष. द. सं, पृ.-78.
4. नित्यशुचिसुखात्मख्यातिरविद्या । यो. सू. 1.5.
5. योऽवमन्येत ते मुले हेतुशास्त्रादपि द्विजः ।
   सा साधुभिर्वहिष्कार्या नास्तिको वेदनिन्दकः ।।. - म० स्मृ० अ०-2.
6. मुख्यो माध्यमिको विवर्त्तमखिलशून्यस्य मेने जगत्,
   योगाचारमते तु सन्ति मुनयस्तेषां विवर्त्तोऽखिलः ।

जैनचार्वाकाभ्यां सह नास्तिकदर्शनं षडिति प्रतिपादयन्ति । एषु आस्तिकदर्शनेषु षट्सु पञ्चभूतात्मके संसारे सांसारिकदुःखनिवृत्तिनिमित्तं वैशेषिकाः द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाभावान् स्वकीयतत्त्वरुपेण स्वीकुर्वन्ति । एतदर्थं किं नाम वैशेषिकदर्शनमित्याकांक्षायामुच्यते - ''विशेष एव वैशेषिक'' इति [1]गुणरत्नमहोदधिकृतौ वृत्तौ प्रोक्तम् । अपि च इतरदार्शनिकैरभ्युपगतस्य ''विशेष'' नामपदार्थस्य स्वीकारात् तेषां वैशेषिक इति संज्ञा ।

वैशेषकसंज्ञानिरुपणम् -

प्रागेव वैशेषिकशब्दस्य व्युत्पत्तिजन्यप्रयोगस्तु दृश्यते - ''विशेष'' शब्दादिकचूप्रत्यय इति । **(1)** अतः हरिभद्रसुरिकृत-षड्दर्शनसमुच्चयग्रन्थस्योपरि [2]गुणरत्नसुरिकृत-महोदधिवृत्तिटीकायाम् - ''नित्यद्रव्यवृत्तयोऽन्त्याः विशेषाः । विशेषा वदन्त्यभिधीयन्ते वा । ''तद्‌वत्यधीते'' इत्यपि वैशेषिकाः । तेषामिदं वैशेषिकम्'' इति ।

(2) एवमपि [3]सर्वदर्शनसंग्रहकारेण माधवाचार्येण वैशेषिकशब्दस्य संज्ञानिरूपणे सामान्यतः -

द्वित्वे च पाकजोत्पत्तौ, विभागे च विभागजे ।
यस्य न स्खलिता बुद्धिः, तं वै वैशेषिकं विदुः ॥

इति प्रोक्तम् । एतत्तु सम्यक्त्वेन नाभिहितम् ।

(3) [4]विशेषः नाम परमाणुमर्थं बोधयति । तदनुसारं परमाणुविचारः, तेन परमाणुना सृष्टिक्रमः इत्यादयः यस्मिन् वर्णितं भवन्ति, तदेव वैशेषिकमिति ।

अर्थोऽस्ति क्षणिकस्त्वसावनुमितो बुद्ध्येति सौत्रान्तिकः,
प्रत्यक्षं क्षणभङ्गुरञ्च सकलं वैभाषिको भाषते ॥ -सं.सा-इ.पृ.17

1. डा. उि. पि, एल, वैद्यपअकाशित । पृ. 23.
2. पूर्ववत् ।
3. स.द. सं.-पृ.178
4 ''विशेष'' शब्दका प्रयोग परमाणु अर्थ में होता है । तदनुसार-
(क) परमाणु की सत्ता और तन्मूलकसृष्टि जिन् दर्शनमे स्वीकृत हो वही वैशेषिकदर्शन है ।
- न्या. क. भूमिका - पृ. 42
(ख) एवं प्रकृतिपुरूषयोः उपादानमुत्सृज्य परमाणूपादानकथनरूपात् विशेषात् वैशेषिकमित्यपि किमपि परिशीलनम् । - रं.भा.भूमिका - क.4

(4) अपरे [1]दुर्वेकमिश्रास्तु द्रव्य-गुण-कर्म-सामान्यादिपदार्था एव विशेषत्वेन व्यवहृतत्वात्, षट्पदार्थप्रतिपादकत्वमेव विशेषपदार्थत्वेन प्रतिपादितत्वाद् वा, कणादमुनिप्रणीतशास्त्रं वैशेषिकशास्त्रमिति निगदन्ति ।

(5) धर्मव्याख्यानप्रसङ्गे सूत्रकारेण वैशेषिकसूत्रस्य प्रादौ समाप्तौ च विशेषशब्दप्रयोगात् वैशेषिकमिति मन्यन्ते [2]वीरराधवाचार्य: ।

(6) [3]उदयनाचार्यस्तु - एकादशदर्शनविनिश्चिततत्त्वनिष्ठाभाव: द्रव्य-गुण-कर्मादिपदार्थतत्त्वै: पृथक्त्वेन व्यवहृतो विशेषशब्द इति प्रवदति ।

(7) अन्ते च ढुण्ढिराजशास्त्रिणा प्रदत्तभूमिकायां [4]वैशेषिकपदस्य नाम-विशिष्यते सर्वतो व्यवच्छिद्यते येन स: विशेष: । व्यवच्छेदकता नाम साधर्म्यवैधर्म्याभ्यां व्यवच्छेदकता । अत: वैशेषिकशब्दस्य अर्थ अधोभागे प्रदर्श्यते -

---

1. द्रव्य-गुण-कर्म-सामान्य-विशेषसमवायात्मकै: पदार्थविशेष:व्यवहरन्तीति वैशेषिका: । रूढेश्चाभ्युपगतकणादशास्त्रम् एवोच्यते । अथवा षट्पदार्थप्रतिपादकतया विशेष्यते तदस्मात् शास्त्रादिति विशेष: कणादं शास्त्रं विवक्षितम् । तद्वदन्त्यभिधीयन्ते वेति वैशेषिका: ॥
-ध. प्र. पृ.240.

2. धर्मव्याख्यानं शास्त्राङ्गमादावन्ते च घटयन्नयं व्युत्पादयिषितप्रधानार्थपरेषु सूत्रेषु आदौ "धर्मविशेषप्रसूतात्" इति विशेषपदम्, अन्ते च "संयुक्तसमवायादग्ने: वैशेषिक" मिति वैशेषिकपदम् । यतो निर्दिदेश, ततो वैशेषिकमिति व्यवहार: आसीदिति ॥
रं. भा. भूमिका पृ० - 3.

3. (क) विशेषो व्यवच्छेद: तत्त्वनिश्चय: तेन व्यवहरतीत्यर्थ: । कि. पृ.-4.

(ख) Kwhei-Cl-and Cit-San two Chinese Buddhists say that Kanad's work was known by the name Vaisesika, because it was Visesh-superior to other systems especially the Sankhya- V.Phy.p.-4

(ग) It may be that the name of Vaisesika was given to $ Kanada's Philosophy from the difference of Viseshas which he establishes between substances, qualities and actions or it may be from Visesha, the name of the individual things applicable therefore to atoms. - Six systems of Ind. Phy. P. 79.

4. वै.उ. भूमिका -पृ. - 1.

(क) विशेषाभ्याम् (चतुर्थीद्विवचने) = व्यवच्छेदकाभ्यां व्यवहरतीति वैशेषिकं दर्शनम्, वैशेषिको दार्शनिकः ।

(ख) विशेषाभ्याम् (तृतीयद्विवचने) = व्यवच्छेदकाभ्यां व्यवहरतीति वैशेषिकं दर्शनम्, वैशेषिको दार्शनिकः ।

तृतीयोऽध्यायः

कणादपरिचयादयः

कणादमहर्षिणा विरचितं दर्शनसूत्रं [1]वैशेषिकदर्शनं [2]काणादशास्त्रं वेत्यभिधीयते । अधुना तत्सूत्रस्य व्याख्यानात्पूर्वमेव सूत्रकर्त्तॄणां कणादमहर्षीणां परिचयादिकं प्रदाय समयोऽपि निरुपयिष्यते ।

वंशपरिचयः-

(क) द्रव्य-गुण-कर्मादिषट्पदार्थान् सूत्रीकृत्य अल्पाक्षरयुक्तं संशयरहितं, सत्यपि संशये तस्य निराकरणोपायविशिष्टं वैशेषिकसूत्रं कणादेन विरचितमिति न कस्याप्यापत्तिः । कणादस्तु [3]कश्यपगोत्रज उलूकोपाधिं प्राप्य वारणासेय-ब्राह्मण-पञ्चशिखाचार्यत्वेन सम्भाव्यते इति प्रमाणवाक्यानि सम्भवन्ति ।

---

1. कणादेन तु सम्प्रोक्तम्, शास्त्रं वैशोषिकं महत् ।
गौतमेन तथा न्यायम्, सांख्यन्तु कपिलेन वै ॥
-पद्म पुराण उत्तरकाण्ड 207.263

2. कणादं गौतमीयं मतमुदयनदिङ्नागमिश्रादिकानाम्
-मु- समर्पणयत्रे कृष्णवल्लभार्वेण

3. Kanada belonged to the family of Kashyap who was often also designed under the name of Uluka-His pupil was supposed to be a certain Panchasikhacharya son of Brahmin ot Banaras.
H. 1 page -187

(ख) अन्यस्मिन् तु [1]व्यासदेवोक्तवायुपुराणानुसारं सोमशर्माख्य-ब्राह्मणस्य अक्षपाद-कणाद-उलूकाख्या: त्रयो वत्सा: आसन्। परन्तु सन्देहोऽत्र कणादशास्त्र-उलूकशास्त्रयोर्मध्ये भेदभावदर्शनान्न सोमशर्मण: पुत्रो वैशेषिकसूत्रकार: कणाद: इति।

(ग) केचन [2]शिष्यपरम्पराक्रमेण कस्यचिद् व्यक्तिविशेषस्य पुत्र उलूक:। तत्प्रणीतं वैशेषिकशास्त्रमिति प्रमाणीकुर्वन्ति। अन्ये [3] तु औलुक्यदर्शनमिति प्रमाणयन्ति। [4]अपरे च औलूक्यदर्शनं वैशेषिकदर्शनम्वेति सूचयन्ति।

यत्तूक्तं कणादस्तु पञ्चशिखाचार्यस्य पुत्रत्वेन शिष्यत्वेन वा स्वीकृतस्तदपि न समीचीनम्। पञ्चशिखाचार्यस्य नाम्ना कोऽपि ग्रन्थो नोपलभ्यते। परन्तु [5]सांख्यकौमुद्यां "इति यथाह स्म भगवान् पञ्चशिखाचार्य:" इति वाचस्पतिमिश्रेण समुच्चारितम्, तावता तच्छिष्यत्वं कणादस्य न सिद्ध्यति।

---

1. सप्तविंशतिप्राप्ते तु परिवर्त्ते समागमे।
   जातुकर्ण्णो यदा व्यासो भविष्यति तपोधन: ॥
   तदाऽहं सम्भविष्यामि, सोमशर्मा द्विजोत्तम:
   प्रभासतीर्थमासाद्य, योगात्मा लोकविश्रुत: ॥
   अत्रापि मम ते पुत्रा:, भविष्यन्ति तपोधना:।
   अक्षपाद: कणादश्च उलूको वत्स एव च ॥

2. वाचस्पत्यम् - 319

3. नारायणभट्टपादकृत-नैषधकाव्यटीकायाम्- 35 पद्ये।

4. ध्वान्तस्य वामोरू विचारणायां, वैशेषिकं चारुमतं मतं ते।
   आलूक्यमाहु: खलु दर्शनं तत्क्षमं तमस्त्वनिरूपणाय ॥
   नै. का. 22.35.

5. सां. त. कौ. पृ.21.

निष्कर्षोऽयम् - औलूक्यशास्त्रविषये याथार्थ्यप्रमाणसत्त्वात् काणादशास्त्रमौलूक्यशास्त्रमित्याचक्षते । [1]कणादः कश्यपगोत्रजः उलूकरुपं धारयन् शिवाद् वैशेषिकसूत्रं संक्षपेणाशृणोत् । यथा - पाणिनिना शिवडम्बुरकनाद-श्रवणाच्चतुर्दशसूत्राणि श्रुतानि, तद्वत् कणादेन उलूकरूपधृतशिवस्य

---

1. (क) It's founder Kanada, the Empedocles of India was a devotee of Siva, pupil of Samasarma and an inhabitants of Pravasapatna in Kathiabada.

- Introduction of Tarkasagraha by T.M. Tripathi.

(ख) Learned introduction of Nyayakandali by V.P.Diwedi page-7-10

(ग) प्रणम्य हेतुमीश्व्यरं मुनिं कणादमन्वतः ।
पदार्थ-धर्मसंग्रहः प्रवक्ष्यते महोदयैः ॥
योगाचारविभूत्या यस्तोषयित्वा महेश्वरम् ।
चक्रे वैशेषिकं शास्त्रं, तस्मै कणभुजे नमः ।

- प्र.भा.पृ.-1.

(घ) प्रथमं हि मया प्रोक्तं, शैवं पाशुपतादिकम् ।
मच्छक्त्यावेशितैर्विप्रः, सम्प्रोक्तानि ततः परम् ॥
कणादेन च सम्प्रोक्तं, शास्त्रं वैशेषिकं महत् ।
गौतमेन तथा न्यायं, सांख्यन्तु कपिलेन वै ॥

- प.पु.उ.का. 207.262-63.

(ङ) मुनये कणादाय स्वयमीश्वर उलूकधारी प्रत्यक्षीभूय द्रव्यगुणकर्मसामान्यविशेषसमवायलक्षणां पदार्थषट्कमुपदिदेश ।

- न्या० ली. भू०-पृ.2.

(च) न्या० को भूमिकायां पृ-२.

(छ) Sugiuria on the autherity of a Chineese work Isiki Jutsuki saus-he was called rice eater because he was used to go out and eat rice obtained from women while he was called Uluka, because he lived in a mountain and was very ugly.

-S.H.L. as preserved in China and Japan p. 14.

मुखाच्छ्रुतत्वात् औलूक्यदर्शनमित्याचक्षते। तदर्थं [1]कुमारिलभट्टपादस्योक्तिः-

"यदाप्यौलूक्यसिद्धान्तात्, समवायस्य जन्मना।
व्यक्तिस्तस्येन्द्रियाधीना, तेन प्रत्यक्षमुच्यते॥"

ये केचन उलूक्यमहर्षिणा वैशेषिकतन्त्रमुद्भावितमिति प्रख्यापयन्ति, तन्न। [2]शङ्करमिश्रेण तस्य समाधानं कृतम् - कणादमहर्षिणा वैशेषिकतन्त्रमेव प्रस्थापितम्। सिद्धान्तस्तु शिवादुलूकधारिणो द्रव्यगुणकर्मसामान्य-विशेषसमवायपदार्थान् निशम्य सूक्ष्मतया सूत्रैस्तच्छात्रं प्रणिनाय।

कणादस्य समयः प्राचीनत्वञ्च-

कणभक्षाक्षचरणस्य कालनिर्णयविषये सन्ति विवादाः। अत्र केचिद् वैशेषिकदर्शनस्य सर्वेभ्यो दर्शनशास्त्रेभ्यः प्राचीनत्वं स्वीक्रियते। अन्ये तु अस्यार्वाचीनत्वमभ्युपगच्छन्ति। अत एव तानि सर्वाणि मतानि समाकलय्य

(ज) About the end of the time of creation, when the age of creatures was immeasurable, a teacher came to the world. He was named Uluka. Uluka means an owl. In the day time he mediated in the dense forest secluding himself from worldly affairs and at night, when people went to rest he wondered about for food. The mode of living was very similar to that of an owl. So that he got the name Uluka. - V.P.D. Page-5

(झ) अन्ये तु धर्मैः सह धर्मिणः उद्देशः कृतः। केनेति बिना पक्षिणा उलूकेन।

-व्योम. पृ 114

(ट) जे एस् एन् शास्त्रिकृत - तर्कसंग्रहभूमिकायाम्।

(ठ) कणादमिति। तस्य कापोतीं वृत्तिमनुतिष्ठतः रथ्यादिनिपतितान् तण्डुलकणान् आदाय प्रत्यहं कृताऽऽहारनिमित्ता संज्ञा। अत एव निरवकाशः कणान् वा भक्षयतु इति उपालम्भ तत्र भवताम्। - न्या० क० पृ. 4.

(ड) कणान् परमाणून् अत्ति सिद्धान्तत्वेनात्मसात्करोतीति कणादः। - V. Phy. P- 7

(1) श्लो० वा. 1.58.

(2) याभ्यां वैशेषिकतन्त्रे सम्यग्व्युत्पादितोऽस्म्यहम्।
कणादभवनाथाभ्यां ताभ्यां मम नमः सदा॥ - वै. श्लो. - 2.

स्थिरीक्रियते वैशेषिकदर्शनस्य समय: प्राचीनत्वञ्च यथा [1]न्यायकाषे वर्णितमस्ति, तदेव प्रदीयतेऽध:-

(क) वादरायणकृत -ब्रह्ममीमांसादर्शनम्, ततः परं जैमीनीयं मीमांसादर्शनम्, ततः गौतमीयं न्यायदर्शनम्, ततः काणादं वैशेषिकदर्शनम्, कपिलस्य सांख्यदर्शनम्, पतञ्जलेः योगदर्शनमिति क्रममभ्युपयन्ति केचन ।

(ख) चन्द्रकान्ततर्कालङ्कारमते - कापिलं सांख्यदर्शनस्य, प्राचीनत्वमङ्गीकृत्य तदनन्तरमेव आदिपतञ्जलेस्ततोऽवरजत्वं कणभक्षाक्षचरण- जैमिनीनामिति ।

(ग) केचन षण्णां सूत्राणां समकालत्वं स्वीकुर्वन्ति ।

कणाददर्शनस्य पराचीनत्वं स्वीकुर्वन्ति उपर्युक्तमतानि न तु समीचीनानि तथाहि -

(क) "न वयं षट्पदार्थवादिनो वैशेषिकवत्" इति [2]सांख्यदर्शनसूत्रे वैशेषिकदर्शनशब्दस्य समुच्चारणदर्शनात् न सांख्यदर्शनस्य प्राचीनत्वं वैशेषिकदर्शनादिति प्रमाणम् । (ख) वादरायणीय-ब्रह्ममीमांसादर्शनस्य "महद्दीर्घवद् वा ह्रस्वपरिमण्डलाभ्याम्" (2-2-11) सूत्रे [3]वैशेषिकदर्शनस्य परमाणुह्रस्वद्यणुकादिविचारोऽस्ति । अतः वैशेषिकाद् ब्रह्ममीमांसायाः प्राचीनत्वमङ्गीकुर्वन्तः सम्प्रदायास्तु निरस्ताः । (ग) शब्दानामुत्पत्तिविनाशशालित्वन्तु [4]कणादगौतमीयदर्शनयोः सिद्धान्तः । परन्तु सोऽपि सिद्धान्तः "कर्मैक तत्र दर्शनादिति" [5]सूत्रे शब्दस्य नित्यत्वप्रकरणमुद्धृत्य जैमिनिना खण्डितः । अतः वैशेषिकदर्शनात् मीमांसायाः पराचीनत्वं सिद्ध्यति ।

---

(1) न्या० को भूमिका- पृ०-1.

(2.) सां. सू. 1.25.

(3) ब्र.सू. - 2.2.11.

(4) (क) वै.सू. - 2.2.2, 27, 32, 37 सूत्राणि ।
(ख) न्या. सू 2.2.13 सूत्रत: 2.2.39. सूत्रं पर्यन्तं ।

(5) मी. सू. 1.1.6.

(घ) वैशेषिकसूत्रे [1]सव्यभिचार-विरुद्ध-साध्यसमाख्या: त्रयो हेत्वाभासा: स्थिरीकृता: । [2]गौतमीयसूत्रे उपर्युक्तहेत्वाभासत्रयेण साकं पुनरपि हेत्वाभासद्वयं समील्य सव्यभिचार - विरुद्ध-प्रकरणसम (सत्प्रतिपक्ष) - साध्यसम (असिद्ध) - कालातीता: (बाधित) इति पञ्च हेत्वाभासा: स्थिरीकृता: । अत: न्यायशास्त्रस्य पराचीनत्वमिति । (ङ) अश्वघोषः तत्कृतसूत्रालङ्कारग्रन्थे वैशेषिकस्य प्राधान्यं बौद्ध-धर्मात्पूर्वमेव आसीदिति वर्णयति । अत: वैशेषिकदर्शनस्य प्राचीनत्वं बौद्धदर्शनादिति [3]ऐतिहासिकाणां मतम् ।

समाप्तौ च दर्शनान्तरकारै: अनङ्गीकृतस्य विशेषपदार्थस्याङ्गीकारादेव तत्प्रसिद्धिरस्ति । कणादसमयस्तु खीष्टपूर्व-तृतीय-चतुर्थशतकाभ्यन्तरमिति [4]प्रमाणमस्ति ।

वैशेषिकसूत्रम्-

अल्पाक्षरसंयुक्तं संशयरहितमनेकाक्षरस्यानर्थक्यं तर्कनिहितं तत् नाम [5]सूत्रमिति । तद्वत् कणादप्रणीतवैशेषिकसूत्रमिति उच्यते । तदेव दशाध्यायात्मकम् । प्रत्यध्यायं आह्निकद्वयम् । दशाध्यायस्य विंशत्याह्निकानि । तस्य सूत्राणि सप्तदशाधिकत्रिंशतमितानि । 317 सूत्राणि । एतेषु वर्णितविषया: अधोभागे प्रदीयते -

---

1. वै.सू. 3.1.15, 3.1.17, 3.1.18.
2. न्या. सू. 1.2.4.
3. Ashvaghosa States in his Sutralankara - Before Buddha came to the world, all creatures were so uncultivated and blind to truth, they looked upon the Vaisesika Sutra as the best. Quoted by H.Ui from French translations of Sutralankara by Edouard Huber.
4. (क) P.o1.0 (Intro)(P-IX XX-
   (ख) नारायणमिश्र कृत - भूमिका (वै. उपस्कारस्य) पृ. 6
   (ग) Since Kautilya does'nt refer to Vaisesika and formulated latter than 300 B.C. Kanada's Sutra seems to have received additions from time to time. Some of the sutras new found in his treatise were not commented on by Scholiast Prasasthapada which was indicated that at the time of latter commented on sutra, they were not included in it.
   - H.I. Phy.-1. P-179.
5. अल्पाक्षरमसन्दिग्धं सारस्वद्विश्वतो मुखम् ।
   अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ॥ -सं. द. कौ. - पृ. 3.

प्रथमाध्याये- सप्तपदार्थानां स्वरूपम्, तेषां गुणाः लक्षणानि सत्ता धर्माधर्माविति विषयाः। **द्वितीयाध्याये**- द्रव्यतत्त्वालोचनया पृथिव्यादिद्रव्याणां लक्षणानि, तेषां प्रमाणादि विषयाः। **तृतीयाध्याये**- आत्मान्तःकरणविषयाः, तेषु पारस्परिकसम्बन्धः। **चतुर्थाध्याये**- परमाणूनां मूलकारणता, शरीरद्रव्यतत्त्वयोश्च सम्बन्धः। **पञ्चमाध्याये**- कर्मणां विचारो भूकम्पवृष्टिपातादिकर्मपरम्परायाश्च कारणनिर्देशः। **षष्ठाध्याये**- वैदिककर्मणां कर्मफलानामालोचना। **सप्तमाध्याये**- गुणसमवायसम्बन्धयोर्विचारः। **अष्टमाध्याये**- ज्ञानप्रकरणं, प्रत्यक्षप्रमाणस्य हेतुनिर्देशः, इन्द्रियादीनां हेतुविचारः। **नवमाध्याये**- अभावप्रमाविद्यादीनामालोचना। **दशमाध्याये**- सुखदुःखादीनां भेदाभेदविषयकज्ञानविषये चोपदेशः।

सूत्रस्य भाष्यम्-

प्राक्तनोऽयं ग्रन्थः वैशेषिकसूत्रम्। अस्य विवरणभूताः वहवो ग्रन्थाः पूर्वे रचिताः सन्ति। किन्तु तेषु केषाञ्चिद्ग्रन्थानां नाममात्रं श्रूयते। केचन च समुपलभ्यन्ते। यावदुपलभ्यते, तावदेव प्रस्तूयते।

उपलभ्यग्रन्थेषु-

|क| [1]प्रशस्तपादाचार्यकृत - भाष्यम्
|ख| [2]भारद्वाजवृत्तिः
|ग| [3]शङ्करमिश्रकृत - उपस्कारः
|घ| [4]चन्द्रानन्दवृत्तिः
|ङ| [5]वीरराघवाचार्यकृत - रसायनभाष्यम्
|च| [6]क णादसूत्रनिबन्धनम्
|छ| [7]स्वामीब्रह्ममुनिकृत - ब्रह्ममुनिभाष्यम्

---

1. चौखम्वासंस्कृतसीरिजद्वारा प्रकाशितम्।
2. गङ्गाधरकविराजद्वारा प्रकाशितम्।
3. चौखम्बा संस्कृत सीरिज द्वारा प्रकाशितम्।
4. Gaekward's Sanskrit Series Publication.
5. भेङ्कटराघवाचार्यकृत प्रकाशनं माद्रासराज्ये।
6. अनन्तलालठाक्कुरद्वारा प्रकाशितम्।
7. आर्यकुमारमहासभाद्वारा (बडौदा) प्रकाशितम्।

अनुपलभ्यग्रन्थेषु -

। क । [1]श्रायस्ककृतव्याख्या । ख । [2]रावणभाष्यम्

। ग । [3]आत्रेयभाष्यम् । घ । [4]चन्द्रकान्तभाष्यम्

। ङ । [5]जयनारायणविवृत्तिः

— ● —

चतुर्थोऽध्यायः

प्रशस्तपादाचार्यः तत्कृतभाष्यञ्च

अतिप्राचीनस्य कणादमहर्षिकृतवैशेषिकसूत्रस्य प्रशस्तपादाचार्यकृतं भाष्यं सर्वविदितमस्ति । यद्यपि प्रशस्तपादानां समयनिर्धारणविषये तथातात्त्विकं प्रमाणं नोपलभ्यते, तथापि यत् किञ्चित् प्राप्यते तदत्र निवेद्यते । स्वभावतः ग्रन्थस्य प्रादावन्तिमे च ग्रन्थकर्त्तुः परिचयो दीयते । परन्तु अस्य भाष्यस्य कस्मिन्नपि स्थाने ग्रन्थकर्तृपरिचयाभावात्तत्समयः अनुमानेन निश्चीयते ।

प्रशस्तपादाचार्याणां नामानि "प्रशस्तदेवः "प्रशस्तचरणः" "प्रशस्तकारदेवः "प्रशस्तमतिः इति [6]बहुधा श्रूयमाणानि सन्ति । [7]बौद्धायनसूत्रस्य प्रबराध्याये अङ्गिरसगणान्तःपातिशारद्वद्गणे प्रशस्तपादस्य "प्रशस्तः" इति नाम दृश्यते । [8]प्रवररत्नग्रन्थे अङ्गिरसगणे गौतमवर्णे च "प्रशस्तः" इति नाम्ना अन्यो दृश्यते । [9]अपि च "प्रशस्तदेवः" "प्रशस्तचरण" इति नामान्तरे स्तः । [10]पुनरेव शान्तरक्षितेन "प्रशस्तमतिरिति स्वीकृतमस्ति । [11]एतद्विषये "अखिलभारतीयसंस्कृतपरिषदि" प्रशस्तपादस्य वहुषु नामसु

1. नारायणमिश्रभूमिकासहितः उपस्कारः 2. पूर्ववत् 3. पूर्ववत्
4. Introduction of Vaisesika Sutra p, 16-21.
5. द्रष्टव्यम् - आर्यकुमारमहासभाद्वारा (बडौदा) प्रकाशितम् ।
6. B.G.N.G. Vol. 1.P. 16. 7. न्या. को. - पृ. 2. 8. पूर्ववत्
9. पूर्ववत् 10. B.G.N.G. Vol. 1.P. 16.
11. 1.1.1969 दिनाङ्क अखिलभारतीयसंस्कृतपरिषत्पत्रिका पृ. 16.

सत्स्वपि प्रशस्तपाद इति स्थरीकृतम् । परन्तु [1]सतीशचन्द्रभट्टाचार्येण प्रशस्तपादस्य प्रशस्तमतिः इति नाम नाङ्गीकृतम् । अपि च [2]मल्लवादी "प्रशस्तः इति कथयति । प्रशस्तदेवः, प्रशस्तः, प्रशस्तपादः, प्रशस्तपादाचार्य इति चत्वारि नामानि, प्रशस्तः इ ति अर्थं बोधयति । यथा लोके आचार्यपित्रादिगुरूस्थानेषु आचार्यपाददेवादीनां नामानि प्रदीयन्ते, तद्वत् अत्र [3]निष्पत्तिः । परन्तु प्रशस्तपादाचार्यस्य नाम्नि "पादः इति पदेऽपि आचार्यपदं किमर्थमिति चेत्" । अधिकन्तु न दोषाय इति न्यायात् "मम तातपादाचार्येण" इत्यादिप्रयोगवदत्रापि उन्नेयम् । पुनश्च प्रशस्तः मल्लवादीव्यवहारशब्दस्तु आक्षेपार्थं प्रशस्तपादस्य मतखण्डनाय दत्तः ।

तस्य समयः-

प्रशस्तपादस्य समयविषये तत्कृतग्रन्थतः किमपि न प्राप्यते इति प्रमाणम् । परन्तु प्रशस्तपादकृत-पदार्थधर्मसंग्रहग्रन्थे यद्यपि कस्यचिद् दार्शनिकस्य प्रत्यक्षतया प्रमाणवाक्यानि न समुपलभ्यन्ते, तथापि तत्पूर्वजदार्शनिकानां सूत्रकाराणाञ्च मतानि खण्डितानि । द्वितीयतः पदार्थधर्मसंग्रहग्रन्थस्य वाक्यानि दर्शनान्तरग्रन्थेषु प्रमाणतया लभ्यन्ते तान्यपि पाथेयभूतानि तत्समयनिर्धारणे भवन्ति ।

।क। [4]मल्लवादी प्रशस्तपादभाष्यमुदाहरति ।

।ख। [5]बौद्धायनसूत्रे प्रशस्तपादस्य नाम श्रूयते । एतेन आभ्यां पूर्वजः प्रशस्तपादः ।

।ग। [6]वसुबन्धुः प्रशस्तपादस्य मतमुपस्थापयति । अतः प्रशस्तपादः तत्पूर्वजः इति केनचिदुच्यते ।

1. I.H.P. Introduction . 89.
2. Introduction on Prasastha commented Tika on Sutra.
By A.L. Thakkur. P. 12.
3. Prasasthapada and his other name Shitashirsaka By G. Chemparthy in Indó Indian Journal (12) Yr. 1970 Page, 241-54.
4. Introduction in Prasastha on Tika by A.L.Thakkura - P. 12.
5. न्या० को. पृ.-2.
6. Eg. Stcherbatsky quoted on E.N. Phy P-10.

।घ। [1]कृष्णाराय: अपि च तन्मतं समर्थयति । पुनश्च [2]प्रशस्तपादो बौद्धाचार्य-दिङ्नागस्य न्यायमुखग्रन्थस्य प्रत्यक्षप्रमाणप्रकरणमनुकरोतीति केषाञ्चिन्मतम् । अत: [3]प्रशस्तपादस्य समयस्तु 500-600 खीष्टीय - सम्बत्सराभ्यन्तरे इति केचित् । [4]षष्ठशतकस्यान्तिमार्द्धे इति केचन । अस्मदीयमते 500-600 खीष्टीय-सम्बत्सराभ्यन्तरेऽस्य स्थितिरिति सम्भाव्यते ।

तस्य कृति:-

प्रशस्तपादाचार्यस्य एका कृति: [5]पदार्थधर्मसंग्रहनामधेया । साऽपि कणादसूत्रस्य भाष्यरूपेण प्रसिद्धोऽस्ति । सूत्रानुसारं सूत्रार्थो स्वपदैर्यद् वर्ण्यते तदेव भाष्यम् । परन्तु कणादसूत्रमनुकृत्य (यथा उपस्कारे वर्णितमस्ति) प्रशस्तपादाचार्येण प्रतिसूत्रं भाष्यं न कृतम् । अतएव पदार्थधर्मसंग्रह इति नाम अस्य । यद्यपि सूत्रानुसारं भाष्यं न पदार्थधर्मसंग्रह:, तथापि सूत्रस्य सर्वभावमाकलय्य द्रव्यादिपदार्थानामालोचनं कृत्वा सूक्ष्मतया उपस्थापितम्, । एतेन न भाष्यत्वसंज्ञाहानि: । पुनश्च कणादस्य मतमुपस्थाप्यानेन किञ्चित्तत्वं प्रदत्तम् ।

अपरप्रश्नं समुदेति - प्रशस्तपादकृतो ग्रन्थ: प्रशस्तपादभाष्यम्, तदेव [6]पदार्थप्रवेश: [7]पदार्थसंग्रह:, [8]पदार्थधर्मसंग्रह: इति नामभि उच्यते । अपि [9]अनन्तलालठाकुरमते पदार्थधर्मसंग्रह:, वैशेषिकसूत्र-वाक्य-भाष्यस्योपरि

1. Introduction of authority of Kalipada Tarkacharya in Sanskrit manuscript of Private Library of Gujarat.
2. Prasasthapada borrowed largely from Dignaga with modification of certain points. Thus he takes parts of Dignaga's description of perception from Nyayamukha, but adds that can be either without imagining or with imagining. - O.I.P; P-194
3. E.N.Phy Vol.11 P. 282.
4. B.G.N.G. Vol.1 P. 16.
5. प्रणम्य हेतुमीश्वरं मुनिं कणादमन्यत: ।
   पदार्थधर्मसंग्रह: प्रवक्ष्यते महोदयै: ॥ -प्र. भा. पृ. -1
6. न्या. क. पृ. 786.
7. तत्त्वप्रदीपिका - पृ. 176-77.
8. द्र. भा. भा. पृ. - 1.
9. Introduction on Prasastha on Tika by A.L. Thakkura, P.13

टीका (यस्याः टीकायाः उपरि मालवादी नामधेयः जैनदार्शनिकः एकां टीकां कृतवान्) इति प्रशस्तपादस्य ग्रन्थद्वयं वर्त्तते। तत्तु न समीचीनम्। [1]प्रशस्तपादेन वैशेषिकसूत्रमवलम्ब्य पदार्थधर्मसंग्रहः नामाख्या एका टीका रचिता। अपि च या टीका साम्प्रतं नोपलभ्यते, सा सूत्रस्योपरि अन्याकृतिरिति कथं सम्भवेत्। अतः प्रशस्तपादस्य एका कृतिः पदार्थधर्मसंग्रहः; तस्य अपरं नाम "पदार्थप्रवेशः" पदार्थसंग्रहो वा प्रशस्तपादभाष्यम्वा।

प्रशस्तपादभाष्यस्य भाष्यत्वस्वीकारः-

अपि च प्रशस्तपादभाष्यस्यादौ पदार्थधर्मग्रहः इति ग्रन्थस्य नाम, न तु कणादसूत्रानुसारं भाष्यं निगदितमस्ति। अतः [2]भाष्यसंज्ञाहानिरिति चेत्। न। "इति प्रशस्तपादाचार्यविरचिते द्रव्यादिपदार्थषट्कभाष्यं समाप्तमिति ग्रन्थान्तिमे दृश्यते। एतद्व्यतिरिक्तेषु अन्यग्रन्थेष्वपि भाष्यमिति स्वीकृतं भवति। यथा-

।क। [3]तेनास्माभिरिह भाष्यतात्पर्यमात्रं व्याख्यातम्।

।ख। [4]प्रशस्तदेवाचार्यभाष्यव्याख्याच्छलेन कणादरहस्यं व्याख्यास्यामः।

।ग। [5]यावदवयवकर्मनियतमित्यन्ये। वक्ष्यति च भाष्यकारो विभागग्रन्थे।

।घ। [6]आकारे प्रशस्तपादभाष्यादौ।

। ङ। [7]गुणादीनां पञ्चानामपि निर्गुणत्वनिष्क्रियत्वे इति प्रशस्तपादभाष्य दर्शनात्।

अतः कणादसूत्रोपरि प्रशस्तपादस्य विरचितो ग्रन्थो भाष्यमेव; नान्यत्।

---

1. H. Ind. Phy, P. 23-37.
2. वैशद्यं लघुत्वं कृत्स्नत्वञ्च प्रकर्षः सूत्रेषु वैशद्यभावात् भाष्यस्य च विस्तरत्वात् प्रकरणादीनाञ्च एकदेशत्वाच्च। कि. पृ. 2.
3. न्या. क. गुणप्रकरणस्यान्ते पृ 289.
4. कणादरहस्ये, पृ -1.
5. गुणप्रकाशविवृत्तिः पृ.1.
6. महादेवभट्टकृत - मुक्तावलीप्रकाशस्य वायुप्रकरणेऽन्ते।
7. चित्सुखीग्रन्थस्य द्वितीयपरिच्छेदे चतुर्थकारिकाव्याख्याने।

पञ्चमोऽध्याय:

प्रशस्तपादभाष्यटीकाकारा:

प्रशस्तपादभाष्योऽयमतीवप्राक्तनग्रन्थ: । अस्य समयनिरूपणानन्तरं भाष्यटीकाकर्त्तृणां विषयेऽस्मिन् अधुनालोच्यते । तच्च प्रथमं प्रशस्तपादभाष्यस्य आशयोद्घाटका: व्योमशिवाचार्यप्रमुखा: अनेके व्याख्यातार: अद्य यावत् सन्ति । क्र मशस्तेषां परिचय: दीयते पाठकानां सौकर्य्यार्थम् । टीकाकारेषु समयक्रमानुसारम्-

(1) व्योमवतीटीकाकार: व्योमशिवाचार्य: ।

(2) किरणावलीकार: उदयनाचार्य: ।

(3) न्यायकन्दलीकार: श्रीधराचार्य: ।

(4) सेतुटीकाकार: पद्मनाभमिश्र: ।

(5) जागदीशिसूक्तिकार: जगदीशतर्कालङ्कार: ।

व्योमशिवाचार्य:

व्योमशिवाचार्य: समुपलभ्यटीकाकर्त्तृणां मध्ये प्राचीनपण्डित: । न्यायवैशेषिकविषये प्रभूतज्ञानं तस्यासीत् । तस्य समयनिर्धारणविषयेऽधिकप्रमाणं नास्ति । परन्तु [1]के चन 900-960 खीष्टीयसम्बत्सर: अस्य काल इति आमनन्ति । वासस्थानविषयेऽनेकदार्शनिकानां पृथङ्मतानि सन्ति । [2]कस्य मते - काश्मीरदेशस्य पण्डित:, [3]अन्यस्मिन् मते - पश्चिमकाश्मीरस्य, [4]अन्यस्य मते - दक्षिणभारतीय इति । परन्तु कस्मिन्नपि ग्रन्थेऽस्य पण्डितस्य वासस्थानविषये बलवत्तरप्रमाणाभावात् न तत् निश्चीयते ।

1. E. L. Phy. Vol.11, P - 10.
2. भि भरदाचारी - पूर्व ग्रन्थे, पृ - 425.
3. डि. आर. शास्त्री- पृर्वग्रन्थे, पृ -425.
4. गोपीनाथकविराज: - पृर्वग्रन्थे, पृ- 425.

अस्य एका कृतिः व्योमवतीटीका प्रशस्तपादभाष्यस्योपरि। अन्यं किमपि तद्विरचितशास्त्रस्य नाम नोपलभ्यते श्रूयते वा। व्योमवतीटीकायाः प्रादौ केषु स्थलेषु पदपङ्क्तीनामुच्छेदो दृश्यते। अस्याः प्रादौ -

प्रमितिविशिष्टानन्तर्यप्रतिपादनाच्च तदभावनिरासः। सतच्छब्दोऽपि हेतौ वर्त्तमानो विशिष्टदेशकुलप्रसूतमविप्लुतेन ब्राह्मणेन अविप्लुतेन ब्राह्मणेनाविप्लुतायां ब्राह्म -- विघ्ननु -- देशावसिताया -- दुपजातं- -- इत्यादि।

अन्तेऽपि -

अथाणु परिमाणत्वान्मनसः कथं रूपादिज्ञानान्याशुपद्यन्त इत्याह - आशुसञ्चारि। तच्च प्रयत्नादृष्टपरिग्रहवशात् प्रयत्नेन जीवनपूर्वकेणादृष्टविशेषेण च परिग्रहवशात् आशुसञ्चारित्वमिति।

उदयानाचार्यः

प्रशस्तपादमहर्षिकृतभाष्यव्याख्यातृषु कालतः ज्ञानतश्च सर्वसिद्धान्त-चूडामणेरुदयनाचार्यस्य मुख्यविचारः क्रियते। तस्य समय-वासस्थानादिविषये यानि विविधमतानि दृश्यन्ते, तान्येव प्रस्तूयन्ते।

उदयनाचार्यस्य समयः-

न्यायाचार्यपदाङ्कितोऽयं श्रीमदुदयनाचार्यो दशमशतके जन्म अलभत इत्यस्मिन् विषये नानाविधानि मतानि ऐतिहासिकप्रवरैः प्रदत्तानि सन्ति। उदयनाचार्यविलिखितलक्षणावलीग्रन्थस्य समाप्तौ-

[1]तर्काम्बराङ्कप्रमितेष्वतीतेषु शकान्ततः।
वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलीम्॥''

इत्यनेन 906 शकाब्दे, 984 ख्रीष्टीयसम्बत्सरे लक्षणावलीग्रन्थस्य समाप्तेर्दर्शनात् दशमशतकस्य पूर्वार्द्धे अथवा उत्तरार्धे उदयनाचार्यस्य सत्ता

1. (क) ल.व., पृ - 28.
(ख) भा. द. इ., पृ - 582.
(ग) ल. व., पृ- 7.

अध्यवसीयते। किं चाचार्योदयनस्य कुसुमाञ्जलिकारिकाया:-

[1]शङ्का चेदनुमास्त्येव न चेच्छङ्का ततस्तराम्

व्याघातवधिराशङ्का तर्क: शङ्कावधिर्मत: ।।

इति उपहासच्छलतया खण्डनखण्डखाद्ये श्रीहर्षण एतन्मतखण्डनाय -

[2]तस्मादस्माभिरप्यस्मिन्नर्थे न खलु दुष्पठा।

स्वगार्थैवान्यथाकारमक्षराणि कियन्त्यपि ।।

शङ्का चेदनुमात्स्यैव न चेच्छङ्का कुतस्तराम्।

व्याघातवधिराशङ्का तर्कै: शङ्कावधि: कुत: ।।

इत्युक्तत्वात् श्रीहर्षात्प्राचीन एवोदयनाचार्य इत्यत्र न कस्यापत्ति: ।

अपि च नैषधमहाकाव्यकर्त्तु: श्रीहर्षस्य [3]समय: 972 शकाब्द इति निर्धारितत्वात् तत: पूर्वमेवास्योदयनाचार्यस्य समय इति उपर्युक्तपक्षमेव समर्थयति।

पुनश्च श्रीमदुदयनायार्यस्तु वाचस्पतिमिश्रादर्वाचीन: इति ज्ञायते। यत:उदयनाचार्यकृत-आत्मतत्त्वविवेकपुस्तके ''इति तात्पर्याचार्य:'', ''न्यायवार्त्तिकतात्पर्यटीकाकारो वाचस्पतिमिश्र एव'', ''तात्पर्याचार्य'' इति उपाधितयोल्लेखितत्वात्।

पुनरपि वाचस्पतिमिश्ररचित - न्यायवार्त्तिकतात्पर्यटीकाया उपरि श्रीमदुदयनाचार्येण न्यायवार्तिकतात्पर्यपरिशुद्धि: रचितेत्यस्माद् वाचस्पते:

---

1. न्या. क. 3.7.
2. कु. सु. भूमिका पृ. 3.
3. युग्माश्वाङ्कैर्निरूक्ते (972) शकनृपसमये कान्यकुब्जेश्वरस्य,
   आदेशं प्राप्य यत्नान्नलचरितमहाकाव्यटीकां विधत्ते।
   सूरिर्भूर्देवसंज्ञो दिनमणितनय: कुर्मपूर्वाङ्गजन्मा।
   तुष्यात्तेनान्तरात्मा त्रिभुवनजनकोमापति: श्रीमहेश: ।।
   नै. का. प्रतिसर्गसमाप्तौ।

पराचीनत्वं द्योत्यते । अत एव वाचस्पतिमिश्रस्य समयः [1]ऐतिहातिकप्रवरैः नवमशतक इति प्रोक्तम् ।

[2]केचित्तु उदयनाचार्यस्य बौद्धधर्मप्रवर्तकधर्मकीर्त्तिना (635 - 650 खीष्टाब्दः) सह सभायां वादो जात इति भविष्यपुराणपरिशिष्टत्रिशदध्यायस्यैकशतकश्लोकादवगम्यते । तस्मात् सप्तमशतकीय उदयनाचार्य इति वदन्ति ।

[3]अपरञ्च- वौद्धसभायां तान् वोद्धजनान् पराजित्य स्वशरीरसंलग्नपापराशिं मोचयितुमुत्सहते स्म । तदा स सर्वतीर्थभ्रमणमकरोत् । अन्तिमे च नीलाद्रिनाथजगन्नाथदेवदर्शनाय श्रीक्षेत्रं जगाम । तस्मिन् समये जगन्नाथमन्दिरस्य विवृतं द्वारं सहसा पिहितं जातम्, तेन क्रुद्धः उदयनाचार्यः-

ऐश्वर्य्यमदमत्तोऽसि , मामवज्ञाय तिष्ठसि ।
समायाते पुनर्बौद्धे, मदाधीना तव स्थितिः ।।

इति यदा उक्तवान्, तदा द्वारं उद्घाटितमिति श्रूयते ।

सिद्धान्तोऽयम् - भविष्यपुराणानुसारं उदयनाचार्यस्य कैश्चिद् विद्वद्वरण्यैः बौद्धपण्डितैः सह वादः सप्तमशतके सञ्जात इति । अपरपक्षस्तु उदयनाचार्यस्य समयः दशमशतक इति पूर्वमेव कल्पितमस्ति । बौद्धाचार्यान् अपांकुर्वत् उदयनाचार्य यः, स एव कुसुमाञ्जलिकारर्न भवितुमर्हति । अन्य एव । अत एव उदयनाचार्यस्य समयः दशमशतक इति ।

---

1. (क) H-P.E.W., Page - 219
   (ख) I.P., Page - 124
   (ग) भा. द., पृ- 440.
2. अथ वक्ष्ये तृतीयस्य हरेर्वंशस्य धीमतः ।
   उदयनाचार्यनाम्नः माहात्म्यं लोमहर्षणम् ।।
   भूत्वा स मिथिलायान्तु शास्त्राण्यधैष्ट सर्वतः ।
   विशेषतो न्यायशास्त्रं साक्षाद्वैगौतमः मुनिः ।। भ. पु. अ. - 30.
3. अनन्तलालठाक्कुर प्रकाशित कि.भू., पृ - 32-33.
1. द्रष्टव्यम् - विन्ध्येश्वरीप्रसाद - ढुण्ढिराजशास्त्रिसम्पादित-

उदयनाचार्यस्य वासस्थानम्-

श्रीमदुदयनाचार्यस्य वासस्थानविषयमधिकृत्य ऐतिहासिकाः स्वकीय-मतमाश्रयन्तः, परपक्षं दूषयन्तः सन्तः स्वमतानि दृढयन्ति । [1]केचित्तु दक्षिण-भारतीयमतमाश्रयन्ति । [2]अन्येवङ्गदेशजोऽयमाचार्य इति मन्यन्ते । [3]तुतीयपक्षस्तु - शशिनाथझामहोदयेन लक्षणावलीभूमिकायां प्रमाणीक्रियते - कनकनद्याः पूर्वदिशि दरभङ्गानगरस्योत्तरपार्श्वे 32 कि.मि. दूरे मङ्गरौनीग्रामेऽऽचार्यस्य वास इति ।

अस्य कृतिः-

अस्य पण्डितस्य वह्वः कृतयः । ता एव न केवलं न्यायशास्त्रमधिकृत्य वर्त्तन्ते, परन्तु वेदान्तादिदर्शनविषयमधिकृत्य कृतिरस्ति । अतः अधो प्रदत्तानि पुस्तकाणि अनेनाचार्येण विरचितानि -

|1| न्यायकुसुमाञ्जलिः[4] । |2| आत्मतत्त्वविवेकः[5] ।
|3| लक्षणमाला[6] । |4| न्यायपरिशिष्टः ।
|5| तात्पर्यपरिशुद्धिः[7] । |6| किरणावली[8] ।

किरणावलीग्रन्थः -

सर्वकृतिं परित्यज्य पाथेयभूतो ग्रन्थः सर्वादौ विचारणीयः । अतः प्रशस्तपादभाष्यस्योपरि प्रकाण्डदार्शनिकेन श्रीमदुदयनाचार्येण विरचितकिरणा-वली सर्वं विदिता एव । अस्य बुद्धिगुणप्रकरणद्वयाभावात् पुस्तकस्य असम्पूर्णता

किरणावलीभूमिकायाः 26-27 पत्रयोः ।

2. वङ्गदेशे न्यायनिबन्धृणां रघुनाथशिरोमणिप्रभृतीनां प्रादुर्भावात् पूर्वं हरिदासभट्टाचार्य आविरासीदिति । यतो वङ्गदेशे न्यायनिबन्धृणां प्रादुर्भावात्परं न्यायाचार्याणां वङ्गदेशस्य प्रधान्यं मिथिलायाः प्राधान्यविलोपश्चासीदिति असन्देह एव । सोऽयं नवद्वीपे प्रादुर्बभूवेति प्रसिद्धिः । -चन्द्रकान्तशर्माप्रकाशित - न्या.कु.
3. ल.व भूमिका - पृ. 1-2.
4. कलिकता - वाप्टिष्टमिशनद्वारा प्रकाशितम् (1864)
5. चौखम्बा संस्कृत सीरिज ।
6. वनारसीप्रकाशनम् ।
7. एसिआटिकसोसाइट संस्थया प्रकाशिता ।
8. वरोदा प्रकाशनम् ।

विद्यते। तस्य आदौ -

"शास्त्रारम्भे सदाचारपरिप्राप्ततया कायवाङ्मनोभिः कृतं परापरगुरुनमस्कारं शिष्टान् शिक्षयितुमादौ निबध्नाति प्रणम्येति।"

समाप्तौ च-

वेगस्येतरक्रियोत्तरकालीनजत्वात्। न हि मूर्त्तत्वमात्रेण क्रियेत्यत आह- प्रयत्नादृष्टपरिग्रहादिति। क्वचिददृष्टपरिग्रहादित्यर्थ इतिशब्दो द्रव्यसमाप्तौ इति किरणावली।

अपि च किरणावलीकाठिन्यस्य परिशीलनाय वहवो दार्शनिकाः टीकादीन् विलिखितवन्तः, यथा अधो प्रदशर्यन्ते -

।क। वर्द्धमानोपाध्यायकृत - किरणावलीप्रकाशः।

।ख। भगीरथठक्कुरकृत - किरणावलीप्रकाशप्रकाशिका।

।ग। रघुनाथशिरोमणिकृत - किरणावलीप्रकाशदीधितिः।

।घ। रुद्रन्यायवाचस्पतिकृत- किरणावलीप्रकाशविवृत्तिपरीक्षा।

।ङ। मथुरानाथतर्कवागीशकृत - किरणावलीप्रकाशः।

।च। पद्मनाभमिश्रकृत - किरणावलीभाष्करः।

अत्र उपर्युक्तटीकाकर्तृणां टीकानामुपरिचनालोचना भवति विस्तार-भयात्।

श्रीधराचार्यः

श्रीधराचार्यः प्राचीननैयायिकः उदयनाचार्यस्य समसामयिकश्च। अस्य श्रीधराचार्यस्य समयनिर्धारणे प्रमाणन्तु स्वल्पम्। श्रीधराचार्यस्य समयः[1] - 950-1000 खीष्टीयसम्बत्सरः। यतः - तेन [2] 910 खीष्टीयसम्बत्सरे कन्दलीग्रन्थस्य समाप्तिर्जाता इति प्रमाणमस्ति।

---

1. B.G.N.V. P-10.
2. (क) E.N.Phy. Vol. 11, Page - 485.
   (ख) अधिकदशोत्तरनवशतकाब्दे (910) न्यायकन्दली रचिता।

अस्य महोदयस्य वासस्थानन्तु[1] हावडामण्डलान्तर्गतराढाख्यस्थान-समीपस्थ-'भूरिसृष्टि' ग्राम, यस्य ग्रामस्य आधुनिकनाम [2]भूसृष्ट इति। पितुर्नाम-[3]बलदेव:। [4]माता च-अशोका, अम्बोका वा।

अस्य कृति:-

तत: अस्य कृतिविषयेऽनुसन्धेयम्। अत्र आयार्यस्य पञ्च ग्रन्था: समुपलभ्यन्ते। यथा अध: प्रदेशे -

।क। न्यायकन्दली [5]।   ।ख। तत्त्वप्रबोध:[6]।

।ग। अद्वैतसिद्धि:[7]।   ।घ। तत्त्वसम्बादिनी[8]।

।ङ। संग्रहिका [9]।

उपर्युक्तग्रन्थानां रचयिता श्रीधराचार्य इति [10]गोपीनाथकविराजेन स्वीकृतमस्ति। अपि च गोपीनाथस्य संग्रहिकाटीकायां सन्देहो जायते - सा श्रीधराचार्यस्य [11]व्योमशिवाचार्यस्य वेति।

---

1. आसीद्दक्षिणराढाख्यां द्विजानां पूण्यकर्मणाम्।
   भूरिसृष्टिरिति ग्रामो भूरिसृजनाश्रय: ॥ - न्या. क. पृ- 330.
2. N.C. Bhattacharya M.E.I Phy, Vol. 11, P-485.
3. तस्माद्विशुद्धगुणरत्नमहासमुद्रो,
   विद्यालतासमवलम्वनभूरूहोऽभूत्।
   स्वच्छाशयो विविधकी र्त्तिनदीप्रवाह-
   प्रस्यन्दनोत्तमबलो बलदेवनामा ॥ - न्या. क, पृ-330.
4. तस्याभूद् भूरियशसो विशुद्धकल्पसम्भवा।
   अशोकेत्यर्चितगुणा गुणिनो गृहमेधिनी ॥
   सच्छायस्थूलकलदो वहुशाखो द्विजाश्रय:।
   ताभ्यां श्रीधर इत्युच्चैरर्थिकल्पद्रुमोऽभवत् ॥ - न्या. क, पृ - 330.
5. विन्ध्येश्वरीप्रसादद्विवेदीमहोदयेन विजयनगर - सं.सी. द्वारा प्रकाशितम्।
6. न्याय क० भू० पृ.46.
7. पूर्ववत् पृ. 5.
8. पूर्ववत् पृ. 82
9. पूर्ववत् पृ. 159
10. E. L. Phy, Vol. 11, p-485.
11. V. Bharadachari.

न्यायकन्दली-

अस्य ग्रन्थस्योपरि तादृशी टीका नोपलभ्यते । अस्य ग्रन्थस्य प्रारम्भे-

अनादिनिधनं देवं, जगत्कारणमीश्वरम् ।
प्रपद्ये सत्यसङ्कल्पं, नित्यविज्ञानविग्रहम् ॥
ध्यानैकतातमनसो विगतप्रचाराः ,
पश्यन्ति यं किमपि निर्मलमद्वितीयम् ।
ज्ञानात्मने विघटिताखिलबन्धनाय ,
तस्मै नमो भगवते पुरुषोत्तमाय ॥

ग्रन्थस्यान्ते -

परस्परोपसंश्लेषो भिन्नानां यत्कृतो भवेत् ।
समवायः स विज्ञेयः स्वातन्त्र्यप्रतिरोधकः ।

इति श्री भट्टीधरकृतायां पदार्थप्रवेशन्यायकन्दलीटीकायां समवाय-पदार्थः समाप्तः ।

पद्मनाभमिश्रः

पद्मनाभमिश्रस्तु नव्यनैयायिको वङ्गीयश्च । [1]पितुर्नाम-बलभद्रमिश्रः । [2]मातुर्नाम-विजयश्री । अस्य ज्येष्टभ्राता विश्वनाथमिश्रः । अनुजस्तु-गोवर्द्धनमिश्रः । महोदयस्य पद्मनाभमिश्रस्य समयः चतुर्दशशतको भवतीति । [3]तत्त्वचिन्तामणिकारगङ्गेशोपाध्यायस्य (1225 खी. सम्बत्सरः) स्य पुत्रः किरणावलीप्रकाशिकाकार-वर्द्धमानः 1250 - 1300 खी. सम्बत्सरेऽऽसीत् । वर्द्धमानतत्त्वचिन्तामणेः[4] चिन्तामणिपरीक्षानाम्नी टीका पद्मनाभेन कृता । अतः तस्य पद्मनाभस्य चतुर्दशशतकसमयः भवितुं युक्तः ।

---

1. बलभद्रमुखाम्भोजवदनादुदयचलात् ।
   उदितो भाष्करस्तस्मादादरेण निषेव्यताम् ॥ कि.भा, पृ.-1.
2. न्या. को, पृ -6.
3. राईमोहनचक्रवर्तीकृत - नव्यन्याय रे इतिहास (वंगभाषा) ।
4. न्या. का, पृ - 6.

पद्मनाभस्य कृतय:-

पद्मनाभस्य अष्टकृतय: सन्ति । यथा-

।क।किरणावलीभाष्कर:[1] (उदयनाचार्यकृतकिरणवल्या:)

।ख। सेतुटीका (प्रशस्तपादभाष्यस्योपरि)

।ग। चिन्तामणिपरीक्षा [2] (गङ्गेशोपाध्यायकृतचिन्तामणे:)

।घ। कणादरहस्य: [3] (राद्धन्तमुक्ताहारस्य)

।ङ। कन्दलीसार: [4] (श्रीधराचार्यकृतन्यायकन्दल्या:)

।च। वर्द्धमानेन्द्र: (वर्द्धमानप्रकाशस्योपरि)

।छ। खण्डनखण्डखाद्यटीका [5] (खण्डनखण्डखाद्यस्य)

।ज। वीरभद्रदेवचम्पु: ।

।झ। चन्द्रालोकप्रकाश: [6] (चन्द्रालोकस्य टीका)

सेतुटीका-

इयं टीका प्रशस्तपादाचार्यकृतभाष्यस्योपरि वर्त्तते । विस्तीर्णतया सर्वेषां प्रकरणानां आलोचना कृता । प्रारम्भे -

स्मृतिपथमुपनीय श्रीमतस्तातवक्त्रात्,
उचितमुपचितार्थं वाक्यमतादरेण ।
जयति विरचितोऽसौ पद्मनाभेन यस्मात् ,
उदयनकृतिपारप्राप्तये सेतुरुच्चै: ॥
उदयनकृतिचन्द्रिकाया: बुद्धौ भाष्याम्बुधिष्परित: ।
बालानामपि सुगमस्तत्र मया रच्यते सेतु: ॥

---

1. न्या.का, पृ - 6.
2. पूर्ववत्, पृ- 6.
3. पूर्ववत्, पृ- 6.
4. E.I.P, Vol. 11, P- 485
5. संस्कृतपाठानाम् - वाराणसी द्वारा प्रकाशितम् ।
6. सेतुटीका - भूमिकां , पृ- 7.

अन्ते च -

यथा निष्टान्नीतं मुनिपदमिदं तातचरणै-
स्तथा भ्रातुर्नात्र प्रभवति विशेषं गुरुरपि।
अनुच्छिष्टं यच्चेदिह हि पदवद्बद्दराधिया,
तदा स्वाद्यस्वाद्य भवतः कृत्तिनस्तर्ककृत्तिनः ॥

जगदीशतर्कालङ्कारः

जगदीशतर्कालङ्कारो महान् नव्यनैयायिकः पण्डितरासीत्। स नवद्वीपाधिवासी। तस्य जन्म[1] 1605 खी. सम्बत्सरे अभवत्। परन्तु [2]परेण 1631 सम्बत्सरे जन्म अलभत इति। सोऽपि अष्टादशवयः पर्य्यन्तं भवानन्द-सिद्धान्तवागीशपण्डितात् न्यायशास्त्रमधीत्य पुनरपि न्यायशास्त्रसमेत-सकलशास्त्राणि रामचन्द्रसार्वभौमाचार्यस्य[3] समीपे सम्यकृतया अधीतवान्।

1. Jagadish flourished some time about 1600 A.D. He was fourth in descent from Sanatana Mishra, father-in-law of Chaitanya, The greatest Vaishava Reformer, who was born in 1485 A.D. Allowing 30 Yrs. in avarage for one gereration this gives 1605 A.D. as the time of Jagadisa. This date is supported by a copy of a manuscript of his Tarkamrta was copied in 1635 A.D. This date agrees well with the fact that a work of his named Kavya Prakasharahashya was copied by the pupil of his in saka 1657. A. D. H.I.L, P- 469

1. जगदीशो नाम श्रीचैतन्यमहाप्रभोः श्वशुरात् सनातनमिश्रात् चतुर्थः पुरुषः। श्रीचैतन्यमहाप्रभुश्च खीष्टीये पञ्चाशीत्यधिकचतुर्दशशततमाब्दे प्रादुर्बभूवेति इतिहासविदामाशयः। तेन जगदीशस्य पञ्चाधिकषोडशशतसम्बत्सरे जन्मेति कल्प्यते। एकस्य तर्कामृतग्रन्थखण्डस्य ,एकत्रिंशदधिकषोडशशततमसम्बत्सरो लेखकालः समुपलभ्यते, तेनापि तथाकल्पनं दृढीभवति। उक्तं च विद्वद्भिः न्यायकन्दलीभूमिकायां यथा- जगदीशभट्टाचार्यकृत - शब्दशक्तिप्रकाशिकापुस्तकस्य 1624 खीष्टाब्दः शालिवाहनशकलिखितस्योपलब्धत्वात्तत्समयात् पूर्वं तद्ग्रन्थकर्तृस्थितिरिति सुव्यक्तम्। कालिपददेवशर्मणा भाष्यभूमिकायाम्।

3. सार्वभौमस्य च गुरोः पदाब्जम्,
विद्यार्थिना कल्पतरो प्रणम्य।
विनिर्मितः श्रीजगदीशविज्ञैः,
विद्येति तामाद्यमणेर्मयुखः ॥ - Calcutta Sanskrit College, Cat-III, P. 324, No. 575, Introduction Verse-2.

जगदीशकृतिः-

अनेन विलिखितानि सर्वाणि पुस्तकाणि प्रायशः न्यायशास्त्रमधिकृत्य सन्ति । एतेभ्यो ग्रन्थेभ्यः केचन प्रकाशिताः । ते अधो भागे प्रदीयन्ते ।

।क। तत्त्वचिन्तामणिदीधितिप्रकाशिका [1]

।ख। न्यायचिन्तामणिमयूखः [2]

।ग। न्यायादर्शः, न्यायसारावली वा

।घ। शब्दशक्तिप्रकाशिका [3]

।ङ। तर्कामृतम् [4]

।च। न्यायलीलावतीदीधितिव्याख्या

।छ। द्रव्यभाष्यटीका सूक्तिटीका वा

।ज। अवच्छेदकत्वनिरूक्तिः [5]

सूक्तिटीका-

इयं प्रशस्तपादाचार्यकृत- पदार्थधर्मसंग्रहस्य वा उपरि वर्त्तते । अतः तस्य प्रारम्भे -

"कणभक्षमुनेः यक्षरक्षाविनस्तवासना ।
सूक्तिं श्रीजगदीशस्य चिन्तयन्तु विचक्षणाः ।"

समाप्तौ च-

"इति महामहोपाध्याय - श्रीजगदीशभट्टाचार्यतकलिङ्कारकृत - द्रव्य भाष्यटीका समाप्ता ।

---

1. चौखम्बा संस्कृतसीरीजद्वारा प्रकाशितम् ।
2. कलिकतास्थ राजकीय संस्कृतमहाविद्यालय द्वारा ।
3. कलिकता विश्वविद्यालय द्वारा ।
4. चौखम्बा विद्याभवनद्वारा
5. चौखम्बासंस्कृतसीरीजमाध्यमेन प्रकाशितम् ।

षष्टोऽध्यायः

गोपीनाथमिश्रः, तद्देशकालादयश्च


द्रव्यभाष्यभावग्रन्थकर्त्तुः गोपीनाथमिश्रस्य समयनिवासादिकविषये कस्यचिदैतिहासिकस्य याथार्थ्यज्ञानं यद्यपि नास्ति, तथापि पूर्वापरसङ्गतिसमूह-माकलय्य यथाशक्ति अस्य महाभागस्य कालादिकं निरुपयिष्यते। अस्योपरि यानि कानिचित्पुस्तकानि प्राप्यन्ते तेषु Orissa Historical Research Journal; प्रभातवानार्जीकृत Orissa History of Orissa; हरेकृष्णमहतावविलिखित History of Orissa; उत्कलप्रदेशस्य राज्यसंग्रहालये स्थितानि ताडपत्राणि, Descriptive Catalogue of Sanskrit Mss. of Orissa इत्यादीनि पुस्तकाणि एतद्विषये पाथेयभूतानि भवन्ति।

वंशपरिचयः (Genealogical Indentification)

उत्कलसंस्कृतसाहित्यवाङ्मये गोपीनाथमिश्रनामधेयाः अनेके विद्वांसः आसन्। तेषु अस्माकं विचार्य्यपुरुषस्य द्रव्यभाष्यभावकर्त्तुः गोपीनाथमिश्रस्य गोत्र वंशादिनिर्णयप्रमाणानि नोपलभ्यन्ते इति [1]"पण्डितनीलमणिमिश्रप्रभृतिभिः प्रमाणितेऽपि अधुना सूक्ष्मतया गोपीनाथमिश्रस्य गोत्रादिपरिचयनिर्द्धारणं स्पष्टतया द्रव्यभाष्यभावग्रन्थेषु उक्तत्वान्नास्ति कस्याप्यापत्तिः। तदेव अग्रे वक्ष्यते।

गोपीनाथमिश्रः [2]द्रव्यभाष्यभावग्रन्थस्य रचयिता, [3]वाजपेयीवंशजः, [4]जगन्नाथवाजपेयिनः पुत्रः इति प्रमाणमस्ति। अस्य गोपीनाथस्य कालादिनिर्णयात्

1. उडिशार संस्कृत लेखा उ लेखक, पृ- 99.
2. दीक्षितशेषशास्त्रज्ञो, जगन्नाथप्रसादतः।
   भाष्यभावप्रकाशोऽयं, गोपीनाथेन तन्यते॥ - द्र.भा.भा, पृ. - 1
3. मतानि यः खण्डयितुं श्रुतीनाम्,
   तथैव संस्थापयितुं समर्थः।
   श्रीगोपीनाथाभिधो वाजपेयी,
   भूर्लोकभाष्यमणिरेषो जीयात्॥ - द्र. भा. भा. पृ. 257।
4. यः साक्षात्कुरुते समाधिषु सदा नारायणाख्यं महो,
   यद्व्याख्याविशदीकृतं विजयते तज्जैमिनीयं मतम्।
   यस्सोमाध्वरदीक्षितो विभुजगन्नाथः समुज्जृम्भते,
   प्राशस्त्यं विवृणोम्यमुष्यतनयो भाष्यं कृतं प्रीतये॥ पूर्ववत्



1. अष्टाब्देषु कविं गते च नवमे तर्काब्धिपारं गतः,
मीमांसाद्वयसप्तपाञ्चरचना सम्पत्तिकृद्द्वादशे ।
जल्पैरल्पदिने विजित्य विदिशो यः षोडशवत्सरे,
योगाभ्यासरतः पुराणपुरुषः नारायणः प्राविशत् ॥
2. सिद्धेश्वरीदत्तवरास्स्वतन्त्रो,
षड्दर्शनी यस्य कुलैव नासीत् ।
काऽपि वनेऽहीनमखेऽग्निचेता
जलेश्वरः कृष्णपरायणोभूत् ॥
3. नरसिंहधनञ्जयौ बुधावथ गङ्गाधरोऽन्वाखण्डलः ।
तनया किल वाजपेयिनो स च मृत्युञ्जय पञ्चमोऽस्ति मे ॥
अद्वैतागममुत्कलेऽवतरन् संक्षेपशारीरिके,
कृत्वा वार्तिकमध्वरिषु निरतः षण्मासदीक्षाव्रती ।
मीमांसा यत एव बुद्धिमगमत् काश्यां नृसिंहः सुर-
स्रोतस्वत्युदकैकजीवनविधियोगेन सिद्धिं गतः ॥

पूर्वं साम्प्रतं वाजपेयी वंशजानां कौत्स्यगोत्राभिधानामनुक्रमणिका अनेकपुस्तकेभ्य: श्लोकानाकल्य्य क्रमश: प्रदीयते ।

वाजपेयी वंशजा:

शम्भुकर:[1]
|
विद्याकर:
|
जगन्नाथ:[2]
|
गोपीनाथ:[3]
|
मृत्युञ्जय:[4]
|
गोपीनाथ:[5]

---

1. पूर्वं सर्वसुपर्वनायकगुरुस्पर्द्धि: समृद्धिरसा:,
पृष्टस्याखिलशास्त्रतत्त्वनिगमज्ञानैकबारांनिधि: ।
जातो शम्भुकराभिध: कविवरो विद्याकरस्तत्सुत:,
सम्भूता कवितालतोन्नतिकरा: वर्षा: प्रकर्षान्विता: ॥ - को. का, 21. 64.

2. अथाऽभिधीयते श्लोकैरग्निष्टोमस्य पद्धति: ।
x x x
वाजपेयीऽग्निचिद् विद्वानसुधी विद्याकरात्मज: ।
जगन्नाथोऽभ्यधाच्छ्लोकैरग्निष्टोमस्य पद्धतिम् ॥ - अ. प. आरम्भे ।

3. द्रष्टव्यम्- टिप्पणी -2.

4. प्रासादे स्वकृते हरं परिचरन्नासीदमुष्मिन् कुले,
मीमांसापर्वकर्णधारतरूणो मृत्युञ्जय: पण्डित: ।
विद्याभि: सकलाभिरूज्ज्वलमति: य: शुद्धिमुक्तावली ,
ग्रन्थेनाखिलमेव पूतमकरोत्स्वीयं कुलं चेज्जाया ॥

5. अमुष्य पुत्र: किल गोपीनाथो,
मिश्रो गुणैर्यस्य वंशे वसन्तौ ।
जलेशनारायणनामयोगात्,
सुतौ तु मित्रावरूणावुपेतौ ॥

4. देवानन्दः सुतोऽस्याजनि कृतचयनो यज्ञविद्याधुरिणो,
वेदाभ्यासप्रयासी परिषदि विजये यः कृतः पण्डितेशः ।
नानादेशादुपेता सुनिपुणमतयोः काश्यां नृसिंहः सुरः,
मीमांसातर्कविद्याश्रुतिशिखरमतं प्रौढिमध्यापयन्ति ॥

5. अनुजोऽस्य च पौण्डरीकयज्वा,
बलभद्रो विदितः श्रुतो नयेन ॥
सदृशः मुनिमौलिभट्टतन्त्रे,
किमु सम्बत्सरदीक्षया क्रतौ च ॥

6. आनन्दपुत्रा वसु तेजसोऽष्टौ, वसुत्तमा किं वसुधामपेताः ।
यदीयाशिष्टादनवाप्तविद्या, ये केऽपि तल्लक्षणमज्ञतयैव ॥
सर्वे च पुत्रा विगतारिमित्रास्ते बाजपेयादिमखैः पवित्राः ।
काले यथावद् विहिताग्निहोत्रा, महाम्भिराशासित सच्चरित्राः ॥

ते वामदेवाभिध-वर्द्धमानौ, समाधवौ तौ भुबनेशवीरौ ।
धराधरस्यानुगदाधराह्वै, रविश्च तेषामिह चाष्टमेऽभूत् ॥

7. धराधराख्या प्रथितस्य जैमिनेः,
जगन्निवासैकजुषो दशात्मजाः ।
गरिष्टविघ्नेश्वरः नामसम्वृतौ
विशिष्ट इव व्यजनिष्ट पूर्वजः ॥

मुरारीपिताम्बरवासुदेव- नारायणश्रीपतिकेशवाख्याः ।
वक्रेश्वरश्रीजयदेवकृष्णः साचारविद्यास्तनयास्तवान्यैः ॥

8. मुरारीपूजार्पित - विद्ययोर्जितो,
मुरारीरासीत् श्रुतिमौक्तिपारगः ॥
निरन्तरं श्रीनरसिंहसेवया,
नृसिंह नामा जनितस्य चात्मजः । 8-17 अङ्गानि नि.प्र.ग्रन्थे

गोपीनाथमिश्रस्य समयः-

स्वभावतः कस्यापि प्राक्तनजनस्य कालनिरुपणसमये कानिचिदैतिहासिकपुस्तकानि, तत्कर्त्तृकग्रन्थाः, पूर्वपरसमुद्धृतवाक्यानि च सहायकमात्राणि भवन्ति । तद्वदेवात्र गोपीनाथमिश्रमहोदयस्य समयनिरूपणार्थं तत्पूर्वजानां तत्कृतीनां च यदि समयो निर्धार्यते, तर्हि तेनैव अस्यापि समयादिकं निर्धारितं भवेत् ।

।क। प्रागेव गोपीनाथमिश्रमहाभागेन विलिखितद्रव्यभाष्यभावग्रन्थस्य प्रतिलिपिकर्त्तुः सर्वशास्त्रपण्डितकौण्डिन्यवंश-ओड्रदेशनिवासी-श्रीरघुनाथदासस्य जीवनकालः 1685-1775 खी. सम्बत्सरमध्यस्थ इति निश्चिततत्वात् ग्रन्थकर्त्तुः समयस्तत्पूर्वकाल इति वक्तुं प्रमाणान्तरं नापेक्ष्यते । रघुनाथदासविषयः यथास्थानं त्वग्रेऽऽलोचयिष्यते ।

।ख। "[1]हरेकृष्णदेव । 1715 - 19 स्य पञ्चमाङ्के चैत्रमासि कृष्णपक्षे नवम्यां भृगुवासरे रघुनाथदासेन लिखितमिदं पुस्तकमिति ताडपत्रे प्रतिलिपिकार्य समापनदिवसदर्शनात् तदनुसारं 2.4.1719 तारिकायां [2]दिवसगणनेन तत्पूर्वमेव द्रव्यभाष्यभावग्रन्थस्य रचनाकाल आसीदिति सिद्ध्यति ।

।ग। केचन खोरधामहाराजस्य गजपतिरामचन्द्रदेव (1725-1736) स्य राजसभायां राजपण्डितरुपेण परिचितः [3]स्मृतिकारो गोपीनाथमिश्रः आसीदिति अतः एवार्थान् वदन्ति । एतत्तु न युक्तम् । 1719 खी. सम्बत्सरे ग्रन्थस्य प्रतिलिपिकार्यसमापननिर्द्धारणात् तत्पूर्वमेव ग्रन्थप्रणयनकार्यसंम्भाव्यत्वात्, अस्मदीयगोपीनाथमिश्रादन्य एव गजपतिरामचन्द्रदेवराजसभायां पण्डितो गोपीनाथवाजपेयी इति पाक्षिकप्रमाणम् ।

। घ । पुनश्च वृहस्पतिसूरिकृत - [4]कृत्यकौमुदीग्रन्थस्य प्रतिलिपिकर्त्तुः

1. द्र. भा. भा. पृ. 257 ।
2. Indian Emphemecris by Pillai, Vol. VI, P-233.
3. D.C., Vol. 1, Introduction.
4. भगवान् गोपीनाथाख्यो, नारायणस्त्रयः क्रमात् ।
   पुत्रः पौत्रः प्रपौत्रश्च, मानगोविन्दविश्रुतः ॥

मानगोविन्दपण्डितस्य पितृत्वेन गोपीनाथाख्यस्य परिचितत्वात्, स एव द्रव्यभाष्यभावग्रन्थकर्त्ता इति चेन्न। मानगोविन्दपण्डितपितुः गोपीनाथस्य कौण्डिन्यगोत्रजत्वात् एतद्ग्रन्थकर्त्तुर्गोपीनाथस्य [1]कौत्सगोत्रजत्वात्।

। ङ ।अपि च गोपीनाथमहाभागानां प्रपौत्रः कोशलानन्दमहाकाव्यकारः गङ्गाधरमिश्रश्च [2]सम्बलपुरराज्यस्य वालियारसिंहराज्ञो राजसभायां। (4716 = कलियुगाब्दे) 1716 खी. सम्बत्सरे आसीत्। अतः तत्प्रपितामहस्य गोपीनाथस्य समयः तत्पूर्वमिति भवेदिति निश्चयः।

।च। नापि षोडशशतकः गोपीनाथमिश्रस्य। षोडशशतके[3] नित्याचार-प्रदीपकारस्य वाजपेयीवंशजमुरारीमिश्रपण्डितपुत्रस्य[4] विघ्नेश्वरमिश्रपण्डित-शिष्यस्य [5]सिद्धेश्वरीप्रसादात् लब्धज्ञानस्य षड्दर्शनचूडामणेः [6]मुकुन्ददेवसभा-पण्डितस्य नरसिंहदेववाजपेयिनः पाण्डित्यमेव प्रकाशितमासीदिति पुरी-

---

कौण्डिन्यान्वयजातेन, सुन्दरग्रामवासिना।
मानागोविन्ददासेन लिखिता कृत्यकौमुदी॥ पूर्ववत्, पृ-48.

1. आमत्सरः सत्समयप्रणेता, कौत्सस्य वंशो वसुधावतंसः।
प्रसादमीमांसकयज्ञयूपैः, येनोत्कले भूषित एषो देशः। नि.प्र.

2. फत्तेजङ्गहयस्थितो नरपतिः कल्की दुराचारिणाम्,
दूरीकृत्य रिपून् विभूतिमतनोद्दिन्यामलभ्यां नृपैः।
काले याति कलौ कलाचलयुगे प्रत्यर्थिदन्ताबल-
व्युहे श्रीवलियारसिंह इति यो लक्षार्तिरक्षाप्रदः॥ को. का. 21.60.

3. एसिएटिक-सोसाइटी कलिकत्ता-संस्थापक्षतः पण्डितविनोदविहारीभट्टाचार्यसम्पादित 1903 खी. सम्बत्सरे।

4. श्रीमद्विघ्नेश्वरगुरोः प्राप्तविद्येन तेन च।
नित्याचारप्रदीपोऽयं नृसिंहेन प्रणीयते॥ नि. प्र. आरम्भे

5. मुनिजनसमुपास्यां कुन्दवृन्दावदाताम्,
शतदलतलसंस्थां वञ्चिताथ प्रदां यः।
शशिशकलधरामाराध्य सिद्धेश्वरीं ताम्,
करवदरसमानं शास्त्रषट्कं ददर्श॥ पूर्ववत्।

6. विजित्य वादेन सभान्तराले, तं गौडदेशागततार्किकेन्द्रम्।
मुकुन्दभूमिनृपते र्जगाम, नानाविधानुग्रहपात्रतां यः॥ पूर्ववत्।

मण्डलान्तर्गत-साक्षीगोपाल-ग्रामसमीपस्थवीरनरसिंहपुर-शासनग्रामण्योः चक्रधरमिश्र-वामदेवमिश्रयोः उक्तेः [1]सत्यनारायणराजगुरुणापि प्रमाणिततत्वात् । नरसिंहमिश्रेण स्वग्रन्थे कुत्रापि गोपीनाथः स्वसमकालिक इति नोक्तत्वाच्च ।

।छ। [2]1559-1568 खी सम्बत्सरे स्थितस्य गजपतितेलङ्गमुकुन्ददेवराजस्य वङ्गप्रदेशराज्ञः सूलईमान् कररानीत्याख्यस्य च कश्चिद् विवादो जातः । एनं विवादं आकवरः सुलईमानकररानी-मुकुन्ददेवयोर्मध्ये [3]सन्धिमकारयत् । एतेन प्रसन्नो मुकुन्ददेवोनरसिंहवाजपेयिनं [4]मासत्रयाभ्यन्तरे प्रेषितवान् ।

पुनश्च [5]मुकुन्ददेवस्य 1568 खी. सम्बत्सरे पञ्चत्वप्राप्त्यनन्तरं आकवरः वङ्गलादेशसमेतोत्कलराज्यं विजित्य नरसिंहवाजपेयिनं दिल्लीमनयदिति । अतो नरसिंहस्य समयः षोडशशतक इति भवति ।

अपि च [6]आईन-ई-आकवरग्रन्थे पण्डित-नरसिंह-परमिन्दरनामधेयौ पण्डितौ द्वावास्तामिति प्राध्यापक डि.सि. भट्टाचार्यमहोदयेन समर्थितमस्ति ।

पुनरपि [7]रामतीर्थ नामधेयः पण्डितः आकवरराजसभायामासीत् यस्मात्पूर्वं नरसिंहभट्टः नरसिंहः नरसिंहयोगी वेति एको विद्वान् राजपण्डित-रुपेणासीदिति । स एव नरसिंहो राजपण्डितः नरसिंहवाजपेयी । स नान्य एव ।

अस्मिन् प्रसङ्गे - नरसिंहवाजपेयिनश्च जीवनकालः 1510-1568 खी सम्बत्सरः, यस्य विषयेऽग्रे कथयिष्यते । नरसिंहवाजपेयिनः पञ्चमपूर्वजो गोपीनाथः । अतः नरसिंहवाजपेयिनः समयः 1510-1568 इति हेतोः न तु पञ्चमपूर्वजस्य गोपीनाथमिश्रस्य षोडशशतकः समयः कल्पयितुं न शक्यः ।

---

1. सहकार मासिकपत्रिका - सं. 15 पृ. 615-627.
2. (क) H. O, Vol. 1, P- 343.
   (ख) H. B, Vol. II, P- 183.
3. A.K. Barnama English Translation, Vol. II, P-381.
4. दिल्लीश्वरं यः परितोष्य वाग्भिः, विद्याभिरष्टादशभिः प्रवीणः ।
   मुकुन्ददेवस्य प्रशस्तवाचः, समानयत्सर्वजनस्य मध्ये ॥ -नि. प्र.
5. A.K. Barnama English Translation, Vol. II, P- 382.
6. Ain-1 Alabari by H. Bochaman, vol. I, P-608.
7. I. H. R; Vol.XIII, Part- I, P-33.

।जा। नरसिंहवाजपेयीकृत - नित्याचारप्रदीपग्रन्थे वाजपेयीवंशावली प्रदत्ता, यस्यां शम्भुकरवाजपेयिन: समयादारभ्य नरसिंहवाजपेयी समयपर्य्यन्त-मस्ति । परन्तु केनचित् नरसिंहमिश्रस्य पूर्वजानां गोपीनाथादीनां विषये प्रमाणाभावात् शम्भुकरवाजपेयिन: समयारभ्यो: नरसिंहवाजपेयीनं पर्य्यन्तं कालनिरुपणेन गोपीनाथस्य काल: निरुपयिष्यते ।

।। झ ।। शम्भुकरवाजपेयी-

उत्कलधर्मशास्त्रेषु स्मृतिकारस्य शङ्खधरस्य परस्मिन् समये शम्भुकरवाजपेयी नामधेय: धर्मशास्त्रज्ञ: 150 वर्षाणि आयुं नित्वा उत्कलप्रदेशे अवर्त्ततेति [1]हण्टरमहोदयेन प्रतिपादितम् । [2]मनमोहनचक्रवर्त्तीमहोदयस्य मते-शम्भुकरपुत्रविद्याकरवाजपेयिन: समय: पञ्चदशशतकस्यादावेवेति । अत: शम्भुकरस्य समय: पञ्चदशकाभ्यन्तरे न भवितुमर्हति । तस्य विचारोऽग्रे करिष्यते । अपि च विनोदविहारीभट्टाचार्यस्तु शम्भोकरवाजपेयिपुत्र-विद्याकरवाजपेयिकृत [3]नित्याचारपद्धतिभूमिकायां शम्भुकरवाजपेयिसमय: [4]नृसिंहदेवस्य शासनकाल इति प्रतिपादितवान् ।

अत्र तु शङ्का यत् - नृसिंहदेवस्य नरसिंहदेवस्य वा [5]चत्वारो राजान उत्कलराज्ये गङ्गवंशजा: शासनं चक्रु: । परन्तु शम्भुकरस्य जीवनकाले एतेषु चतुर्षु नरसिंहदेवेषु कोऽयं नरसिंहदेव इति सन्देह: । एते राजान: एकैकश: समयानुसारं विविच्यन्ते ।

---

1. Hunter's Orissa, Vol.II, Appendix-IX, P- 201 & 208.
2. The language and literature of Orissa, Indiax Asiatic Society of Bengal Vol.-LXVI, No. 4-1897, P - 33-37.
3. Biblotheca Indica of Asiatic Society Calcutta- 1901.
4. नानाशासनकृन्नृपालपरमात् श्रीमन्नृसिंहाभिधा-
   नैतच्छासनकं स्वधर्मनिरतो देशे जहौ तेज स: ।
   कार्शी प्राप्य तत: स्वसूनुसुधियं विद्याकरं सानुजम्,
   स्वेषामुद्वहनार्थमुत्कलभुवञ्चायातुं आदिष्टवान् ।। -विद्याकरवाजपेयिन:क्र. दीपिकायाम्
5. प्रथमनृसिंहदेवस्य शासनकाल: - 1238-1264 खी. स.
   द्वितीयनृसिंहदेवस्य शासनकाल: - 1278-1306 खी. स.
   तृतीयनृसिंहदेवस्य शासनकाल: - 1328-1352 खी.स.

किं चतुर्थनरसिंहदेवस्य समये शम्भुकरस्य जन्म इति चेत् । न । चतुर्थ-नरसिंहदेवस्य शासनकाल 1378 - 1414 ख्री. सम्बत्सरः । अस्य नरसिंहस्य गुरुः रामचन्द्रवाजपेयी, यः रामचन्द्रः शम्भुकरवाजपेयीपुत्रविद्याकरवाजपेयिनो शिष्यः । अतः पुत्रस्य शिष्यसमये पितुर्जन्मासम्भवो भवति । तद्वत् तृतीयनरसिंह-देवस्य सामयिकः न शम्भुकरवाजपेयी । अस्य नृपतेः राज्यशासनकालः 1328 - 1352 ख्री. सम्बत्सरः ।

सम्भाव्यते-शम्भुकरस्तु द्वितीयनरसिंहदेव(979-1306)स्य समसाम-यिकः, कारणम् - अयं राजा [1]शताधिकब्राह्मणग्रामान् प्रतिष्ठापितवानिति प्रमाणं प्राप्यते । द्वितीयतः शम्भुकरवाजपेयिनः अग्निहोत्रादियज्ञादिषु दक्षता आसीत् । एकदा राजा नरसिंहदेवः तस्मै शम्भुकरवाजपेयिने [2]राजप्रतिग्रहं दातुमैच्छत् । परन्तु शम्भुकरेण स एव राजप्रतिग्रहः ग्रहीतुं नाङ्गीकृतः, यस्मात् राजा अकुप्यत । ततः राजक्रोधमसह्यमाना शम्भुकरः स्वदारापुत्रादिभिः [3]काशीनगरमगमयत् । तत्रैव तस्य पञ्चत्वं प्राप्तिरिति प्रमाणमस्ति । अतः तस्य [4]जीवनविवरणम्-

---

चतृर्थनृसिंहदेवस्य शासनकालः - 1378-1414 ख्री.स.

1.(क) तस्याः सूनुरभूद् वीरः श्रीनृसिंहमहीपतिः
गङ्गवंशसमुद्हर्त्ता हर्त्ता वैरि महीतलम् ॥ 97
तेन दत्तं द्विजातिभ्यो, शासनं शवसंख्यकम्
महादानानि दानानि श्रीमन्नातुरनुज्ञया ॥ 98
ताम्रफलकाभिलेखः उत्कलमहाराजद्वितीयनरहिदेवविषये 1217 शकब्दे 1295 ख्री. सम्बत्सरे इति N.N. Basu महोदयेन J.N.S.B., Vol. LXV 1896, P. 253-54.

(ख) यः खङ्गचण्डमहसा रिपुराजकाना-
माहृत्य सम्पदममर्त्यतरो समानाम् ।
भूदेवसात्कृतमभूतलभूषणेन,
दानम्भसा महीतलसत्करपल्लवेन ॥ - वि. को. सं.5., पृ. 320.

2. राजप्रतिग्रहो घोरो मध्वास्वादी विषोपमः ।
पुत्रमांसं वरं भोक्तुं न तु राजप्रतिग्रहः ॥ D.C.,Vol. I, Intro P. 5.

3. द्रष्टव्यम् - टि-42.

4. O.H.R.J., Vol.1, No.3, 1952.

शम्भुकरस्य जन्म - 1260 ख्री. स.
काशीगमनम् - 1292 ,, ,,
देहावसानम् - 1330 ,, ,,

एतद्व्यतिरिक्ता: नृसिंहवाजपेय्यादयो मुकुन्ददेवे (1568 ख्री.स.) न संस्थापिते [1]दाण्डमुकुन्दपुरग्रामे मिश्रनामाङ्का: भरद्वाजगोत्रजा: सन्त: अवसन्, यस्य वंशस्य वसति: अद्यावधि दृश्यते ।

॥ ञ ॥ विद्याकरवाजपेयी-

नानाशास्त्रधुरिणो शम्भुकरवाजपेयिपुत्र-विद्याकरवाजपेयी तत्पित्रा साकं विद्यानगरीं काशीं गत्वा बहुशास्त्रमधीत्य [2]नित्याचारपद्धतिं विद्याकरपद्धतिं वा ग्रन्थं विरच्य श्रीक्षेत्रं पुरीं प्रति स्वकीयोपयमनिमित्तं प्रत्यागच्छत् ।

नित्याचारपद्धतिपुस्तकस्य भूमिकाकर्त्ता पण्डितविनोदविहारीभट्टाचार्यस्तु ''शम्भुकरवाजपेयीपुत्रो विद्याकरवाजपयी 1344-1560 ख्री. सम्बत्सराभ्यन्तरे तृतीयनरसिंहदेवस्य शासनकालेऽऽसीदित्यभिप्रैति । पुनश्च नित्याचारपद्धतिग्रन्थस्योद्धृतवाक्येभ्य: चतुर्दशशतकसमयो विद्याकरवाजपेयिन इति सूचितमस्ति, यथा निम्ने उच्यते ।

।क। भोजराजकृत - कामधेनु: - एकादशशतक:

।ख। पार्थसारथिमिश्रकृत-[3]तन्त्ररत्नशास्त्रदीपिका, क्रमदीपिका-दशमशतक:

।ग। भट्टलक्ष्मीधरकृत - कृत्यकल्पतरु : - द्वादशशतक:

---

1. The famous Vajpeyee family was living in some old Brahman Sansana's in the Sadar Sub-Division of Puri District, their gotra being Bharadvaja and surname being Mishra. The descendants of this family are still living in the village Dandamukundapur near Pipil in the Jagannath road which was founded by Telang Mukundadeve before 1568 A. D.
- O.H.R.J., Vol. I, No. 3, P. 192.

2. आहर्त्ता य: क्रतूनामयुतभृतिभृतां त्रिशतां सत्यव्रत्या:,
पुत्रौ विद्याकरोऽभूत् सकलगुणिगणै रीड्यते कृष्णवद्य: ।
त्रिशद्वर्ष: स काश्यां कृतवसतिरभूद् धर्मशास्त्रस्य कर्त्ता,
पद्धत्याख्यस्य खण्डं पथममिह बलोऽलीलिखत् तस्य कार्ष्णि: ॥ नि.प्र.

3. Date of Parthasarathi Mishra and squence of his work by K. S. Ramaswamisastri., I.H.Q., Vol. XIII, No. 3, P-4489-97

।घ। आदित्यभट्टकविवल्लभकृत-कालादर्श:[1] - त्रयोदशशतक:

।ङ। अनन्तभट्टकृत - अनन्तभट्टीय: - 1285 खी.स.

।च। चिन्तामणिकृत - कृत्यकौमुदी[2] -1315-1330 खी.स.

।छ। शङ्खधरकृत - स्मृतिसमुच्चय:[3] - त्रयोदशशतक: ।

अपि च नित्याचारपद्धतिग्रन्थस्य समुद्धृतप्रमाणवाक्येभ्य: समय-निरुणान्तरमेव वङ्गप्रदेशस्थ-रघुनन्दनपण्डितकृत-मदन-पारिजातग्रन्थस्याह्निक-तत्त्वप्रकरणे ''इति मदनपारिजाते विद्याकरवाजपेयिधृतमरीचिवचनादिति'' पदपङ्क्तीदर्शनात्[4] तत्पूर्वमेव विद्याकरपण्डितस्य काल: भवति । [5]डा. पि. भि.काणेमहोदयानां मतानुसारं रघुनन्दनपण्डितकृत-मदनपारिजातग्रन्थस्य समय: 1360-1390 खी. सम्बत्सर: । अत: विद्याकरवाजपेयिन: 1330-1360 खी. सम्बत्सरस्य स्वीकारेण न कापि हानि: ।

सूर्यवंशीयगजपतिपुरुषोत्तमदेवस्तु (1466-1497) विद्याकरवाजपेयिनो शिष्य: इति चेन्न । विद्याकरवाजपेयिन: 1285-1350 खी. सम्बत्सरमध्ये निरुपितत्वात् । अपि च नरसिंहदेवस्य 1217 शकाब्दे (1295 खी. सम्बत्सरे) शम्भुकरवाजपेयिनो राजप्रतिग्रहप्रत्याख्यानविषये, विद्याकरेण साकं काशीमन-विषये च [6]प्रमाणं मिलति । पुनश्च विद्याकरवाजपेयिन: [7]त्रिंशद्वर्षं काश्यां निवास अभूत् । अत: तस्य कालवृत्तान्त: दीयते-

विद्याकरस्य जन्म - 1285 खी. स.
काशीगमनम् - 1292 खी.स.
काश्यां निवास: - 1295-1324 खी. स.
स्वर्गारोहणम् - 1350 खी. स.

1. A Descriptive Catalogue of Sans. Manuscript Smrti, published by A.S.B., Preface P-LVIII.
2. Contribution of History of Smrti in Bengal & Mithila by M.M. Chakravarti J.A.S.B., Vol. XXII, No. 2, P-137.
3. J.H.S.B., Vol.XLVI, No.4 - 1897, p. 335.
4. पूर्ववत्
5. History of Dharmasastra., Vol. 1., P. 389.
6. Three Kendupatna grants of Narasingh Mahadeva.
7. द्रष्टव्यम् - 6.35.

।ट। जगन्नाथवाजपेयी-

जगन्नाथवाजपेयी नामधेयः कश्चन पुरुषो विद्याकरवाजपेयिनः पुत्र इति न केनापि प्रमाणितम् । परन्तु अस्मदीयगुरुदेवस्य श्रीमत्कुलमणिमिश्रस्य प्राचार्य-महोदयैःश्रीमदानन्दमिश्रमहाभागैः प्रकल्पितपुस्तकागारे[1] विद्याकरवाजपेयिपुत्र-जगन्नाथवाजपेयिपण्डितकृत-अग्निष्टोमपद्धतिः समुपलब्धा । साऽपि कीटानु-विद्धा । तां मातृकामनुसृत्य ओडिशाप्रदेशस्थ-राज्यसंग्रहालयस्य [2]परिचालक-पण्डितनीलमणिमिश्रमहाभागानाम्मते 1360-1400 ख्री. सम्बत्सरपर्य्यन्तं जगन्नाथवाजपेयिनः समय इति यत् प्रतिपादितम्, तत्तु न समीचीनम्, जगन्नाथवाजपेयिनः पिता विद्याकरवाजपेयी 1285-1350 ख्री.सम्बत्सरसमय-मध्यग इति हेतोः । पितुर्मरणानन्तरं पुत्रस्य जन्मकल्पना असमीचीनम् । अतः जगन्नाथमिश्रः (वाजपेयी) चतुर्दशशतकस्य मध्यमभागे आसीदिति प्रमाणेन साधितं भवति ।

अत्रैवानुसन्धेयं यत् - विद्याकरवाजपेयिनः समयः 1285-1350 सम्बत्सरः । अतः विद्याकरवाजपेयिपुत्रस्य अग्निष्टोमपद्धतिकारस्य जगन्नाथवाजपेयिनः समयः 1310-1370 ख्री. सम्बत्सरो भवति ।

समाप्तौ-यतः जगन्नाथवाजपेयिनः समयः 1310-1370 ख्री. सम्बत्सरः, तस्य पुत्रस्य गोपीनाथमिश्रस्य समयः1340-1400 ख्री. सम्बत्सर इति भवितुमर्हति । यद्यपि 1340-1400 ख्री.सम्बत्सर इत्यत्र किमपि प्रमाणं नास्ति, तथापि पितुः समयनिर्धारणेन पुत्रस्य समयनिर्धारणं सुगमतया क्रियते । गोपीनाथमिश्रः चतुर्दशशतकस्योत्तरार्द्धे आसीदीति ।

---

1. अथाऽभिधीयते श्लोकैरग्निष्टोमस्य पद्धतिः ।

   x x x

   वाजपेयीऽग्निचिद् विद्वान् सुधी विद्याकरात्मजः ।
   जगन्नाथोऽप्यधाच्छ्लोकैरग्निष्टोमस्य पद्धतिः ॥ -अ. प. समाप्तौ

2. उडिशार संस्कृत लेखा ओ लेखक, पृ. 99.

गोपीनाथमिश्रस्य वासस्थानम् -

गोपीनाथमिश्रस्य वासस्थानविषये न प्रभूतप्रमाणानि सन्ति। परन्तु गङ्गाधरमिश्रकृत-कोशलानन्दमहाकाव्यम्, केदारनाथमहापात्राणाञ्च मतम्-एतयोः द्वयोः मतमाश्रित्य वासस्थानं स्थिरीक्रियते।

प्रथमतः [1]केदारनाथमहापात्रमतानुसारम्-शम्भुकरवाजपेयिवंशजानां शम्भुकरवाजपेयिनः समयादारभ्य अद्यावधि पुरीमण्डलान्तर्गत- साक्षीगोपाल-समीपस्थ-दाण्डमुकुन्दपुरग्रामे वसतिः दृश्यते। अतः गोपीनाथमिश्रस्यापि वसतिः दाण्डमुकुन्दपुरग्रामे एव भवेत्।

द्वितीयपक्षस्तु - गङ्गाधरमिश्रकृत - [2]कोशलानन्दमहाकाव्ये वर्णितमस्ति यत्-वाजपेयिवंशजेन केनापि गोपीनाथमिश्रेण पुरीमण्डलतः सम्बलपुर-मण्डलान्तर्गतहीराङ्कुरं (यस्याधुनिकनाम हीराकुदः) नामकं स्थानमागतम्, यस्मिन् वंशे कविः गङ्गाधरः अजायत।

अतः गोपीनाथः सम्भवतः दाण्डमुकुन्दपुरग्रामात् सम्बलपुरमण्डलस्य हीराकुदं स्थानं प्रति गतवानिति अनुमीयते। अधुना हीराङ्कुरः नामकं स्थानं नास्ति सम्बलपुरे। तदेव पुनश्च नदीनटे वर्त्तते इति [3]प्रमाणमस्ति। साम्प्रतमपि हीराकुदस्थानं महानदीनाम्न्याः विशालनद्याः तटप्रदेशे वर्त्तते। तत्र अधुना विशालनदीसेतुः अस्ति।

---

1. O.H.R.J., Vol.1, No.3, P-192.
2. तद्भव्यस्य कुले पुराणविमले रत्नाकरे धीमताम्,
   गोपीनाथ एषः पण्डितवरो हीराङ्कुरे वर्त्तते।
   जातं जन्म ममेति तत्र सहसा नैषा विधत्ते मुदम्,
   विद्याहृद्यतरान्यसंसदि परा गोत्राधिकं पूज्यते॥ -को. का. 21.65
3. तस्मात्खाण्डववैरिपाण्डवसुहृद् वीरोऽस्ति धीरापरो,
   देवानां तटिनीतटेऽस्ति सुषमां सत्क्षत्रनक्षत्रराट्।
   प्राप्तं प्राप च नामसार्थमतुलं हीराधरो हीरक-
   स्पर्शादङ्गगतावनीशमुकुटश्रेणीषु तद्गौरवात्॥ -को. का. 17.74.

गोपीनाथस्य कृति:

गोपीनाथमिश्रस्य कृतिसंख्या नाधिका इति ज्ञायते । परन्तु अद्यावधि तस्य कृतिद्वयं प्राप्यते ।

।क। द्रव्यभाष्यभाव:, भाष्यभावप्रकाशो वा

।ख। आत्मस्वरूपानुसन्धानम् ।

[1]द्रव्यभाष्यभाव: इति ग्रन्थस्य अपरं नाम भाष्यभावप्रकाश: । प्रशस्त-पादभाष्यस्योपरि इयमेव टीका । ये ये विषया: प्रश्स्तपादभाष्येऽऽलोचिता:, तान् एव अनुशील्य अयं ग्रन्थ: निबद्ध: । द्रव्यगुणकर्मादीन् आलोच्य पृथिवीजल-तेजोपवनादीनां नवद्रव्याणां विचार: क्रियते । अस्य ग्रन्थस्य मातृकात्रयं वर्त्तते । द्वे मातृके ओडिशाराज्यसंग्रहालये स्त: । अपरा Govt. Oriental Sanskrit Manuscript Library मध्ये वर्त्तते । अस्योपरि आलोचना विशदरूपेण करिष्यतेऽग्रे ।

[2]आत्मस्वरूपानुसन्धानन्तु अपरो ग्रन्थ: । "तत्त्वमसि" इतिमहा - वाक्यस्योपरि विचार: अस्मिन् ग्रन्थे भवति । अद्वैतवेदान्तविभागीयोऽयं ग्रन्थ: इति दिक् ।

—●—

1. भाष्यभावप्रकाशोऽयं गोपीनाथेन तन्यते । -द्र. भा. भा. पृ. - 1.

2. (A) Notice of Sanskrit Manuscript, Calcutta, by Haraprasad Sastri, Vol.IV, P.26-27
(B) Quoted on Biography Indian Philosophy, Vol. I, P-410.
(C) Quoted on New Catalogous Catalogorum, Vol. II, P. 59.

सप्तमोऽध्यायः

द्रव्यभाष्यभावमातृकायाः विवरणम्

प्रशस्तपादभाष्यव्याख्याभूतं गोपीनाथमिश्रकृताप्रकाशितद्रव्यभाष्य-भावग्रन्थमन्वेषयन्तः तत्प्रकाशने बद्धपरिकराः निश्चितमनसः इतस्ततः भ्रमन्तः सन्तः वयं तत्र तत्र मातृकास्थानं गत्वा उषित्वा च मातृकात्रयं भुवनेश्वरमद्रास-नगरयोरलभामहे । तेषु द्वे मातृके भुवनेश्वरस्थे ताडपत्रैः निर्मिते, अपरा च मद्रास Govt. Oriental Manuscript Library मध्ये वर्त्तमाना । अपि च भुवनेश्वर-स्थयोः द्वयोः तालपत्रमातृकयोः एका असम्पूर्णा । सम्पूर्णात्मके द्वे मातृके स्तः । आसां विशेषपरिचयनिमित्तं पाठान्तरसौकर्य्याय च क, ख, ग, इति संज्ञा सम्प्रदीयते । आदौ द्रव्यभाष्यभावस्य 'क' मातृकायाः पूर्णविवरणं प्रस्तूयते । अत्र सविवरणं प्रमाणं [1]तत्रत्यग्रन्थसूचिकानुसारमुपस्थाप्यते । यथा-

No. of manuscript :	DAR/104
Name of author of : manuscript	**DRAVYA-BHASYA- BHAVAH by GOPINATHA MISHRAH**
Description :	Beginning-

क्षीराम्बोधि प्रमथनविधौ लक्ष्मीं वीक्ष्य मनोज्ञाम्,
मध्ये तोयं विक चवदनाम्भोजमाविर्भवन्तीम् ।
ओत्सुक्येनश्लिथिमथनव्युत्पत्तेः शार्ङ्गपाणेः ,
लीलापाणिः सुरतममितमङ्गलं नस्तनोतु ।।

End-

यस्साक्षात्कु रुते समाधिषु सदा नारायणाख्यामहे ,
यद्व्याख्याविशदीकृ तं विजयते तज्जैमिनीयं मतम् ।
योऽसावप्ययदीक्षितो भगवज्जगन्नाथः समुज्जृम्भते,
प्राशस्त्यं विवृणोम्मुष्यतनयो भाष्यं कृ तं प्रीतये ।।

1. Catalogue of Sanskrit Manuscript of Orissa, Vol.5, P-119.

प्रशस्तभाष्यभावार्थं प्रकाशोऽयं मया कृतम् ।
अनेन तमसि ध्वंसे सञ्चरन्तु सुखाद् बुधाः ॥

Colophon-

इति श्रीगोपीनाथमिश्रविरचितो द्रव्यभाष्यभाव: समाप्त: ।

4. Nature of manuscript. : **Size - 40.6 X 3.1 C.M.**
No. of Folios - 215.
No. of lines in each folio - 4.
Script - Oriya.
Condition - Good.

5.Findspot : **Purchased from Pt. Damodar Dash, Bhubaneswar - 2.**
Puri.

इयं मातृका ताडपत्रै: ग्रन्थिता । ग्रन्थस्य उत्कललिप्या प्रतिलिपीकरणसमाप्तिदिवस: 2.4.1719 दिनाङ्के इति हेतो: कुत्रचिद् तदानीन्तनवर्णाकृति: साम्प्रतिकवर्णाकृते: वैषम्या दरीदृश्यते । मातृकायां दण्डाकारेण लेखनं, कुत्रचिदपि ग्रन्थपात: क्वापि कीटानुबिद्धता, क्वचिदधिकाश्च पाठा: प्राप्यन्ते । किन्तु प्रमोदस्यायं विषय: यत् ग्रन्थस्य समाप्तिपर्यन्तं मातृकायां विद्यते । अन्याभ्यां मातृकाभ्यां अपेक्षया अत्र नाधिकतया ग्रन्थपातोऽस्ति ।

'ख' मातृकाया: पूर्णविवरणं प्रवक्ष्यते । अपि च [1]ग्रन्थसूचिकानुसारं कथ्यते अधोभागेषु । यथा-

R.No. 4185
Paper: 10 $^3/_4$ X 9 $^3/_4$ inches,
Foll. 138
Lines - 20 in a page
Devanagari : Good.

Transcribed in 1922-23 from a Manuscript of M.R. Ry. Govindarajaguru. Padmapura Sasanam Berhampur Taluk. Gangam District.

---

1. A Triennial Catalogue of Manuscript, Vol. V, Part-I, Sanskrit. A, Page - 6175.

पदार्थधर्मसंग्रहव्याख्या - भाष्यभावप्रकाशः

PADARTHADHARMASANGRAHA VYAKHYA BHASYA BHAVAPRAKASAH

Foll. 1a - 138a Foll- 1386 is left blank;

A commentary on Prasasthapadabhasya on the Vaisesika Sutra. Otherwise known as Padarthadharmasangraha which work has been described under R. No. 1553 ante. by Gopinath, son of Jagannatha.

Complete.

Beginning.

क्षीराम्भो.................................

मध्ये तोयं वक चवदनाम्भोजमाविर्भवन्तीम् ।

औत्सुक्येन श्लथितमथनव्यावृत्तेः शार्ङ्गपाणेः,

लीलापाङ्गस्फु रितममितं मङ्गलं नस्तनोतु ॥

यद्बुद्धिवैषम्यमपेमाहं, शास्त्रेषु तत्त्वं विषयीक रोति ।

नारायणो यः परया स्वभक्त्या, तं तातमीड्यं प्रणमामि नित्यम् ॥

दीक्षितः शेषशास्त्रज्ञः---------------

भाष्यभावप्रक ाशोऽयं गोपीनाथेन तन्यते ॥

चिकीर्षितग्रन्थस्याव्यवहितपूर्वकाले नियमतः क्रियमाणस्येष्टसाधनतांशे (भ्रमशून्यं) । नामविगीताचारविषयत्वेनानुमितेष्टसाधनताकस्य मङ्गलस्य परिशेषानुमानात् समाप्तिफलकत्वस्य.... परापरगुरुनमस्काररुपस्य शिष्टशिक्षायै निबन्धनं कुर्वन्नेव प्रयोजनाभिधेये दर्शयति । प्रणम्येति -हेतुं जन्यमात्रं प्रतिषिद्ध-निमित्तकारणताकमीश्वरं नित्यं सर्वविषयकज्ञान (श्रद्धाति) शयपूर्वकं नत्वा अत ईश्वरप्रणामादनुपश्चात् कणादं कणादनामानं मुनिं प्रणम्य मया पदार्थधर्मसंग्रहनामा भाष्यग्रन्थः प्रवक्ष्यते .... रणादि विषयीकरिष्यत इति योजना ।

नन्वाचार्येण प्रारीप्सितग्रन्थस्याविघ्नसमाप्त्यर्थं मङ्गलाचरणं कृतम् । तदुक्तम्- अन्वयव्यतिरेकव्यभिचारेण मङ्गलनिष्टकारणत्वस्य समाप्तिनिरुपि-तान्वयव्यतिरेकगम्यत्वाभावात् ।

X X X

पदार्थ इति । नन्वत्र क: समास: पदार्थानां धर्मा इति षष्ठीसमास इति चेत् । न । भेदषष्ठ्या अप्राप्ते: कृ तस्तत्समाससम्भावना ।

End-

स्वतन्त्रास्तु अदृष्टविशेषोपग्रहादनारब्धद्रव्या वायुपरमाणवस्तदीय-त्रसरेणवो वा मनांसि । तेषां तत्त्वेनैव सुखादिकं प्रति क रणत्वम् । अनन्तानामतिरिक्त नां धर्मिणामतिरिक्त याश्च जाते: क ल्पनामपेक्ष्य क्लृप्तेष्वेव सुखादिक रणत्वक ल्पनाया लघुत्वात् । तस्य च वायवीयत्वेऽपि त्वचा (।) भावान्न स्पर्शग्राहक त्वं, त्वक्त्वस्यैव स्पर्शग्रहे प्रयोजक त्वादित्याहु: । इतिशब्दो द्रव्यपदार्थसमाप्त्यर्थ: ।

यस्साक्षात्कु रुते समाधिषु सदा नारायणाख्यं महो,
यद्व्याख्याविशदीकृ तं विजयते तज्जैमीनीयं मतम् ।
यस्सोमाध्वरदीक्षितो विभुजगन्नाथ: समुज्जृम्भते,
प्राशस्त्यं व्यवृणोदमुष्यतनयो भाष्यं कृ ति (:) प्रीतये ॥
प्रशस्तभाष्यभावार्थप्रक ाशोऽयं मया कृ त: ।
अनेक तमसि ध्वस्ते सञ्चरन्तु सुखं बुधा: ।

Colophon -

इति श्रीगोपीनाथमिश्रविरचितो भाष्यभावप्रक ाश: समाप्त: ।

कर्गजपत्रात्मिका मातृकेयं 3-4-1922 दिनाङ्के प्रतिलिपि: कृतेति मातृकाया: पुष्पिकात: ज्ञायते । तस्यां देवनागरीलिप्या उत्तमतया अक्षराणि सन्ति । 'क' मातृकाया: कानिचिद् वर्णपदवाक्यादीनि अत्रैव कुत्रचित्स्थलेषु लुप्तानि, अपि च 'ख' मातृकायामनवस्थितानां वर्णपदवाक्यादीनां पाता: 'क' मातृकाशरीरेषु न वर्त्तन्ते ।

'ग' मातृका तु [1]ग्रन्थसूत्रानुसारमाकलनं भवति । यथा -

1. Catalogue of Sanskrit Manuscript of Orissa, Vol. - I, Page- 170.

1. Name of manuscript : G R 55
2. Name and author of manuscript. : Bhavaprakash by Gopinatha Misra
3. Description : Beginning-

नम: गणेशाय-

क्षीराम्बोधि प्रमथनविधौ वीक्ष्य लक्ष्मीं मनोज्ञाम् ।
मध्ये तोयं विक चवदनाम्भोजमाविर्भवन्तीम्
औत्युक्येन श्लिथितमथनाव्युत्पत्तेः शार्ङ्गपाणेः
लीलापाणिः सुरतममितमङ्गलं नस्तनोतु ।

No colophon -

4. Nature of Manuscript : Size - 41.5 X 3.5 C.M.
No. of folios -2.
No. of lines in each folio. 3.
Script - Oriya.
Condition - Earth ants eaten.
5. Findspot. : Purchased from Jagannath Rath, Bhubaneswar, on 29.3.1956

अस्या: मातृकाया: समग्रकलेवराभावात् साम्प्रतं कियन्ति पत्राणि सन्ति । तानि समीक्ष्य पाठान्तरे प्रदर्श्यते । कीटानुबिद्धा मातृका पत्रद्वयात्मिका प्राप्यते ।

पाठान्तरविवरणम्-

'ग' मातृकयो: लुप्तयुक्तवर्णपदवाक्यानि पाठान्तरे प्रदत्तानि। 'क' मातृकायामनवस्थितवर्णादीनि यद्यपि 'स्व'मातृकायां प्राप्यन्ते, तान्येव यदि समीचीनानि चेत्, तत: तानि ग्रन्थाभ्यन्तरे संयुज्य ''क मातृकायां न सन्तीति'' पाठान्तरे स्पष्टतया विलिख्यन्ते । 'ख' मातृकायामवस्थितासमीचीनवर्णपदादीनि यद्यपि 'क' मातृकायां नोपलभ्यन्ते, तान्येव पाठान्तरे 'ख' मातृकायां योग: (आधिक्यं) इति निर्देशितमस्ति । पुनश्च 'क' मातृकाया: 'ख' मातृकाया: वा कुत्रचित् समीचीनवर्णपदवाक्यादय: न लिपिबद्धा: । तज्ज्ञापनाय रिक्तस्थान-सूचनाय रिक्तचिन्हानि (---) पाठान्तरे प्रदत्तानि भवन्ति ।

अष्टमोऽध्यायः

लिपिकार - रघुनाथदासस्य परिचयः

रघुनाथदासस्तु गोपीनाथमिश्रकृत-प्रशस्तपादभाष्यटीकाग्रन्थस्य प्रति-लिपिकारः । अयं पण्डितमूर्धन्यः सर्वशास्त्रेषु प्रवीणश्चतुर्विंशतिग्रन्थानां रचयिता प्रतिलिपिकारश्च आसीत् । तस्य वंशपरिचयः, वासस्थानं, समय इत्यादयः क्रमशः विचार्य्यन्ते ।

[1]रघुनाथदासकृतावुत्पत्तिरङ्गिण्यां स्पष्टतः तद्वंशानुक्रमविषये यत्किञ्चित् प्राप्यते, तदनुसारं दीयते अधः ।

[2]<u>कौण्डिन्यवंशावली</u>

- जनार्दनदासः
  - वाचस्पतिदासः (मीमांसा-न्याय-वेदान्त-वेदाङ्गपण्डितः)
    - हरिहरदासः[3]
      - गदाधरदासः
        - सुधाकरदासः
        - सिद्धेश्वरदासः
          - नरसिंहदासः
            - श्रीनिवासदासः (पुरीनिवासी पुराणागमाचार्यः)
              - वासुदेवदासः (जगन्नाथमन्दिरमुक्तिमण्डपे पुराणपण्डितः)
                - रघुनाथदासः
                  - जयदेवदासः
                    - नारायणदासः
                  - पीताम्बरदासः
                    - सदाशिवदासः

---

1. द्रष्टव्यम् - O.H.R.J., Vol. XI, No. 2, Page-83.
2. आसीत् पुरा पुण्ययशः प्रकाशः,
   कौण्डिन्यवंशे विबुधावतंसः ।

अशेषशास्त्राम्बुधिपारगन्ता,
जनार्द्दनाख्यो रिपुवर्गहन्ता ॥ 1॥

मीमांसान्यायवेत्ता समजनि तनयस्तस्य वेदाङ्गवेदा-
ध्यायी वेदान्तवेदी प्रथितबहुयशा नामवाचस्पतिर्यः ।
भूमौ वाचस्पतिर्वा प्रविनतसुमनो राजराजीवराज-
द्राज्ये विभ्राजमानो नृपसदसि महाधीरगम्भीरचितः ॥ 2 ॥

3. तस्यात्मजो हरिहरः सकलार्थविज्ञो,
राजद्यशो हरिहराङ्कितचित्तवृत्तिः ।
तस्मादभूद् बहुगुणो भुवि देवदासः,
तस्माद् गदाधर इवाथ गदाधराख्यः ॥ 3 ॥

सुधाकरस्तस्य बभूव पुत्रः,
सुधाकरो येन जितः स्वकीर्त्त्या ।
सिद्धेश्वरः सिद्ध इवापराऽभूत्,
तस्मात्ततः श्रीनरसिंहः नामा ॥ 4 ॥

लौकिंकवन्द्यः सुतपोऽभिलाषी
क्षेत्राधिवासी स पितामहो मे ।
श्री श्री निवासस्तनयस्ततोऽभूत्,
पुराणशास्त्रागमपारगामी ॥ 5 ॥

ततः पिता मेऽजनि वासुदेवः,
नृसिंहसेवा प्रसमस्तकामः ।
धीरः सुशान्तः सपुराणवेत्ता,
नीलाचले मौक्तिकमण्डपे यः ॥ 6॥

श्रीवृन्दारकवृन्दवन्द्यचरणः श्रीमन्नृसिंहाश्रयः ।
सम्भूतो रघुनाथ नामा विदितस्तस्मात् सुधी भूसुरः ॥ 7॥

- A Descriptive Catalogue of Sanskrit Manuscript of Orissa, Vol.-1.

वासस्थानम्-

केषाञ्चिन्महाराजानां सभायां राजकार्यं निर्वाहयन्त: केचन [1]कौण्डिन्य-वंशजा: उत्कलदेशेऽभवन् । तत्र कश्चित् वासुदेवाख्यो जगन्नाथमन्दिरस्य मुक्तिमण्डपे पण्डितराजरूपकेन तिष्टन् स्ववृत्तिमकरोत् । अन्येऽपि पुरीवासस्थानं न पर्यत्यजन् । किन्तु पण्डित: नरसिंहदेवपूजक: [2]प्राचीनद्या उत्तरस्यां दिशि ओड्रदेशस्य साईलोविषयकस्य गडगडाग्रामेऽतिष्टत्, यदा गङ्गेश्वरदुर्गस्याधिपतिश्चक्रधरो बभुव । तस्मिन् कुले जातस्य रघुनाथदासस्य [3]पिता वासुदेवदास:, माता अम्बिका ।

समय:-

अस्य रघुनाथदासमहोदयस्य समयनिर्धारणविषये यद्यपि अधिकप्रमाणं नोपलभ्यते तथापि यावदुपलभ्यते, तदत्र प्रस्तूयते ।

(क) साहित्यभूषणग्रन्थानुसारम् - ‘‘हरिकृष्णदेवस्य द्वितीयाङ्के श्रावणमासि शुक्लपक्षे नवम्यां वृहस्पतिवासरे रघुनाथदासेन लिखितमिदं पुस्तकम् । इति यदुक्तं [4]तदनुसारं 18.7.1715 समय इति भवति । अर्थात् हरेकृष्णदेवस्य शासनकाले (1715-19) उपर्युक्तग्रन्थो विरचितो भवतीति सिध्यति ।

1.(क) कौण्डिन्यकुलजातेन, वासुदेवाम्बिकाभुवा ।
वृत्तावलिरियं यत्नाद्रघुनाथेन तन्यते ॥ - वृत्तावलि:, पृ. 1.

(ख) इति श्रीकौण्डिन्यकुलसम्भव-वासुदेवात्मन-श्रीरघुनाथदासविरचितायां भट्टिटिकायां द्वाविंशतितम: सर्ग: समाप्तोऽयं ग्रन्थ: । भट्टिटीकासमाप्तौ ।

2. कातन्त्रविस्ताराक्षेपनिगूढार्थप्रकाशनम् ।
कुरुते रघुनाथे श्रीवासुदेवाम्बिकासुत: ॥
- कातन्त्राविस्ताराक्षेपनिगूढार्थप्रकाशनम् ।

3. ओड्रे नीवृत्ति साईलोविषयके प्राच्युत्तरस्यां दिशि,
ग्रामो यस्त्वतिराजते गडगडा नाम चिरात्पालित: ।
नाम्ना चक्रधरेण दुर्गविलसत् गङ्गेश्वरस्थायिना
तत्रस्थं रघुनाथ नाम विदितं विप्रं नृसिंहोऽवतु ॥ -सा. भू. पृ.-11

4. Indian Emphemecris, P-233.

(ख) तस्यान्यस्मिन्नपि "अमरकोषटीका" नाम्नि पुस्तके दर्शितमस्ति यत्-

वीरकेशरीदेवस्य त्रयोविंशाङ्के माधवे ।
जयदेवेन पुस्तस्य समाप्तिं लेखनं गतः ॥
नारायणाभिधेयस्य पुस्तस्य पठनाय सः ।
सटीकोऽमरकोषोऽयं लिखितः बहुयत्नतः ॥

अत्र खोरधाराजाधिपति-गजपतिवीरकेशरीदेव (1736 - 93 सम्बत्सरः) स्य शासनकाले त्रयोविंशतिवर्षे वैशाखमासि [1]28-8-1754 तः 7-9-1755 समयाभ्यन्तरे अमरकोषटीका लिखिता । अर्थात् अमरकोषटीकासमाप्तिकालात् प्राक् वर्षत्रयात् अथवा वर्षचतुष्टयात्पूर्वमेव टीकाया उपक्रमो भवेदित्यनुमीयते । अतः [2]1750-51 सम्बत्सरेऽस्य लेखनमिति सम्भाव्यते ।

(ग) एतत्कृतकालनिर्णयाख्यग्रन्थस्य प्रतिलिपीकरणमनन्तदासेन 19-दिने समापितम् । अत 19-10-1728 दिनात्पूर्वमेव कालनिर्णयस्य रचनाकाल इति मन्यते ।

(घ) केदारनाथमहापात्रेण प्रमाणीकृतं यद् अस्य रघुनाथमहाभागस्य त्रिंशद्वर्षे साहित्यभूषणस्य समाप्तिर्जाता इति । एतेनापि अस्य जीवनकालः 1685 सम्बत्सर इति सिद्धो भवाति ।

(ङ) पुनश्च रघुनाथदासेन तर्कभाषा सिद्धान्तमञ्जरी इति द्वौ ग्रन्थौ प्रतिलिपीकृतौ । तयोः निम्नभागयोः लिखितं दृश्यते-

श्रीदिव्यसिंहनृपतेश्चतुर्विशाङ्के पौषशुक्लद्वादशी शनिवारः ।
श्रीदिव्यसिंहनृपत्तेश्चतुर्विंशाङ्के माघशुक्लचतुर्द्दशी शनिवारः ।

तर्कभाषासिद्धान्तमञ्जरीग्रन्थयोः[3]21.12.1710, 6.1.1711 च इति प्रतिलिपीकरण-कालो भवति ।

---

1. झङ्कार, सं. X, No.9, पृ. 831 तः 848
2. O.H.R.J, Vol.XI, No.2, P-78.
3. Indian Emphemecris by Pillai, Vol. VI, page-233.

(च) अपि च रघुवंशटीका तस्य पौत्रस्य नारायणदासस्यावबोधनायानेन कृता 1750 सम्बत्सरे । किन्तु अमरकोषटीका रघुनाथदासस्य पुत्रेण प्रतिलिपीकृता 1754 त: 1755 वर्षे ।

अत: उपर्युक्तग्रन्थानां समयनिर्धारणेन 1685 त: 1750 सम्बत्सरपर्य्यन्त-मस्य रघुनाथदासस्य जीवनकाल इति [1]केदारनाथमहापात्रेण एतत्स्थिरीकृतम् । परन्तु एनं न समीचीनम् । तस्यापि वंशजेन बलरामदासेनोत्कलभाषा विलिखिते [2]"सुन्दरी" नाम्नि ग्रन्थे "1775 सम्बत्सरे मृत्युं गत[3]: इति ।

किं च [4]रत्नकोशाख्यग्रन्थस्य लेखनसमाप्तिकाल: 1935 सम्बत्सरे अभूदित्यस्ति । एतद्ग्रन्थे ग्रन्थकर्तृकालात् 160 वर्षात्पूर्वं रघुनाथ: पञ्चत्वं गत इत्युक्तिरस्ति । अत: रघुनाथदासस्य मरणकालो 1775 वत्सरमेव प्रमीयते । इदं मतमपि [5]अद्वैतचन्द्रधलमहाभागे कृते "साहित्यभूषणम्, तस्य सम्पादनं समीक्षणात्मकमध्ययनञ्च" इति शोधप्रबन्धे दर्शितमस्ति । तथा च 1685 सम्बत्सरे लब्धजन्मा रघुनाथमहाभाग: 1775 सम्बत्सरे पञ्चत्वं प्राप्त इति सुनिर्धारितम् ।

अस्य कृति:-

अयं पण्डित: बहून् ग्रन्थान् विरच्य उत्कलसंस्कृतसाहित्यवाङ्मयं वर्द्धयति । अपि च प्राक्तनग्रन्थानां किमपि कृतवानिति ज्ञायते । तेषां नामानि अधो प्रदर्श्यन्ते-

(क) स्वविरचितग्रन्था:-

1 - भट्टिकाव्यस्य टीका (सर्वस्व)
2 - साहित्यभूषणम् (अलङ्कारशास्त्रम्)
3 - वृत्तावलि: (अलङ्कारशास्त्रम्)
4 - नलोदलकाव्यटीका (कालिदासकृता)
5 - रघुवंशकाव्यस्य टीका (काव्यम्)

---

1. O.H.R.J., Vol. XI., No. 2., Page- 82.
2. सुन्दरीकाव्य - पृ. - 29
3. सतरशपञ्चस्तरिरे कले मृत्युवरण
4. रत्नकोष:, पृ. - 241
5. अद्य जगन्नाथसंस्कृतविश्वविद्यालयस्य साहित्यविभागेऽध्यापक:

6 - श्राद्धनिर्णय: (धर्मशास्त्रग्रन्थ:)
7 - न्यायरत्नावली (न्यायशास्त्रोपरि)
8 - उत्पाततरङ्गिणी (ऐतिहासिकग्रन्थ:)
9 - वनदुर्गापूजा (पूजापद्धतिः)
10-काव्यप्रकाशटीका (अलङ्कारग्रन्थ:)
11-कालनिर्णय: (धर्मशास्त्रग्रन्थ:)
12- अमरकोषटीका (कोषग्रन्थ:)
13- वर्द्धमानप्रकाश: (न्यायग्रन्थ:)
14- कारकनिर्णय: (व्याकरणग्रन्थ:)
15- कातन्त्रविस्ताराक्षेपनिगूढार्थप्रकाशनम् (व्याकरणशास्त्रम्)
16- सारसिद्धान्तसंग्रह: (व्याकरणग्रन्थ:)

(ख) लिपीकृतग्रन्था:-

1. द्रव्यभाष्यभाव: (वैशेषिकदर्शनम्)
2. सिद्धान्त मुक्तावली (वैशेषिकदर्शनम्)
3. तर्कभाषा (न्यायग्रन्थ:)
4. सिद्धान्तम जरी (न्यायग्रन्थ)
5. वैद्यकल्पलता (आयुर्वेदग्रन्थ:)

नवमोऽध्याय:

द्रव्यभाष्यभावस्य सामीक्षिकमध्ययनम्

मङ्गलाचरणविचार:

"दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते" [1]त्यादिश्रुतिवाक्यबलेन स्वर्ग-प्राप्तिकामनया दर्शादियज्ञानुष्ठानं कर्त्तव्यम्, तद्वत् चिकीर्षितग्रन्थरचनाया: प्रागेव "समाप्तिकामो मङ्गलमाचरेदिति [2]श्रुतिप्रमाणबलादेव ग्रन्थे मङ्गलं करणीयमिति ।

1. उदेति जुहोति, अनुदिते जुहोति - इत्यादि ।
2. ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मण: पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकवुभौ ॥ (उपस्कारे उदाहृतम् पृ.६)

अत: प्रशस्तपादाचार्यस्तु तत्कृत-पदार्थधर्मसंग्रहाख्यग्रन्थेषु "प्रणम्य हेतु-मीश्वर" मिति पद्येन हेतुमीश्वरं कणादनामानं मुनिञ्च प्रणम्य ग्रन्थसमाप्तिकामनया मङ्गलं करोति। पुनरपि भाष्यस्य टीकाकारो गोपीनाथमिश्र: "क्षीराम्भोधि" इत्यस्मिन् श्लोके शार्ङ्गपाणिं नमस्करोति स्वग्रन्थस्य समाप्तये।

एवमपि वैदिकयुगे "वेदनिष्टवाक्यादीनामुद्धरणं कृत्वा सम्यकृतया, वेदमन्त्रादीनपि यथारीत्या पठनात्परमेव कार्यमारभ्यते। तत: परस्मिन् समये सूत्रयुगे [1]अथशब्द: सूत्रारम्भे विघ्नोपशान्तये ग्रन्थसमाप्तये च प्रदीयते स्म। अपि च भाष्ययुगे मीमांसासूत्रस्योपरि शवरमुनिकृतशावरभाष्यं, वेदान्तसूत्रस्योपरि श्रीमच्छङ्कराचार्यकृतशारीरिक भाष्यम्, वैशेषिकस्योपरि प्रशस्तपादचार्य-कृतपदार्थधर्मसंग्रहग्रन्थ: इत्यादय:। तेषु अपि स्वकीय परमार्थदेवानां स्तुतिं कुर्वन् ते स्वग्रन्थान् विरचितवन्त:। न केवलमास्तिकदार्शनिकानां विरचितग्रन्थेषु मङ्गलम्, अपितु [2]नास्तिकदार्शनिकानां ग्रन्थेष्वपि मङ्गलं दृश्यते। अत: एतदधिकृत्य किञ्चिद्विचार्यते।

ननु ग्रन्थारम्भसमये तद्ग्रन्थकरणे सामर्थ्यप्रवृत्तये मङ्गलं विना ग्रन्थसमाप्तिसम्भावनाया: विधानमिति चेन्न। ग्रन्थस्यान्तिमप्रसङ्गस्य समाप्त्य-भावसम्भावनायां वैपरीत्यकर्मदर्शनापत्ते:। अपि च बौद्धादिनास्तिकादीनां ग्रन्थेषु मङ्गलं विना समाप्तिदर्शनान्न मङ्गलं ग्रन्थसमाप्तिं प्रति कारणमिति व्यतिरेकसहचार: इति चेन्न। पूर्वार्जितपुण्यादिकार्यहेतुबलेन कार्यसिद्धिदर्शनात्। न मङ्गलं प्रत्यक्षत: ग्रन्थस्य चरमवर्णानुकूलसम्बन्धरूपसमाप्तिं प्रति न कारणमिति वाच्यम् नास्तिकग्रन्थकर्त्तृणा ग्रन्थादिषु तेषामिष्टदेवतास्मरणत्वादेव तेषां मङ्गलविधानम्।

---

1. अथातो धर्मं व्याख्यास्याम: (वै.सू. 1-1-1), अथातो ब्रह्मजिज्ञासा" (वे.सू. 1-1-1) अथातो धर्मं व्याख्यास्याम:" (यो.सू. 1-1-1)
2. यस्य ज्ञानमनन्तवस्तुविषयं य: पूज्यते दैवतै-
नित्यं यस्य वचो न दुर्नयकृतै: कोलाहलैर्लुप्यते।
रागद्वेषमुखद्विषां च परिषत्क्षिप्तां क्षणाद्येन सा,
स श्रीवीरविभुर्विधूतकलुषां बुद्धिं विधत्तां मम॥ - न्या. कु. प्रादौ

अतः मङ्गलं कारणम्, विघ्नध्वंसो व्यापारः, समाप्तिः कार्यमिति स्पष्टार्थः। अत्र तेषां विघ्नध्वंस-समाप्ति-मङ्गलानां सम्बन्धविचारो विधीयते। यथा उक्तं [1]न्यायसिद्धान्तमुक्तावल्याः टीकायां श्रीकृष्णवल्लभाचार्येण-

प्रथमे मङ्गलविघ्नध्वंसयोः कार्यकारणभावः। विशेष्यतासम्बन्धेनाऽऽत्मवृत्तिविघ्नध्वंसं प्रति स्वानुकूलकृतिमत्त्वसम्बन्धेन नमस्कारात्मकं मङ्गलं कारणमिति आत्मनिष्ठकार्यकारणभावः। स्वोत्पत्त्यवच्छेदकतासम्बन्धेन शरीरे विघ्नध्वंसस्य वर्त्तमानत्वात् स्वापकर्षबोधानुकूलव्यापारात्मकस्य मङ्गलस्य शरीरे स्वानुकूलकृत्यवच्छेदकतासम्बन्धेन वर्त्तमानत्वाच्च शरीरनिष्ठकार्यकारणभावः। अथवा स्वोत्पत्त्यवच्छेदकतासम्बन्धेन शरीरवृत्तिविघ्नध्वंसं प्रति स्वानुकूलकृत्यवच्छेदकतासम्बन्धेनाऽऽश्रयतया वा शरीरवृत्तिमङ्गलं कारणमिति शरीरनिष्ठकार्यकारणभावः। स्वविशिष्टात्मसमवेतज्ञानजन्यत्वसम्बन्धेन विघ्नध्वंसस्य, स्वविषयकज्ञानजन्यशब्दघटितत्वसम्बन्धेन मङ्गलस्य च ग्रन्थे वर्त्तमानत्वात्, उच्चते-स्वविशिष्टात्मसमवेतज्ञानजन्यत्वसम्बन्धेन ग्रन्थनिष्ठविघ्नध्वंसं प्रति स्वविषयकज्ञानजन्यशब्दघटितत्वसम्बन्धेन ग्रन्थनिष्ठं मङ्गलं कारणमिति ग्रन्थनिष्ठकार्यकारणभावः।

अपि च समाप्तिमङ्गलयोः कार्यकारणभावः। स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्त्वसम्बन्धेनाऽऽत्मवृत्तिसमाप्तिं प्रति स्वानुकूलवृत्तिमत्त्वसम्बन्धेन मङ्गलं कारणमिति आत्मनिष्ठकार्यकारणभावः। स्वजनकविघ्नध्वंसोत्पत्त्यवच्छेदकतासम्बन्धेन शरीरवृत्तिसमाप्तिं प्रति स्वजन्यविघ्नध्वंसावच्छेदकतासम्बन्धेन शरीरनिष्ठं मङ्गलं कारणम्, अथवा स्वप्रतियोगिचरमवर्णावच्छेदकतासम्बन्धेन शरीरवृत्तिसमाप्तिं प्रति स्वोत्पत्त्यवच्छेदकजातीयसम्बन्धेन शरीरनिष्ठमङ्गलं कारणमिति शरीरकार्यकारणभावः। स्वप्रतियोगिचरमवर्णघटितत्वसम्बन्धेन ग्रन्थनिष्ठसमाप्तिं प्रति स्वविषयकज्ञानजन्यशब्दघटितत्वसम्बन्धेन ग्रन्थनिष्ठमङ्गलं कारणमिति ग्रन्थनिष्ठकार्यकारणभावः।

---

1. न्या. सि. मु. पृ.-6

अपि च समाप्तिविघ्नध्वंसयोः कार्यकारणभावः। स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्त्वसम्बन्धेन आत्मवृत्तिसमाप्तिं प्रति विशेषणतासम्बन्धेनात्मविघ्नध्वंसः कारणमिति आत्मनिष्टकार्यकारणभावः। स्वजनकविघ्नध्वंसावच्छेदकतासम्बन्धेन शरीरनिष्टविघ्नध्वंसकारणमिति शरीरनिष्टकार्यकारणभावः। स्वप्रतियोगिचरमवर्णघटितसम्बन्धेन ग्रन्थनिष्टसमाप्तिं प्रति स्वविशिष्टात्मसमवेतज्ञानजन्यत्वसम्बन्धेन ग्रन्थनिष्टं विघ्नध्वंसः कारणमिति ग्रन्थनिष्टकार्यकारणभावः।

अतः मङ्गलं करणीयं ग्रन्थसमाप्तये, ग्रन्थसमाप्तौ विघ्नोपशान्तये च। [1]प्राचीनमते प्रारीप्सितग्रन्थस्य चरमवर्णानुकूलस्वसम्बन्धकृतिमत्त्वं प्रति मङ्गलं कारणमिति। [2]नव्यास्तु चरमवर्णसङ्घटितस्वसम्बन्धजन्यरूपग्रन्थस्य यथारूपविघ्नविधातकपूर्वकं मङ्गलं कारणमिति।

(क) प्राचीनमते-

(1) ननु कादम्बर्यां [3]मङ्गलसत्त्वेऽपि अन्तिमवर्णसूत्रितस्वविषयरूपसमाप्त्यभावेन कारणसत्त्वे कार्याभावइति अन्वयव्यभिचार इति चेन्न प्रभूतमङ्गलाचरणस्याऽऽवश्यकस्थले तस्मात् न्यूनमङ्गलसत्त्वेन ग्रन्थपरिसमाप्त्यभावात्। (2) पुनरपि मङ्गलाभावेऽपि ग्रन्थसमाप्तिकार्यसत्त्वात् नास्तिकादीनां

---

1. (क) मङ्गलं समाप्तिं प्रति कारणम्। - कि. पृ. 7.
   (ख) मङ्गलस्य समाप्तिजनकत्वमिति प्राञ्चः। - पूर्ववत् पृ. 7/4
   (ग) अत एव कृतनस्कारस्यापि कादम्बर्यादिरपरिसमाप्तिः, विशिष्टनमस्काराभावात्, तदवशिष्टस्य कार्यगम्यत्वात्। - न्या. क., पृ. 3.
2. (क) मङ्गलं विघ्नध्वंसं प्रति कारणम्। - कि - पृ. 7.
   (ख) न च कृतमङ्गलस्यापि फलादर्शनादकृतमङ्गलस्यापि फलदर्शनादननुष्ठानं न हि निष्फले प्रेक्षावान् प्रवर्त्तत इति वाच्यम्। अकरणस्थले जन्मान्तरीयस्य करणस्थले चाङ्गवैगुण्यस्य कल्पनया सकलत्वनिश्चयात्। - वै. उ. पृ. -6.
3. (क) सत्यपि मङ्गले यत्र च समाप्त्यभावस्तत्र नापि मङ्गलत्वेन, नापि विघ्नध्वंसत्वेन वा। समाप्त्यभावस्तु मङ्गलानन्तरोत्पन्नविघ्नात्। - गो.4
   (ख) तस्य कर्त्तृकर्मसाधनवैगुण्यहेतुत्वात्।
   सादृगुण्येऽपि विघ्नहेतूनां वलीयत्वात्॥ - कि. पृ.।

ग्रन्थेषु कथं मङ्गलं ग्रन्थसमाप्तिं प्रति कारणमिति चेन्न; [1]तत्र पूर्वजन्मसञ्चित-पुण्यसत्त्वेन तदानीन्तनजन्मनि विघ्ननाशभावस्य स्वीकारात्।

(ख) नवीनमते-

नव्यानाम्मते (1) [2]विनापि मङ्गलं नास्तिकादीनां ग्रन्थेषु समाप्तिदर्शनात् मङ्गलमेव विघ्नोपशान्तकारणम्, न तु ग्रन्थसमाप्तेरिति। (2) ननु सत्यपि मङ्गले न विघ्नध्वंसाभावादन्वयव्यभिचार इति चेत्। प्रभूतमङ्गलकृतत्वेन विघ्नध्वंसाभावस्य कार्यदर्शनाभावात्। अत नान्वयव्यभिचारः अस्मत्पक्षे, समाप्तावेव सम्भव इति। (3) ननु [3]श्रुत्यादौ मङ्गलाभावे तस्य समाप्तिदर्शनादिति व्यतिरेकसहचार इति चेन्न; तेषु ईश्वरपदप्रयुक्तहेतुशब्दस्य प्रयोगात्। अतः विघ्नध्वंसं प्रति मङ्गलं कारणम्।

अत एव [4]**सेतुटीकाकार-पद्मनाभमिश्रेण** चतुर्विधानि मङ्गलकरणस्य कारणानि प्रदर्शितानि। यथा- (1) केचित्समाप्यतामिति कामनया मङ्गलमाचरन्ति, (2) परे निर्विघ्नं समाप्यतामित्यनया, (3) अन्ये विघ्नो माभूदिति प्रागभावविषयिण्या, (4) इतरे विघ्नोनश्यतु इति ध्वंसावगाहिन्या। उपर्युक्तचतुर्विधेभ्यः कारणेभ्यः अन्यतमं कारणमनुसृत्य मङ्गलमाचरन्ति बुधाः। अतः प्रशस्तपादस्तु नमस्यति - [5]प्रणम्य हेतुमीश्वरेति इत्यादिना। प्रणामः

---

1. (क) तथा च बौद्धादिकृतग्रन्थसमाप्तिजन्मान्तरानुवर्त्तमानविघ्नत्वाभावजन्यत्वेन विघ्नस्य ध्वंसपूर्वकत्वाभावात्तस्य मङ्गलजन्यत्वेऽपि न क्षतिः। - गो. 3.
   (ख) न चैवं सति किमनेनैति वाच्यम्, प्रचितस्यास्यैव वलवत्तरविघ्नवारणेऽपि कारणत्वात्। - कि. पृ. - 1.
2. मङ्गलं विघ्नध्वंसस्य फलत्वमाचार्यसम्मतिमिति तु विरलैरेव ज्ञातुं शक्यते। अत एवातिचतुरेण चिन्तामणिकृता स्वकीयत्वेन स्वीकृतोऽयं पन्था।
3. प्रत्यक्षस्थले परिपन्थी न तु शब्दे, तत्र धर्मसामानाधिकरण्येनापि जन्यत्वग्रहसम्भवात्। अत एव आचार्यचरणाः तत्त्वचिन्तामणिकारः आगममूलत्वाच्चास्यार्थस्य व्यभिचारो न दोषायेति। - सेतु - 10.
4. सेतु टीकायाम्, पृ.-10.
5. प्रकर्षवाचिता प्रशब्देन भक्तिश्रद्धातिशयपूर्वकं नमस्कारमाचष्टे। - न्या. क., पृ. 3.

भक्तिश्रद्धातिशयपूर्वकः [1]नमस्कारः । सः त्रिविधः कायिक-वाचिक-मानस-भेदात् । [2]कायिकश्चकरशिरःसंयोगादिः दण्डवत् पतनादिश्च । वाचनिकत्वं मानसनमस्कारानुमापकशब्दत्वम् । मानसत्वंमात्मन्यस्मदपकृष्टवत्त्वम् । नान्यो विशेषः ।

मङ्गलस्य जातिस्वरूपम्-

तदनन्तरं मङ्गलत्वस्य सामान्यं निराकरोति - मङ्गलत्वं न जातिः संयोगादिना साङ्कर्य्यात् घटपटसंयोगवत् मङ्गलत्वपरिहारेण शब्दात्मिकायां स्तुतौ साङ्कर्य्यस्य स्फुटत्वात् । अपि च मङ्गलत्वस्य पूर्ववर्तित्वं अन्यं प्रति पूर्ववर्त्तिना गृहीतेनान्यथासिद्धेः घटाकाशवत् । अतः विघ्नध्वंसकारणत्वस्य मङ्गलस्य समाप्तिं प्रति पूर्ववर्त्तित्वम् । ननु नमस्कारत्वं न जातिः संयोगत्वनमस्कारत्वयोरेकत्र कायिकसमानाधिकरणत्वात् इति चेन्न; नमस्कारश्च कायिक-मानसिक-वाचिकभेदात्, अयमेव विषयः [3]सेतुकारेण निरस्तः वर्णितोऽस्ति ।

''प्रणम्य'' पदे शक्तिविचारः

''प्र'' उपसर्गेण नुम् धातोः ल्यप् प्रत्यये कृते ''प्रणम्य'' पदनिष्पन्नत्वात् प्रशब्दोपादानं प्रकृष्टो नमस्कार इति प्रशब्देन प्रजयादौ बाधकत्वेनैतत्पदशक्यमिति उपसर्गविशेषाणां शक्तिकल्पितत्वादतो शक्तिर्विचार्यते ।

---

1. स्वापकर्षबोधानुकूलव्यापारः नमस्कारः । - द्र. भा. भा.7
2. द्र. भा. भा. पृ. 7.
3. ''ननु कायिकत्वं न जातिः कायिकस्वस्थोभयकर्मजन्यसंयोगे सत्वेन तत्र अन्यतरकर्मजन्यतावच्छेदकजातिविरहादन्यतरकर्मजन्यतावच्छेदकजातेः स्थाणुश्येन-संयोगे सत्त्वेन तत्र कायिकत्वाभावादन्यतरकर्मजन्ये कायिके द्विसत्त्वात् सङ्करादिति चेन्न ।अन्यतर कर्मादिजन्यतावच्छेदकजातिविरहेण तामादाय सङ्कराभावात् । ननु वाचनिकत्वं न जातिः महत्त्वस्य महादेवेत्यत्र सत्त्वेन वाचनिकत्वाभावात्, वाचनिकत्वस्य नतिरित्यत्र सत्त्वेन महत्त्वाभावात् तम इत्यत्र द्विसत्त्वादिति चेन्न। नामत्वादिव्याप्यनानावाचनिकत्वस्वीकारात् । ननु मानसिकत्वं न जातिः कृष्णादहमपकृष्टो घटश्चेति समूहालम्बनेऽव्याप्यवृत्तित्वापत्तेरिति । समूहालम्बनस्य मानसिकत्वानङ्गीकारात्, अव्याप्यवृत्तिजातिस्वीकाराद् वा ।'' - सेतु-17.

[1]शक्तिर्नाम पदेन सह पदार्थस्य सम्बन्धः । तदेव शाब्दबोधेऽऽक्षिप्यते । [2]एकसम्बन्धनिरूपितार्थं बोधयितुं व्यापारविशेषो शाब्दबोधः इति । तदेव (शाब्दबोधः) स्वपदवाक्यादिसन्निवेशितशक्तिना बोधयति । अतः शक्तिः विचार्या । ''घटोऽयमिति'' वाक्ये घटपदसम्बन्धघटत्वयोः तत्प्रकारेश्वरे ज्ञानत्वं शक्तित्वम् । वैयाकरणास्तु ''गम्'' धातो ''तिप्'' प्रत्यययोगाद् गच्छतीति [3]पदजन्यबोधविषयता, तदेव वाक्यार्थे पदत्वस्य सङ्गतिः इति चेन्न; पदं तु ईश्वरेच्छात्मकत्वात् पदपदार्थतन्निरुपितशक्तिमत्त्वेन प्रतीते; नोचेत् कचटत-पादीनां परस्परसंहत्याभावेऽपि परस्पराकांक्षाप्रतीत्यादिगुणाभावेऽपि प्रयोगदर्शनं भवेत् । इदं पदममुमर्थं सम्बोधयतीति भ्रमरहितपदत्वसम्बन्धितेश्वरेच्छा-संयुक्तबोधस्तु शक्तिरिति । अत [4]अस्वरसेन प्रोक्तम्- स एव शक्तिग्रहो व्याकरणोपमान-कोशा प्तवाक्यव्यवहार-वाक्यशेष-विवृत्तिप्रसिद्धपद-सान्निध्यभेदात्सप्तविधो दृश्यते ।

अपि च ओदनं पचतीत्यादौ पदाभ्यां शक्तिद्वयेन युगपदुपस्थिततया ज्ञानम्, न तु एकपदाद् एकशक्त्या वा शाब्दबोधः । अत्र तु शक्तिलक्षणाभ्या-मुभाभ्यामन्वयबोधात् । परन्तु प्रणम्य इत्यत्र एकपदेऽपि उपसर्ग- संसर्गात् कुत्र शक्तिर्जायते ? उपसर्गे, धातौ वा ? नोपसर्गे पदं विना उपसर्गस्यार्थाभावात् । न धातौ उपसर्गसंयागेन प्रकृतपदानां भिन्नार्थप्रती तित्वात् । अतः नापि धातोर्विशिष्टे केवले, न च विशिष्टे लक्षणा, किन्तु केवले लक्षणा इति सर्ववादिसम्मतम् ।

1. व्यवहारेषु बृद्धानां, वाक्यश्रवणभाविषु ।
अवापोद्धारभेदेन, पदानां शक्तिनिश्चयः ॥ - (वाक्यार्थमातृका-पृ-6) प्र.प. 378
2. न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेऽपि पदानि नः
तन्मात्रावसितेष्वेषु पदार्थेभ्यस्स गम्यते । - श्लो. वा. 7.229.
3. आश्रयाऽवधिरूद्देश्यः सम्बन्धः शक्तिरेव वा
यथायथं विभक्त्यर्थं सुपां कर्मेति भाष्यतः । - मु. उदाहृत श्लोक, पृ. 296.
4. शक्तिग्रहं व्याकरणोपमान-
कोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद् विवृत्तेर्वदन्ति,
सान्निध्यतः सिद्धपदस्य बृद्धाः ॥ - न्या. मु. उदाहृत, पृ.296.

मोक्षविचार:

मोक्षमार्गमनुसरन्त: सर्वे शास्त्रकारा: अनेकसन्देहात्मकमार्गं प्रदर्शयन्त: सन्त: मोक्षमार्गस्य प्रकृततत्त्वानि न बुध्यन्ते। अत: कोऽयं मार्ग: प्रकृत्या औचित्यपूर्ण इति विचार्य्य साम्प्रतं वैशेषिकदर्शनस्य उत्कर्षप्रतिपादनपरकं तत्त्वमारभ्यते।

अधुना वैशेषिकतत्त्वानि अभ्युपगच्छन्तो दार्शनिका: ''यतोऽभ्युदय-नि:श्रेयससिद्धि: स: धर्म'' (वै.सू. 1.1.2) इतिसूत्रात् [1]अभ्युदयनि:श्रेयसपदद्वयस्य मोक्षपरकमर्थं स्वीकुर्वन्ति। अत: कणादेन वेदप्रामाण्यादिना [2]अभ्युदय:; [3]द्रव्यगुणादिपदार्थानां साधर्म्यवैधर्म्यज्ञानात् नि:श्रेयसविषयौ स्वीकृतौ। अत: सर्वेषां दार्शनिकानां मतानि अपांकुर्वता वैशेषिकशास्त्रेण स्वमतानुसारं संस्थाप्यते नि:श्रेयसम्।

(क) सांख्यमतानुसारं मोक्षकल्पनम्-

[4]प्रकृतिपुरुषयोर्वियोगावस्थैव मुक्तिरिति मन्यन्ते पञ्चविंशतितत्त्वज्ञा:। [5]पञ्चविंशतितत्त्वज्ञानपूर्वकोऽपवर्ग इति च। पुरुषस्य कौटिस्थ्यं मोक्ष वेति [6]मोक्षावस्थायां महदादिविकृतभूतप्रकृतिं मूलप्रकृतिञ्च परित्यज्य पुरुषस्या-

---

1. अभ्युदयस्तत्त्वज्ञानं नि:श्रेयसमात्यन्तिकी दु:खनिवृत्तिस्तदुभयं यत: स धर्म: ॥
   - वै. सू. उ., 1. 1. 2.
2. तद्वचनादम्नायस्य प्रामाण्यम् ॥ - वै. सू., 1.1.3.
3. (क) समवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्नि:श्रेयसम् ॥ - वै.सू., 1.1.4
   (ख) ''अभ्युदय: सुखं नि:श्रेयसमेककालीनसकलात्मविशेषगुणध्वंस:। प्रमाणञ्च धर्मे देवदत्तशरीरादिषु भोक्तृविशेषगुणप्रेरितभूतपूर्वकं कार्यत्वे सति तद्भोगसाधनत्वान्निमित्तस्रग्वदिति।'' - वृत्तिकार: -22
4. (क) तस्मान्न बध्यते नापि मुच्यते नापि संसरति कश्चित्।
   संसरति बध्यते मुच्यते च नानाश्रया प्रकृति: ॥ - सां. का. 7.62.
   (ख) सर्वै: सप्तभिरेव तु बध्नात्यात्मानात्मना प्रकृति:।
   सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण ॥ - सां. का. 63.
5. जटी मुण्डी शिखी वापि यत्र कुत्राश्रमे रता:।
   पञ्चविंशतितत्त्वज्ञा: मुच्यते नात्र संशय: ॥ -महाभारतम्, सां.का.उद्धृत-पृ.1.
6. (क) द्वयोरेकतरस्य वौदासीन्यमपवर्ग: ॥ सां. सू. 3.65.
   (ख) ज्ञानिनं प्रति निवृत्तापि प्रवृत्तिरन्यं प्रति सृष्टौ प्रवर्त्तते।
   - नागेशभट्ट, सां.सू. 3/66 पृ. 124.

बन्धनावस्था मुक्तिः । अत्र तु अवधेयम् - प्रकृतिपुरुषयोरुभययोर्मेलनेन बन्धः । सोऽपि त्रिगुणात्मकः । यदा त्रिगुणात्मकबन्धरुपसंसारं विहाय निराधार-निरुपात्मकपुरुषः याति, न बध्नातुमिच्छति तदेव मोक्ष इति कथ्यते ।[1]यथा मञ्चस्था सती नर्तकी स्वनृत्याद्यभिनयादीन् प्रदर्श्य पुनरेव स्वकीयं रूपं धत्ते, तद्वत् पुरुषः त्रिगुणात्मिकया प्रकृत्या साकं संसारे स्वकीयं कार्यं निष्पाद्य पुनरपि कार्याद् विरमते ।

सः मोक्ष त्रिविध इति कथितम्, प्राकृ तिक-वैकारिक-दाक्षिणभेदात् । प्रकृतावात्मज्ञानाद् ये प्रकृतिमुपासते तेषां प्राकृतिको बन्धः । ये विकारानेव भूतेन्द्रियाहङ्कारबुद्धीः पुरुषबुद्ध्योपासते तेषां वैकारिको बन्धः । अग्निहवनादिकर्मभिः यत् लभ्यते सः [2]दाक्षिणो बन्धः ।[3]केचित्तु मन्यन्ते प्रागेव ज्ञानेन्द्रियाणामुपरमः, तस्माद् धर्माधर्मक्षयः, अन्ते च कैवल्यप्राप्तिरिति ।

साङ्ख्यमतखण्डनम्-

प्रकृतिपुरुषयोर्विवेकदर्शनात् प्रवृत्तेरुपशाखायां प्रकृतौ पुरुषस्यावस्थानं मोक्ष इति चेत् । न । [4] प्रवृत्तिनिष्टप्रकृतेः औदासीन्याभावात् । पुरुषेण सह निबन्धना प्रकृतिश्चेत्, तदपि न समीचीनम्, [5]अचेतनायाः प्रकृतेः प्रवृत्त्यभावात् ।

(ग) त्रिधा हि प्रपञ्चः पुरुषं बध्नाति-भोगायतनं शरीरम्, भोगसाधनानीन्द्रियाणि, भोग्याः शब्दादयो विषयाः, भोग इति च सुखदुःखविषयोऽपरीक्षानुभव उच्यते, तदस्य त्रिविधस्यापि बन्धस्यात्यन्तिको विलयो मोक्ष इति ॥ - शास्त्रदीपिका पृ. 358.

1. रङ्गस्य दर्शयित्वा निवर्त्तते नर्त्तकी तथा नृत्यात् ।
पुरुषस्य तथाऽऽत्मानं प्रकाशस्य विनिवर्त्तते प्रकृतिः ॥ - सां. का. -

2. इष्टापूर्त्तं मन्यमाना वरिष्टम्, नान्यच्छ्रेयो येऽभिनन्दति मूढाः ।
नाकस्य पृष्टे ते सुकृतेन भूत्वा, इमं लोकं हीनतरं वा विशन्ति ॥ मुण्डकोप-1.2.10.

3. (क) द्रष्टव्यम् - पृ. 70
(ख) ज्ञानेन्द्रिकादूपरतेः धर्माधर्मक्षयो भवेत् ।
धर्माधर्मक्षयाच्चाथ कैवल्यमिति गीयते ॥
आद्या हि मोक्षज्ञानेन द्वितीयो रागसंक्षयात् ।
कृस्त्नक्षयात् तृतीयस्तु व्याख्यातं मोक्षलक्षणम् ॥ - क्षेमेन्द्रकृत-सां. तत्त्वविवेचनम् ।

4. चिदर्थशून्या च जडा च बुद्धिः, शब्दादितन्मात्रजमम्बरादि ।
न बन्धमोक्षौ पुरुषस्य चेति, कियज्जडैर्न ग्रन्थितं विरोधिः । - स्या. म., प. - 15.

5. अस्या अचेतनाया विमृश्यकारित्वाभावात् । - न्यायकन्दली - पृ. 8

पुनश्च प्रकृतेः बन्धनमोक्षौ न सङ्गच्छेताम्, तत्पक्षे [1]मानाभावात् । [2]अजामेकामित्यत्र अजाशब्दस्य स्त्रीलिङ्गत्वाभ्युपगमेऽपि [3]प्रसवक्षमत्वाभावात् प्रसवक्षमत्वेऽपि तस्या अनादिकत्वकल्पानाया अनाय्यत्वात् । लक्षणया स्यादिति चेन्न । अविद्यादौ प्रमाणाभावेन मुख्यार्थासम्भवेन लक्षणयानौचित्यात् । एवमपि मोक्षाय न सांख्यदर्शनस्य सामर्थ्यम् ।

(ख) योगमतानुसारं मोक्षः-

दुःखाभावो मुक्तिरिति पातञ्जलाः । दुःखं नाम क्लेशः, प्रारब्धकर्मणा सह क्लेशानामत्यन्तविनाशो मोक्षः । [4]योगेन क्लेशप्रारब्धकर्मणोर्विनाशः शक्येत । सोऽपि त्रिविधः - [5]समाधि- [6]एकाग्रता - 7 निरोधपरिणामाख्यः । तेन त्रयेण दुःखनिवृत्तिः । अविद्यादिपञ्चक्लेशानां शुक्लादिरूपत्रयाणामभिनिवेशात् ज्ञानोदयाच्च निवृत्तिरिति इति[8]भोजराजेन समासेन प्रोक्तम् । [9]निवृत्तिः ईश्वरेच्छानुसारं प्रोक्ता ।

---

1. अत्यन्ताऽसतो नित्यनिवृत्तत्वात्, अथास्ति, तथापि किं निवर्त्तनीयम् ? नित्यत्वेन तन्निवृत्तेरशक्यत्वात् । अथ ज्ञानस्वाभाव एवासौ निवर्त्तनीय इति मतम् । अनुमतमेतत् । दग्धेन्धनानलवदुपशमो मोक्ष इति वक्ष्यमाणत्वात् ।
2. अजामेकां लोहितशुक्लकृष्णा, वह्वीः प्रजाः सृजमानां नमामः ।
   अजां ये तां जुषमाणां भजन्ते, जहत्येनां भुक्तभोगां नुमस्तात् ॥ -तत्त्व. कौ., पृ. -5.
3. न । सहकारिस्वरूपशक्तिरूपेऽदृष्टे स्त्रीलिङ्गनिर्देशस्यानुपपत्त्यभावात्, अनुपपन्नत्वेन चानादित्वमुच्यते ॥ -सेतु- 17.
4. ततः क्लेशकर्मनिवृत्तिः ॥ -यो. सू. 4-30
5. सर्वार्थतैकाग्रतयोः क्षयादयो चित्तस्य समाधिपरिणामः । - यो. सू. 3-11
6. ततः पुनः शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रताव्युत्थाननिरोधसंस्कारयोरभि- भवप्रादुर्भावौ विरोधपरिणामः । - यो. सू. 3.12.
7. क्षणचित्तान्वयो निरोधपरिणामः । - यो. सू. 3.9.
8. (क) क्लेशानामविद्यादीनामभिनिवेशान्तानां कर्मणाञ्च शुक्लादिभेदेन त्रिविधानां ज्ञानोदयात्पूर्वपूर्वकारणनिवृत्त्या निवृत्तिः । -भाजराजकृत भोजवृत्तिः पृ. 325.
   (ख) प्रारब्धातिरिक्ताः क्लेशाख्यमूलेन सह हताः स्युरतो न पुनरुत्पन्न इत्यर्थः । - विज्ञानभिक्षु यो. वा. 4-30
   (ग) दग्धे वीजे यथात्यन्तं प्रादुर्भवति नाङ्कुरः ।
   कर्मवीजं तथादग्धे न रोहति भवाङ्कुरः ॥ - तत्त्वार्थाधिगमसूत्र - 10-7.
   (घ) सती मूले तद्विपाको जात्युपभोगाः । - पात.सू.,1-13.
9. प्रकृतिपुरुषसंयोगवियोगयोरीश्वरेच्छाव्यतिरेकेणानुपपत्तेः ।- भोजवृत्तिः 1.24 सूत्रस्य

योगमतखण्डनम्-

दुःखाभावो मुक्तिरित्यत्र किं [1]प्रागभावश्चेन्न; तस्य दुःखप्रागभावस्यानादित्वेन स्वीकारेणासाध्यत्वात् । प्रध्वंसाभावश्चेत्, प्रध्वंसाभावस्य स्वतः-सिद्धत्वात् । नापि दुःखात्यन्ताभावः, दुःखाभावरुपसाध्यस्यासत्त्वात्, साध्यता-विरोधाच्च । नापि अन्योन्याभावः दुःखाभावस्यानाधारेण तादात्म्यसम्बन्धेना-भावकल्पनायाः अयुक्तत्वात् ।

अपि च दुःखाभावस्य प्रामाण्याभावात्; मुक्तिसम्भवापत्तेः । तस्य दुःखाभावस्य न प्रत्यक्षप्रमाणम्, इन्द्रियजन्यविषयाभावात् । नानुमानम्, दुःखा-भावविषये लिङ्गदर्शनाभावात्; नोपमानम्, तत्सादृश्यपदार्थस्यानुपलब्धेः । नागमो वा, हेयत्वासम्भवाद्दुःखस्य ।

(ग) वेदान्तपक्षे मोक्षस्वीकारः

"यस्याऽमतं तस्य मतम्, मतं यस्य न वेद सः । अविज्ञातं विमानतां विज्ञातमविजानताम्" (के न. उ. 2.3.) इति उपनिषद्वाक्येनाविद्यापरिकल्पित-संसारित्वस्य निवर्त्तनेन नित्यमुक्तात्मस्वरूपं प्राप्यते । [2]अविद्यायां निवृत्तावेव आत्मापवर्गे इति कथ्यते । यथा *"विश्वमायानिवृत्तिः" इति (श्वेत 1.10)* वचनादिति एकदण्डिनः ।

त्रिदण्डिनस्तु [3]भोगायतनं शरीरम्, भोगसाधनानीन्द्रियाणि चक्षुरादीनि, अन्तरिन्द्रियं मनश्च, भोग्याः शब्दादयो विषयाः । तत्सम्बन्धिशरीरस्य पातात्स्व-रूपेण ब्रह्मणि अवस्थानं मोक्ष इति ।

---

1. यावदनागतदुःखप्रागभावानुवृत्ति क्रियत इति चेन्न । प्रागभावस्वभावो वा दुःखनिवृत्तिः, तस्यानागतकतिपयसमयसम्बन्धो वा, यावदनागतसमयसम्बन्धो वा ? नाद्यः, अनादित्वात् । न द्वितीयः - दुःखस्य पुनरूत्पत्तिप्रसङ्गात् । न तृतीयः- प्रागभावत्वविरोधात् । अतः दुःखोत्पादौ संसारित्वम् । - न्या. ली., पृ. 32.

2. ज्ञानान्मोक्ष इति वेदान्तिनस्सङ्गिरन्ते ॥
उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणः गतिः ।
तथा वैज्ञानकर्मभ्यां नराणां मुक्तिरिष्यते ॥ -प्र. प., पृ.341.

3. मोक्षार्थो न प्रवर्त्तेत तत्र काम्यनिषिद्धयोः ।
नित्यं नैमित्तिकं कुर्य्यात् प्रत्यवायजिंघासयोः ॥110॥
तत्र ज्ञानात्मतत्त्वानां भोगात्पूर्वक्रियाक्षये ।
उत्तरप्रत्ययाभावात्, देहो नोत्पद्यते पुनः ॥108॥

वेदान्तमतखण्डनम्-

[1]ब्रह्मात्मनि जीवात्मलयो इति तु न समीचीनम् एकपदार्थे ब्रह्मात्मनि तद्व्यतिरिक्तधर्मिणः जीवात्मनः लयस्वीकारेऽन्यथाप्रसङ्गः स्यात्। अपि च लिङ्गशरीरस्य एकादशेन्द्रियादिकस्य लयाभ्युपगमे दुःखाभावात् नैयायिक-मताभिन्नम्, नान्यो विशेषः इति त्रिदण्डिमतमपास्तम्।

[2]साम्प्रतमेकदण्डिमतखण्डनं क्रियते - दुःखमात्रनिवृत्तिरपवर्गश्चेत्, न, दुःखमात्रनिवृत्तौ प्रमाणादीनां मानाभावात्। न प्रत्यक्षप्रमाणमुक्तम्, इन्द्रियजन्यविषयाभावात्। नानुमानप्रमाणस्य सामर्थ्यं तद्गतलिङ्गाभावात्। नाप्तशब्दो वा आप्तवाक्यानां तत्पक्षे प्रमाणाभावात्।

अपि च [3]अविद्यानिवृत्तौ आत्मजः विज्ञानसुखात्मकं नित्यशरीर-विषयकज्ञानमस्तीति चेत्। आत्मनः सुखत्वाभ्युपगमे संसारावस्थायां नित्य-सुखज्ञानाभावात्। [4]नित्यं ज्ञानमानन्दं ब्रह्म; आनन्दमयत्वस्वीकारे "अहं सुखी" त्यत्रापि संसारदशायां सुखत्वदुःखत्वादीनां प्रयोगदर्शनेन ब्रह्मगुणत्ववत् पुनरपि संसारापत्तेश्च।

ज्ञानजन्योपभोगार्थं शरीरं न प्रवर्त्तते।
तदभावे न कश्चित् हि हेतुस्तत्रावतिष्टते
तस्मात्कर्मक्षयादेव हेत्वभावेन मुच्यते ॥ 101 ॥ श्लो. वा. सम्बन्धाक्षेपः - पृ.475-76.

1. ब्रह्मात्मनि जीवात्मालयो मुक्तिरिति चेन्न। लयो यद्येको भावस्तदा बाधात् नहि द्वयमेकं भवति। लिङ्गशरीरापगमो लयो, लिङ्गञ्चैकादशेन्द्रियाणि तेषां शरीरस्य च विगमो लय इति चेन्न। एतावता दुःखसामग्री विरहस्योक्तत्वात्। तथा च दुःखाभावो मुक्तिरिति पर्यवसानात् ॥
- उ. पृ. 25.

2. नित्यं सुखमात्मनो महत्त्ववन्मोक्षे व्यज्यते, तेनाऽभिव्यक्तेनात्यन्तं विभुक्तः सुखी भवतीति केचिन्मन्यन्ते। तेषां प्रमाणाभावादनुपपत्तिः। न प्रत्यक्षं, नानुमानं, नागमो वा विद्यते - नित्यं सुखमात्मनो महत्त्ववन् मोक्षेऽभिव्यज्यत इति। - न्या. वा. भा., 60.

3. (क) अहं सुखीति आत्मभिन्नत्वेन प्रतीयमानस्य सुखस्यात्मनाभेदे बोधने प्रत्यक्षबोधे श्रुतिव्यापाराभावात्। - द्र.भा.भा. पृ.22.

(ख) निःश्रेयसं त्वविद्यानिवृत्तिर्वेदान्तिनस्तत्र तदभिमतायामभाव रूपायामविद्यायामेव मानाभावात्। मिथ्याज्ञानरूपायाः ध्वंसस्य च दुःखाभावेतरत्वेनापुरुषार्थत्वात्। - सेतु. 27.

4. वै. द्रष्टव्यम् - वै. 3 पृ. 26.

किञ्च [1]मुक्तस्य स्वरूपभूतसुखत्वोत्पन्नस्वीकारे मुक्तावस्थायामात्ममनः-संयोगादिज्ञानकारणस्योत्पन्नाभावात् नित्यसुखविषयस्य उत्पन्नेको वा हेतुर्भवेत् ? ननु आत्ममनःसंयोगे तादृशज्ञानस्य हेतुरिति चेन्न, [2]संसारावस्थायां आत्ममनः-संयोगस्य ज्ञानहेतुत्वे मोक्षावस्थायां विषयसान्निध्याभावात् मनःसंयोगव्यापार-स्यासम्भवात् न सुखोत्पत्तिः स्यात् ।

(घ) मीमांसकमतानुसारं मोक्षः

मीमांसकानां [3]भट्टानुयायिनाम्मते नित्यसुखाभिव्यक्तिः मुक्तिः । तत्र [4]सांसारिकदुःखविच्छेदे सुखाभिव्यक्तौ माक्षः । प्रपञ्चसम्बन्धविलयो मोक्ष इति ।

[5]गुरुमते तु नियोगसिद्धिरेव मोक्षः; तदेव निरानन्दमयत्वेन गुणाभावेन च सिद्धिर्भवति । एवमपि [6]शालिकनाथस्तु - देहस्यात्यन्तवियोगेन धर्माधर्मा-दिगुणानां विशेषपरित्यागः मोक्षरिति ।

---

1. (क) सुखवन्नित्यमिति चेत् ? संसारस्थस्य मुक्तेनाऽविशेषः । यथा मुक्तः सुखेन तत्सम्बधेन च सन्नित्येनोत्पन्नस्तथा संसारस्थोऽपि प्रसज्यादिति उभयस्य नित्यत्वात् ।
   -न्या. भा. पृ. 61.

   (ख) अहं सुखीति आत्मभिन्नत्वेन प्रतीयमानस्य सुखस्यात्मभेदे बोधने प्रत्यक्षबाधने श्रुतिव्यापाराभावात् । न चैतावता सुखमात्रासिद्धावपि तस्य नित्यत्वे मानाभाव इति वाच्यम्, ''आनन्दो ब्रह्मणो रूपमित्यत्र रूपशब्दस्य स्वरूपाधिकत्वे बाधादवच्छेदकपरत्वान्नित्यत्वे च तथासम्भवात् तद्बोधकश्रुतेरेव तत्र प्रमाणत्वात् ।
   - द्र.भा.भा., पृ. 22.

2. द्रष्टव्यम् - न्या. भा., पृ.62.
3. दुःखिनः सुखावस्थायाम्, नश्येयुः सर्व एव ते
   दुःखित्वं चानुवर्त्तते विनाशो विक्रियात्मके ॥ - श्लो. वा. आत्मवाद-27.
4. दुःखात्यन्तसमुच्छेदे सति प्रागात्मवर्त्तिनः ।
   सुखस्य मनसा मुक्तिः मुक्तिरूक्ता कुमारिलैः ॥ - मानमनोदयः, पृ.212.
5. न चाऽभाववचनं वैशेषिकमभिप्रायम् । इतस्तु स्वाभाविकाभिप्रायमिति शक्यं वक्तुम्, उभयत्रापि सामान्योपादानात्, अत्यन्तसमानविषयत्वात् । अतः प्रमाणान्तरवशादाऽऽनन्दवचनं दुखाभावपरम् । इतिस्तु पथाश्रुतमिति न्याय्यम् । तस्मात् सुखदुःखादि समस्त-वैशेषिकात्मगुणोच्छेदो मोक्षः । -शास्त्रदीपिका-पृ. 525.
6. आत्यन्तिकस्तु देहोच्छेदः इत्यादिना धर्माधर्मपरिक्षयनिबन्धनः । - प्र.प.,पृ.341.

भाट्टमतखण्डनम् -

[1]न नित्यसुखाभिव्यक्तिः मुक्तिः न तु दुःखाभाव इति वाच्यम्, नित्य-सुखस्य प्रमाणाभावात्, नित्याभिव्यक्ते: सांसारिकमुक्तयो: पुनरपि दुःखोत्पत्तौ संसारापत्तेश्च । अपि च[2]सुखतदभिव्यक्तयोर्नित्यत्वमिति चेत् । न । तयोर्नित्यत्व-स्वीकारे देहस्य नित्यत्वे विमुक्तशरीरस्य स्वर्गे देहविरहापत्तेः ।

प्रभाकरमतखण्डनम्-

नियोगसिद्धिर्मोक्ष इति मतं मन्यमानाः प्राभाकरास्तु असमीचीनाः, [3]मोक्षे दुःखाभावत्वमात्मनः निरानन्दत्वस्यापि स्वीकारे पुनरपि आत्मनः सुखानुभवः निरानन्द इति गुणसत्त्वासत्त्वाभ्युपगमापत्तेः, गुणाभावसुखस्य संसारेऽदृष्टत्वाच्च ।

(ङ) न्यायमते मोक्षकल्पना-

नानाप्रवक्तृमनीषीभिस्तेषां मतानुसारं मोक्षोपायनिरुपणं कुर्वन्ति । तद्वत् न्यायमतानुसारं [4]अक्षपादेन "प्रमाणप्रमेयादीनां सम्यज्ज्ञानेन निःश्रेयसं दुःखजन्मादीनामत्यन्तापचये [5]अपवर्ग" इति कल्पितम् ।

[6]वात्स्यायनमते - दुःखेन जन्मना अत्यन्तविमुक्तिरपवर्गः । दुःखानुत्पाद एव मोक्षः । दुःखानुत्पाद इति दुःखाभावप्रतीतिः । यदा तत्त्वज्ञानेन मिथ्याज्ञानमपसरति, मिथ्याज्ञानापाये दोषाः अपसरिताः भवन्ति । अपगते दोषेन प्रवृत्तिः । प्रवृत्तौ नष्टायां जन्म अपसरति, तदपसारिते दुःखापगतो भवति । अपगते दुःखेऽऽत्यन्तिकदुःखनिवृत्तिः भवति तन्निवृत्तौ आत्यन्तिकापवर्ग [7]निःश्रेयसं वा भवति । तदेव कैवल्यमिति अपरे ।

---

1. वै. उ., पृ. 24-25.
2. न्याय. लीलावती, पृ. 37.
3. नित्या सुखाभिव्यक्तिरित्यर्थेतु शरीरादुत्पन्नाया प्रथमाभिव्यक्तैरेव अनन्तत्वाङ्गीकारे प्रमाणं विनापि भावकार्यस्यानित्यत्वस्वीकारानङ्गीकारेमुक्तस्थसंसारितोरस्वीकारः । - सेतु-25.
4. प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासछलजाति - निग्रहस्थानानां तत्त्वज्ञानाद् निःश्रेयसाधिगसः । - न्या सू 1-1-1
5. तदत्यन्तविमोक्षोऽपवर्गः -न्या सू 1-1-22
6. आत्यन्तिके च संसारदुःखाभावे सुखवचनादागमेऽपि सत्यविरोधः । यद्यपि कश्चिदागमः स्यात् मुक्तस्यात्यन्तिकं सुखमिति ? सुखशब्द आत्यन्तिको दुःखाभावे प्रत्युक्त इत्येवमुपपद्यते । दृष्टो हि दुःखाभावे सुखशत्दप्रयोगो बहुलं लोक इति- न्या. भा. 1.1.22
7. नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्
   ज्ञानञ्च विमलीकुर्वन्नभ्यासेन च पाचयेत्
   अभ्यासाच्च क्वचिज्ज्ञानात्कैवल्यं लभते नरः । - अन्नभट्टकृत - त.संग्र.दी. पृ. 424.

अपि च [1]वार्त्तिकानुसारं - बाधनाविषयात्मिका बुद्धिः । बाधनाबुद्धेः शरीरादयो गौणी । शरीरेन्द्रियादीनामपचयविषये योगिनः प्रत्यक्षवादिनः । यदा विषयेष्वात्मनः औदासीन्यं, तदेव मोक्षस्य लक्षणमिति । [2]एतदपि न्यायमञ्जर्या-मुक्तमस्ति ।

किन्तु [3]खद्योतकारवाचस्पतिमिश्रास्तु न तत् अपवर्गः निःश्रेयसं वा, तदेव मोक्ष एव । तच्च न दुःखाभावे प्राप्यते । अविनश्यत्, स्थायितमं, शरीरे-न्द्रियादीनां क्षणिकसुखाभावसुखं मोक्ष इति प्रचक्षन्ते ।

न्यायमतखण्डनम्-

[4]न आत्मशरीरेन्द्रियार्थादिद्वादशप्रमेयादीनामपवर्गेऽपसारितेन मुक्तिरिति चेत् । न । शरीरेन्द्रियबुद्धिमनप्रवृत्तिदोषफलदुःखानामात्मन्यन्तर्भावात्, आत्मनः न प्रमेयत्वं तस्य प्रमातृत्वात्, इन्द्रियबुद्धिमनसां प्रमेयत्वाभावः आत्मनः करणत्वाच्च ।

नापि दुःखात्यन्तं विमुक्तश्चरतीति श्रुतिवाक्यबलादेव दुःखात्यन्ता-भावपरको मोक्ष इति वाच्यम्, [5]दुःखप्रागभावस्य कारणविघटनमुखेनोक्तत्वात् ।

1. अथ च बाधनेति बाधनाविषयं बुद्धिं लक्षयति, तेन बाधना च तदनुषङ्गिगणश्च शरीरादयो गौणमुख्यभावेन लक्षिताः भवन्ति । सैव हि बाधनबुद्धेर्दुखे मुख्या शरीरादयो गौणीति । अलमेभिरिति प्रत्ययः निर्वेदः वशितया योगिनः स्वयमुपलभ्यते, स्वयमुपनतेषु औदासीन्यमुपेक्षाबुद्धिवैराग्यं लक्षणशब्दं इति । - वार्त्तिक पृ. 62.
2. प्रवृत्तिदोषजनितं सुखदुःखात्मकं मुख्यं फलं तत्साधनं तु गौणम् । - न्या.म., पृ. 542.
3. लोके क्षणिकं सुखं परित्यज्य बुद्धिपूर्वकारी स्थायिसुखमादत्ते । स्थायितमं च सुखमेव मोक्ष इति । एवन्तु शरीरेन्द्रियाद्यपि प्रति वक्तुं शक्यम् - "क्षणिकं नश्वरशरीरादि त्यक्तुं स्थायितरं तदासादयितुं पुरुषा अभिलषन्ति - अतः स्थायितरशरीरेन्द्रियादिरूप एव मोक्षः ।
- खद्योत-36.
4. अतः शरीरेन्द्रियबुद्धिमनःप्रवृत्तिदोषफलदुःखानां आत्मन्येवान्तर्भावोयुक्तः । संसारिण आत्मनः कथञ्चित् तदविष्वग्भूतत्वात् । आत्मा च प्रमेय एव न भवति, तस्य प्रमातृत्वात् । इन्द्रियबुद्धिमनसां तु करणत्वात् प्रमेयत्वाभावः । - स्याद् वादम-पृ. 80.1.

5 दुःखाप्रागभावस्यैव कारणाविघटनमुखेनात्यन्ताभावसमानरूपतातात्पर्यत्वात् ।
- उपस्कार सू.- 3, पृ. 22.

अपि च सुखार्थिनां दुःखाभावत्वात् मुक्तौ प्रवृत्तिः स्यादिति चेन्न । [1]दुःखाभावे सुखोत्पत्तिमत्त्वे, सुखाभावे दुःखोत्पत्तिमत्त्वे मोक्षसिद्धाभावप्रसङ्गापत्तेः । नेदं [2]तदत्यन्तविमोक्षोऽपवर्गः इत्यत्र सांसारिकदुःखस्यात्यन्तप्रहाणेन संसारदुःखाभावे सुखवचनादीनामविरोधेन मुक्तिरिति वाच्यम्, दुःखात्यन्ताभावस्यासाध्यत्वात् । परन्तु [3]द्रव्यभाष्यभावग्रन्थकर्त्तुः गोपीनाथमिश्रस्य मते तु - मुक्तौ नित्यसुखवत्त्वस्य अनुभवः । सांसारिकदशायां नित्यसुखस्य मिथ्याज्ञानरूपप्रतिबन्धकत्वात् प्रत्यक्षतया नानुभवः इति भावः ।

(च) बौद्धमतखण्डनम्-

एवमपि बौद्धानाम्मतनिराकरणं संक्षेपेण क्रियते- (1) आत्महानिः मुक्तिरिति माध्यमिकाः । तदपि तुच्छम् आत्महानौ मुक्ताभावप्रसङ्गात् । (2) निर्विषया चित्तसन्ततिर्मुक्तिरिति सौत्रान्तिकाः । तदपि हेयम् । मुक्तौ ज्ञानस्य निर्विषयत्वे प्रमाणाभावात् । (3) निवृत्तिविरोध मुक्तिरिति योगाचाराः ! तन्न । ज्ञानस्य मुख्यदुःखत्वाभावेन तद्हानेरपुरुषार्थत्वात् । (4) क्लेशशून्या चित्सन्ततिर्मुक्तिरिति वैभाषिकाः इति चेत् न। जीवन्मुक्तिदशायामपि रागद्वेषमोहानामसत्त्वेन परममुक्तिप्रसङ्गात् । ज्ञानस्य सुखदुःखाभावेतरत्वेन पुरुषार्थत्वाभावात् ।

1 न च दुःखपदस्यैकविंशतिप्रभिन्नदुःखपरतया उक्तैव तत्र गतिरिति वाच्यम् । असत्यसम्भवापत्तेः ।
द्र.भा.भा.-पृ.18

2. निःश्रेयसं पुनः दुःखनिवृत्तिरात्यन्तिकी । अत्र च वादिनामविवाद एव । न ह्यपवृक्तस्य दुःखं प्रत्यापद्यत इति कश्चिदभ्युपैति, केवलात्माऽपि दुःखहेतुत्वान्निवर्त्तयिव्य शरीरादिवदिति ये वदन्ति तेषां यद्यसौ नास्ति किं विनिवर्त्तयितव्यम् ? अत्यन्तो सतो नित्यनिवृत्तत्वात् ।- कि.

3. न च सुखस्य नित्यत्वे मानाभावः, प्रत्युत्पन्नं सुखं विनष्टं सुखमितिप्रतीतिबलेन तस्योत्पत्तिविनाशशालित्वमेव प्रत्यक्षतःसिद्धमिति नोक्तस्वरूपत्वं मुक्तेरिति वाच्यम्, सुखविशेषस्य तथात्वेऽऽत्मस्वरूपावच्छेदकस्य सुखस्य सांसारिकदशायामननुभूयमानस्य नित्यत्वात् । सुखमुत्पन्नमित्यादि प्रतीतेश्च सांसारिकसुखत्वावान्तरजातिमत्सुखमात्रविषयत्वात् । न चात्मस्वरूपावच्छेदकस्य सुखस्य नित्यत्वे सांसारिकदशायामपि तदनुभव इति वाच्यम्, अत्यन्तसुखानुभवं प्रति मिथ्याज्ञानस्य प्रतिबन्धकत्वेन तदानीं तदनुपपत्तेः ॥ - द्र.भा.भा.पृ. 21

(छ) वैशेषिकमते मोक्षस्थापना-

प्रागेव कणादसूत्रे पदार्थधर्मजिज्ञासासूत्रस्य विवक्षानन्तरं द्वितीयसूत्रे धर्मस्य साक्षात्कारप्रकरणे उच्यते- ''यतोऽभ्युदयनिःश्रेयस्सिद्धिः स धर्मः (वै.सू. 1.1.2)। अत एव एकस्तु अभ्युदयः, अन्यन्तु निःश्रेयसमिति। अतः तत्त्वज्ञानेन'' अभ्युदयः, दुःखनिवृत्त्यां निःश्रेयसमिति [1]उपस्कारः। किन्तु [2]वृत्तिकारस्य मते- पदार्थानां सम्यग्ज्ञानेन अभ्युदयेन निःश्रेयसमिति। किं तावद -भ्युदयः ? उच्यते - वेदादिपाठेन तत्त्वज्ञानाद् द्रव्यगुणकर्मादीनां साधर्म्यवैधर्म्य-रूपज्ञानात् तत्त्वज्ञानमेव निःश्रेयसमिति उच्यते।

अतः शास्त्रतत्त्वज्ञाननिःश्रेयसानां मध्ये कः सम्पर्क इति उच्यते उपस्कारे- ''तदत्र शास्त्रनिःश्रेयसयोः हेतुहेतुमद्भावः, शास्त्रतत्त्वज्ञानयोः व्यापारव्यापारि-भावः, निःश्रेयस-तत्त्वज्ञानयोः कार्यकारणभावः, द्रव्यादिपदार्थशास्त्रयोः प्रतिपाद्यप्रतिपादकभावसम्बन्धोऽवगम्यते।

मोक्षसंज्ञा-

निःश्रेयसस्य संज्ञानिरुपणे प्रागेव सूत्रकारेण -''धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्यभ्यां तत्त्वज्ञाना-न्निःश्रेयसमिति निःश्रेयसस्य स्वरूपलक्षणमुक्तम्।

परन्तु [3]प्रशस्तपादस्योक्तौ - द्रव्यगुणकर्मादिपदार्थानां सम्यज्ज्ञानादी-श्वरस्य चोदनादभिव्यक्तात् निःश्रेयसमिति। अत्र ईश्वरचोदनापरत्वादेव निःश्रेयसमिति। परन्तु [4]कन्दलीकारण ''तच्चेश्वरचोदनाभिव्यक्ताद् धर्मादेव'' इति प्रशस्तपादवचनात् ''यतोऽभ्युदय निःश्रेयसस्सिद्धिः स धर्म ''इति सूत्रकारस्य

---

1. अभ्युदयस्तत्त्वज्ञानं निःश्रेयसमात्यन्तिकी दुःखनिवृत्तिः। 1.1.2 सूत्रे उप.
2. अभ्युदयः सुखं निःश्रेयसमेककालीनसकलात्मविशेषगुणध्वंसः। प्रमाणञ्च धर्मे देवदत्तशरीरादिषुं भोक्तृविशेषगुणप्रेरितभूतपूर्वकं कार्यत्वे सति तद्भागसाधनत्वात् तन्निमित्तस्रग्वदिति। - उ.पृ.12.
3. द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां साधर्म्यवैधर्म्यतत्त्वज्ञानं निःश्रेयसहेतुः। तच्चेश्वरचोदनाभिव्यक्ताद् धर्मादेव। - भा. 15.
4. ननु यदि तत्त्वज्ञानं निःश्रेयसहेतुस्तर्हि धर्मो न कारणम् ? ततः सूत्रविरोधः यतोऽभ्युदयनिःश्रेयसस्सिद्धिः स धर्म इति ततः आह- तच्चेश्वरचोदनाभिव्यक्ताद् धर्मादेव। - क, पृ. 18.

धर्मत्वहानि: । एतन्मतं न समर्थयति गोपीनाथमिश्र: । किन्तु [1]उदयनाचार्यस्य किरणावल्याम् - "तच्च" पदेन ईश्वरचोदनरूपोपदेश: । इदं मतं [2]गोपीनाथेन स्वीकृतम् । पुनश्च [3]किरणावलीमते - "आत्यन्तिकदु:खनिवृत्ति: मोक्ष इति । कन्दलीकारस्याभिमतानुसारम् - असह्यनिखिलदु:खस्य आत्यन्तिकनिवृत्ति: मोक्ष इति ।

ततः परम् - गोपीनाथमिश्रस्तु भिन्नं मोक्षलक्षणं कथयति यथा - "दु:खध्वंसस्य समानाधिकरणदु:खप्रागभावासमानकालीनत्वाद् ध्वंसस्य लिङ्गत्वम् ॥"

उपस्कारकारस्तु गोपीनाथमिश्रस्य पराचीनत्वाद् गोपीनाथमिश्रस्य मतं समील्य सङ्घटयति मोक्षलक्षणम्- *"समानाधिकरणदु:खप्रागभावासमाना-कालीनत्वं युगपदुत्पन्नसमानाधिकरणसर्वात्मविशेषगुणध्वंससमाकालीन-त्वम्वा । अशेषविशेषगुणध्वंसावधिकरणदु:खाप्रागभावो वा मुक्ति: ॥"* *"तन्मुक्तावतिव्याप्तिवारणाय समानाधिकरणपदम् । चरमदु:खस्यापि समानाधिकरणमुक्तिकालीनात्ममनःसंयोगप्रागभावसमानाकालीनत्वादावति-व्याप्तिवारणाय प्रथमदु:खपदम् । सुषुप्तिकालीनदु:खध्वंसस्य समानाधिकरण-दु:खाऽसमानकालीनत्वादतिव्याप्तिवारणाय प्रागभावेति । मुक्तिकालीना-ऽत्ममनःसंयोगध्वंसेऽतिव्याप्तिवारणाय चरमदु:खपदमिति"* ।

किमिति मोक्ष: प्राप्यते ? अत्रै व [4]सेतुकारस्य प्रामाण्यम् - प्रथम क्षणे चरम दु:खम्, द्वितीयक्षणे चरमदु:खसाक्षात्कार:; तृतीयक्षणे चरमदु:खनाशक:, चतुर्थक्षणे ज्ञाननाश: इति मोक्षप्रकरणस्यानुशीलनम् ।

---

1. तच्चेति ईश्वरचोदना उपदेशे वेद इति यावत् । तेनाभिव्यक्तात् प्रतिपादनात् धर्मात् ।
   - कि. 10.
2. ईश्वरेण चोद्यत इति ईश्वरचोदनावेद: । अकर्त्तरि चाकारके त्वधिकारात्कर्मणि च तेनाभिव्यक्त्या प्रतिपादनाद् धर्मान्निवृत्तिलक्षणात्फलकामनानुष्टितत्वादिति यावत् ।
   - द्र.भा.भा. पृ.24
3. नि:श्रेयसं पुन: दु:खनिवृत्तिरात्यन्तिकी । - कि. 12.
4. दु:खस्थलद्वयेऽपि मुख्यत्वं विशेषणमन्यथा प्रथममुख्यपदानुपादानेऽसम्भवश्चरमदु:ख-

समासत्रयखण्डनम्-

"पदार्थधर्मसंग्रहः प्रवक्ष्यते" इत्यास्मिन् द्रव्य-गुण-कर्मादिपदार्थानां तद्धर्माणा च संग्रहः पदार्थधर्मसंग्रहः इति, पदार्थाश्चेते धर्माश्चेति पदार्थधर्माः, पदार्थाश्च धर्माश्चेति पदार्थधर्माः तेषां संग्रह इति षष्ठीतत्पुरुष-कर्मधारय-द्वन्द्वसमासः त्रयः समस्तपदनिष्पन्नमिति[1]टीकाकाराणां समता।

व्योमवतीकारमते- पदार्थधर्मसंग्रह इति पदे उत्तरपदप्राधान्यत्वात् षष्ठीतत्पुरुषः इति। षष्ठीतत्पुरुषस्वीकारे किरणावली-सेतु-जगदीशप्रभृतीनां सम्मतिरस्ति। एतत्तु न समीचीनमिति गोपीनाथमिश्रः।

ननु उत्तरपदप्राधान्यस्वीकारे पदार्थ-धर्मइत्यत्र धर्मपदे प्राधान्यमिति चेत्। न। धर्मपदे प्राधान्यस्वीकारेण धर्मिण्याव्याप्तेः, धर्मस्यानधिकरण

ध्वंसस्यापि ज्ञानरूपदुःखसमानकालीनत्वात्प्रथमक्षणे चरमदुःखं द्वितीयक्षणे चरमदुःखसाक्षात्कारस्तृतीयक्षणे चरमदुःखनाशः चतुर्थक्षणे ज्ञाननाश इति परिपाटवेन चरमदुःखध्वसस्य ज्ञानसमानकालीनत्वात्। चरममुख्यपदोपादानवैमुख्ये चरमज्ञाने निर्वाणापत्तिः। तस्यापि समानाधिकरणमुख्यदुःखेनासमानकालीनत्वादिति साडम्बरं प्रपञ्चितम्। - सेतुक - 27.

1.(क)पदार्थानां धर्मास्तेषां संग्रह इत्युत्तरपदप्राधान्येऽपि धर्माणां धर्मिनिष्ठतया संग्रहो भवत्येव। - व्या. 20.

(ख) पदार्थाः द्रव्यादयः तेषां धर्माः साधर्म्यवैधर्म्यरूपास्त एव परस्परं विशेषणभूतास्तेन संगृह्यन्ते। शास्त्रे नानास्थानेषु वितता एकत्र संकलय्य कथ्यन्त इति संग्रहः। स प्रकृष्टो वक्ष्यते। - किरणावली - 22.

(ग) पदार्थः द्रव्यादयः षट्तेषां धर्माः साधारणासाधारणस्वरूपाः संगृह्यन्ते संक्षेपेणाभिधीयन्तेऽनेनेति पदार्थधर्मसंग्रहः - एतेन संग्रहस्य पदार्थधर्मैः सह वाच्यवाचकभावः। - कि. 16.

(घ) पदार्थस्य धर्म स संगृह्यत इति कर्मव्युत्पत्तेः तस्य प्रवचनं सम्भवति - सेतु - 22.

(ङ) पदार्थानां भावपदार्थानां ये धर्माः साधर्म्य-वैधर्म्यरूपास्तेषां संग्रह संक्षेपेण कथनं यत्र स पदार्थधर्मसंग्रह भाष्यनाम ग्रन्थः प्रवक्ष्यते। -जगदीशि- 15.

त्वापत्तेश्च । परन्तु [1]केचित्तु धर्मिणां प्राधान्यमिति । तन्न । [2]पदार्थधर्मइत्यस्मिन् धर्मिपदाभावात् धर्मिणा पदार्थपदेनान्वयासम्भवाच्च । अपि च येन उत्तरपद-प्राधान्यमङ्गीकृतम्, तेनापि धर्मिप्राधान्यस्वीकारे विरोधापत्तेश्च ।

किरणावलीमते तु विशेषणविशेष्यभाव: इति । तदपि न समीचीनम् । षष्ठीतत्पुरुषे विशेषणविशेष्ययोरनन्वयापत्तेः । कर्मधारयसमासे तु विशेषण-विशेष्यभावयो: सम्बन्धभाव: । अपि च पदार्थे धर्माणां सामानाधिकरण्यतया निष्टत्वात् पृथक्त्वाभावेन अन्वयासम्भवात् न तु षष्ठीतत्पुरुष: । [3]यथा मत्पुस्तकं इति स्थले क्रियानन्वयित्वात् षष्ठी तत्पुरुषसमासः । न तु अवयवावयविभाव:, किन्तु सम्बन्धिभाव: । अपरञ्च पदार्थधर्म इत्यत्र धर्मधर्मिभावत्वान्न षष्ठी ।

[4]**जगदीशभट्टाचार्यस्तु** - पदार्थपदे केवलं भावपदार्थानां ग्रहणमिति चेत् । न । भावपदार्थानां धर्माणामभ्युपगमेन अभावपदार्थग्रहणाभावापत्तेः, वैशेषिकतन्त्रे तु अभावस्य अभावत्वस्वीकाराच्च । अत: पदार्थपदे भावाभाव पदार्थानां स्वीकार: कर्त्तव्य: ।

[5]नापि कर्मधारय: नीलोत्पलमित्यत्र उत्पले नीलत्वरूपदर्शनात् उत्पलत्वनीलत्वयोर्मध्ये विशेषणविशेष्यभावस्वीकार: । परन्तु पदार्थाश्चेते

---

1. धर्मिणां संग्रह इति सुखदुःखसाधनत्वधर्माविबोधे सति प्रवृत्तिनिमित्तयोर्भावात् । धर्माणां सहप्राधान्यं न निषिध्यते । तत्त्वज्ञानं चात्रप्रधानतया विवक्षितम् । तद् धर्मिषु उपसर्जनस्यापि लभ्यते । यदेव तत्त्वज्ञानप्रधानक्रियासम्बन्धादुभयेषां प्राधान्यमिति । - व्योमवती-20
2. न च धर्माणां पदार्थत्वेनाभेदोऽपि येन रूपेण धर्मधर्मिभाव: द्रव्यगुणत्वादिना रूपेण भेदोऽस्तीति षष्ठीतत्पुरुषसमासयोपपत्तिरिति वाच्यम् । अश्रूयमाणधर्मावच्छेदेन भेदस्य ष्ट्युपपादनत्वाभावात् । अन्यथा घटस्य घटच्छेदे प्रयोगापत्तेः । तत्रापि घटावयवत्वघटत्वादिना भेदसम्भवात् । - द्र. भा. भा. पृ.11
3. धर्माणां पदार्थोऽभिन्नत्वेन भेदश्चाभिषष्ठ्यताप्राप्तेः कुतस्तत्समाससम्भावना ॥ -द्र.भा.भा.पृ.11
4. पदार्थानां भावपदार्थानां ये धर्मा: साधर्म्यवैधर्म्यरूपास्तेषां संग्रहरूपेण कथनं यत्र स पदार्थधर्मसंग्रह: भाष्यनाम ग्रन्थ: प्रवक्ष्यते - जाग. सू. पृ. 14.
5. पूर्वपदार्थतावच्छेदनस्य व्यभिचाराभावेऽपि उत्तरपदार्थतावच्छेदकस्य व्यभिचारात्सर्वत्र तद्व्यभिचार । - द्र.भा.भा.पृ.11

धर्माश्चेति इत्यस्मिन् पदार्थत्वधर्मत्वयोः विशेषणविशेष्यभावाभावाद् व्यभिचारप्रसङ्गः । अत्र तु पदार्थत्वधर्मत्वयोः सम्बन्धसम्बन्धिभावः एव । ननु "प्रमाणप्रमेय" इत्यादिसूत्रे विशेषणविशेष्यभावशून्यत्वं कथं वा कर्मधारय इति वाच्यम् । तत्र धर्माणामेव विशेषणतया पूर्वनिपातापत्तेः।[1]अत्र विशेषणविशेष्यभावस्य विवक्षाभावेऽपि विशेषणत्वेन तद्वत् विवक्षितत्वात् ।

नापि द्वन्द्वसमासः । फलपुष्पाणि इत्यत्र समस्तपदे फल-पुष्पेति- समस्तपदानां समस्तविशेष्यभावपदार्थानां सामस्त्येन द्वन्द्वः । तद्वत् पदार्थधर्मसंग्रहः इत्यत्र पदार्थधर्मयोः समस्तपदयोः विशेष्यपदयोः तादृशसम्बन्धाभावात् । पदार्थे तद्धर्मस्य पृथग्रूपेणादृष्टत्वाच्च । पृथग्रूपमिति चेत् पदजन्यप्रतीतिविषयो न स्यात् अतः [2]पदार्थत्वधर्मत्वयोः उभयोः भेदस्वीकारानन्तरं द्वन्द्वसमासभावे साधर्म्य-वैधर्म्यनिरुपणे न समासत्वहानिः ।

गुणप्रकरणम्

पृथिव्यप्तेजोवाय्वादीनां नवद्रव्याणां विभागं दर्शयित्वाधुना रुपरसगन्धादिचतुर्विंशतिगुणानां नामानि प्रतिपाद्यन्ते । प्रागेव भगवता कणादेन [3]रूपरसादिसप्तदशगुणाः निरुपिताः । परन्तु तेन सूत्रस्यान्ते "च" प्रयोगात् पुनरपि प्रशस्तपादाचार्येण रुपरसगन्धादीनां सप्तदशगुणैः साकं गुरुत्वद्रवत्वादिसप्तगुणान् संयोजयन् [4]चतुर्विंशतिगुणाः स्थिरीकृताः ।

---

1. विशेषणविशेष्यभावस्य विवक्षितत्वान्नात्र तादृशो विवक्षेति वाच्यम् । धर्मत्वस्य विशेषणत्वनयत्वेन तादृशविवक्षायां तत्रावश्यकत्वात् । - द्र. भा. भा. पृ.12
2. प्रकृतो पदार्थत्वधर्मत्वयोर्भेदात् द्वन्द्व एव ज्यायान् । तथा चोभयोः प्राधान्येनोपस्थिते संग्रहान्वयेऽपि त्वग्रे साधर्म्यवैधर्म्यनिरूपणमपि साधुं संगच्छते । -द्र.भा.भा. पृ.12
3. रूपरसगन्धस्पर्शाः सङ्ख्याः परिमाणानि संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः ॥ -वै.सू.,1.1.6.
4. गुणाश्च रूपरसगन्ध-रपर्श-संख्या-परिमाणानि-संयोग-विभाग-परत्वापरत्व-बुद्धि-सुख-दुःख-द्वेष-प्रयत्नाश्च कण्ठोक्ताः सप्तदशः । चशब्दसमुच्चिताश्च गुरूत्वद्रवत्व-स्नेह-संस्कारा-दृष्टशब्दाः सप्तैवेत्येव चतुर्विंशतिर्गुणाः- -प्र.भा.पृ.27.

[1]किरणावल्यामुदयनाचार्यस्तु - असाधारणशब्दात्मरूपकण्ठोक्तात् सप्तविंशतिगुणाः कार्यकारणभावरुपाभावाददृष्टत्वात् सप्तगुणाः संक्षेपेणोक्ता इति वदति। अपि च तत्पूर्वं [2]व्योमाचार्येण कृत्यभिहितरुपाः कण्ठोक्ताः धर्माधर्मयोरभिधानरुपमदृष्टमिति उच्यते। [3]तदेवोदयनाचार्यणामङ्गीकरणम्।

[4]कन्दलीकारेण तु "कण्ठोक्ता इत्यस्यार्थः कथितः, "च" शब्देन धर्माधर्मयोरुपसंग्रहत्वेनानुक्ताः अदृष्टशब्दाः गुरुत्वद्रवत्वादिसप्तगुणाः" इति प्रोक्तम्।

किन्तु एभ्यः उपर्युक्तटीकाकर्तृभ्यो भिन्नो [5]गोपीनाथमिश्रस्तु सिद्धान्तयति - कणादमहर्षिणा समुच्चारितसप्तदशगुणाः तत्तद्वाचकत्वेन प्रथिताः। "च" शब्देन आन्तरसिद्धाः गुरुत्वद्रवत्वादिसप्तगुणाः अनुक्तसमुच्चयार्थरुपेण उक्ताः। [6]समुच्चयार्थशब्दस्तत्रैव कणादसूत्रमवलम्ब्य भाष्ये सप्तगुणानां योगो भवति।

कर्मप्रकरणम्

उत्क्षेपणावक्षेपणमाकुञ्चन-प्रसारण-गमनानि पञ्चकर्माणि (वै.सू.1.1.7) इति सूत्रकारनिर्देशात् उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनाख्यं पञ्चकर्म। [7]प्रशस्तपादस्य मते उत्क्षेपणावक्षेपणादिपञ्चकर्मणां ग्रहणात्। अपि च

---

1. कण्ठोक्ताः इति असाधारणस्वशब्देनोक्ताः। अदृष्टत्वं नाम कार्यकारणलक्षणानां तद्व्यवस्थापकानामभावात्। - पूर्ववत्
2. कण्ठोक्ताः सूत्रकारेणेत्यवृत्यभिहिताः। अदृष्टशब्देन धर्माधर्मयोः संक्षेपेणाभिधानम्। - व्योमवती
3. अदृष्टशब्देन धर्माधर्मयोः संक्षेपेणाभिधानम्। - कि. 21.
4. गुणाः रूपादयः "कण्ठोक्ता" सूत्रकारेण कथिता। चशब्देनात्रोक्ता गुणत्वेन लोके प्रसिद्धाः गुरुत्वादयः सप्तसमुचित्ताः। अदृष्टशब्देन धर्माधर्मयोरूपसंग्रहः। - न्या.क. 26-27.
5. कण्ठोक्ता इति महर्षिणैव रूपरसगन्धादयः सप्तदशगुणाः तत्तद्वाचकशब्देनैवोक्ताः। चशब्देति। चशब्दः प्रयत्नाश्च सूत्रावयवस्थ इत्यर्थः। तस्यानुक्तसमुच्चयार्थत्वात् तत्रान्तरसिद्धगुणभावानामेषां समुच्चयाकत्वमित्यर्थः। - द्र.भा.भा.पृ.44
6. समुच्चयार्थो वा शब्दः पूर्वस्मिन्नितरत्र तु
विकल्पेनोभयोराह प्रत्युदाहरणे पृथक्॥ - श्लो.वा.1.109.
7. उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चैव कर्माणि। गमनग्रहणाद् भ्रमणरेचनस्यन्दनोदूर्ध्वज्वलनतिर्य्यक्पतननमनोन्नमनादयो गमनविशेषाः न नात्यन्तराणि। - प्र. भा., पृ. 28.

भ्रमणरेचनस्यन्दनोर्ध्वज्वलनतिर्य्यक्पतननमनोन्नमनानि गमनजात्याश्रय-व्यक्तिविशेषाः पूर्वोक्तोत्क्षेपणादिभ्यः व्यतिरिक्ताः सन्ति। भाष्यस्वीकृत-भ्रमणादीनि पञ्चकर्माणि सूत्रकारेण प्रतिपादितेभ्यः उत्क्षेपणावक्षेपणादि पञ्चकर्मभ्यो भिन्नत्वात् न पञ्चकर्माणि, अवधिकमेव इति चेत्। न [1]नाधिक्यं कर्मणः, भ्रमणादीनां पञ्चकर्मणां गमनकर्मणि अन्तर्भावात्।

सामान्य निरुपणम्

द्रव्यादित्रिकपदार्थानामुद्देशानन्तरं सामान्यपदार्थविचारे जातिः कल्पिता। सा जातिः अन्येषु दर्शनशास्त्रेष्वपि आलोचिता। सा च व्यक्तेः भिन्ना एव। जातिव्यक्त्योर्भेदः, भेदाभेदाविति सामान्यस्य प्रकारत्रयं दार्शनिकाः स्थापयन्ति। तत्र जातिव्यक्त्योर्भेदः पारमार्थिकः, अभेदव्यपदेशो भाक्त इति व्यपदिशन्ति वैशेषिकाः प्रभाकराश्च। अद्वैतवेदान्तिनस्तु अभेदः पारमार्थिकः, भेदःकाल्पनिकः भिद्यमानतन्त्रत्वादिति वदन्ति। अत्र 'सामान्यं विशेष इति बुद्ध्यपेक्षम्' (1.2.3.), 'भावोऽनुवृत्तेरेव हेतुत्वात् सामान्यमेव' (1.2.4), 'द्रव्यत्वं गुणत्वं कर्मत्वञ्च सामान्यानि विशेषाश्च' (1.2.5) इति भगवत्कणादप्रणीतसूत्रत्रयेण सामान्यमालोच्यते। अधुना समवायसिद्धिविषये कणभुक्पक्षविपक्षयोः बौद्धकुमारिलभट्टमतयोः निरसनानन्तरं स्वकीयमतं विविच्यते।

बौद्धमते सामान्यविचारः

[2]बौद्धमते - जातिविकल्पविलसत्। सामान्यमिति, अर्थात् शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः, विकल्पस्य विलसितं विकल्पविलसित-मिति। [3]विकल्पशब्दस्तु शब्दज्ञानानुपाती, वस्तुशून्यं प्रत्ययविशेषश्च। यथा-गौरयमिति प्रतीतेः अनुवृत्तिबुद्धिविशेषतया गोत्वादिविशिष्टप्रत्ययः। तद्वत् घटघटत्वयोः द्रव्यद्रव्यत्वयोः पृथक्तया आश्रितत्वं जातिरिति॥

---

1. न तु गमनत्वाभिन्नकर्मत्वसाक्षाद्व्याप्यजातिमन्त इत्यर्थः। तथा च भ्रमणत्वादीनां गमनव्याप्यत्वे कर्मत्व-साक्षाद्व्याप्यत्वाभावान्न विभाजकमिति नाधिक्यमित्यर्थः।
   - द्र.भा.भा.पृ. 50.
2. शब्दज्ञानानुपाती योऽतस्तु शून्यस्य उच्यते।
   विकल्प इति सर्वज्ञैः खरशृङ्गखपुष्पवत्॥ -प्र.स.
3. प्र.प.पृ.63.

किं घटव्यक्ते: घटत्वरुपसामान्यमभिन्नं इति चेत् । तन्न । तथास्वीकारे घटेन सहोत्पादे विनाशे वा स्वरुपहानिप्रसङ्गः । भिन्नत्वमिति चेन्न । व्यक्तिमात्रोत्पादे जातिदर्शनात् । नोभयम्, उभयरूपस्वीकारे विरोधापत्तेः । अतः कुत्र वर्त्तते ? गवि गोत्ववृत्तेः पूर्वमिति चेत् । नाधाराभावे आधेयभावकल्पनस्यानार्य्यत्वात् । अगवि गोत्वमासीदिति चेत् । न । गोपिण्डोत्पन्नात् पूर्वं तदनधिकरणस्य गवेतरपिण्डस्य स्वीकारविरोधात्, अश्वेऽपि गोत्वापत्तेश्च । न च गोः उत्पन्नमात्रेण गोत्वमुत्पन्नमित्यपि वाच्यम्, सामान्यस्य नित्यत्वाभ्युपगमात् । अन्यतः आगतमिति चेन्न, निष्क्रियत्वाभ्युपगमात् । अत उच्यते-

[1]नायाति न तत्राऽऽसीदस्ति पश्चान्न चांशवत् ।
जहाति पूर्वं नाधारमहो व्यसनसन्ततिः ॥ इति

अतः सामान्यं संस्थानव्यङ्ग्य गोत्वघटत्वादिवत्, न तु गुणकर्मगतम् । [2]तदेव चक्षुरुपालोकमनसामेकज्ञानकारणत्ववदत्यन्तभिन्नानामपि व्यक्तीनामयं गौरित्येकज्ञानकारणत्वं सम्भवति । अनेकव्यक्तिभिः जायमानाऽयं गौरित्येवंरूपा संवित् । सा अत्यन्तभेदयोगिनामपि व्यक्तीनां भेदः । यदि व्यक्तेरभावात् जातेरप्यभावः, तर्हि नानार्थभूतेषु व्यक्तिष्वेकाकारा बुद्धिः कथं जायत इति चेत् । उच्यते - प्रत्यक्षाभावेऽपि प्रत्यक्षदृष्टसामान्यबुद्धिरुपकार्य्यात् कारणस्यानुमानात् ।

---

1. प्र. वा. 3.151.

2. पररूपंस्वरूपेण, यया संव्रियते धिया ।
एकार्थप्रतिभासिन्या, भावनाश्रित्य भेदिनः ॥
तया संवृतनानात्वाः, प्रकृत्या भेदिनः स्वयम् ।
अभेदिन इवाभान्ति, भावा रूपेण केनचित् ॥
नानाभिप्रायरूपेण ,सामान्यं सम्प्रकीर्तितम् ।
तदसत्परमार्थेन, यथा संकल्पितं तथा ॥ -प्र.वा. 1.67.69.

बौद्धमतखण्डनम्-

नायाति न च तत्रासीदित्यादि न युक्तम्। सामान्यं तु नित्यं व्यापकं सर्वदेशसम्बन्धत्वञ्च। [1]गवि गोत्वसमवायेन व्यवहारापत्तौ देशानां तत्रासम्बन्धात्। सामान्यसंयोगसम्बन्धः नास्ति, पञ्चस्कन्धसंज्ञाभेदमात्रमेवेति चेत्। न। कालस्य साधनापेक्षत्वात्। [2]अपरे च - अर्थक्रियाकारित्वं सत्त्वं सामान्यमिति चेत्। न। अर्थक्रियायाः असत्त्वात्, तस्याः (अर्थक्रियायाः) सत्त्वेऽपि अनवस्थानेऽसत्त्वाच्च। [3]अन्ये च -सामान्यस्योत्पत्तौ कालाभावात् गोत्वमितिसामान्यपदे गौरयमिति व्यावृत्तिमत्त्वेन तत्प्रत्ययस्य बाधापत्तेः। अपि च [4]यत्रैव घट उत्पद्यते तत्रैव तिष्ठतीति चेन्न भूतलत्वादीनां घटत्वापत्तेः, समवायसम्बन्धेन तद्वृत्त्याभावात्। अतो न याति न च तत्रासीदिति भ्रान्तिरेव।

मीमांसामते जातिस्वीकारः-

वैशेषिक-प्राभाकरयोः जातिविचारे साम्यत् नात्र प्राभाकरमत-मालोच्यते। भट्टमीमांसकानान्तु जातिव्यक्त्योः भेदाभेदत्वस्वीकारात् तदेवात्र विचार्यते। तस्यायम्भावः - जात्यात्मनाऽभेदः, व्यक्त्यात्मना भेद इति। भेदाभेदो

1. न देशानां गोव्यवहारापत्तिः समवायेन सद्व्यवहारस्याभ्युपगमात्। काले रूपादिमत्त्वेऽपि कालो रूपवानित्यप्रतीतिव्यवहारवत्। न च कालो नास्त्येव पञ्चस्कन्ध-संज्ञाभेदमात्रमित्यभ्युपगमादिति वाच्यम् कालस्य साधयिष्यमाणत्वात्।

   - उप.पृ.81.

2. एतेनार्थक्रियाकारित्वमपि सत्त्वं प्रत्युक्तम्, असतोऽर्थक्रियाया अभावात्, अर्थाक्रिया च सत्यां तस्य सत्त्वात्, अर्थक्रियायाश्चार्थक्रियापेक्षाया सत्त्वेनानवस्थाने सर्वस्यासत्त्वप्रसङ्गाच्च।

   -न्या.क.-33.

3. उप. पृ. 83.
4. ननु घटान्तरे तत्प्रतीतिर्भवत्येवेति चेत्, तथाहि अपूर्वोत्तरघटोत्पत्तिदशायां तत्रागमनं सम्भवति अमूर्तत्वात्। न यत्र घट उत्पद्यते तत्रैव तिष्टतीति वाच्यम्, तथा सति भूतलत्वादीनामपि घटत्वापत्तेः। तत्र समवायसम्बन्धेनाभावान्न तेषां तत्त्वापत्तिरिति वाच्यम्। समवायसम्बन्धेन तस्य तद्बुद्धित्वाऽप्रसिद्धया तत्रावृत्तित्वप्रसङ्गात्। नान्त्यः अनित्यत्वे सति भवदुक्तजाति-लक्षणाभावेन तस्य जातित्वाभावप्रसङ्गात्॥ -द्र.भा.भा.पृ. 56.

नाम अपर्य्यायत्वे सति समानाधिकरणप्रत्ययः। अनुभवेनैकत्र भावाभाव-प्रतिपादनात् न विरोधः। अतः सर्वेषु स्थलेषु अयं गौः, अयं गौः "अयं घटः अयं घटः इति समस्तगवादिष्वनुगतं विजातियेभ्योव्यावृत्तं देशान्तरकालान्तरेषु अबाधितमनुवृत्तिकारं प्रत्यक्षमुत्पद्यते तदेव च प्रत्यक्षं सामान्यविशेषात्मना द्रव्ये वर्त्तते। स च सामान्याकारो गोत्वघटत्वादिजातिः विशेषाकारस्तु तत्तद्व्यक्तिरित्यनुभवतलादवगम्यते। अतः अयं गौरिति इदं गोपदयोरपर्यायत्वे सति सामानाधिकरण्यदर्शनाद् भेदाभेदावेवाङ्गीकृतौ। व्यक्त्यात्मनोः भेदपक्षे तु गोत्वघटत्वादिजातितत्तद्व्यक्त्योः भेद इति पर्यायत्वे सति सामानाधिकरण्यमिति भेदपक्षः।

मीमांसामतनिराकरणम्

[1]एकाकारप्रतीत्या अभेददर्शनाद् विलक्षणाकारप्रतीतेः भेददर्शनादुभयोः दोष एकाकारप्रतीतिसमये विलक्षणाकारप्रतीत्यभावेन जातिव्यक्त्योः साम्यप्रसङ्गात्, जातिस्थले व्यक्तेः, व्यक्तिस्थाने जातेस्स्वीकारापत्तेश्च। अनुगतप्रतीतौ व्यावृत्तप्रतीतिविषयभावाच्च। शुक्तिकायां इदं रजतमिति रजतत्वसादृश्यज्ञानेऽपि भेदनिबन्धनं भवेत्। एतदर्थं जातिव्यक्त्योरभेदग्रहणं न युक्तम्। अतः अस्माकं मते भेदग्रहणं पारमार्थिकम्, अभेदग्रहणं गौण इति। अभेदग्रहणास्वीकारे घटघटत्वयोः समानकालीनप्रतीतिर्न स्यात्।

वैशेषिकमते सामान्यम्-

वैशेषिकसूत्रे "भावोऽनुवृत्तेरेव हेतुत्वात् सामान्यमेव" (2.2.4) इति भगवता कणादेन सामान्यलक्षणं व्यधायि। तत्र जातिबाधकान्यत्वभावः सामान्यं अनुवृत्तिहेतुत्वात्। व्यावृत्तिपदेऽतिव्याप्तिवारणाय अनुवृत्तिपदमिति। [2]अपरं सामान्यं विशेषाख्यमल्पविषयत्वाद् व्यावृत्तेश्च। अनुवृत्तिरूपविशेषस्य पृथक्पदार्थत्वेन स्वीकाराद् द्विविधसामान्यस्य स्वीकारस्तु न समीचीनम्। तत्स्वीकारे विशेषपदार्थस्य सामान्येऽन्तर्भावप्रसङ्गापत्तेः।

---

1. तत्र यद्येकाकारा प्रतीतिस्तदा विलक्षणाकारप्रतीतिः नास्ति। विलक्षणाकारे च प्रतीतौ एकाकारप्रतीतिरेव नास्ति, तेन भिन्नाभिन्नाविशेषाश्रयेणानाऽर्थक्रियासमर्थनं न घटत इति ॥
   - प्र. प., पृ. 373.
2. अन्यत्राऽन्त्येभ्यो विशेषेभ्यः। - वै.सू. 1.2.6

तमनुसृत्य [1]प्रशस्तपादाचार्येण सामान्यस्य द्विविधरूपता स्वीकृता परापरभेदात् । परा सत्ता सामान्यं अनुवृत्तिबुद्ध्यात्मकमहाविषयत्वात् । अपरा सत्ता विशेषः द्रव्यादित्रिक पदार्थानामिति ।

व्योमवतीकारस्तु "सत्तावृत्त्येव कारणमिति सामान्यमेव ।" यो हि यद्विषयं व्याप्नोनि सस्तदपेक्षया परः। यद्यप्यसामान्यादिभ्यो व्यावर्त्तते, तथापि सामान्यं सत्तावृत्तिज्ञानस्यैव कारणमिति सामान्यमेव इति उक्तवान् । अपि च [2]उदयनाचार्यः- "समानानां भावः स्वाभाविकी अनागन्तुको बहुनां धर्मः सामान्यमिति किरणावल्यां प्रतिपादयति। यद्यपि तच्च समवाय सम्बन्धावच्छिन्नमिति नित्यत्वे सति अनेक समवेतत्वं जातित्वमिति लक्षणं परिव्याप्तं भवति, तथापि प्रशस्तपादः तादृशलक्षणं नावदत्। तदवत् [3]**श्रीधराचार्येण**- "अनन्तव्यावृत्तानां पिण्डानां यतः कारणादन्योन्यस्वरूपानुगमः प्रतीयते तत्सामान्यम् ।" "सा (सत्ता) अनुवृत्तेरेव हेतुत्वात् सामान्यमेव" । "सत्ता तु स्वाश्रयानुवृत्तेरेव हेतुस्तेन सामान्यमेव इति । एते तु पूर्ववक्तारः प्रत्यक्षतः अस्य दलव्यावृत्तिपूर्वकं सामान्यलक्षणं न निरुपयन्ति ।

अत्र [4]गोपीनाथमिश्रस्य वैशिष्ट्यं यत्- "सामान्यत्वं सामान्यवृत्ति-धर्मत्वम् । सामान्यवृत्तिधर्मत्वञ्च सामान्यसंयोगादिसाधारण्याद्यत्वनित्या-दिव्यक्तिवृत्तित्वेनापि समानवृत्तिसम्भवेनाभिमतसामान्यस्वरूपलाभाच्च । नित्यत्वे सति अनेकसमवेतत्वं सामान्यमिति सामन्यलक्षणम् । अनेकेत्यनुपादाने ईश्वरज्ञानादौ, समवेतेत्यनुपादाने च समवायात्यन्ताभावादतिव्याप्तिः ।"

इदं मतमनुसृत्य [5]शङ्करमिश्रेण तद्वत् सामान्यस्य सामान्यलक्षणे कृत्वा तस्य दलव्यावृत्तिः कृता । अपि च [6]विश्वनाथ- पञ्चाननाचार्यः मुक्तावल्यां गोपीनाथमार्गमनुसृत्य सामान्यं वक्ति ॥

---

1. सामान्यं द्विविधं परमपरञ्च । अनुवृत्तिप्रत्ययकारणम् । तत्र परं सत्ता महाविषयत्वात् । सा चानुवृत्तेव हेतुत्वात् सामान्यमेव द्रव्यत्वाद्यपरम्, अल्पविषयत्वात्, तच्च व्यावृत्तेरपि हेतुत्वात् सामान्यं सद्विशेषाख्यामपि लभते । - प्र.भा.-29.
2. किरणावली
3. न्या. क. पृ. - 29.
4. द्र.भा.भाव - पृ.
5. उप. - 87.
6. सामान्यमिति । तल्लक्षणं तु नित्यत्वे सत्यनेकसमवेतत्वम् । अनेकसमवेतत्वं संयोगादीनामस्त्यत उक्तम् - नित्यत्वे सतीति । नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनाम प्यस्त्यत उक्तमनेकेति । नित्यत्वे सत्यनेकवृत्तित्वमत्यन्ताभावेऽप्यस्त्यतो वृत्तित्वसामान्यं विहाय समवेतत्वमित्युक्तम् ॥ - मु. 44-46.

विशेषप्रकरणम्

[1]अनुवृत्तिनियामकत्वं सामान्यस्य, व्यावृत्तिबुद्धिनियामकत्वं विशेषस्य, विशिष्टबुद्धिनियामकत्वं समवायस्य इति अनुवृत्तिव्यावृत्तिविशिष्टबुद्धिरूपा: सामान्यविशेषसमवाया: । कस्तावद् विशेष: - "अन्यत्रान्येभ्यो विशेषेभ्यो (1.2.6) इति सूत्रकारस्य वचनाद्[2]भाष्यकारस्योक्ति: - "नित्यद्रव्यवृत्तयोऽन्त्या: विशेषा: । ते खल्वत्यन्तव्यावृत्तिहेतुत्वाद् विशेषा एव ।" पुनरपि भाष्ये विशेषशब्दस्य व्याख्यानम् - '[3]द्रव्यत्वात्, अल्पविषयत्वात्, व्यावृत्ते: हेतुत्वात्, अपरं सामान्यं विशेष: । "[4]सोऽपि नित्यद्रव्यवृत्तयो अन्त्या: विशेषा: इति सर्वेषां टीकाकर्त्तृणामैक्यम् ।

प्रशस्तपादस्य विशेषसंज्ञानिरुपणविषये [5]"अन्त्या: विशेषा:" इत्यत्र बहुवचनं न युक्तमिति चेन्न। तत्पक्षे प्रमाणसत्त्वात् किन्तु विशेषपदस्य बहुवचनविषये काऽपि उक्ति: नास्ति । अपि च कन्दलीकारस्य निरुक्तिस्तत्रैव ।

समवायप्रकरणम्

समवायसिद्धये भगवता कणादमहर्षिणा "इहेदमिति यत: कार्यकारणयो स्स: समवाय: "(वै.सू.7.2.26) इत्यनेन तस्य लक्षणं कृतम् । सूत्रमिदमाचक्षाण:

---

1. बुद्धेरनुवृत्तिबुद्धि: व्यावृत्तबुद्धि:, इहेदमिति बुद्धिश्च, तथा बुद्ध्या यत् स्वोत्पत्तयेऽपेक्ष्यते तदित्यर्थ: । तथा चानुबृत्तिबुद्धिनियामकत्वं सामान्यस्य व्यावृत्तिबुद्धि: इहेदमिति बुद्धिश्च । तया बुद्ध्या यत्स्वोत्पत्तयेऽपेक्ष्यते तदित्यर्थ: । तथा चानुवृत्तिबृद्धिनियामकत्वं सामान्यस्य, व्यावृत्तबुद्धिनियामकत्वं विशेषस्य, इहेदमिति विशिष्टबृद्धिविशेषनियामकत्वं च समवायस्येत्युक्तं भवति ॥ - वै.रसायन भाष्यम्- 41.
2. प्र. भा. पृ. 36.
3. प्र.भा.पृ. 30.
4. विशिनष्टि व्यावर्त्तयति इतरभिन्नेन ज्ञापयति स्वाश्रयमिति विशेष: । - द्र.भा.भा.पृ.61
5. विशेषा: इति बहुवचनेनानत्यं विवक्षितम् । किं ते ? अन्त्या : अन्तेऽवसाने भवन्ति सन्तीति यावत् । येभ्योऽपरे विशेषा न सन्तीत्यर्थ: । -कि.पृ.57.

प्रशस्तपादाचार्यः [1]पदार्थधर्मसंग्रहाभिधे ग्रन्थे'' अयुतसिद्धानामाधाराधेयभूतानां यत्यम्बन्धं इहेतिप्रत्यहेतुः सः समवायः इति समवायस्य लक्षणं कृतवान्। भाष्ये समवायस्य नित्यानित्यभेदेन लक्षणद्वयं प्रतिपाद्यते। तथाहि युतसिद्धिरुभयो-स्सम्बन्धिनोः परस्परपरिहारेण पृथगाश्रयित्वम्। सा च ययोः नास्ति, तावयुतसिद्धौ तयोस्सम्बन्धस्समवायः। यथा- तन्तुपटयोः। अनित्यानुसारेणेदमयुतसिद्धि-सम्पादनम्। पृथग्गतिमत्त्वं युतसिद्धिः तद्विपरीता त्वयुतसिद्धिः यथा आकाशपरमाण्वोः। एवन्तु नित्यानुसारेण विभागस्तत्रैव प्रतिपादितः।

अधुना प्रशस्तपादाचार्यस्यानुयायिनाम्मते [2]व्यौमशिवाचार्यस्तु- ''युतसिद्धिर्वक्ष्यमाणा सा विद्यते येषां ते तु युतसिद्धाः। तन्निषेधेन चायुतसिद्धा-स्तेषामिति।'' अत्र अयुतसिद्धपदन्तु युतसिद्धनिषेधार्थे नञ्प्रयोगः। न तु नित्यानित्यभेदेन समवायस्य कल्पनम्। परन्तु [3]उदयनाचार्येण अयुतसिद्धानां सम्बन्ध इत्येतावदेव लक्षणम्। इहप्रत्ययहेतुरिति प्रमाणोपन्यासात् नित्यसम्बन्धा-नित्यसम्बन्धौ स्वीकृतौ। अपि चाधाराधेयभूतानां विषयनिर्देशो भवति।''अतः [4]अवयवावयविनोः जातिव्यक्त्योः गुणगुणिनोः क्रियाक्रियावतोः नित्यद्रव्य-विशेषयोश्च यः सम्बन्धः सः समवायः। समवायत्वं च नित्यसम्बन्धत्वम्।

[5]श्रीधराचार्यस्तु प्रशस्तपादकृत-समवायलक्षणं रूपविशेषणानां सार्थक्यं वर्णयामास। ''अयुतसिद्धानां सम्बन्धः समवायः इत्यस्मिन् लक्षणे सुखस्य धर्मस्य च कार्यकारणभावसम्बन्धोऽपि समवायः स्यात्। अतः तद्वारणाय आधाराधेयभूतानामिति विशेषणम्। आकाशाकाशपदयोः वाच्यवाचक-भावरूपसम्बन्धस्य समवायस्य व्यावृत्तये इहप्रत्ययहेतुपदम्। आधाराधेय-भूतानामिहप्रत्ययहेतुः समवाय इत्युक्ते कुण्डवदरसम्बन्धेऽतिप्रसङ्गात्। तन्निवृत्त्यर्थमयुतसिद्धानामिति विशेषणं योग्यम्। तस्मात् समस्तमेवेदं समवायलक्षणपरमिति।

---

1. प्र.भा.पृ.37.
2. व्यो.पृ. 61.
3. कि. पृ. 53.
4. मु.का. 11.
5. न्या.क.पृ. 37-38.

[1]गोपीनाथमिश्रस्तु किरणावलीन्यायकन्दलीमतद्वयं समर्थयति । किन्तु आधाराधेयभूतानां इहप्रत्यहेतुः समवाय इत्यत्र आधाराधेययोः इहसम्बन्धं विना एकस्यापि आधारस्याविद्यमानतया नियमोऽस्तीति अयुतसिद्धौ इति भावः। एतत्तु केनापि टीकाकारेण नोद्घाटितमिदं मतमनुकरोति [2]सेतुकारः - तेनोभयोः आधाराधेययोरविद्यमानतया सम्बन्धः समवाय इति अङ्गीकृतम् । अपि च संयोगावस्थायां उत्पत्तेः पूर्वं उभयोः असम्बद्धौ, समवायस्थले नित्यसम्बन्धिनोः नित्यसम्बन्ध सत्यपि प्रसिद्धम् ।

स्वत्वविचारः

प्रशस्तपादभाष्ये तद्भाष्यटीकासु वा कस्मिन्नपि प्रकरणे स्वत्वविचारो नोपलभ्यते । परन्तु [3]द्रव्यभाष्यभावग्रन्थे स्वत्वस्य पदार्थान्तरत्वं स्वीक्रियते । स्वत्वं नाम - क्रय-परिग्रह-याजनाध्यापन-विभाग-पितृमरणोपादानादिभ्य उत्पद्यते । तत्स्वत्वं पदार्थान्तरम्, क्रयस्वत्वमुत्पन्नम्, विक्रियस्वत्वं विनष्टमिति यत्र स्वत्वस्य उत्पन्नविनाशशालित्वयोः लोकेऽनुभवत्वात् घटवदिति । ननु पित्रार्जितसम्पत्तेः दानादिविनियोगत्वनिषेधान्न स्वत्वं क्षीयते । देवतोद्देश्येन दीयमाने गवादौ देवतास्वत्वस्य विनियोगाभावात् स्वत्वमपि न क्षीयते । येनार्जितं, तस्य स्वत्वम् । सोऽपि विक्रेतुं योग्यः तस्य स्वत्वात् । अतः स्वत्वस्य लक्षणम्-

(क) स्वसमानकालीनयावद्विक्रियादिप्रागभावविशिष्टक्रियाध्वंस एव स्वत्वम्

(ख) यद्व्यतिरेकेण यथेष्टविनियोगविषयत्वासम्भवस्तद्विषयत्वं स्वत्वम् ।

---

1. अयुतेति । ''युमि श्रितौ इति धातोस्तेनायुतमिश्रितौ सिद्धौ । ययोः परस्येह सम्बन्धं विना एकस्याविद्यमानतया नियमोऽस्ति अयुतसिद्धौ । यदुभयसत्ताधिकरणं कालव्यापकं यदुभयासम्बन्धाधिकरणकालत्वम्, तत्त्वमयुतसिद्धमिति यावत् । -द्र.भा.भा.पृ.-66
2. सेतुटीका - 58.
3. पिण्डादीनां स्वजनेऽपि, पुत्राद्यनुमितं विना ।
   विभक्तानां पित्रादीनां, परस्परानुमितिना ॥
   स्थावरं द्विपदश्चैव, यद्यपि स्वयमर्जितम् ।
   असम्भूयन् सूतान् सर्वान्, तदपि न च विक्रियम् ॥
   अविभक्ताविभक्तार्वा, दायादाः स्थावरे समाः ।
   नैकः कुर्य्यात् क्रयं दानं, परस्परमतं विना ॥ -द्र.भा.भा.पृ.71

स्वत्वं गुणः समवायित्वाभावात्। नापि सामान्यादयः, तस्याऽनुवृत्त्या-दिबुद्धिहेतुत्वाभावाच्च। नाभावः विधिमुखेन तस्य प्रतीतित्वात्। स्वत्वं तु पदार्थान्तरं तस्य क्रियादिभिः उत्पन्नत्वात्, विक्रियादिभिः विनष्टत्वात् द्रव्यवत् इत्यनेन स्वत्वं पदार्थान्तरम्।

पृथिवीप्रकरणम्

पृथिवीप्रकरणस्यालोचनायां पृथिवीत्वजातिः सिध्यते। अतः उच्यते कणादसूत्रे - "रूपरसगन्धस्पशवती पृथिवी "(2.1.1.) इति समुच्चारितम्॥ रूपजन्यलौकिकसाक्षात्कारविषयताव्याप्यगुणत्वव्याप्यजातिसमवायित्वं गन्धत्वम्। गन्धसमवायिकारणतावच्छेदकतया पृथिवीत्वजातिसिद्धिः॥ तद्वत् नीलरूपसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वम्, कटुकषाद्यनेकरसप्रकार - कत्वात् कटुसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं वा, पाकजस्पर्शसमाना-धिकरणद्रव्यत्वव्याप्यजातिमत्त्वं वा पृथिव्या सामान्यलक्षणम्।

ननु सूत्रकारानुसारं रूपरसगन्धस्पर्शसमवायिकारणतावच्छेदकतया पृथिवीत्वजातिसिद्धेः पुनरपि[2] भाष्ये रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्व संयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारगुणसमवायिकारणतावच्छेदकतया पृथिवीत्वजातिसिद्धौ संख्यादिदशगुणानामाधिक्यस्वीकारो न युक्त इति चेत्। न।[3]समानासमानजातीयव्यवच्छेदो लक्षणार्थः इति न्यायवार्त्तिकप्रमाणवाक्य-बलात् प्रसिद्धपदार्थानामनुक्तेन, विशेषार्थमवबोधार्थं व्यवहारविषयप्रतिपाद-नार्थमप्रसिद्धपदार्थानामुक्तेन लक्षणप्रवृत्तेः। अत्र पृथिव्याः अप्रसिद्धगुणानां रूपरस-गन्धस्पर्शानामुक्तत्वात्, प्रसिद्धगुणानां संख्यादिचाक्षुषगुणानामनुक्तेन नापि क्षतिः।

अपि च सूत्रकारेण प्रसिद्धगुणाः उक्ताः। ते प्रदीयन्ते। प्रथमतः संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वापरत्वसप्तगुणानां प्रसिद्धगुणानां

1. द्र.भा.भा.पृ. 107.
2. प्र.भा.पृ. 71.
3. न्या.क.पृ. 71.

[1]चाक्षुषेऽन्तर्भावात्, पृथिवी चाक्षुषद्रव्यत्वात् एतेषां सप्तगुणानां पृथिवीगुणस्वीकारे न क्षतिः । अपि च गुरुत्वद्रवत्वसंस्कारगुणानां [2]पतनोपदेश[3]सामान्यवचनो-[4]त्तरकर्मवचनात् पृथिवीगुणग्रहणे नापि असमीचीनमिति वक्ति द्रव्यभाष्य-भावग्रन्थकारः ।

[5]न पाषाणादौ गन्धाभावेन तत्कारणतापृथिवीत्वन्यूनवृत्तित्वेन पृथिवी-त्वानवच्छेदकत्वमिति वाच्यम्, पाषाणादवयवानां तद्भस्मसु गन्धोपलब्धेः । [6]पृथिव्यां स्पर्शः अनुष्णशीतरुपपाकजस्पर्शत्वात् पाकजस्पर्शसमानाधिकरण-द्रव्यत्वव्याप्यजातिमत्त्वं पृथिवीत्वजातिः । ननु पाकजविशेषगुणानां द्रव्यान्तरेष्वन्तर्भावात् पृथिव्यामेवातिनियमेनोपलम्भात् पाकजगुणत्वावच्छेद-कस्य पृथिवीत्वजातिसिद्धावसम्भव इति चेत् । न । पीलुपाकनये पाकज-विशेषगुणस्य सर्वपृथिवीत्वाभावात् ।

न च जलीयद्रवत्वं संयुक्तसमवायेन सर्पिरादावुपलभ्भात् तेष्वातिव्याप्ति-रिति चेत् । न । सर्पिरादौ सांसाद्धिकद्रवत्वात् । संयोगसमवायेनाननुविधानान्नाति-व्याप्तिः । अतः ग्रन्थकारस्य [7]पितृदेवेनोक्तं संयुक्तसमवायेन जलीयं क्षीरतैलयोः द्रवत्वं घृतजत्वादौ स्वकीयं वह्नियोगजम् । एवमपि ग्रन्थकारस्य वैशिष्ट्यम् ।

ततः शरीरेन्द्रियविषयसंज्ञकंकार्यंप्राणापानादिचेष्टाश्रयभोगसाधनेन्द्रिया-श्रयाभ्यां शरीरं, गन्धव्यञ्जकैः घ्राणेन्द्रियं; मृदादिभिः विषयादयः प्रसिद्धाः इति एतन्मतं समर्थितं मीमांसकैरपि ।

---

1. संख्या परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्मरूपिद्रव्य समवायाच्चाक्षुषाणि । - वै.सू.4.1.1.
2. संयोगप्रयत्नाभावे गुरुत्वात्पतनम् ॥ -वै.सू.5.1.7.
3. सर्पिर्जतुमधूच्छिष्टानां पार्थिवानामग्निसंयोगाद् द्रवत्वमद्भिः सामान्यम् । - वै.सू.2.1.7.
4. नोदनाच्चाद्यमिषोः कर्म, तत्कर्मकारिताच्च संस्कारवत् तथोत्तरमुत्तरञ्च ॥ - वै.सू., 5.1.17.
5. द्र.भा.भा.पृ. 106
6. प्र.भा.पृ. 71.
7. द्र.भा.भा.पृ. 112

जलप्रकरणम्

'रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाः' (2.1.2) सूत्रे जलस्य शुक्लमधुरशीताः रूपरसस्पर्शगुणाः, द्रवत्वस्नेहसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरूत्वसंस्कारवत्यः आपः इति निगदति। गोपीनाथ मिश्रोऽपि [3]रसाभिविशेषत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतया जलत्वजातिसिद्धिरिति वदति। अपि च स्नेहसमवायिकारणतावच्छेदकतया अपां जातिलक्षणम्।

पुनश्च अपाकजेतराभास्वरशुक्लेतररूपासमानाधिकरणरुपवदवृत्ति - द्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वमपां लक्षणम्। कालिन्दीजलादावतिव्याप्तिवारणाय अपाकजेतरपदम्। एतेन कालिन्दीजलादौ नैल्यस्यानुभवः आश्रयोपाधिकत्वात्। जलस्य पाकजानुभवः अनलसंयोगात्। अत्र [4]जलेऽपाकजं गुणस्तु **गोपीनाथमिश्रमतस्य** विशेषः।

अपि च मधुरेतररसासमानाधिकरणसमानाधिकरणद्रव्यत्वव्याप्यजातावतिव्याप्तिवारणाय मधुरेतरपदम्। एवमपि इति स्पर्शसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वम्, सांसाद्धिकद्रवत्ववदवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वम्वा जलस्य लक्षणम्।

अस्य कार्यमपि द्विविधम् - विषयेन्द्रियभेदात्। विषयः सरित्समुद्रकरकादीनि इन्द्रियं रसोपलम्भकं रसनमिति अलमधिकेन।

तेजः प्रकरणम्

जन्यतेजस्त्वावच्छिन्नकार्यतानिरुपितकारणतावच्छेदकतया तेजस्त्वजातिसिद्धिः। अत्र "उष्णस्पर्शसमवायितावच्छेदकतया तेजस्त्वजाति

1. मु. का. 39.
2. प्र.भा.पृ.91.
3. द्र.भा.भा. 140.
4. जलरूपं न पाकजम्, कारणरूपविजातीयत्वाभावात् तेजोरूपवदिति द्रष्टव्यम्। लाक्षाजलादौ तु रक्तत्वमौपाधिकम्। - द्र.भा.भा.पृ.141.

इति लक्षणं नवीना: निर्मान्ति । उच्छृंखलास्तु - तेजस्त्वं न जाति: प्रमाणाभावात् , अनुगतप्रत्ययाभावाच्च । अस्मिन् प्रकरणे तौ द्वौ पक्षौ निरस्तौ ।

अत्र नित्यानित्यभेदेन तेजस: द्वेधा विभज्य पुनरपि अनित्यतेजस: शरीरेन्द्रियविषयभेदात् त्रेधा विभाजनमित्यादयो विषया: नासमाना: । विषयस्य भौमदिव्यौदर्य्याकरजभेदात् चतुर्धा ॥

वायुप्रकरणम्

स्पर्शसमवायिकारणतावच्छेदकतया वायुत्वजातिसिद्धि: । भाष्ये तु स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारगुणा: वायो: ।अत: सूत्रकारेण - वायु: स्पर्शवान् (वै, सू, (2- 1- 4) इति कथितम् । अत्र वायो: अणुकार्यभेदेन द्विविधम् । कार्यरूपतया शरीरेन्द्रियविषयप्राणभेदात् चतुर्विधं कार्यलक्षणम् । विषयनिरुपणप्रसङ्गे स्पर्शशब्दादिलिङ्गविषयभूतो वायु: अनुमान-प्रमाणेन प्रसाधित: । स च चक्षुरिन्द्रियविषयाभावात् पृथिव्यादित्रिकपदार्थेभ्यो विलक्षण: ।प्रागेव वायुनीरुपत्वस्यानुद्भूतरुपसम्भवाद् असिद्धत्वेन पूर्वपक्षीकृत्य वायुत्वं प्रसाधितम् ।

[1]आकाशप्रकरणम्

[2]संज्ञा तु त्रिविधा-नैमित्तिकी-औपाधिकी-पारिभाषिकीभेदात् । आकाशकालदिशां त्रयाणां द्रव्याणामपरजात्यभावेन व्यक्तिमात्रपरत्वात् पारिभाषिकी संज्ञा । नाकाशस्य शब्दसमवायिकारणतया तज्जातिसिद्धिरिति - वाच्यम् । शब्दस्याकाशे अनेकसमवेतत्वाभावात् । किन्तु आश्रयतया समवायात् । शब्दसंख्यापरिमाणपृथक्त्वसंयोगविभागा: आकाशस्य गुणा: । संख्यादिपञ्चगुणा: आकाशकालदिक्षु योजनीया: एकैकत्वादपरजात्यभावाच्च ।

अत्र [3]आकाशे इन्द्रियवृत्तितया नीलरूपप्रभाग्रहणेन नीलमाकाशमिति केचन । तत्तु न समीचीनम् । इह पक्षी आकाश इत्यप्रतीतौ प्रभामण्डलस्याधिकरणत्वम्,

1. द्र.भा.भा. 192. 2. तथैव 3. से. टी. पृ. 319.

नाकाशस्य । अत: आकाशप्रामाण्ये न प्रत्यक्षप्रमाणमित्युक्त्वा नानुमानमवृत्तित्वेन लिङ्गाभावात्, नोपमानं सादृश्याभावात्, न 'तस्मादाकाश: सम्भूत' इति प्रमाणत्वेऽपि शब्द: तस्य तत्परत्वात् इति खण्डयित्वापि शब्दम् [1]अकारणगुणपूर्वकत्वात्, अयावद्द्रव्यभावित्वात्, आश्रयादन्यत्रोपलब्धेश्च प्रत्यक्षमिति पुनरपि मतमुपस्थापयति ।

शब्द: न द्रव्यं निर्गुणत्वात् । नापि समवाय: एकमात्रवृत्तित्वात् । नात्मन: श्रोतृग्राह्यत्वात् शब्दत्ववत् । न दिक्कालमनसां विशेषगुणत्वात् । अत: [2]परिशेषाच्छब्द एव गुण: कारणगुणपूर्वकत्वाद् भेरीदण्डसंयोगेन तत्समानाधिकरण तया भेर्य्यां तदुत्पन्नत्वात्, न तु समवायसम्बन्धेन । अपि च शब्द: प्रत्यक्षं भेर्य्यादौ दण्डसंयोगादिक्रमेण निमित्तवशाद् । सोऽपि वीचीतरङ्ग न्यायेन कदम्बगोलक-न्यायेन वा वायुवत् कर्णशष्कुल्यावच्छिन्ननभोप्रदेशे शब्दसन्तानं जनयति इति प्रतिपाद्य द्रव्यस्य गुणत्वं निरुप्यते। अत: सूत्रकारेण "शब्द: नात्मन: श्रोतृग्राह्यत्वात् शब्दवदिति ।

[3]कालप्रकरणम्

अत्र [4]कालत्वं विजातीयपरत्वाऽसमवायिकारणसंयोगाश्रयविभुत्वमिति कथयित्वा नित्यस्य कालस्य क्षणलवनिमेषादिव्यवहारादिभावत्वे वर्त्तमानानागतातीतानां व्यवहारे च निमित्तविशेषा: प्रतिपादिता: ।

[5]दिक् प्रकरणम्

"[6]इत इदमिति यतस्तद्दिश्य लिङ्गमिति (वै.सू.2.2.10) सूत्रमुद्दिश्यं नियतदिग्देशयो: समानकालयो: पिण्डयो: यतो द्रव्याद् भवति सा दिगिति निरूप्य तद्भेद: प्रदर्श्यते । [7]पूर्वपश्चिमदक्षिणादिदशप्रत्ययै: पिण्डापेक्षया दिशो विभाग: प्रस्थापित: । [8]दिक्कालयो: ईश्वरादतिरिक्तत्वमिति पूर्वपक्षं स्वीकृत्य पुनरपि तत्खण्डनं कृतमिति ।

---

1. शब्द: प्रत्यक्षत्वे सत्यकारणगुणपूर्वकत्वादयावद्द्रव्यभावित्वादश्रयादन्यत्रोपलब्धेश्च न स्पर्शवद् विशेषगुण: । - प्र. भा. ,पृ. 144.
2. परिशेषाद् गुणो भूत्वा आकाशस्याधिगमे लिङ्गम् । - प्र.म. 145.
3. द्र. भा. भा. पृ.206 4. तत्रैव पृ. 5. द्र.भा.भा.पृ.215
6. वै.सू. 2.2.10. 7. प्र.भा. 162. 8. द्र. भा. भा.216

आत्मप्रकरणम्

[1]आत्मशक्यतावच्छेदकत्वेन सिद्धः आत्मत्वस्य सामान्यविशेषः। केचित्तु ब्रह्माण्डाद्यसाधारणत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतया आत्मत्वजाति इति। नवीनास्तु मानसत्वासमवायिकारणतावच्छेदकतया आत्मत्वजाति इति मन्यन्ते।

"न सुखसमवायिकारणतावच्छेदकतया आत्मत्वजातिसिद्धिरिति वाच्यम्। ईश्वरे सुखसमवायिकारणत्वादि"त्यादिकं विचार्य्य तत्खण्डनं गोपीनाथेन कृतम्। आत्मसिद्धौ तस्य निरवयवत्वाद् बाह्येन्द्रियप्रत्यक्षत्वेऽपि मानसप्रमाणं निरस्यन् तत्सौक्ष्याद‌प्रत्यक्षत्वेऽपि शब्दाद्युपलब्ध्यनुमितैः श्रोत्रादिभिः करणैः [2]आत्मा समधिगम्यते; [3]करणं खलु सर्वत्र कर्तृव्यापारगोचरः इति न्यायात्। न च (चार्वाक्मते) चैतन्यं ज्ञानं प्रति समवायस्य गुणत्वे कार्यकारणभावस्वीकारे शरीरनाशे तज्ज्ञानस्य नाश इति वाच्यम्। "[4]यतः भाष्ये मृते चाभावादिति" इत्युक्तत्वात्। मरणादनन्तरं शरीरनाशेऽपि शरीरान्तरोत्पन्नानुभवजन्यस्मृतिज्ञानस्य जन्मान्तरे स्तन्यपानादिप्रवृत्तिदर्शनाद् आत्मत्वानुमानं सिध्यति। ननु पूर्वानुभवजन्यं युद्धादिकार्यं स्मर्यतामिति चेन्न। [5]तस्य युद्धादिकस्योद्बोधकाभावात् न तदुत्पत्तेः।

जीवेश्वरभेदेन आत्मनः द्विविधो विभागः। अस्मिन् सन्दर्भे "नित्यविज्ञान मेव आत्मा" इति वेदान्तिनः। जीवस्य भोक्तृत्वमिति पञ्चविंशतितत्त्वज्ञाः सांख्याः। ज्ञानाज्ञानारुपः आत्मेति आहुःकुमारिलाः। एवं पक्षं स्वयमुत्थाप्य तत्पक्षदोषाः कथिताः।

तदनन्तरं क्षित्यादिकस्य सकर्तृकत्वमीश्वरे प्रदर्शयन् पूर्वपक्षमतानि समाधाय तन्मतानुसारं सिद्धान्तः प्रोक्तः।

---

1. द्र. भा. भा. पृ. 221
2. प्र.भा.पृ. 168.
3. द्र.भा.भा. पृ. 225
4. द्र.भा.भा.पृ. 229
5. भाष्यम्, पृ. 317.

पुनरपि ईश्वरस्य प्रत्यक्षज्ञानकारणानि प्रसाध्य ईश्वरज्ञानस्यैकत्वं प्रतिपादितम् । अनुभवभेदसंस्काराणां भेदकार्यफलादीनि प्रदर्श्य संस्कारस्यात्मना सह सम्बन्धः निरूपितः ।

[1]मनः प्रकरणम्

मानसत्वावच्छिन्नकार्यतानिरुपितकारणतावच्छेदकत्वेन मनस्त्वजातिविशेषः । तदेव एकमिति भाष्यकारः । [2]न च शरीरावयवानां हस्तमुखचरणानां नृत्यगीतादिकर्मसु युगपन्नानाप्रयत्नोत्पादनात् मनसो बहुत्वमिति वाच्यम् । सत्क्रियाकलापविषयकचिकीर्षायामेकप्रयत्नत्वात्, मनः कार्यस्य त्वस्या सञ्चाराच्च तदनुपलब्धेः । एतन्मतं समर्थयति शङ्करमिश्रः [3]उपस्कारे । यथा- *"यद्यप्येकस्मिन्नपि शरीरे बहुनि मनांसि स्युस्तदा ज्ञानप्रयत्नानां यौगपद्यं स्यात् । यत्तु नर्तकीकरचरणाङ्गुलीषु युगपत्कर्मदर्शनाद् युगपदेव बहवः प्रयत्नाः उत्पद्यन्ते इति मतम् । तदयुक्तम्, मनसः शीघ्रसञ्चरादेव तदुपपत्तेः । अविनश्यदवस्थयोग्यात्मविशेषगुणानां यौगपद्यानभ्युपगमात् ।"*

एवमपि [4]एकशरीरे पञ्चेन्द्रियैः सह पञ्चानां मनसां बहुत्वं पूर्वपक्षमतमुपस्थाप्य पुनः तन्निराकरणपूर्वकं प्रतिशरीरं मनसः एकत्वं साध्यते ।

अपि च श्रोत्राद्यव्यापारे स्मृत्युत्पत्तिदर्शनाद् बाह्येन्द्रियैरगृहीतसुखादिग्राह्यान्तरभावात् च अन्तःकरणमित्यत्र विषयाकारविज्ञानस्य वासनया सुखदुःखप्राप्तिरिति मन्यमानानां बौद्धानां मतमुपस्थाप्य तत् खण्डयित्वा करणान्तरानुमानं बाह्येन्द्रियचक्षुरादिभिः अगृहीतानां सुखादीनामनुमानं वर्णितम् । संख्यापरिमाणपृथक्त्व संयोगविभागपरत्वापरत्वसंस्काराणां मनोगुणानां वैशिष्ट्यं प्रतिपाद्य प्रकरणं समाप्यते ।

---

1. द्र.भा.भा. पृ. 246
2. द्र.भा.भा.पृ. 254
3. उपस्कार पृ. 238.
4. द्र.भा.भा.पृ. 252

नवद्रव्याणां साधर्म्यवैधर्म्यगुणविवेचनम्

गुणाः	पृथिवी	जलं	तेजो	मरुत्	व्योमः	कालः	दिक्	आत्मा	मनः
रूपम्	*	*	*						
रसः	*	*							
गन्धः	*								
स्पर्शः	*	*	*	*					
संख्या	x	x	x	x	x	x	x	x	x
परिमाणम्		x	x	x	x	x	x	x	x
पृथक्त्वम्		x	x	x	x	x	x	x	x
संयोगः	x	x	x	x	x	x	x	x	x
विभागः		x	x	x	x	x	x	x	x
परत्वम		x	x	x	x				x
अपरत्वम्		x	x	x	x				x
बुद्धिः								*	
सुखम्								*	
दुःखम्								*	
इच्छा								*	
द्वेषः								*	
प्रयत्नः								*	
गुरुत्वम्	x	x							
द्रवत्वम्	x	*	x						
स्नेहः		*							
संस्कारः	x	x						*	x
शब्दः					*				
धर्मः								*	
अधर्मः								*	

अत्र पृथिव्यप्तेजोमरूपादीनां नवद्रव्याणां गुरुनिरूपणमुपर्युक्तशब्द-सञ्जामध्ये प्रदत्तम् ।

येषां द्रव्यादीनां ये ये विशेषगुणाः, तेष्वेपि तन्निरूपणाय भिन्नचिह्नानि (*) प्रदत्तानि । परन्तु सामान्यगुणानां निरुपणस्थाने (x) चिह्नमिदं दत्तम् । अतः अस्माज्ज्ञायते रूप-रस-गन्ध-स्पर्श-बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्न-धर्माऽधर्म-भावनाख्यसंस्कार-शब्द-स्नेह-सांसाद्धिकद्रवत्वानि विशेषगुणाः । संख्या -परिमाण-पृथक्त्व-संयोग-विभाग-परत्वाऽपरत्व-गुरुत्व-नैमित्तिक-द्रवत्व- वेगस्थितिस्थापकाख्यसंस्काराः सामान्यगुणाः । रिक्तस्थानानि चिह्नितस्थानेभ्यो: वैधर्म्याणि सूचयन्ति इति बोध्यम् ।

एवं ग्रन्थोक्तविषयाः विस्तरभिया यावच्छक्तिः संग्रहरूपेण विवेचिताः ।

कृतज्ञताविष्कारः

वाजपेयिवंशजस्य अनेकशास्त्राध्येतुः जगन्नाथवाजपेयिपुत्रगोपीनाथ-मिश्रस्य प्रशस्तपादव्याख्याभूतस्य द्रव्यभाष्यभावपरिशीलनावसरे प्राक्शास्त्रि-कक्षातः आचार्यकक्षां यावदध्यापितवद्भ्यः प्राचीननव्यन्यायशास्त्रेषु अप्रतिहत-सातेभ्यः श्रीचैतन्यमहाप्रभुपदकमल निविष्टमनोभ्यः ब्रह्मचारिभ्यः समस्तशिष्यान् पुत्रकल्पमन्यमानेभ्यः मदीयगुरुदेवेभ्यः पुरीस्थसदाशिव-केन्द्रीय-संस्कृत-विद्या-पीठस्य दर्शनविभागस्य अवसरप्राप्तमुख्याध्यापकेभ्यः श्रीराधारमणदासमहाराजेभ्यः त्रिकरणसमन्वितकार्तज्ञ्यं ज्ञापयामि ।

अपि च उपकृतवद्भ्यो दयादाक्षिण्यादिसर्वगुणोपेतेभ्यः परमकारुणिकेभ्यो नव्यन्यायशिरोमणि-शिक्षाशास्त्रि-विद्यावारिध्युपाधियुक्तेभ्यो भूतपूर्वतञ्जावूल-सरस्वतीमहालकोशागारपण्डितेभ्यः; साम्प्रतं प्रयागस्थ-श्रीगङ्गानाथझा-केन्द्रीय-संस्कृत-विद्यापीठे परियोजनाधिकारिपदवीमलं-कुर्वद्भ्यो मम मार्गनिर्देशकेभ्यः डा.के.ई. गोविन्दन्महाभागेभ्यः आजीवनं प्रणतिं वितनोमि ।

पुनश्च नितरां पुरीस्थ-श्रीसदाशिव-केन्द्रीय-संस्कृत-विद्यापीठो-न्नतिकरणे दत्तचित्तेभ्यः तद्विद्यापीठस्य प्राचार्यपदमलङ्कुर्वद्भ्यः डा.

हरिहरझामहोदयेभ्यः, परमदयालुभ्यः प्रयागस्थ-गङ्गानाथ-झा-केन्द्रीय-संस्कृत-विद्यापीठस्य प्राचार्यमहोदयेभ्यः डा. गयाचरणत्रिपाठिमहानुभवेभ्यः धन्यवादं समर्प्य कृतकृत्यं मन्ये ॥

अपि च ज्ञानसरोवरस्य सरोरुहकल्पेभ्यो देशविदेशनिस्नातशाश्त्रचूडा-मणिभ्यः उत्कलविश्वविद्यालयस्य संस्कृतविभागे मुख्याध्यापकपदादवसर-प्राप्तेभ्यो मदीयगुरुचरण- डॉ. अनामचरण स्वाइँ महाभागेभ्यःशतधा प्रणतिततिं व्याहृत्य द्रव्यभाष्यभावग्रन्थस्य मातृकादिकं दत्तवद्भ्यः ओडिशा- प्रदेशस्थ-राज्यसंग्रहालयपरिचालकेभ्य; पण्डितनीलमणिमिश्रेभ्यः. तत्सह- कारिण्यै मद्भगिनीकल्पायै डा.ममतामिश्रमहाभागायै च साग्रहं धन्यवादं विनिवेदयामि । पुनश्च **Madras Govt. Oriental Manuscript Library** अधिकारिभ्यः धन्यवादमर्पयामि । सर्वकर्मसु सहायकेभ्यः मदीयज्येष्टभातृकल्पेभ्यः प्रयागस्थगङ्गानाथ-झा-केन्द्रीय-संस्कृत- विद्यापीठे- ऽनुसन्धानकार्यकुर्वद्भ्यो गवेषणासहायकेभ्यः डा.रमेशचन्द्रहोतृभ्यः धन्यवादस्यार्पणानन्तरं दिल्लीस्थ राष्ट्रियसंस्कृतसंस्थानेन एतत्पुस्तकप्रकाशननिमितं वितप्रदानात्तेतेभ्यः उपकारवद्धयः, मुद्रणकार्ये भूरिपरिश्रमं कृत्वा स्वल्पसमये कार्यं सम्पादितवद्भ्यः सर्वेभ्यः धन्यवादानर्पयित्वा सहृदयहृदयाह्लादकानां कणभक्षाक्षचरणपक्ष-समर्थितानां दार्शनिकानां च कृते द्रव्यभाष्यभावग्रन्थोऽयं किमपि नवीनं तत्त्वं प्रदर्शयिष्यतीति विश्वसिमि ।

भवदीयःअनुसन्धाता
डा. मार्कण्ड दासः,
सर्वदर्शनाचार्यः, शिक्षाशास्त्री, विद्याबारिधिः

भाष्यानुसारं सूचीपत्रम्

प्रशस्तपादाचार्यकृतभाष्यस्य

गोपीनाथमिश्रकृत-द्रव्यभाष्यभावः

मङ्गलाचरणम्

(मू) प्रणम्य हेतुमीश्वरं, मुनिं कणादमन्वतः ।
पदार्थधर्मसंग्रहः, प्रवक्ष्यते महोदयः ।।

गोपीनाथमिश्रकृत-द्रव्यभाष्यभावटीका

(टी) [1]नमः नृसिंहाय -
क्षीराम्भोधिप्रमथनविधौ वीक्ष्य लक्ष्मीं मनोज्ञाम्,
मध्ये तोयं विकचवदनाम्भोजनमावि[2]र्भवन्तीम् ।
औत्सुक्येन शिलथितमथन[3]व्यावृत्तेः [4]शार्ङ्गपाणेः,
लीलापाङ्गैः स्फुरितममितं मङ्गलं नस्तनोतु ॥ १ ॥

यद्[5]बुद्धिवैषम्यमपेतमोहः,
शास्त्रेषु तत्त्वं विषयीकरोति ।
नारायणो यः परया स्वभक्त्या,
तं तातमीड्यं प्रणमामि नित्यम् ॥२॥

दीक्षिताशेषशास्त्रज्ञो, जगन्नाथप्रसादतः ।
भाष्यभावप्रकाशोऽयम्, गोपीनाथेन तन्यते ॥३॥

---

1. श्रीगणेशाय नमः - ग मातृकायां ।
2. आविर्भवताम्- ग मातृकायां ।
3. व्युत्पत्तेः - ग मातृकायां ।
4. शार्ङ्गपाणिः - ग मातृकायां ।

चिकिर्षितग्रन्थस्यारम्भेऽव्यवहितपूर्वकालिकनियमत:[1] क्रियमाणेष्टसाधनतांशे[2] भ्रमशून्यानम[3]विगीतशिष्टाचारविषयत्वेनानुमितेष्टसाधनताकस्य[4] मङ्गलप्रभावाशेषानुमानसमाप्तिफलकत्वस्य सिद्धौ तत्कामनया कृतपराऽकृतपरात्परगुरुनमस्कारत्व-[5]शिष्यशिक्षासूक्तिनिबन्धनं निबन्धं कुर्वन्नेव [6]प्रयोजनादभिधानादेव दर्शयति- **प्रणम्येति** ।। हेतुं जन्य[7]मात्रप्रसिद्धनिमित्तकारणताकं हेतुः । तम् ईश्वरो नित्य: सर्वविषयकज्ञानवत्त्वात् । प्रणम्य-[8]भक्तिश्रद्धादरपूर्वकं नत्वा । [9]अत: ईश्वरप्रणामाद् अनु पश्चाद् वदन्तं श्रीकणादं कणादनामानं मुनिं प्रणम्य पदार्थधर्मसंग्रहनामभाष्यग्रन्थ: प्रवक्ष्यते [10]उच्चारणविषयीकरिष्यते इति योजना ।

[11]नन्वाचार्येण प्रारीप्सितग्रन्थस्याविघ्नसमाप्तित्वं मङ्गलाकारेण कृतमित्युक्तम् । [12]तदयुक्तम् । नाद्य [13]अन्वयव्यतिरेकव्यभिचारेण मङ्गलनिष्ठकारणत्वस्य समाप्तित्वनिरूपितान्वयव्यतिरेकगम्यत्वाभावादिति चेन्न । येन [14]समाप्तावव्यवहितपूर्वक्षणे मङ्गलस्य न [15]कारणत्वेन प्रवेश: व्याप्तिकत्वस्य परिधानेन परित्यागेन । तथा यत्र मङ्गलं विनापि समाप्तिस्तु तज्जनिताशयमङ्गलानुमाने च न [16]व्यतिरेकव्यभिचार: । तदन्वयव्यभिचार: । तदन्वयव्यभिचारस्य सहकार्यान्तरविरहप्रयुक्तत्वेनापि वक्तुं शक्यत्वात् न

1. पूर्विकाज्ञानतल्लनियमित: - ग मातृकायां । 2. क्रियमाणस्येष्टसाधनतांशे - ग मातृकायां ।
3. अनिर्गीतं ग मातृकायां । 4. साधनता कस्य मङ्गलस्य परिशेषानुमानात्समाप्तिं- ख मातृकायां ।
5. शिष्यशिक्षायै निबन्धनं - ख मातृकायां । 6. प्रयोजनाभिधेयं - ख मातृकायां ।
7. मात्रप्रसिद्ध - ग मातृकायां । 8. श्रद्धातिशयं तत्वा- (क) ख मातृकायां ।
9. तत: -ग मातृकायां । 10. उच्चारणविषयीति केचित् - ग मातृकायां ।
11. तज्जनितयोजनानन्दगत - क मातृकायां । 12. तदुक्तम् - ख मातृकायां ।
13. साधनताकस्य मङ्गलस्य परिशेषानुमानात्समाप्तिफलकत्वस्य परापरगुरूनमस्काररूप- - ख मातृकायां ।
14. समाप्तेस्तु - ग मातृकायां ।
15. मङ्गलानि कारणत्वं प्रविष्टम् -मङ्गलानि कारणत्वं प्रविष्टम् - ग मातृकायां ।
16. व्यतिरेकव्यभिचार: नास्ति - ख मातृकायां ।

कारणताग्रहप्रतिबन्धक इति वाच्यम् [1]जन्मान्तरीयमङ्गलानुमाने कारणत्वग्रहः, कारणत्वग्रहे च [2]तदनुमानमित्यन्योन्याश्रयदोषेण जन्यत्वाश्रयमङ्गलानुमानस्यापि कर्त्तुमशक्यत्वात् । न चैवं प्रत्यक्षेण मङ्गलस्यकारणत्वग्रहाभावेऽपि [3]मङ्गलस्येष्ट-साधनमिष्टसाधनतांशे [4]भ्रमाधारविषयत्वाद् दर्शयतीति ।

इष्टसाधनत्वसिद्धाविष्टान्तरत्वमङ्गलद्वारेण समये नियतोपस्थिति-कत्वाभावात् परिशेषानुमानेन समाप्तिफलकत्वग्रह इति वाच्यम् ग्राह्यस्य कारणत्वस्य प्रत्यक्षेण बाधेऽनुमानेन तत्कारणाग्रहाऽसम्भवादिति चेन्न । विघ्नञ्च [5]ध्वंसपूर्वकसमाप्तित्वावच्छिन्नं [6]प्रत्याशङ्कितसमस्तविघ्नध्वंसस्य मङ्गलत्वेन कारणत्वं [7]कल्पनीयं येनोदयत्वव्यतिरेकव्यभिचाराभावात् । तथा च बौद्धादिकृतग्रन्थसमाप्तेः[8] जन्मान्तरानुवर्त्तमानविघ्नत्वाभावजन्यत्वेन विघ्नस्य ध्वंसपूर्वकत्वाभावात्तस्य [9]मङ्गलाजन्यत्वेऽपि न क्षतिः । [10]शङ्कितविघ्नध्वं-सत्त्वेनैवेति कारणाद् येन मङ्गलेन समाप्तिस्तु (?) तत्र तादृशमङ्गलत्वाभावान्न क्षतिर्न वाननुगमः, [11]न च प्रारीप्सितप्रतिबन्धकं [12]दुरितविघ्नं; नास्ति इत्यस्यातीन्द्रियत्वेन समाप्तेः ध्वंसपूर्वकत्वस्य निश्चेतुमशक्यत्वान्न प्रवृत्तिरिति वाच्यम्, कारीर[13]वृष्ट्यादौ फलसंशयेऽपि प्रवृत्तिदर्शनेन त[14]न्निश्चेतुमशक्यत्वान्न तत्र प्रवृत्तिरिति वाच्यम् ।

---

1. जन्यत्वाश्रय - क मातृकायां ।
2. तदनुमानमिदं - क मातृकायां ।
3. मङ्गलस्य - नास्ति ।
4. भ्रमाचारविषयत्वादर्शवदितीष्टसाधनत्वासिद्धौ इष्टान्तरस्य मङ्गलाचारण समये ।
5. नास्ति ।
6. प्रत्याशङ्कितविघ्नसमक्षस्य ।
7. कल्पनेनादयत्व ।
8. ममाप्ति - ग मातृकायां ।
9. मङ्गलजन्यत्व - क पुस्तिकायां ।
10. आशङ्कितविघ्नध्वंसमङ्गलत्वेनेति करणात् यत्र तादृशमङ्गलाभावान्न ।
11. परिच्छेदः ।
12. दुरितं विघ्नस्तस्यातिक्रमत्वेन ।
13. वृष्ट्यादौ - क मातृकायां ।
14. नन्निश्चेयं सहचित्कारत्वादिति सम्प्रदाय विदः - क मातृकायां ।

[1]परे तु विघ्नध्वंसम्प्रति मङ्गलस्य कारणत्वेनागृहीतत्वात् । विघ्नध्वंसपूर्वकं समाप्तिं प्रति कारणत्वस्य ग्रहीतुमशक्यत्वाल्लाघवाच्च विघ्नध्वंसस्यैव मङ्गलहेतुकत्वात् । तथा च नान्वयव्यतिरेकव्यभिचारौ । सत्यपि मङ्गले यत्र च समाप्त्यभावस्तत्र नापि मङ्गलत्वेन, नापि विघ्नध्वंसत्वेन वा, समाप्त्यभावस्तु मङ्गलानन्तरोत्पन्नविघ्नात् । एतद्धि ग्रन्थेन समाप्यतामिति पुरुषान्त[2]प्रति कुर्य्याद् वा । विघ्नस्य प्रतिबन्धकत्वेन तत्संसर्गाभावस्य ज्ञानवत्त्वं (प्रति) समाप्तिहेतुत्वात् स च बौद्धादिग्रन्थसमाप्तिस्थलेऽयत्नाभाव एव । शिष्टकृतग्रन्थादिसमाप्तौ च मङ्गलेन विघ्नध्वंसे कृते तत्समवहितादन्यकारणकलापात् समाप्तिरिति प्रतिपेदिरे ।

नवीनास्तु यत्र प्रायश्चित्तादिना विघ्नध्वंसस्तु सत्यपि मङ्गले न विघ्नध्वंसाभावादन्वयव्यभिचार: । [3]एवमीश्वरप्रणीतग्रन्थादौ मङ्गलस्य बहुत्राश्रूयमाणत्वात्तद्विघ्नध्वंसस्य वक्तुमशक्यत्वान्न विघ्नध्वंस एव मङ्गलकारणम्, किन्तु समाप्तौ । न चान्वयव्यतिरेकव्यभिचार: [4]पूर्वोक्तस्तदवस्थ एवेति वाच्यम् समाप्तेश्चशमवर्णध्वंसरूपत्वेन चरमवर्णेष्वेव जाति: कल्पनीया । तथाच तज्जातीयत्वावच्छिन्नस्य [5]ध्वंसं प्रति मङ्गलत्वेन कारणत्वस्य क्लृप्तत्वात् नान्वयव्यतिरेकव्यभिचारौ । न च विघ्नेष्वेव विलक्षणजाति: [6]कल्पनीया । तथा च तज्जातीयविघ्नं प्रति समाप्तिमङ्गलत्वेन कारणताग्रह: इति न कोऽपि दोष इति वाच्यम्, विघ्नस्यातीन्द्रियत्वेन तत्र तादृशजाते: कल्पयितुमशक्यत्वाद् [7]ईश्वरकृतग्रन्थस्थमङ्गलतर्कस्यान्वयव्यभिचारादिसहाभावाच्च ।

तच्चाहु: - [8]शिष्यपरं तु शब्दतदुपजीविप्रमाणबोधितबलवदनिष्टाननुबन्धितेष्टसाधनतावत् तदिति । मङ्गलत्वञ्च विघ्नध्वंसकामनया तत्पूर्वकसमाप्तिकामनात्वाद् वेदबोधितविषयम् । यद्वा समाप्तित्वावच्छिन्नकार्यतया

1. परिच्छेदो नास्ति ।
2. प्रति कुयूर्याद --- ज्ञानवत्त्वम् - नास्ति ।
3. एवमोश्वरप्रणीतग्रन्थादौ - नास्ति ।
4. पूर्ववत् ।
5 ध्वंस --- प्रतिमङ्गलत्वेन कार -- नास्ति ।
6. कल्प्यताम् ।
7. ईश्वरकृत्व --- त्र चाहु: ।
8. शिष्टपरन्त -- तदिति - नास्ति ।

विघ्नध्वंसत्वावच्छिन्नकार्यतया वा निरुपिताया: [1]कारणतदवच्छेदकत्वेन सिद्धौ जातिविशेष:। न चैवं मङ्गलेष्टसाधनतानुमितावपि [2]तदप्रामाण्यशङ्कया [3]सुलभोत्पत्तित्वेन न ततो निष्कम्पप्रवृत्तिरिति वाच्यम्, शब्दस्तदुपजीविप्रमाणातिरिक्तप्रमाणबोधितबलवदनिष्टाननुवन्धीष्टसाधनताकभिन्नरुपालौकिकधर्मशास्त्रनिषिद्धरुपाविगीतशिष्टाचारविषयत्वेन वेदबोधितकर्त्तव्यताकसिद्धौ कर्त्तव्यताया: [4]दर्शाद्यलौकिकश्रेष्टसाधनताज्ञानं विना अननुपपत्तेस्तदनुमाने चाप्रामाण्यशङ्काया: सिषाधयिषितासाध्यविशेषणतावधृतसमाप्तिकामो मङ्गलमाचरेदित्याद्याकारनिर्वाचितानुपूर्वीकश्रुतिबलेनैव सुनिरसनीयत्वात्। तान् प्रथमविशेषणेन भोजनादौ वाचा व्यभिचार:। [5]तदर्थश्च। शब्दो वेदस्तदुपजीविनी स्मृति: [6]तदतिरिक्तप्रमाणेन प्रत्यक्षादिना बोधितबलवदनिष्टाननुबन्धिनीष्टसाधनता, यस्य भोजनादेस्तत्तदलौकिकं तदन्यद्दर्शाद्यलौकिकम्। [7]अत्र शब्देन विशेषणाद्दर्शादे:; बलवदनिष्टाननुबन्धीतिविशेषणादुच्चारणादेर्न लौककिमिति। [8]तदुपजीविताविशेषणाद् इष्टिकादे:, तदुपजीवितविशेषणान्निषिद्धाचरणादिकमलौकिकमिति। तत्र द्वितीयविशेषणेन तत्तज्जातीयविशेषणान्नागमादौ तृतीयविशेषणाच्च न तस्य जलताडनादौ च व्यभिचार:। न च तस्य तृतीयविशेषणेनैव वारणमिति वाच्यम्। तन्न। वैधरागजप्रसज्याभावेन वेदनिषिद्धाभावात्। शिष्यपदञ्च इष्टसाधनतांशेऽभ्रान्तपरम्। तेनेष्टासाधनतांशभ्रान्तवारणमिति तद्वारणमिति मन्तव्यम्, तथा च वेदप्रमाण्याभ्युगमप्र[9]युक्ताचारविषयत्वादित्येव हेतुरिति कृतमाद्य वा विशेषणाभ्यामिति मन्तव्यम्।

---

1. कारणतदवच्छेदकत्वेन जातिसिद्धि: खण्ड - क मातृकायां। 2. नास्ति।
3. स्थूलप्रोत्थितत्वेन न ततो निष्कर्षप्रवृत्तिरिति वाच्यम् - 'क' मातृकायाम्।
4. नास्ति। 5. तदन्यश्च - क मातृकायाम्।
6. तदतिरिक्त --- अलौकिकम्। 7. तान् शब्देन - क मातृकायाम्।
8. तदुपजीवित - तन्न नास्ति।
9. प्रयुक्तादिविशेषणत्वादित्वेन हेतुरिति कृद्माद् वा विशेषणाभ्युपगमामिति। - क मातृकायाम्।

अत्र धर्मशास्त्रनिषिद्धायाः स्वबाधितोत्कर्षत्वेन [1]कामपि प्रति प्रीतिजनकतावच्छेदकरुपक्रियायास्तदाराधनाविषयत्वेन [2]ज्ञानापायभक्तेरप्रामाण्यशङ्कानास्कन्धितफलावश्यं भावनिश्चयरुपाश्रद्धाया अतिशयपूर्वकत्वं विशिष्टो नमस्कारः प्रशब्दसमभिव्याहारबलेन नमि पातुं नावबोध्यते। ननु प्रकर्षात्तदुपसर्गरुपविशेषान्नियतोपस्थितिकत्वेन [3]उपसर्गविशेषणां तत्र तत्र शक्तिकल्पनापत्तिः। अन्यथा प्रादुसर्गसमभिव्याहततादृशधातुत्वादिना शक्तिकल्पनेऽनन्तशक्तिकल्पनापत्तिः, तानपि वादिना प्रादीनामबोधकत्वेन नियमितस्तदुपादानानुपपत्तिश्च। अतः प्रशब्देन प्रकर्षबाधितो न वितन्वते। प्रजया प्रजयादौ प्रकृतिवाच्यत्वे प्रकर्षिताव्यवसितानन्वयापत्तेः। प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामित्यन्वयात्। एवं प्रतिष्टित इत्यादौ गमनं तस्योपसर्गतत्त्वेनाख्यातार्थयत्नानन्वयापत्तिः। अतस्वातानन्दगतकतया धातोर्विधिलक्षणाशयिगमनवत्त्वमुपसर्गस्य तात्पर्यग्राहकत्वमित्यवश्यं वक्तव्यम्। ‘‘ततश्चैकरुपोपसर्गाणां तथात्व’’मिति न्यायः।

न चैवमुपसृष्टस्य तिष्टतेर्लक्षणाकल्पनात्सर्वेषामेवोपसृष्टानां धातूनामपि तथाकल्पनमैकरुप्यादिति वाच्यम् इष्टापत्तेः। विशिष्टस्य केवलान्वयत्वेन तल्लक्षणकल्पनायां विरोधाभावात्। शक्यादन्येन रुपेण ज्ञाते भवति लक्षणेति न्यायात्। न च विशिष्टकेवलयोः सम्बन्धाभावात् शक्यसम्बन्धस्य च लक्षणत्वात्कथं[4]लक्षणेतिवाच्यम् सम्बन्धान्तराभावेऽपि तादात्म्यस्यैव सम्बन्धत्वेन वक्तुं शक्यत्वादिति दिक्। वस्तुतस्तूपसर्गाणां वाचकत्वे धात्वर्थोपसर्गार्थयोः[5] द्वारा भावादनन्वयापत्तिः इति द्वितीयः।

---

1. नास्ति।
2. ज्ञानरूपायाः भक्तेरप्रामाण्यशङ्कानास्कन्धितज्ञानस्कन्धितफलवत्त्वं भावनिश्चयात्मिका फलश्रद्धादिप्रीतिशयपूर्वकत्वविशेषणेन - क मातृकायाम्।
3. यदोभयोत्पादात् नियतोपस्थितिकबाधकं विना एतत्पदशक्तिरिति व्युत्पत्तेरूपसर्गविशेषाणां तदशक्तिः। -क - मातृकायाम्।
4. लक्षणेति वाच्यम्
5. द्वाराद्भाव - परः नास्ति

एतद् द्रष्टव्यम्- नमस्कारश्च स्वापकर्षबोधानुकूलव्यापारः। स च त्रिविधः-कायिको वाचिको मानसश्चेति। तत्र नमस्कारत्वं प्रत्यकं भिन्नं धर्म-त्रयमेव। कायिकश्च करशिरःसंयोगादिदण्डवत्पतनादिश्च। [1]ननु कायिकनम-स्कारेषु नमस्कारत्वस्य जातेरेकस्याभावेनानुगतधर्माभावात् कथमनुगतो नमस्कारव्यवहारः ? ननु तेषु करशिरःसंयोगादिषु संयोगत्वव्याप्यान्यतरकर्म-जन्यतावच्छेदकत्वेन सिद्धजात्या साङ्कर्य्येण नानात्वस्यावश्यं स्वीकारादिति चेन्न। कायिकेषु नमस्कारत्वस्य जातित्वाभावेऽपि मानसनमस्कारानुमापक-[2]चेष्टात्वेनैकत्वात्। न जातिव्यवहारस्यानुगमकधर्मत्वमात्रनिबन्धनम्।

एवञ्च वाचनिकत्वं मानसनमस्कारानुमापकशब्दत्वम्। तच्च नमामी-त्यादिवर्णेषु [3]व्यासज्यवृत्तीति एकवर्णश्रवणेनैतादृशधर्मसाक्षात्कारः। एतेन वाचनिकत्वस्य जातित्वे तस्याव्यासज्यवृत्तित्वाभावादेकवर्णसाक्षात्कारे तत्साक्षात्कारापत्तिः, देवदत्तजन्यतावच्छेदक[4]जात्या साङ्कर्य्यापत्तिरिति परास्तम्।

मानसत्वं चात्मन्यस्मादपकृष्टत्वज्ञानवत्त्वम्। अत्र चावधित्वनिरुपितै-स्तादृशज्ञानविषयतावत्त्वं नमस्कार्यत्वं न तु ज्ञानविषयत्वमात्रं नमस्कर्त्तुरपि तथा त्वापत्तेः, जातिविशेषो वा मानसत्वम्।

न च भक्तिवादिना परामर्शवादिना साङ्कर्य्यमिति न वाच्यम्, असिद्धजात्या साङ्कर्य्यस्य [5]अदोषत्वात्। एवञ्च [6]त्रिविधत्वनमस्कारस्य एकेन नमिधातुना निबन्धनम्, स सकृदुच्चारित इत्यादिव्युत्पत्तेः। श्लेशादौ व्यभिचारेण वक्तृता-त्पर्य्याऽभावविषयत्वात्सकृदुच्चरितः [7]शब्द सकृदेवार्थं बोधयत्येव। अत्र च नम इत्यनेनापि नमस्कारनिबन्धनसिद्धौ तत्पूर्वकालताबोधक[8]क्त्वाप्रत्ययो ग्रन्थारम्भा[9]ऽव्यवहितपूर्वकाले नमस्कारः [10]कर्त्तव्य इति शिष्यशिक्षार्थः।

---

1. ननु नास्ति क मातृकायाम्।
2. चेष्टात्वानावनकत्वात् - क मातृकायाम्।
3. व्यासन्यवृत्तीति एक।
4. जात्या --- परास्तम् नास्ति।
5. दोषत्वाद, क मातृकायाम्।
6. त्रिविधम् - नास्ति।
7. शष्यं बाधयति - नास्ति।
8. प्रयोग
9 व्यवहित
10. कर्त्तव्यं - ननु -नास्ति

ननु पूर्वकालत्वं न क्त्वाशक्यं तत्तन्नियतोपस्थितावप्येकशरीरावच्छेदेन युगपत्प्रयत्नासमानकर्त्तृकत्वेन[1] क्त्वाप्रत्ययवाच्येन [2]क्त्वाप्रत्ययश्च तस्य पूर्वकालत्वस्यानुमातुंशक्यत्वात् ।युगपत्प्रयत्नानिष्पाद्यैककर्त्तृकक्रियात्वेनान्यो-न्यभृत्यत्वेन तदर्थत्वाभावात् । न च भिन्नकर्त्तृकेऽपि क्त्वाप्रयोगाद् व्यभिचारान्न तत् क्त्वावाच्यमिति वाच्यम्, क्रियान्तराध्याहारेण तत्रापि समानकर्त्तृकत्व-स्योपपादत्वात् । तथाहि भजक्रिया व्रजक्रियायाः प्रागभावकालीनव्रजक्रियया सहैकशरीरावच्छेदेन युगपत्प्रत्ययनिष्पादत्वे सत्येककर्त्तृक्रियात्वात् यन्नैव तन्नैवेति व्यतिरेकिणस्तदनुमानात् ।

एवञ्च समानकर्तुकत्वपूर्वकालत्वयोः शक्यत्वेन महर्षिणा ''समान-कर्त्तृकयो'' रित्यादिसूत्रेणानुशिष्टत्वेऽपि [3]समानकर्त्तृकत्वस्यान्यलभ्यत्वा-शङ्काभावात् समानकर्तृकत्वमेव क्त्वाप्रत्ययवाच्यम्, न चैवं भजक्रियां पक्षीकृत्य व्रजक्रियापूर्वकालत्वानुमानं व्रजक्रियां पक्षीकृत्य भजक्रियापूर्व-कालत्वानुमानस्यापि [4]सम्भवान्नि[5]यतक्रियापूर्वभावत्वबोधानुपपत्तिः । पूर्वज्ञानत्वस्य वाच्यत्वे तस्य प्रकृत्यर्थान्वयित्ववदाख्यातातिरिक्तप्रयत्नानां [6]प्रकृत्य-र्थान्यार्थत्वबलेन भजक्रियायामेव तथा नियतमिति वाच्यम्, प्रकृतत्वाज्जीवात्म-त्ववदाख्यातातिरिक्तबोधकत्वाद्व्युत्पत्तेः क्त्वावाच्यस्य समानकर्तृकत्वस्य भजक्रियायां विशेषणत्वेनान्वये तस्याप्राधान्येनोपस्थितौ तस्य एव पक्षत्वेन परिग्रहात् तत्रैव पूर्वकालत्वानुमानाद् व्रजक्रियायास्त्वितरविशेषण-त्वेनोपस्थिततया पक्षत्वेन परिग्रहायोगात् पूर्वकालतानुमानमिति चेन्न कियासु युगपत्प्रयत्ननिष्पाद्यत्वस्य वक्तुमशक्यत्वात् । तत्त्वज्ञानिनां कायव्यूहदशायां सर्वासामपि क्रियाणां युगपत्प्रयत्ननिष्पाद्यत्वासम्भावाच्च ।न चैकशरीरावच्छेदेन इति विशेणणात् तन्निरास इति वाच्यम् तन्मते कायव्यूहस्य हि अस्यासिद्धत्वेन विशेषणस्य तेन दातुमशक्यत्वात् । तथाच नोभयत्वसिद्धत्वं तद्हेतोरिदं साधकत्वम् ।

---

1. निष्पाद्यैककर्तृत्वेन - क मातृकायाम् ।
2. नास्ति
3. समानकर्तृत्वस्याभ्यत्वाशङ्काभावात् ।
4. आश्रित्य प्रियशीतलं वहुतरूच्छायं सदा भोगभागकालोकेन सुधाकरेण कलयान्नानअत्रह्यखिलदैवतैः पनतैराराधितः प्रत्यहं दे --- कुशलं प्रसन्नहृदयो देवो जगन्नाथकः ।
5. नियत - नास्ति ।
6. प्रकृत्यर्थ - कर्तृकलस्य ।

किञ्च समानकर्तृकत्वस्य भुक्त्वाव्रजतीत्यादौ व्रजनकृतिमान् [1]व्रजन-प्रागभावकालीनभोजनकृतिमति अन्वयबोधे समानविभक्तित्वस्य नामावयवयो-रभेदादन्वये [2]तन्त्रत्वे वाक्यादिमर्य्यादालभ्यत्वेनाशक्यत्वात्।

किञ्च व्रजक्रियायाः इतरविशेषणत्वेनोपस्थितावपि तस्याः पक्षत्वपरिग्रहे बाधकाभावेन तत्रापि पूर्वकालत्वस्यानुमातुं शक्यत्वात्तस्मादनन्यगतिकतया [3]पूर्वकालतयैव क्त्वा वाच्या। पूर्वकालत्वञ्च तत्प्रागभावाधिकरणकालत्वम्। तथाच [4]भुक्त्वा व्रजतीत्यादौ व्रजनकृतिमान् व्रजनप्रागभावकालीनभोजन-कृतमानित्यन्वयबोधः। नन्वेवं भोजनानन्तरं दिनान्तरगमने भुक्त्वा व्रजतीत्य-प्रयोगात्पूर्वकालत्वमात्रं न क्त्वा वाच्या, किन्तु स्वविरोधितज्जातीयक्रियान्तरं ध्वंसानधिकरणतत्पूर्वकालत्वम्। तत्र स्वविजातीयेति विशेषणभोजनस्य गलकम्बलसंयोगरुपक्रियात्वेन प्रथमगलकम्बलसंयोगस्य द्वितीयेन व्यवधानेऽपि न दोषः। एवञ्च विरोध्युपादानादाचमनक्रियाव्यवधानं न दोषाय।

एवञ्च यद्यपि पूर्वकालमात्रं महर्षिणा [7]क्त्वा वाच्यत्वेनानुशिष्टम्, तथापि अतिप्रसज्या प्रीतभुक्त्वा गतव्युत्पत्त्यादौ साक्षात्प्रतीतेः स्वविजातीयतद्विरोधि-क्रियानन्तरितपूर्वकालत्वमेव क्त्वावाच्यत्वमिति चेत्। न। तद् भुक्त्वा क्व प्रहरत्रये यास्यतीत्यादौ व्यवधानांशस्यैव व्यभिचारेणाशक्यत्वात्। न च भोजनानन्तरं तादृशकालोपाध्यतिरिक्त कालोपाधिरेव तत्र विरोधीति तेनानन्तरि-तत्वमस्त्येवेति वाच्यम्, मानाभावात्। "सृष्ट्या संहरती" त्यादा "[8]वुषित्वा शाश्वती समाः" इत्यादौ एतादृशकल्पनयापि अभावाच्च, स्वविरोधित्व-स्याननुगतत्वेन नानार्थतापत्तेश्च। तस्मादव्यवधानानां परित्यागेन पूर्वज्ञानमात्रता वाच्या। पूर्वकालत्वञ्च कुत्रचित् कृतिपूर्वकालत्वम्, कुत्रचित्कृत्युपाधायक-सामग्रीपूर्वज्ञानत्वम्। क्वचित्क्रियापूर्वकालत्वम्। भुक्त्वा व्रजतीत्यादौ

---

1. नास्ति।
2. चन्द्रत्वेन - क मातृकायाम्।
3. नास्ति।
4. व्रजतीत्यादौ- क मातृकायाम्।
5. अन्वयबोधेन तदेव - क मातृकायाम्।
6. प्रत्ययेन क - मातृकायां
7. नास्ति।
8. जित्वा शाश्वतीस्तमा - क मातृकायाम्।

कृतिपूर्वकालत्वम्। सृष्ट्या संहरतीत्यादौ [1]कृत्त्युपधायकसंहरणसामग्री-पूर्वकालत्वम्। [2]तत्र स्थित्वा रथो व्रजतीत्यादौ च क्रियापूर्वकालत्वमिति यथायथं द्रष्टव्यमिति प्राञ्चः।

वस्तुतस्तु भुक्त्वा व्रजतीत्यादौ भोजनक्रियायाः प्राथम्योपस्थितेः, अन्वयबोधदशायामपि तथैवोपस्थितेरानन्तर्य्यत्वात्तत्पूर्वकालता[3]शक्यताहेतुः, व्रजनकृतेः प्राथम्योपस्थितौ वैपरीत्यक्रमापत्तेस्तु ध्वंसाधिकरणकालवृत्तिवद्-रुपमानन्तर्य्यं प्रत्ययवाच्यम्। तथा च भोजनकृतिमानिति भोजनध्वंसाधिकरण-कालवृत्तिव्रजनकृतिमानिति सम्मुखतः एवान्वयबोधः। व्रजनस्य भोजनस्य चाधिकरणकालवृत्तित्वे भोजनस्य [4]तत्प्रागभावाधिकरणकालवृत्तित्वमर्थादेव सिध्यतीति न तस्य शक्यम्। तत्र च आनन्तर्यमपि पूर्ववदेव त्रैविध्येन बोध्यम्। तत्र च स्थित्वा पश्यतीत्यादौ स्थितिमान् [5]स्थितिध्वंससमान-कालीनदर्शनकृतिमानित्यन्वयबोधस्य दर्शनकालेऽपि स्थितेऽसिद्धत्वेना-सम्भवाद्दर्शनकृतिमान् दर्शनप्रागभावकालीनस्थित्यादीनामन्वयविषयबोधस्या-बाधितत्वादव्यभिचारात्साक्षादनुशिष्टत्वाच्च। पूर्वकालतयैव क्त्वा वाच्या। मुखं व्यादाय स्वपितीत्यादावपि उत्तरकालीनस्वापापेक्षयाव्यादानस्य पूर्वकालत्वमिति न व्यभिचारः इत्यपरे। एतेनोत्तरकालत्वं क्त्वावाच्यमिति तदपि प्रत्युक्तं वेदितव्यम्।

हेतूपादानाद् हेतुत्वस्य कार्यत्वनिरुप्यतया कार्यत्वलिङ्गकानुमितिरीश्वरे प्रमाणमिति सुचितम्। अन्यथा ईश्वरपदादेव हेतुत्वबोधादभेदत्वोपादानवैय्य-र्थ्यापत्तेः। सामान्यबोधेऽपि हेतुशब्दोऽविशेषपरतया श्रेयोहेतुतया प्रस्तुतशास्त्रहेतुतया वा योजनीयः।

---

1. कृत्यायधायकसंहार - क मातृकायाम्।
2. तत्ररथो गच्छतीत्यादौ-क मातृकायाम्।
3. अशक्यत्वे तु।
4. तत्प्रागभावा न तस्य शक्यत्वम्। क मातृकायाम्।
5. स्थितिमान् उन्दर्शनकृतिप्राग - क मातृकायाम्।

अत्र नमस्कारस्येष्टसाधनतांशाऽभ्रान्ताचारगुरुतरगुरुतमयोः क्रमेण नमस्कारत्वेन क्रमलाभेऽपि शिष्यशिक्षार्थं क्रमनिबद्धोऽस्त्विति। एवञ्चानुशब्देन पश्चाद्भावे दर्शिते पश्चात्तस्यावधिनिरूप्यतया अवध्याकाङ्क्षायां [1]शाब्देनैव पूर्यत इति न्यायेन शब्देनैव तत्पूरणं न्यायमित्यवधेरीश्वरप्रणामस्य प्रकरणोपस्थितावपि शब्देनैवं तत्पूरणं करोत्येवेति। [2]अथवा ''अथातो धर्मजिज्ञासा'' (मी.सू.१:१.१.) इति सूत्रस्थ अतः शब्दानुसारेण यतोऽविशिष्टस्याधिकारिणोऽनुसूचकापत्तेः ओम् [3]निवासिन उपसेदुरतो वक्ष्यत इत्यर्थः। तथाच अनवच्छिन्नसम्प्रदायं वीर्यवच्च शास्त्रं स्यादितिशिष्यशिक्षार्थम्।

पदार्थेति। न त्रिकसमासः। पदार्थानां धर्मा इति षष्ठीतत्पुरुष इति चेत् धर्माणां पदार्थोऽभिन्नत्वेन भेदश्चाभिष्ठ्यताप्राप्तेः कुतस्त्वत्समाससम्भावना। न च धर्माणां पदार्थत्वेनाभेदोऽपि येन रुपेण धर्मधर्मिभावो द्रव्यत्वगुणत्वादिना तेन रूपेण भेदोऽस्तीति षष्ठीतत्पुरुषसमासस्योपपत्तिरिति वाच्यम्, अश्रूयमाणधर्मावच्छेदेन भेदस्य षष्ठ्युप्पादनत्वाभावात्। अन्यथा घटस्य घटवत्पदे प्रयोगापत्तिः। तत्रापि घटावयवत्वचटत्वादिना भेदसम्भवात्। ननु षष्ठ्या न भेदो नियमः, राहो शिरः इति प्रयोजकदर्शनादिति चेन्न, सम्बन्धबोधकषष्ठ्याभेदगर्भित्वनियमाद्। राहोः शिर इत्यादिप्रयोगस्यानुशासनविरोधेन यथाकथञ्चिन्नेयत्वात् किञ्च षष्ठीसमासे पदार्थस्य क्रियानन्वयित्वेन पदार्थानां संग्रहान्वयानुपपत्तेश्च।

ननु पदार्थाश्चेते धर्माश्चेति कर्मधारयः, न तु च समस्यमानपदार्थतावच्छेदकयोः व्यभिचार एव कर्मधारयः, नीलोत्पलमित्यादौ तथा दर्शनात्प्रकृते तदभावात् कथं कर्मधारयेति वाच्यम्, मेरु-महि-भृ-भृत-वृक्षमित्यादौ तथा व्यभिचाराभावेऽपि तद्दर्शनादिति चेत्। न, तत्र पूर्वपदार्थतावच्छेदकस्य व्यभिचाराभावेऽप्युत्तरपदार्थतावच्छेदकस्य व्यभिचारात्सर्वत्र तद्व्यभिचार एव

1. शब्देनैव प्रपूर्यत इति न्यायेन तत्पूरणं न्यायः - क मातृकायाम्।

2. नास्ति।

3. शब्दानुसारेण यतो विशिष्टाधिकारिणो नसूयका उपसेदु वक्ष्यतीत्यर्थः। क मातृकायाम्।

सः । प्रकृते च धर्मत्वस्य पदार्थत्वव्यभिचाराभावात्कथं स इति वाच्यम् परम्परा-व्यभिचाराभावेऽपि प्रमेयाभिधेयमित्यादौ कर्मधारयदर्शनात् । एतादृशकल्पनायां मानाभावदिति चेन्न, तत्र धर्माणामेव व्यावर्तत्वेन विशेषणतया पूर्वनिपातापत्तेः । न च विशेषणविशेष्यभावस्य विवक्षाधीनत्वान्नात्र तादृशी विवक्षेति वाच्यम्; धर्मत्वस्य विशेषणत्वनयत्वेन तादृशविवक्षायां तत्रावश्यकत्वात् ।

न च पदार्थाश्च धर्माश्चेति द्वन्द्व इति वाच्यम् समस्यमानपदार्थतया भेदाभावे द्वन्द्वस्यानुपपत्तिरिति चेन्न । प्रमाण-प्रमेयेत्यादौ पदार्थतावच्छेदभेदेऽपि [1]द्वन्द्वस्य दर्शनात्पदार्थभेदापेक्षया पदजन्यप्रतीतिविषयभेदस्य [2]लघुत्वात् प्रकृते पदार्थत्वधर्मत्वयोर्भेदात् द्वन्द्व एव जायते । तथा चोभयोः प्राधान्येनोपस्थिते संग्रहान्वयेऽपि त्वग्रे साधर्म्यवैधर्म्यनिरूपणमपि साधु सङ्गच्छते इति संक्षेपः ।

षट्पदार्थसंग्रह इति वक्तव्ये धर्मपदोपादानपदार्थानां परस्परञ्च धर्मध-र्मित्वप्रदर्शनार्थम् । संगृहितेऽत्यनेनेति करणे च । तथा च पदार्थधर्मसंग्रहो भाष्यग्रन्थः । संग्रहणञ्च आकरे नानास्थानविततानां पदार्थानां परस्परसङ्गति-मत्त्वेनैकत्र निरुपणम् । पदार्थानां संग्रहणत्वकथनेन त एवाभिधेया इति दर्शितम् । प्रवक्षत इति । वक्तुरत्र लक्षणयोच्चारणार्थः । संग्रहस्य वाक्यरुपत्वेन तद्विषयवाक्यप्रयोगाभावेन यथाश्रुतानुपपत्तेः । चिकीर्षितग्रन्थेऽन्यनिरूपण-प्रस्तावे प्राधान्येन विजातीयनिरूपणस्य संग्रहपदेन दर्शितत्वाद् वैशद्यादिरुपः । प्रकर्षः प्रशब्देन द्योत्यते । अभिधेयप्रतीतावपि प्रेक्षावान् प्रयोजनं विना न प्रवर्तत इति प्रयोजनं दर्शयति ।

महोदय इति सर्वे गत्यर्थाः ज्ञानार्था इति उदयस्तत्त्वज्ञानम् । महान् [3]भयादिविरोधि उदयस्तत्त्वज्ञानं यस्मादिति बहुव्रीहिः । तथाच तत्त्वज्ञानं प्रयोजनम्, तस्यैव साक्षाज्जन्यत्वात् । यत्तु महोदय इति शब्दो लक्षितलक्षणया मोक्षपरत्वेन व्याख्यायते । तदयुक्तम् । तस्य [4]साक्षाच्छास्त्रजन्यत्वाभावा-दुत्तरग्रन्थासङ्गतेः लक्षितलक्षणापत्तेश्च । न च समवेतेऽपि बहुव्रीहि-

---

1. नास्ति ।   2. क्तयुत्वाद् ।
3. भयाद विरोधी ।   4. नास्ति ।

समासस्याङ्गीकारेण लक्षणेति वाच्यम् । लक्षितलक्षणापेक्षया निरुपितलक्षणया लघुत्वात् । वस्तुतस्तु "[1]अकर्तरि चकारके" इत्यधिकारात् [2]उदेति अस्मादित्यच्प्रत्ययोपादानेन (न) लक्षणापत्तिरिति दिक् ।

अत्र च ग्रन्थस्य पदार्थानाञ्च प्रतिपाद्यप्रतिपादकभावसम्बन्धः । तत्त्वज्ञानग्रन्थयोश्च हेतुहेतुमद्भाव इति दिक्।

ननु पदार्थतत्त्वज्ञानार्थं शास्त्रे प्रवृत्तिरित्युक्तम् । तदयुक्तम् । पदार्थनामलोकत्वात्परमार्थतोऽभावेन तेषां तत्त्वज्ञानाभावात् । नापि तत्त्वज्ञानस्य पुरुषार्थत्वं, सुखदुःखनिवृत्तेरेव तत्त्वात् ।

सुखदुःखनिवृत्तिभ्यामेव पुरुषः प्रवर्त्तते [3]इति वा लिङ्गादिज्ञानं क्व पदार्थानां द्रव्यादिरुपाणां प्रत्यक्षसिद्धत्वेन प्रतीपालापः कर्त्तुं शक्य अति तान् विशेषणोद्देश्येन तत्त्वज्ञानस्य साक्षात्पुरुषार्थत्वेऽपि परमपुरुषार्थनिःश्रेयसस्य साधनत्वेन पुरुषार्थत्वमाह-

(मू) द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्यतत्त्वज्ञानं निःश्रेयसहेतुः ।

द्रव्येति- द्रव्येत्यादिसमवायानामिति विशेषणविभक्तेरभेदत्वादेतावदभिन्नानामित्यर्थः । पदार्थानामिति पदार्थविषयकतत्त्वज्ञानमित्यर्थः । षष्ट्यर्थो विषयता साधर्म्यवैधर्म्याभ्यामिति । यो यत्रानुवर्त्तते सस्तस्य साधर्म्यम्, यथा पृथिव्याः गन्धः । यो यस्मान्निवर्तते सस्तस्य वैधर्म्यम्; यथा तस्या एव स्नेहः । साधर्म्यवैधर्म्यभ्यामिति तृतीया [4]पञ्चमी वा हेत्वर्थिका । ननु साधर्म्याणामेव वैधर्म्यरुपत्वेनेतरभेदाभावात् तद्द्विवचनयोरनुपपत्तिरिति चेन्न । साधर्म्यत्ववैधर्म्यत्वरुपपदार्थतावच्छेदकभेदात्तदुभयोरुपपत्तेः । द्विवचनार्थस्य द्वित्वस्यै[5]कदेशान्वयः चैत्रस्य पितृव्य इत्यादिवदविरुद्धः । यदा साधर्म्यवैधर्म्यपदं लक्षणया ज्ञानपरम् । तथा च साधर्म्यवैधर्म्यज्ञानजन्यं द्रव्यादिपदार्थतत्त्वज्ञानं निःश्रेयसहेतुरित्यादयः ।

1. अकर्तरि चाकारकं - क मातृकायाम् । 2. कारायदुदेत्यस्मा चप्रत्ययोपादानेन - क मातृकायाम ।
3. इति वार्त्तिकात् इति आशङ्क्य । 4. नास्ति ।
5. एकदेशान्वयाश्चैत्रस्य न्पतेत्यादिवदविरुद्धः । क मातृकायाम् ।

अत्र च यद्यपि तत्त्वज्ञानं वैधर्म्यज्ञानस्य साक्षाद्हेतुत्वम्, साधर्म्यस्य (साधर्म्यवैधर्म्यलक्षणया ज्ञानपरम्) व्यभिचारित्वम्, तथापि साधर्म्यवैधर्म्याभ्यामित्यनेन तद्व्याप्यधर्मदर्शनमेव विवक्षितम्। [1]अतएव किरणावल्यां स्थाण्वादयो वक्रकोटरादयो वक्रकोटरादिभिः पुरुषादिभ्यो विविच्यत इत्युक्तम् अत्र तस्य भावस्तत्त्वमित्यत्र न योगार्थानुसारेण प्रक्रान्तानां पूर्वप्रवक्र्तृणां द्रव्यादीनां तच्छब्देन परामर्शात्तदभावस्य तन्मात्रवृत्तेः तज्ज्ञानवृत्तेः [2]द्रव्यत्वादेस्तत्त्वपदेन परिग्रहः। तथा च द्रव्यत्वप्रकारकज्ञानमेव द्रव्यस्य तत्त्वज्ञानम्। तत्त्वज्ञानमित्यत्र तत्त्वप्रकारकं ज्ञानमिति मध्यपदलोपिसमासाश्रयणात्स्वाश्रयत्वावच्छिन्नप्रतियोगिताकोऽन्योऽन्याभावाऽसमानाधिकरणधर्मे तत्पदस्य वृत्त्यङ्गीकारेण वा तादृशमेव ज्ञानं द्रव्यत्वस्यैव तादृशत्वादिति द्रष्टव्यम्।

ननु निःश्रेयसोपयोगिपदार्थोद्देश्ये प्रक्रान्ते निःश्रेयसघटकस्याभावस्य कथं नोद्देश इति चेन्न। पदार्थपदेनैव तदुद्देश्यात्। [3]पदार्थत्वञ्च पदजन्यप्रतीतिविषयत्वम्। तच्चाभावेऽ[4]प्यस्ति न पदेन तत्प्रतीतेर्जननात्। एवञ्चाभाव इत्यादौ तस्य वाक्यार्थत्वेऽपि न पदार्थत्वव्याघातः। [5]ननु षाड्विध्येनैव पदार्थानां विभागकरणाद् विभागस्य [6]न्यूनाधिकविधानान्तरनिराकरणार्थ त्वेनाभावस्यापि निराकृतत्वात्कथं तल्लाभ इति वाच्यम्; विभागस्य भाव पदार्थमात्रपरत्वात्।

तथा च पदार्थो द्विविधो भावः अभावश्चेति। द्रव्यगुणकर्मसामान्यविशेषसंमवायरूप इति शाब्दो भावविभाग इति। ननु पदार्थपदेनैवाभावोद्देश्ये द्रव्यादीनां तेनैवोद्देश्यसम्भवादिति कथं पृथङ्निर्देशः, पृथङ्निर्देशे वा कथं तथैवाभावस्यापि नोद्देश इति चेन्न। सामान्यरूपेणोद्देश्येऽपि विशेषनिर्देशं विना विशेषजिज्ञासायामनिवृत्तेः द्रव्यादीनां तेन तेन रूपेण निर्देशः। अभावस्यपि मङ्गलप्रायतया द्रव्यादिनिरूपणे च द्रव्यत्वादेस्तदितरावृत्तित्वमित्यादिरूपेणाभावघटिततया तदुद्देशेनैवोद्देश्यसम्भावाच्च लाघविकेनाचार्य्येण नोद्देशः कृत इति द्रष्टव्यम्।

1. अतएव किरणावल्यां निःसरणवहां स्थित्यादयो वक्रकोटर --- उक्तम् अतस्तस्य भावस्तत्त्वम्।
2. दिव्यत्वादेः-क मातृकायाम्। 3. पदार्थत्व च --- षत्वम्। 4. स्वस्ति।
5. ननु विध्येनैव पदार्थानां विभागकरणात् विभागस्य - क मातृकायाम्।
6. नानाधिकविधानान्तरान्तर - क मातृकायाम्।

तत्राभावो द्विविध:- संसर्गाभावान्योन्याभावभेदात्। संसर्गाभावत्वं संसर्गारोपजन्यप्रतीतिविषयाभाववत्त्वम्। स च त्रिविध:- ध्वंसप्रागभावात्यन्ताभावभेदात्। ध्वंसत्वं नाम चोत्पत्तिमदभावत्वम्। तत्र मुद्गरपातानन्तरञ्च घटो ध्वंस्त इति प्रत्यक्षमेव प्रमाणम्। स च ध्वंसाप्रतियोगी ध्वंसत्वावच्छिन्नं प्रति जन्यत्वेन कारणत्वात्। ध्वंसस्य ध्वंसे घटादुन्मज्जनप्रसङ्गात्। प्रागभाववत्त्वञ्च प्रतियोग्युत्पत्तिपूर्व-कालावच्छिन्नाभावत्वम्। पूर्वत्वञ्च तदधिकरणकालध्वंसानधिकरणकालत्वम्। अतो नान्योऽन्याश्रय:, प्रतियोगिविनश्याभावत्वम्वा। अत्र च क्षणत्वादिव्यवहारो मानम्, क्षणत्वादेर्विभागप्रागभावावच्छिन्नक्रियादिरुपत्वात्। एवञ्च तत्तत्तन्तुजन्यपटस्य तत्तत्तन्त्वन्तरेऽनुत्पाद: प्रागभावाभावप्रयोज्य:। एवञ्च घटोत्पत्तिद्वितीयक्षणस्य पटोत्पत्त्यनधिकरणत्वं तत्प्रागभावप्रयोज्यमित्यादौ तत्र मानमित्याकरेष्वपि द्रष्टव्यम्।

अत्यन्ताभावश्चैतदुभयान्यत्वे सति संसर्गाभाव:। इह भूतले घटो नास्तीत्येतादृश[1]विलक्षणप्रतीतिविषयत्ववदभाववत्त्वम्वा, अन्योन्याभावान्यत्वे सति तात्कालिकाभाववत्त्वम्वा। अत्र प्रत्यक्षमेव मानम्, संसर्गाभावमध्येऽत्यन्ताभाव एव प्रत्यंशो न प्रयोग:, अनुयोगिवाचकपदोरसमभिव्याहृतत्वात् सप्तमी, सति सम्भवे ततोऽधिका। तेन न पचति चैत्र इत्यादौ पाकविषययत्नाभाववानिति अन्वयबोधेऽनुयोगिवाचकपदे [2]सप्तम्या तद्भावेऽपि न क्षतिरिति द्रष्टव्यम्।

तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽभावोऽन्याभाव:, घट: पटो नेति प्रत्यक्षमेवात्र मानम्। न च पटे वर्त्तमानो घटात्यन्तभाव एव एतादृशव्यवहारहेतुरस्तु किञ्चातिरिक्ताभावाङ्गीकारेणेति वाच्यम्, पट: घटो नेति अत्यन्ताभावबोधिकाया अनुयोगिवाचकपदोत्तर[3]सप्तम्यास्त्वत्राभावात्। न च पृथक्त्वं तथा अभावप्रकारकप्रतीते: दूरपह्नवत्वादिति दिक्।

आनन्दावतारे नन्वात्मा वाऽरे [4]द्रष्टव्यमित्यादिश्रुत्या आत्मतत्त्वज्ञानमेव मुक्तिहेतुत्वेन प्रतिपाद्यते, न तु [5]पदार्थमात्रतत्त्वज्ञानं तत्कथं सर्वेषां पदार्थानां

---

1. विलत्वं। 2. सम्पृम्यभावेऽपि। 3. सप्तम्यास्लाभावाद्।
4. द्रष्टव्य इत्यादि -क मातृकायाम्। 5. पदार्थ --- ज्ञानं।

तत्त्वज्ञानं नि:श्रेयसहेतुत्वेनोपन्यस्तमिति चेत्सत्यम्। यद्यप्यात्मतत्त्वज्ञानं साक्षान्मुक्तिहेतुस्तथापि आत्मन इतरभेदानुमितेर्मननरूपाया: आत्मविशेष्यकेतरभेदानुमितेस्तत्त्वज्ञानरुपत्वे तस्य शास्त्रजन्यत्वाभावात्, शास्त्रजन्यत्वे वा शाब्दत्वानुमितित्वयो: साङ्कर्य्यापत्ते:, शब्दत्वस्यातिरिक्तस्याभावेषु अनुमितित्वव्याप्यस्तादृशजातेरनुमितिप्रवृत्तित्वापत्ते: कथं शास्त्रस्य मुक्तिहेतुतत्त्वज्ञानहेतुत्वमिति चेत् तादृशतत्त्वज्ञाने परम्परया शास्त्रस्यापि हे[1]तुत्वाभ्युपगमेनोक्त[2]दोषनिरासादित्याकार एव द्रष्टव्यमिति दिक्।

ननु द्रव्यगुणेत्यादिग्रन्थस्योद्देशपरत्वे विभागस्यापि प्रतीतेर्विभागस्य न्यूनाधिकसंख्यात्वावच्छेदफलत्वात्पदार्थपदोपदिष्टोऽभावमादाय सप्तैव पदार्था: न न्यूनाधिक इति नियम: पर्यवसन्न:, नियमश्च व्यवच्छेदाष्टमपदार्थस्य सिद्ध्यसिद्धिभ्यां दूरुपवाद इति चेन्न। [3]परै: पदार्थान्तरत्वेनाभिमतेषु शक्तिसंख्यादिषु द्रव्यत्वादिपदार्थविभाजकोपाधिसप्तकायोगव्यवच्छेदस्य नियमार्थत्वात्। तथा च प्रसिद्धिद्रव्यत्वादिसप्तकान्यतरायोगस्य बाह्यमीमांसकादिभिराशङ्क्यमानस्य नियमपरेणानेन ग्रन्थेन व्यवच्छेद: क्रियत इति न वा काचिदनुपपत्ति:।

नि:श्रेयसत्वञ्च समानाधिकरणदु:खप्रागभावासमानकालीनदु:खध्वंसत्वम्। तत्र चरमदु:खध्वंसस्य समानाधिकरणदु:खप्रागभावासमा[4]नकालीनत्वाद् ध्वंसस्यैव लिङ्गत्वम्। इदानीं तन्मुक्तावतिव्याप्तिवारणाय समानाधिकरणेति। [5]तस्य चरमदु:खस्यापि समानाधिकरणमुक्तिकालीनात्ममन:[6]संयोगप्रागभावसमानकालीनत्वादति ब्याप्तिवारणाय प्रथमदु:खपदम्। सुषुप्तिकालीनदु:खध्वंसस्य समानाधिकरणदु:खाऽसमानकालीनत्वादतिव्याप्तिवारणाय प्रागभावेति। [7]दु:खाऽसमानकालीनत्वञ्च तत्समानकालीनत्वात्यन्ताभावत्वम्, न तु तद्भिन्नत्वम्। सुषुप्तिकालीनदु:खध्वंसस्य जाग्रद्दशायां दु:खसमान-

1. हेतुत्वाभ्युपगमे भोक्तदोषनिरासादित्याकार।
2. दुरुपदादिति चेन्न।
3. पटै: - क मातृकायाम्।
4. समान --- इदानी --- नास्ति।
5. तत्र।
6. मूर्त्ति संयोग।
7. दु:खाङ --- त्यन्ताभाव।

कालीनत्वेन तद्भिन्नत्वाभावात्प्रागभावपदवैयर्थ्यापत्तेः । चरमदुःखपदञ्च मुक्ति-कालीनात्ममनः संयोगध्वंसेऽतिव्याप्तिवारणाय । तस्य मनसो मुक्तत्वापादकत्वेनालक्ष्यत्वात्, न च [1]दुःखान्तमुक्तावव्याप्तिः । दुःखपदस्यैकविंशतिप्रभिन्न-दुःखपरत्वेन सुखस्यापि [2]दुःखमध्य प्रविष्टत्वात् । यद्वा [3]स्वाधिकरणात्म-क्षणावृत्तिदुःखाधिकरणक्षणवृत्तिदुःखध्वंसत्वं तत् । अत्रेदानीन्तनदुःखध्वंसानां स्वाधिकरणात्मवृत्तिदुःखाधिकरणक्षणवृत्तित्वान्न तत्रातिव्याप्तिः । [4]एतदर्थमेव वृत्यन्तम् । अत्र स्वाधिकरणात्मवृत्तिर्यस्यानुपादाने इदानीन्तनमुक्तावव्याप्तिः । शुकादिचरमदुःखध्वंसस्याऽस्मदादिदुःखाधिकरणक्षणवृत्तित्वात् । एतेनातीत-दुःखध्वंसे पुरुषव्यापारसम्भवाद् वर्त्तमानदुःखध्वंसस्य च स्वानन्तरोत्पन्नयोग्य-स्वसमानाधिकरणविशेषगुणसाध्यत्वात् । अत्रागते च दुःखे प्रमाणसद्भावे तद्दुःखोत्पत्तौ दुःखध्वंसस्य पूर्ववदुपपत्तेः प्रमाणाभावे तस्यालीकत्वेन कर्त्तुमशक्तेः सर्वथा प्रतियोगिविकल्याऽसम्भवाद् दुःखध्वंसरुपो मोक्षो नित्यत्वे ज्ञानसाध्य इति प्रयुक्तम् । चरमदुःखविशेषं प्रति अन्वयव्यतिरेकाभ्यां तत्त्वज्ञानस्य हेतुतया तद्ध्वंसे परम्परया हेतुत्वात् । न चैवं फलतश्चरमदुःखार्थमेव तत्त्वज्ञाने प्रवृत्तिरिति दुःखस्योपादेयत्वप्रसङ्ग इति वाच्यम्, दुःखान्तरस्याऽनुपादेयत्वेऽपि चरमदुःखस्य परमपुरुषार्थनिःश्रेयसप्रतियोगित्वेनोपादेयत्वात् ।

अत्र ब्रवीति-विलक्षणोऽयं [5]नैयायिकवराकमुमूर्षुः दुःखार्थमेव इह तदिति प्रयुक्तम् । प्रमाणञ्चात्राम्नायोऽन्वयश्च- ''अन्याय अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशत (अ.८.१२.१) इति । अत्र प्रियाप्रियपदेन समानकालीनसमानाधिकरण-साक्षात्कारविषयताव्यापकजातिमत्त्वेन [6]द्वेषस्य विषययोग्यात्मविशेषगुणत्वेन [7]उपादेयत्वात् । न वा सुखदुःखेऽनुगतकृत्यनिषेधान्न वा, अन्यभेदान्न वा विशिष्टोभयाभाववादिनाऽर्थान्तः[8] । अतएव वावसन्त इति [9]यदुक्तप्रयोगदर्शनादत्य

---

1. सुखा --- भिन्नदुःखपरत्वेन ।
2. दुःखमध्यप्रतिष्ठितत्वात् ।
3. स्वाधिकरणात्मवृत्तिः ।
4. एतदर्थमेवावृत्त्यन्तं ।
5. नैयायिकराजमुमुक्षुः । क मातृकायाम् ।
6. द्वैषस - क मातृकायाम् ।
7. उपादेयत्वेन वा सुखदुःखे - क मातृकायाम् ।
8. अर्थान्तरं । अत्र
9. ''यल्लुक्'' प्रयोगदर्शनात् ।

न्तिमशरीरिणो धर्माधर्माभावेन [1]सुखदु:खाभावसिद्धिरेव मुक्तसिद्धिरिति । वाव सन्तमिति अनुमानागमच्छन्दस: । न्यायस्तु कालत्ववल्लक्षणविशेषतासम्बन्धे षष्ठिभाववद्वृत्ति: । [2]आत्मसमवेतधर्मत्वादाकाशत्ववदिति सविमुक्तिसिद्धौ चैत्रकालान्यावृत्तिचैत्रदु:खं चैत्रदु:खप्रागभावात्सहवृत्तिधर्मवच्चैत्रदु:ख-प्रागभावाभाववद्वृत्तिसमवेतधर्मवद् वा । मैत्रदु:खवदिति चैत्रचरमदु:खसिद्धौ तस्य तस्योत्पत्त्यवधिकतृतीयक्षणवृत्तिध्वंसप्रतियोगित्वनियमेऽन्यार्थश्चैत्र-मुक्तिसिद्धि: । चैत्रदु:खध्वंसत्वे त्वचैत्रदु:खप्रागभावानधिकरणा [3]नधिकरण-ध्वंसत्वाद् घटादिध्वंसवत् । अत्र चैत्रस्य तद्दु:खप्रागभावा [4]नधिकरणत्वा-सम्भवादनधिकरणत्वकालसिद्धि: । [5]न चाकाशादिवृत्तित्वेनार्थान्तरम् । तद्ध्वंसस्य चैत्रकालाऽन्यावृत्तित्वनियमेन तदन्यावृत्तित्वे बाधादित्यनुमानं तत्र प्रमाणमिति दिक् ।

नवीनास्तु-नेदं मुक्तिलक्षणम् । सुखान्तमुक्तावव्याप्ते: । न च दु:खपदस्यै-कविंशतिप्रभिन्नदु:खपरतया[6] उक्त्यैव तत्र गतिरिति वाच्यम्, तथासत्यसम्भ-वापत्ते: । तथाहि- ''दु:खाभावेऽपि नावेद्य: [7]पुरुषार्थतया इष्यते अत इति न्यायेन वर्तमानेष्वचिरमनुभूयत'' (वा.पृ.४७) इति वार्तिकाच्च । नि:श्रेयसोत्पत्त्यनन्तरं तज्ज्ञानमावश्यकम् । तथा चरमदु:खध्वंसस्यैकविंशतिप्रभन्निदु:खमध्य-प्रविष्टज्ञानप्रागभावसमानकालीनत्वेन मुक्तिमात्रे लक्षणागमनादसम्भव: । न च प्रथमदु:खपदं स्वरुपार्थकमेव । तथा च ज्ञानप्रागभावसमानकालीनत्वेऽपि नोक्तदोष इति वाच्यम् । एवञ्च सति [8]यस्य योगिन: प्रथमदु:खमात्रोपभोगोऽनन्तरं कायव्यूहेन तत्र तदीयान्तिमदु:खध्वंसे यथाश्रुत[9]प्रागभावासमानकालीनत्वेनेत्याव्याप्त्या-पत्ते: । न च तस्यापि मरणदु:खस्याप्यावश्यकत्वेन तद्ध्वंसेन दु:खप्रागभावा-

1. सुखदु:खभावसिद्धे: ।
2. आत्मसमवेतधर्मत्वात् । आकारत्ववदिति ।
3. नात्रधकरण ध्वंसत्वात् ।
4. अर्थादतदनधिकरणत्वकालसिद्धि:, क मातृकायाम् ।
5. न चाकारणादिवृत्तित्वे नार्थान्तरम् - क मातृकायाम् ।
6. तया --- तथासत्य,
7. पुरुषार्थनयेषु ष्यते - क मातृकायाम् ।
8. नास्ति ।
9. प्रा ---- । न च -- ।

ऽसमानकालीन इति वाच्यम्, तस्य दुःखहेत्वधर्माभावेन मरणेऽपि दुःखानुत्पत्तेः । किञ्च मुक्तत्वस्य निरुक्तरुपत्वे नीलघटत्ववदर्थसमाजग्रस्तत्वेन तत्त्वज्ञानजन्यतावच्छेदकत्वात्तदर्थस्तत्त्वज्ञाने [1]प्रवृत्त्यनुपपत्तिः । अर्थसमाजग्रस्तत्वञ्च सामग्रद्वयाधीनतया सामग्रीद्वयं तद्दुःखप्रागभावानधिकरणत्वे [2]तत्प्रागभावाजन्यतदीययावद्दुःखध्वंसाधिकरणत्वम् । दुःखध्वंसे च [3]प्रतियोग्यत्यन्ताभावस्यान्वयप्रतियोगित्वादिरूपतत्सामग्री चेत् । किञ्च यदोत्पत्त्यदुःखध्वंसस्य काल एव चरमदुःखोत्पत्तिस्त[4]द्दोषान्त्यदुःखध्वंसस्यापि दुःखप्रागभावा[5]समानकालीनतया तत्रातिव्याप्तिः । न च दुःखप्रागभावासमानकालीने[6] यत्र दुःखतत्प्रागभावासमानकालीने[7]त्यर्थस्तथा च तस्य दुःखप्रागभावाऽसमानकालीनत्वेऽपि दुःखसमानकालीनत्वान्नातिप्रसङ्ग इति वाच्यम्; प्रागभावदवैयर्थ्यापत्तेः ।

[8]ननु प्रागभावपदस्य सुषुप्तिकालीनदुःखे सति व्याप्तिवारकतया तत्रातिव्याप्तिः स्यादिति चेन्न, सुषुप्तिकालीनदुःखध्वंसस्यापि जाग्रद्दशायां दुःखसमानकालीनत्वेन तत्रातिप्रसङ्गाभावात् । न च दुःखासमानकालीनत्वं [9]तत्त्वात्यन्तभावत्वम् । तथा च सुषुप्तिदशायामपि तत्र तदस्तीति भावत्वेऽतिव्याप्तिरिति वाच्यम् । विशिष्टव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकतदत्यन्ताभावमादाय सांसारिकदुःखध्वंसस्यापि तत्त्वात्तत्रातिप्रसज्यात् । [10]दुःखप्रागभावसमानकालीनेत्यत्रान्योन्याभावस्यावश्यं प्रवेशत्वापत्तेः । न च प्रतियोगित्वाधिकरणपदेनैव [11]विशिष्टाभावादिवारणे नान्योन्याभावप्रवेशावश्य-

---

1. त्य --- पाधीनतया ।
2. तत्तत्प्रागभावा - ।
3. प्रतियोग्यादिरूपतत्सामग्री चेति ।
4. तदोषान्त्यदुःखध्वंसस्यापि ।
5. मानग जा --- प्रागभावा ।
6. लीनेत्यन्थः । तथा च तस्य ।
7. नेत्वेऽपि दुःखसमानकालीनत्वात् न ।
8. ननु --- चेन्न --- नास्ति ।
9. तत्वात्यन्ताभावक्त्वम् - क मातृकायाम् ।
10. दुःखाप्रागभावसमानकालीन - क मातृकायाम् ।
11. विशिष्टभावादिति तत्त्वज्ञानान्नान्योन्याभाव - क मातृकायाम् ।

कत्वमिति वाच्यम्, प्रतियोगिवैय्यधिकरणत्वस्य प्रतियोगितावच्छेदकादिसम्बन्धे [1]चात्यन्तगौरवापत्तेरन्योन्याभावप्रवेशस्य लाघवेनावश्यकत्वात् न चान्योन्याभावोऽप्यव्याप्यवृत्तिरिति । [2]तत्रापि प्रतियोगिवैय्यधिकरण[3]स्य प्रवेशः आवश्यक इति वाच्यम् । ह्येव सर्वस्यापि प्रतियोगिवैय्यधिकरण्यादिघटितत्वेनात्यन्तदुर्वचत्वान्नेदं लक्षणमित्येव[4] वक्तुमशक्यत्वात् सुषुप्तिकालीनदुःखध्वंसस्यापि वासनादिदुःखसमानकालीनत्वाच्च ।

एवं द्वितीयलक्षणेऽपि स्वाधिकरणात्मवृत्तीत्यादौ चरमदुःखध्वंसस्योक्त-न्यायेन ज्ञानरूपदुःखाधिकरणक्षणवृत्तित्वादसम्भवः । [5]यथाश्रुतपरत्वे च तादृशयोगिविशेषदुःखध्वंसेऽतिप्रसङ्गः । न च तत्र मानाभावः । सन्दिग्धातिव्याप्तेरपि दोषत्वादर्थसमाजग्रस्तत्वेन कार्यतावच्छेदकत्वाच्चेति पूर्वोक्ता एव दोषाः ।

किञ्च सर्वत्र लौकिकवैदिकप्रवृत्तौ सुखरुपेष्टसाधनता[6]ज्ञानस्य प्रवृत्तिकत्वात्, उक्तरुपमुक्तौ च [7]सुखभावात्, तदर्थं प्रवृत्त्यानुपपत्तिः । न च प्रवृत्तिमात्रे सुखरूपेष्टसाधनताज्ञानं न प्रवर्तकं प्रायश्चितप्रवृत्तौ व्यभिचारादिति
वाच्यम्, प्रायश्चित्तस्य दुरितनाशकत्वेनैव वेदबोधितत्वात्तत्र सामान्यकार्यकारणभावबोधात् । तथा च बाधकाभावे प्रवृत्तिमात्रं प्रति सुखज्ञानं प्रयोजकं प्रवृत्तिविषयस्य सुखसाधनज्ञानं हेतुः । प्रायश्चित्तप्रवृत्तौ च विशेषशास्त्रस्य बाधकत्वाच्च नान्यथाकार्यकारणभावः । एवञ्च प्रवृत्तिविषये सुखसाधनत्वज्ञानाभावो [8]बाधकं विना प्रवृत्तिप्रतिबन्धकः । तथा चोक्तरुपे निःश्रेयसहेतौ सुखसाधनत्वज्ञानस्याभावात् प्रतिबन्धकस्य सुखसाधनत्वज्ञा[9]नभावस्य विद्यमानत्वात्कथं प्रवृत्तिः ? न च प्रायश्चित्तस्थले किं वात्र किञ्चिद्बोधकमस्ति,

1. गत्यन्तरगौरवापत्तेः
2. अत
3. णस्यावश्यक इति वाच्यम - क मातृकायाम् ।
4. भवताऽध्यवसायः - क मातृकायाम् ।
5. यथार्थपरत्वे च ।
6. ज्ञान वं - क मातृकायाम् ।
7. सुखाभावात् ।
8. विना --- निःश्रेयस
9. ज्ञानस्याभावा --- प्रवृत्तिप्रतिबन्धक --- क मातृकायाम् ।

न वा दुःखञ्च सार्थकतया प्रायश्चित्तवत्तत्त्वज्ञानादिकं वेदबोधितं येन तदर्थं तत्र प्रवर्त्ततेऽत्यादिदूषणं मन्यमानाः मुक्ते[1]रन्यस्यैव स्वरूपमङ्गीचक्रुः । तथाहि - ध्वंसप्रतियोगिसुखत्वादवान्तरजातिरहितसुखसाक्षात्कारो मुक्तिः । स च विनश्यदवस्थेन योगाभ्यासादिजनितपाटवेन श्रवणादिजन्यज्ञानजन्य-संस्कारज[2]न्यनिदिध्यासनसमुत्सारितवासनामिथ्याज्ञानात्मस्वरुपावच्छिन्न-शरीरेण जन्यते । एतेन जन्यज्ञान[3]त्वावच्छिन्नं प्रति शरीरत्वेन कारणत्वाच्छरीरं विना कथं तस्योत्पत्तिरिति प्रत्युक्तम् । तस्य च विनाशकसामग्र्यभावेन विनाशाभावात्तदनन्तत्वम्[4] । न च जन्यत्वेन विनाशित्वनियमात्तस्यावश्यं विनाश इति वाच्यम्, ध्वंसस्यापि तथात्वापत्तेः । न[5] तद्ध्वंसे तथात्ववारणार्थं, भावत्वेन जन्यत्वविशेषणाय, तथात्रापि व्यभिचारवारणार्थमेतदन्यत्वेन विशेषणमिति । न च मानाभाव इति वाच्यम्, मुने[6]र्वक्ष्यमाणप्रमाणबलेनोक्तरुपत्वे तस्यैव तत्र प्रमाणत्वात् । वस्तुतस्तु आत्मावच्छेदकं प्रति नित्यमेव, तच्च निदिध्यासनेनाभिव्यज्यते ।

न च सुखस्य नित्यत्वे मानाभावः, "[7]प्रत्युत्पन्नं सुखं विनष्टं सुख" - मितिप्रतीतिबलेन तस्योत्पत्ति[8]विनाशशक्तित्वमेव प्रत्यक्षसिद्धमिति नोक्तस्वरुपत्वमुक्तेरिति वाच्यम्, सुखविशेषस्य तथात्वेऽऽत्मस्वरूपावच्छेदकस्य सुखस्य [9]सांसारिकदशायामननुभूयमानस्य नित्यत्वात् । सुखमुत्पन्नमित्या-दिप्रतीतेश्च सांसारिकसुखत्वावान्तरजातिमत्सुखमात्रविषयत्वात् । न चात्मस्वरुपावच्छेदकस्य सुखस्य नित्यत्वे सांसारिकदशायामपि तदनुभव इति वाच्यम्, अत्यन्तसुखानुभवं प्रति मिथ्याज्ञानस्य प्रतिबन्धकत्वेन तदानीं तदनुपपत्तेः ।

---

1. मुक्तेः --- तथाहि
2. जन्यध्वंसनामिथ्या - क मातृकायाम्
3. अवच्छिन्नत्वात्
4. तदनन्तरत्वं
5. स च - क मातृकायाम् ।
6. वीक्ष्यमाण बलेन - क मातृकायाम् ।
7. प्रत्युत्पन्नं - क मातृकायाम् ।
8. विनाश - स्वरुपत्वं ।
9. संसारदशायां --- सुखनुभवं प्रति ।

आत्मनो नित्यसुखवत्त्वञ्च श्रुत्यनुमानसिद्धम्। श्रुतिश्च - "प्रेयो ब्रह्म तस्मात्तदन्तरतमं यदयमात्मे"त्यादिना तत्र ब्रह्मपदेनात्मन एवाभिधानम्। बृहत्वाद् बृहणत्वाच्च ब्रह्मैव आत्माऽभिधीयत इति न्यायात् बृहणत्वमतिगुणद्वारा सर्वकार्यानुगुणत्वम्। [1]प्रेयस्त्वमन्तरतमत्त्वं च सुखवत्त्वम्, न तु सुखस्वरूपत्वम्। अहं सुखीति आत्माभिन्नत्वेन प्रतीयमानस्य सुखस्यात्मा[2]भेदबोधने प्रत्यक्षबोधेन श्रुतिव्यापाराभावात्। न चैतावतासुखमात्रसिद्धावपि तस्य नित्यत्वे मानाभाव इति वाच्यम्, "आनन्दं ब्रह्मणो रूपमि"त्य[3]त्र रुपशब्दस्य स्वरूपाधिकत्वे बाधादवच्छेदकपरत्वान्नियतत्वे च तथात्वासम्भवात् तद्बोधकश्रुतेरेव तत्र प्रमाणत्वात्। अनुमानञ्चाहं दुःखसमानकालीनसुखवान् दुःखदशायामपि बलवद्द्वेषविषयत्वाद् यन्नैवं तन्नैवमिति व्यतिरेकी। एवञ्चोक्तानुमानात्सांसारिक-सुखविलक्षणसुखसिद्धि[4]स्तस्य विरोधविशेषगुणनाश्यत्वं दुःखसमानका-लीनत्वासम्भवात्। तस्य च दुःखसमानकालीनस्य बाधकाभावान्नित्यत्व-सिद्धिरिति। यद्वा [5]देवदत्तीयसुखं तत्स्वरुपावच्छेदकं देवदत्तत्वसमानाधिक-रणात्यन्ताभावप्रतियोगिगुणवृत्तिगुणत्वव्याप्यजातिरहितत्वे सति देवदत्तमा-त्रवृत्तित्वाद् [6]देवदत्तत्ववदित्यनुमानं द्रष्टव्यम्। मुक्तेश्च सुखसाक्षात्काररुपत्वे "आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्टितमि" - ति श्रुतिप्रमाणम्। तत्र प्रतिष्टितमिति पदस्य साक्षात्कारविषयत्वपरत्वाद् अन्यथा संसारदशायामपि तस्य सत्त्वे मोक्ष इति विशेषोपादानानुपपत्तिरिति संक्षेपः।

ननु तत्त्वज्ञानं मुक्तौ हेतुरित्युक्तम्, [7]तच्च न साक्षान्मिथ्याज्ञाननिवृत्तिद्वारा। मिथ्याज्ञानञ्च शरीरादात्मप्रकारको [8]भ्रम आत्मनि वा रुपवत्त्वादिप्रकारकः। सः च [9]प्रत्यक्षात्मकः तत्त्वज्ञानं शास्त्रजन्यत्वाच्छब्दरुपमुपपत्तिजनित[10]मनुमिति-

1. बृ --- णत्वं प्रेयस्त्वामनन्तरतमत्वं च सुखत्वद्यैव, न तु - क मातृकायाम्।

2. भेद बोधेन

3. मित्यज --- छेदकपरत्वादनित्यत्वे

4. सिद्धि --- नास्यत्वे।

5. देवदत्तोऽयं सुखं - क मातृकायाम्।

6. देवदत्तत्व --- मुक्तेश्च

7. त --- मिथ्याज्ञान

8. भ्रमणात्मनि

9. प्रत्यक्षात्कन्ततत्त्वज्ञानम् - क मातृकायाम्।

10 अनुरुपम्वा। क - मातृकायाम्।

रुपम्वा। तच्च न प्रत्यक्षात्मकभ्र[1]मविरोधः। सामानाधिकरण्यप्रत्यासत्त्याऽ-नाहार्यभ्रमत्वा[2]वच्छिन्नं प्रति साक्षात्कारात्मकतत्त्वज्ञानत्वेनैव प्रतिबन्धक-त्वकल्पनात्। अत्र तत्त्वज्ञानं प्रत्यावध्यकोटौ सामानाधिकरण्यप्रत्यास-त्त्येत्यकरणे देवदत्तीयतत्त्व[3] ज्ञानाय यज्ञदत्तीयभ्रमनिवृत्तिः, न वा तत्पुरुषाय वादिघटितोऽननुगमः। अत्र अना[4]हार्येतिकरणाद् रुपकादौ मुखे चन्द्रत्वाभाव-सा[5]क्षात्कारे यत्करणे साक्षात्कारस्य न चन्द्रत्वारोपप्रतिबन्धकत्वं तत्त्वज्ञानस्य तत्त्वज्ञानं प्रत्यप्रतिबन्धकत्वाद्भ्रममिति। प्रतिबन्धककोटौ [6]साक्षात्कारत्वकरणे पितृदृष्टचक्षुर्जन्यशङ्खविशेष्यकपीतत्वप्रकारकभ्रमं प्रति [7]शङ्खत्वालिङ्गकपा-ण्डुरत्वानुमितेरपि प्रतिबन्धकोत्पत्तिः। न च [8]मण्डुकवशाञ्जनदृष्टचक्षुर्जन्यकारण त्वप्रकारकवंशविशेष्यकभ्रमत्वावच्छिन्नप्रतीत्या च [9]वंशविषयक उरगत्वाभाव-ज्ञानस्यपि प्रतिबन्धकत्वापत्ति इति वाच्यम्, भ्रमकरणकेन्द्रियजन्यत्वेन [10]साक्षात्कारस्यपि विशेषणात्। एवं लौकिकत्वेनापि साक्षात्कारो विशेषणीयः। तेनोपनयात्मकप्रत्यक्षस्य भ्रमविशेषं प्रति अप्रतिबन्धकत्वेऽपि न क्षतिः एवञ्च समानविशेष्यकत्वसमानप्रकारकत्वादिकमपि प्रत्यासत्तौ विशेषणीयम्। तेन भिन्नविशेष्यकभिन्नप्रकारज्ञानस्याप्रतिबन्धकत्वेऽपि न क्षतिः। ततश्च प्रत्यक्षात्म-कलौकिकमात्मतत्त्वज्ञानं भ्रमनिवर्तकत्वेनान्वेषणीयम्।

[11]ततश्च शास्त्रस्य व्यापार इति तत्र हेत्वपेक्षायां तद् दर्शयति -

1. विरोधिकसमानाधि---
2. भ्रमत्वावच्छिन्न---कलवज्ञानत्वेन प्रतिबन्धकत्व ---
3. तत्त्वज्ञानो
4. पदार्थेति करणाद् रूपकादौ - क मातृकायाम्।
5. साक्षात्कारस्य न --- ज्ञानस्य
6. साक्षात्कारेत्यकरणेऽपि तदुष्टचक्षुर्जन्य
7. शङ्खयत्वलिङ्गकपाण्डुरत्वानुमितप्रतिबन्धकः
8. पाण्डुस्व - क मातृकायाम्।
9. विशेष्यक कारण भावज्ञानस्यापि।
10. साक्षात्कारो - क मातृकायाम्।
11. तत्र च न

(मू) तच्चेश्वरचोदनाभिव्यक्तात् धर्मादेव ।

तच्चेदि । नवीनाः । ननु तत्त्वज्ञानस्य मुक्तिहेतुत्वात् शास्त्रस्य तत्त्वज्ञानहेतुत्वात् । झटित्येव शास्त्रादिदर्शनान्तरं मुक्त्यापत्तिः । तथानापत्तौ वा व्यभिचारान्नोभयोरपि कार्यकारणभाव इति आशङ्क्य न शास्त्रमात्रं तत्त्वज्ञाने हेतुः, किन्तु सहकार्यान्तरसम्बलितमेवेति [1]तच्चेत्यवतारणिकामाहुः । न पुनरर्थे तत्त्वनिःश्रेयसहेतुत्वे नोक्तं तत्त्वज्ञानम् ।

ईश्वरेण चोद्यत इति ईश्वरचोदनावेदः । अकर्तरि चाकारके, त्वधिकारात्कर्मणि च, तेनाभिव्यक्त्या प्रतिपादिताद् धर्मान्निवृत्तिलक्षणात्फल-कामनानुष्ठितत्वादिति यावत् । तथा च निष्कामकर्मानुष्ठानेन तत्त्वज्ञानोत्पत्ति-प्रतिबन्धकदुरितनिवृत्तौ श्रवणादिकर्मोत्पन्नसाचिव्येन निदिध्यासनरुपेणात्म-साक्षात्कारस्तेन च सवासनामिथ्याज्ञाननिवृत्तावपवर्ग इति ।

तथा च कर्मणामन्तःकरणेनैवात्महेतुत्वं तत्त्वज्ञानञ्च भ्रमनिवृत्तिद्वारा मुक्तिं प्रति कारणत्वम् । कर्मणा तद्द्वारा वा तत्त्वज्ञानहेतुत्वं न तु तत्त्वज्ञान-वन्मुक्तिहेतुत्वम् आकाशमरणादि[2]जन्यमुक्तौ व्यभिचारात् । न च तत्रैव व्यभिचारात् तत्त्वज्ञानमपि न कारणमिति वाच्यम्, तत्त्वज्ञाने चावान्तरधर्मसम्भवात्, तत्त्वज्ञानं प्रति विशिष्टहेतुहेतुमद्ग्रहान्मोक्षे चावान्तरधर्माणामभिभवाद् विशिष्टकार्यकारण-भावाऽसम्भवात् । किञ्च[3] "तमेतं वेदानुवचनेन ब्रह्मणा विविदिषन्ति यज्ञेने" त्यादौ यज्ञेनेति [4]तृतीययाऽश्वेन जि[5]गमिष्यतीत्यादिवत् प्रकृत्यर्थे नैवान्वयाद् यज्ञादिजन्यवेदविषयेच्छेत्याद्यन्वयत्वबोधाज्ज्ञानमेव यज्ञानां हेतुत्वमिति । ननु यज्ञानां तत्तदुत्पत्तिवाक्येन तत्तत्फलार्थविहितानां कथं ज्ञानादिहेतुत्वमिति । न च प्रकरणान्तरन्यायेन यज्ञपदं न प्रकृतयज्ञपरम्, किन्त्वतिरिक्तयज्ञ[6]परमेव । तस्य च ज्ञानफलकत्वमिति न विरोध इति वाच्यम् । अत्र द्रव्यदेवतादिरूपलाभाभावे

1. तच्चेताथावतारणिककामा --- हेतुत्वेनोक्तं तत्त्वज्ञानं ईश्वरेण - क मातृकायाम् ।
2. ज --- व्यभिचारात् तत्कर्मत्वज्ञानेऽपि न कारणमिति ।
3. वूदानुवचनेन - क मातृकायाम् ।
4. तृतीयाया - क मातृकायाम् ।
5. निगमि --- व्ययार्थज्ञादिजन्यवेदनविषयकेच्छा ।
6. चरमेव --- तनविरोध इति ।

तत्फलकल्पनानुपपत्तेरगत्या यज्ञपदस्य प्रकृतयज्ञपरत्वस्यावश्यकत्वादिति चेन्न। अत्र संयोगपृथक्त्वन्यायेन तत्फलानामपि कर्मणा ज्ञानार्थत्वाविरोधात्। क्रत्वर्थस्य खादिरत्वस्य पुरुषार्थवत्।

एवञ्च [1]यज्ञेनेत्यादिवाक्ये यज्ञपदस्य तत्त्वज्ञानविहिताशेषकर्मपरत्वात्स्वर्गाद्यर्थमनुष्ठितादेव तत्त्वकाम्यकर्मणोऽन्तःकरणशुद्धद्वारा तत्त्वज्ञानोत्पत्तिः सम्भवतीति धर्मस्य निवृत्तिलक्षणत्वानुधावनप्रयासो व्यर्थ इति नवीनाः। ननु "सत्येन लभ्यस्तपसो [2]ह्येषाणामात्मसम्यग्पदेन ब्रह्मचर्येण" इति श्रुतेः; "कर्मण्येव हि संसिद्धिमि" त्यादिस्मृतेः, ज्ञानादेव तु कैवल्यमेतदालस्यलक्षणमिति ज्ञायमात्रे निन्दास्मरणाच्च, विवादाध्यासितं कर्म मुक्तिहेतुस्तद्हेतुत्वेन वेदबोधितत्वादित्यनुमानात्कर्मणोऽपि तत्त्वज्ञानसाम्येन मुक्तिहेतुत्वमिति चेन्न। "नान्यः पन्थाः विद्यतेऽयनाये" तिश्रुत्या तत्त्वज्ञानान्धस्य मुक्तिहेतुत्वप्रतिषेधात् तादृशश्रुतेः प्रयोजकत्वे पर्यवसानात्स्मृतेश्च [3]श्रुतिविरोधेनाप्रामाण्यादनुमाने च हेतुत्वसिद्धेः।

अत्र स्वात्मतत्त्वज्ञानमीश्वरतत्त्वज्ञानञ्च मुक्तिहेतुः। "तद्ब्रह्मणा वेदितव्यं परमपरञ्चे"ति श्रुतेः। न च परमात्मनः परस्यातीन्द्रियत्वात्कथमीश्वरप्रत्यक्षमिति वाच्यम्, देवदत्तप्रत्यक्षतावच्छिन्नं प्रति तादात्म्यसम्बन्धेन देवदत्तेतरात्मजत्वेन देवदत्ते प्रतिबन्धकतायां योगजधर्मस्य तथायोगजधर्मबलाद् भातीति सेश्वरप्रत्यक्षसिद्धिः। एवञ्च "तमेव विदित्वा" इत्यादौ तच्छब्दस्य प्रकृतपरामर्शत्वात्पूर्वं चेश्वरस्यैव प्रक्रान्तत्वात्तज्ज्ञानस्य [4]मुक्तिहेतुत्वप्रतिपादिका श्रुतिरपि साधुसङ्गच्छते। न च "तमेव विदित्वा तमेव" इत्येवकारेणान्ययोगेत्यवच्छेदात्, तदन्यज्ञानेऽतिमृत्युहेतुर्नास्ति इत्यर्थपर्यवसानेन स्वात्मतत्त्वज्ञाने मुक्तिहेतुत्वान्नापत्तिरिति वाच्यम्, पूर्वदर्शितश्रुतिविरोधेनान्येनकारणस्य विप्रतिपत्तिनिरासार्थत्वादिति बहवः।

[5]स्वतन्त्रास्तु-स्वात्मतत्त्वज्ञानमेव साक्षात्काररूपस्वा[6]त्मविषयप्रत्यक्षं

1. यज्ञेनेत्य --- पदस्य
2. ह्येषः
3. स्मृतिविरोदेनाप्रामाण्य - क मातृकायाम्।
4. मुक्ति --- वि साधु
5. नास्ति
6. विषयभ्रमविरोधतया।

भ्रमबोधिततया अपेक्षितमिति तदेवं मिथ्याज्ञाननिवृत्तिद्वारा मुक्तिहेतुः। ईश्वरज्ञानस्य च मुक्तौ व्यापाराभावाददिदृष्टद्वारा च तथाकल्पने मानाभावादपेक्षितत्वाभावाच्च न कारणत्वम्। [1]योगजप्रत्यक्षबलेन परमात्मनः परस्य प्रयत्नासम्भवेनेश्वरात्मनः प्रत्यक्षत्वासम्भवाच्च रसस्य चक्षुर्गतायामिव योगजधर्मस्य तत्राप्रयोजकत्वात्। न च "तमेव विदित्वा" इत्यादौ तच्छब्दस्य विरोध इति वाच्यम् तत्र तच्छब्दस्य प्रसिद्धार्थत्वेनापि वक्तुं शक्यत्वात् "द्वे ब्राह्मणी" इत्यत्रापि वेदनस्योपा[2]सनापरत्वेन ज्ञानपरत्वाभावाच्चेत्याहुः।

द्रव्योद्देशप्रकरणम्

तत्र जिज्ञासायामनुरोधेनोत्तरग्रन्थस्यावतारणाय तस्य द्रव्यगुणेत्यादौ द्रव्यत्वादीनामुद्दिष्टानां पदार्थानां विशेषरूपेण लक्षणविभागजिज्ञासायामु[3]त्तरग्रन्थमवतारयितुं जिज्ञासामवतारयति-

(मू) अथ के द्रव्यादयः पदार्थाः किञ्च तेषां साधर्म्यं वैधर्म्यञ्चेति।

अथेति प्रयोजननिरूपणानन्तरम्। अथ प्रयोजनाभिधेयसम्बन्धनिरु[4]पणानन्तरम् एतादृशशिष्यजिज्ञासायां प्रत्येकं द्रव्यादुद्देशः क्रियत इत्यध्याहारेणान्वयः[5]। प्रश्नार्थो वा अथशब्दः। द्रव्यादीत्यादिपदेन गुणादिफले परिग्रहः। अग्रे च स्वरुपविभागदर्शनात्तद्विषयतया त्वयं प्रश्नो योजनीयः।

तथा च कानि द्रव्याणि कियन्ति ? के गुणाः कियन्त ? [6]कानि कर्माणि कियन्ति ? किं सामान्यं कतिविधम् ? के के विशेषाः ? कः समवायः ? विशेषाणामानन्त्यात् समवायस्य [7]एकत्वात्स्वरूपमात्रे जिज्ञासा। साधर्म्यवैधर्म्ययोस्तज्ज्ञानहेतुत्वेनोपन्यासात्तद्विषयान् दर्शयति - किं चेति। एतेन पदार्थानामेव[8] प्रतिपाद्यत्वेन प्रतिज्ञानात्तयोश्च पदार्थान्तर्भावात् पुनस्तद्विषयजिज्ञासानुपपन्नमिति प्रत्युक्तम्। साधर्म्यवैधर्म्ययोः पदार्थान्तर्भावेऽपि तत्त्वज्ञानहेतुत्वेन पृथगुपन्यासात्। किञ्च तेषां [9]साधर्म्यम्, किञ्च तेषां वैधर्म्यमिति प्रश्नद्वयसमुच्चयार्थौ चकारौ। यद्यपि साधर्म्याणां वैधर्म्यरूपत्वात्पृथक्[10]-

1. प्रत्यक्ष --- सम्भवेन। 2. उपासनापरत्वेन -। तत्र 3. उत्तरग्रन्थं अवतारयति।
4. निरूपणा --- प्रत्येकम्। 5. पदार्थो वा। 6. कानि --- कतिविधम् ?
7. एकात्वाद्विभागो नास्तीति अतिस्वरूपमात्रं 8. एव - पदार्थान्तर्भावात्
9. साधर्म्यमिति प्रश्नद्वयसमुच्चयार्थौ चकारौ 10. प्रश्नो --- वच्छेदकायोः

प्रश्नोऽनुपपन्नस्तथापि तत्त्वावच्छेदकयोर्भेदात्पृथक्प्रश्न इति द्रष्टव्यम्।

नवीनाः - द्रव्यगुणेत्यादौ भाष्ये विभागपरे द्रव्यादीनि षट् पृथक्तया प्रतीयन्ते। तदनुपपन्नम्। पदार्थानां प्रातिस्विकत्वव्यवस्थापके द्रव्यत्वादौ प्रमाणाभावेन सर्वेषामेकत्वेन षट्संख्यानुपपत्तेर्विभागा[1]नुपपत्तेश्चेत्याशङ्क्य पदार्थानामेव प्रत्येकजिज्ञासायां प्रत्यवतिष्ठते तथेत्याहुः।

(मू) तत्र द्रव्याणि पृथिव्याप्तेजोवाय्वाकाशकालदिगात्ममनांसि इति सामान्यविशेषसंज्ञोक्तानि नवैव तदव्यतिरेकेणान्यस्य सञ्ज्ञानभिधानात्।

तत्रेति। पदार्थानां मध्ये द्रव्याणि नव इत्यन्वयः। निर्धारणे सप्तमी। तत्र कानि द्रव्याणीत्यपेक्षायां पृथिव्यादीनि द्रव्याणि। कियन्तीत्यपेक्षायां नवेति। ननु पृथिव्यादीनि द्रव्याणि इत्यस्यैतानि नवद्रव्यत्वेन व्यवहार्य्याणीत्यर्थः, [2]न तु द्रव्याऽभिन्नानीत्यर्थः एतदव्यतिरेकेण पूर्वं द्रव्यग्रहाभावात्, तथानुगतद्रव्यव्यवहारे किं निमित्तं प्रत्येकं पृथिव्यादिव्यक्तस्येति चेन्न। अननुगमात्। नापि गुणत्वम्, गुणानामननुगतत्वेन[3]तद्दोषतादवस्थ्यात्। उत्पत्तिक्षणे तदभावाच्च। नापि क्रियावत्त्वम्, [4]विभुद्रव्याऽव्यापकत्वात्। नापि [5]समवायिकारणत्वम्, तस्य तत्तत्कार्यनिरुप्यत्वेनैकस्याभावात्। द्रव्यत्वं [6]जातिस्तथेति चेत् अतीन्द्रियाकाशादिसाधारणेनानुगतद्रव्यप्र[7]त्ययाभावेन तस्य जातित्वासिद्धेः। [8]ननु न चाकाशादयः सत्ताव्याप्यजातिमन्तः सत्त्वादिति सत्ताव्याप्यसामान्यसिद्धौ तत्सामान्यं पृथिव्यादिन[9]वकवृत्तिः आकाशादि वृत्तिजातित्वात्सत्तावदित्यनुमानात्पृथिव्यादिनवकवृत्त्येकजातिसिद्धिरिति वाच्यम्, अनुमानस्याप्रयोजकत्वात्, विपक्षे बाधकाऽभावादिति चेन्न। संयोगत्वावच्छिन्नकार्यतानिरूपित-

1. अनुपपत्तेः --- पदार्थाना
2. न तु --- त्यर्थः।
3. तद्दोषतादब्यस्थ्यात्।
4. वहुद्रव्याव्यापकत्वात्
5. समवायिकारण --- त्वेनैकस्य
6. जातं तथेति चेत - क मातृकायाम्
7. प्रत्यक्षमावेन - क मातृकायाम्
8. न - क मातृकायाम्
9. षड्कवृत्ति-आकाशादि-वृत्तिजातित्वात् - क मातृकायाम्।

कारणतावच्छेदकत्वेन द्रव्यत्वजातेः दूपह्नवतयातस्यैवानुगतद्रव्यव्यवहारहेतुत्वात् । तथा च द्रव्यपदेनैव द्रव्यत्वस्योपस्थि[1] तयातदेव द्रव्याणां लक्षणमिति द्रष्टव्यम् ।

ननु संयोगित्वं न कार्यतावच्छेदकं क्रियाविशेषसंयोगविभागानामननुगतानां तत्तत्संयोगं प्रति हेतुत्वात्तत्तत्क्रियाविशेषादिजन्यतावच्छेदकसंयोगत्वव्याप्यतत्तज्जातेरेव कार्यतावच्छेदकत्वात् । तथा च संयोगत्वावच्छिन्नकार्यतायाः [2]एवाभावेन तन्निरुपितकारणतावच्छेदकत्वेन द्रव्यत्वसिद्धिः दूरापत्तिः । किञ्च संयोगत्वावच्छिन्नं प्रति न द्रव्यत्वेन कारणत्वम्[3] ग्राह्यम्, यदा द्रव्याभावस्तदा संयोगाभाव इति व्यतिरेकव्याप्तेरसिद्धिः । आकाशादीनां नित्यत्वेन तदभावासम्भवादिति चेन्न । संयोगत्वव्याप्यजातीनां कार्यतावच्छेदकत्वेऽपि संयोगस्य तथात्वे बाधकाऽभावात् । [4]संयोगत्वं कार्यतावच्छेदकं कार्यमात्रवृत्तिजातित्वाद् घटवदिति साधकस्य सत्त्वाच्च । किञ्च संयोगसामान्यस्य कार्यतावच्छेदकानाक्रान्तत्वे तज्जातीयस्य कस्यचिन्नित्यत्वापत्तेश्चेति भवत्येव संयोगत्वं कार्यतावच्छेदकम् ।

यत्तु [5]व्यतिरेकव्याप्त्याभावान्न द्रव्यत्वेन संयोगकारणतेत्युक्तम् । तन्न । समवायतादात्म्यान्यतरसम्बन्धेनैव [6]संयोगद्रव्ययोः कार्यकारणभावाद् यत्र समवायेन सम्बन्धेन संयागाभावो गुणादौ तत्र तादात्म्येन सम्बन्धेन द्रव्याभाव इति व्यतिरेकव्याप्तेरक्षतलादिति दिक् ।

समवायिकारणतावच्छेदकतया द्रव्यत्वसिद्धिरित्यपि केचित् । **"नवेति"** अत्र [7]यद्यपि विभागस्यन्यूनाधिकसंख्यावच्छेदकफलत्वान्नवत्वमर्थादेव लब्धम्, [8]तथापि शिष्याणां सुखप्रतिपत्त्यर्थं नवग्रहणम् । ननु नवत्वमसिद्धम्, संज्ञाभेदस्य पदार्थभेदकत्वादत्र [9]द्रव्यसंज्ञायाः पृथिव्यादिसंज्ञायाः भिन्नत्वेन तस्यास्तद्भिन्नद्रव्यापादकत्वात् ।

---

1. पस्थित्या --- व्याम्
2. एवाभावेन --- च्छेदकत्वेन
3. कारणत्वं ग्राह्यम्
4. सं --- जातित्वात्
5. व्यतिरेकव्याप्याभावान्न - क मातृकायाम्
6. संयोग --- समवायेन
7. याद्यातिविभागस्य
8. तथापि --- नवग्रहणम् - नास्ति ।
9. द्रव्यसंज्ञाया --तद्भिन्न

न च तद्भिन्नद्रव्यस्य सिद्ध्यसिद्धिभ्यां व्याघात इति वाच्यम्, पृथिव्यादित्वस्याऽननुगतत्वेन प्रत्येकं तदभिन्नद्र[1]व्यसिद्धेर्निबाधत्वादित्यत आह - **सामान्यविशेषसंज्ञोक्तानीति** । [2]सामान्यसंज्ञा द्रव्यमिति । विशेषसंज्ञा पृथिवीत्यादि । ताभ्यामुक्तानि [3]महर्षिणा लोकेन वा । तथा च द्रव्यसंज्ञायाः पृथिवीत्यादिव्यापकसंज्ञात्वेन न तद्भिन्नविषयद्रव्यापादकत्वमित्यर्थः । न च यथा पदार्थादिसंज्ञाव्यापकत्वेन तद्व्यभिचारिणी तत्तदेवद्रव्यादिसंज्ञापि [4]स्यादिति वाच्यम्, तस्याद्रव्यत्वनिमित्तत्वेनान्यत्र तदभावादिति । एवेति । अत्रैव कारणस्य व्यवच्छेदे शक्तिः विशेषणविशेष्यक्रियावाचकपदसमभिव्याहाराद[5]योगान्ययोग-इत्यन्ययोगव्यवच्छेदबोधकत्वमिति मतमिति चेत् । न । शङ्खः पाण्डुर इत्यादौ पाण्डुरादिशब्दात्तद्गुणविशिष्टधर्म[6]मात्रोपस्थितावप्ययोगादेरवस्थापकाऽभावाच्छङ्खे पाण्डुरत्वायोगो नास्तीत्यन्व[7]यबोधानुपपत्तेः । किन्तु विशेषणविशेष्य-क्रियावाचकपदसम[8]भिव्याहृतैवकारस्यायोगान्ययोगात्यन्तयोगव्यवच्छेदेषु [9]शक्तित्रय एवेति प्राञ्चः । तत्र क्रियासङ्गतेवकारस्या[10]त्यन्तयोगव्यवच्छेदेऽपि शक्तिरित्यत्रायोगेऽत्यन्तत्वस्य [11]वक्तुमशक्यत्वादयोगव्यवच्छेद एवार्थः । तत्र सरोजजातीयस्य सर्वस्य नीलभवनकर्त्तृत्वायोगश्चेत् [12]अत्यन्तायोगस्तदव्यव च्छेदश्चैवाकारार्थस्तदा बाध एव । सर्वत्र सरोजजातीये नीलभवनकर्त्तृत्वाभावात्, अतएव तज्जातीयस्य सर्वस्यात्यन्तमयोगवच्च व्यवच्छेदोऽत्यन्तायोगव्यव-च्छेदस्तस्य[13] इत्यपि न [14]सिद्ध्यसिद्धिपराहतत्वेन तद्द्रव्यवच्छेदस्यासम्भवात् । किन्तु तज्जातीयत्वावच्छिन्नव्यवच्छेद एवात्यन्तायोगव्यवच्छेदः । [15]तदवरम् ।

---

1. सिचिर्निर्बाधितत्वात् - क मातृकायाम् ।
2. नास्ति
3. महर्षिणा लोकेन वा
4. स्यादिति --- न्यत्र
5. योगान्वययोगात्यन्ताव्यवच्छेदबोधक
6. स्थितावप्यने --- पाण्डुरत्वा
7. अन्वयबाधानुपपत्तेः - क मातृकायाम्
8. अभिव्याहतैवकारणस्यायोगान्वयोगात्यन्तायोग - क मातृकायाम् ।
9. शक्तिजन्यं एवेति प्रा ञ्चः - क मातृकायाम् ।
10. अत्यन्तायोगष्यवच्छेदे शक्तिरिन्तायोगेऽत्यन्तस्य - क मातृकायाम् ।
11. शक्यत्वा --- च्छेदं
12. स्वद्रव्यवच्छेदः क मातृकायाम् ।
13. सतस्यार्थ
14. सिद्ध्यसि --- सम्भवात्
15. तच्च । विशेषणसङ्गतक्रियासङ्गतैरेवकारतयोर्न पृथक् शक्तिः - क मातृकायाम् ।

विशेषणसङ्गमक्रियासङ्गतैवकारयोर्नपृथक्शक्ति: । किञ्च अयोगव्यवच्छेद एवोभयो: । स: च क्वचिदन्वयितावच्छेदकावच्छिन्नत्वेन प्रतीयते । क्वचिदन्वयितावच्छेदकसामाना[1]धिकरण्येन । किञ्च ज्ञानमर्थं[2]गृह्णात्येवेत्यादौ सर्वत्र ज्ञानेऽर्थग्रहकत्वमत्त्वेन नीलं सरोजं भवत्येवेत्यादिवन्नात्यन्तायोगव्यवच्छेदाभावात् [3]तादृशात्यन्तायोगव्यवच्छेदो [4]न क्रियासङ्गतैवकारार्थ: । किञ्च नीलं सरोज भवत्येवेत्यादिवन्नरो वेदानधोत एवेत्यादिप्रयोगापत्तेश्च । तत्र चान्वयिताव्यवच्छेदकसामानाधिकरण्येनायोगव्यवच्छेद: क्वचिदेव एवकारार्थ: । क्वचिदन्वयितावच्छेदकावच्छिन्नत्वेन ज्ञानमर्थमित्यादौ विशेषणसङ्ग तैवकारस्य तु सर्वत्रान्वयितावच्छेदका-वच्छिन्नत्वेनायोगव्यवच्छेद इति विवेक: ।[5]

तेनैवकारस्यायोगान्ययोगव्यवच्छेदयो: शक्तिद्धयमेव । वस्तुतस्तु सर्वत्रैवकारस्यान्ययोगव्यवच्छेद एव शक्ति: । शक्तित्रयकल्पने द्वयकल्पने वा गौरवात् । शङ्ख: पाण्डुर एव द्रव्यं गुणवदेवेत्यादौ शङ्ख: पाण्डुरत्वायोगो नास्तीत्याद्यन्वयबोधस्य पाण्डुरत्ववदनुपस्थित्या दुरुपपादित्वात् । अन्यविशेषणत्वेनोपस्थितस्य पाण्डुरत्वादेस्तथान्वयायोगाच्च । अन्वययोगव्यवच्छेदार्थत्वे तु शङ्खे पाण्डुरान्यनीलादियोगव्यवच्छेदार्थत्वे न क्वचिदनुपपत्ति: । एवञ्च गुणवदेवेत्यादौ द्रव्यं गुणवदन्यन्न भवतीत्यर्थ: । नीलं सरोजमित्यादौ च सरोजजातीयं [6]नीलभवन कर्त्रन्यन्न भवति । एवं "रुपं पृथिव्यां वर्तत एव" "ज्ञानमर्थं गृह्णातीत्येव," "ऋतौ स्वदारान् गच्छेदेव," [7]"चैत्रेणौदन: एवे" त्यादौ रुपं न पृथिवीवृत्त्यन्यत् । ज्ञानं नार्थग्राहकादन्यत् । ओदनो न [8]चैत्रकर्त्तृकपाककर्मार्थ : । सन्निधानस्थानं न ऋत्वधिकरणकस्वदारकर्मगमनकर्त्रन्य: इत्याख्यातानां तत्तद्धर्मिलक्षणयाऽन्वयो बोध्य : ।

1. सामान्या -- कि च ।
2. गृह्णात्येवेत्यादौ - क मातृकायाम् ।
3. ह्यन्ताभावात् तादृशात्यन्तायोगव्यवच्छेदाभावा --- नास्ति क - मातृकायाम्
4. क्रियासङ्गैवकारार्थ: - क मातृकायाम् ।
5. विवेक: --- यागष्यवच्छेदयो: ।
6. नीलभ --- वर्तत ।
7. ओदन: - क मातृकायाम् ।
8. कर्मार्थ: ।

न च लक्षणैव दोष इति वाच्यम्, अत्र एव शक्तिकल्पनापेक्षया लघुत्वात्। पार्थ एव धनुर्द्धर इत्यादौ च धनुर्धरक्रियादौ पार्थान्यो न भवतीत्यर्थः। [1]अत्रैवकारस्य समभिव्याहृतपदसमानविभक्तित्वात् [2]प्रथमान्तत्वेन तथैवान्वयात्। [3]धनुर्द्धरत्वोपस्थितं विना तदनुपपत्तेः। यत्तु पार्थिवातिरिक्ते धनुर्द्धरत्वं नास्तीत्यर्थः इति चेत्। तन्न। धनुर्द्धरत्वादेरन्वयविशेषणत्वेनोपस्थितेर्निराकांक्षत्वात्। यथाश्रुतेनैवोपपत्तौ लक्षणाकल्पने मानाभावाच्च। अन्ययोगव्यवच्छेदस्तु विशकलितयैवकारार्थः। अन्यद्योगव्यवच्छेद इति अन्ययोगत्वावच्छिन्नव्यवच्छेदस्याप्रसिद्धेः[4]। यत्किञ्चिदन्ययोगव्यवच्छेदस्यातिप्रसक्तवदिति। एवञ्च नैकदेशान्वयाऽपि योगश्च तादात्म्यवृत्तित्वञ्च। एवञ्चात्मनैव ज्ञायत इत्यादौज्ञानेऽत्मान्यवृत्तित्वव्यवच्छेदः। तथाच [5]ज्ञानमात्मवृत्त्यन्यन्न भवतीत्यन्वयबोधः।

एवञ्च [6]तत्सूक्ष्मतयैव रुपं ज्ञायत इत्यादावेकपदोपस्थितानामपि योग्यतावशाद् यथासम्भवमन्वयः। एवं शीत एव स्पर्शो जलवृत्तिरित्यादौ जलवृत्तिस्पर्शे शीतान्यतादाम्त्यव्यवच्छेद इति यथासम्भवमूहनीयम्।

वस्तुतस्तु एवकारस्य निपातत्वे नोपसर्गादिवन्न कुत्रापि शक्तिः, किन्तु तात्पर्यग्राहकत्वम्वा। तथा च पार्थ एव धनुर्द्धर इत्यादौ[7] पार्थशब्दस्यैवकारसमभिव्याहृतस्य पार्थान्यस्मिन् लक्षणा, धनुर्द्धरशब्दस्य धनुर्द्धरत्वाभावे। तथा च पार्थान्यस्मिन् धनुर्द्धरत्वाभाव इत्यादयः। अत्र च पार्थ एवेत्यत्र प्रथमाया इति सप्तम्यर्थलाक्षणिकत्वेऽपि धनुर्धर इत्यत्र प्रथमाया लाक्षणिकत्वाभावान्न सर्वपदलाक्षणिकत्वमिति। [8]शक्तिजन्यपदार्थोपस्थितेरेव शाब्दबोधे तन्त्रत्वमतेऽपि न क्षतिरति द्रष्टव्यम्। न चानन्तलक्षणादोष इति वाच्यम्, अनन्तानेकशक्तिकल्पनातो लघुत्वात्।

---

1. अन्येवकारस्य - क मातृकायाम्।
2. प्रथमान्तत्वेन
3. धनुर्द्धरत्वो - नुपपत्तेः - नास्ति।
4. प्रसिद्धे --- प्रसक्तवदिति।
5. ज्ञानमात्मकृत्यन्यत् भवति - क मातृकायाम्।
6. ततसूक्ष्मेनां रूपं ज्ञायते इति - क मातृकायाम्।
7. पार्थ --- हृतस्य
8. श्वे --- तन्द्रत्वं

प्रकृते च नवैव द्रव्याणीत्यत्र विशेषणसङ्गतैवकारेण द्रव्येषु नवत्वायोग-व्यवच्छेदो[1] द्रव्याणि नवान्यानि न भवन्तीत्यन्वयोगव्यवच्छेदो वा बोध्य: । स च बाधित: । प्रत्यक्षेणानुभूयमानानां घटादीनामेवानन्तत्वादिति चेत् । न । [2]द्रव्य-विभाजकोपाधित्वेन न वा अन्ययोगव्यवच्छेदस्यैवकारार्थत्वात् ।

तथाच द्रव्यविभाजकोपाधय: पृथिव्यादयो नवान्यानि भवन्तीत्यन्वय-बोध: । पृथिव्यादिनवकान्यस्मिन् [3]नवद्रव्यविभाजकोपाधिरित्यन्वयेनैव-कारार्थान्ययोगव्यवच्छेदोपपत्ते: । अत्रोपाधीनां नवत्वमौपचारिकम् । अयोगव्यवच्छेदार्थमते तु द्रव्यविभाजकोपाधौ पृथिवीत्यादियोगो नास्तीत्यर्थेऽपि न क्षति: । एवञ्च द्रव्याणां विभागवशेन न्यूनाधिकसंख्याव्यवच्छेदे लब्धेऽपि तदुपाधीनामुपदर्शितायोगव्यवच्छेदार्थ [4]एवकार: अर्थप्रतिपत्त्यर्थ इति मान्या: । [5]एवञ्च पृथिवीत्यादिनवकास्मिन्नालोकाभाववत्त्वादौ द्रव्यविभाजको-पाधित्वं प्रतिषिध्यत इति न [6]व्यवच्छेदाप्रसिद्ध्यप्रसिद्धिनिबन्धनो दोष: । एवञ्च पृथिवीत्वादिनवकादन्यत्र द्रव्यविभाजकोपाधित्वे व्यवच्छिन्ने वस्तुतो द्रव्यविभाजकोपाधेर्नवान्तर्गतत्वमेवायातीत्येव । पृथिवीत्वानवक्रान्तं न द्रव्यम्, द्रव्यञ्च पृथिवीत्यादिनवक्रान्तमेवेति ।

ननु यथा पृथिवीत्यादिसंज्ञया पृथिव्यादिद्रव्यसिद्धिरेव । संज्ञान्तरेणापि पृथिव्यादिनवभिन्ने द्रव्यत्वसिद्धिराह - तद्व्यतिरेकेणेति । [7]संज्ञान्तरान्तरा-नभिधानात् । तच्च व्यतिरेकेण द्रव्यपृथिवीत्यादिसंज्ञाव्यतिरेकेण । संज्ञान्तरस्य द्रव्यवाचिसंज्ञान्तरस्य महर्षिणा[8] लोकेन वानभिधानादतिरिक्तद्रव्यसिद्धिरिति सिद्धम् । [9]नवैव द्रव्याणीति । [10]नन्विदमसिद्धम् । नवभिन्नस्य तमसो द्रव्यत्वेनानुभूयमानत्वात् । न च तस्य द्रव्यत्वेनानुभवोऽसिद्ध इति वाच्यम्, तमो नीलमित्यनुभवस्य नीलगुणाश्रयत्वप्रकारकत्वेन द्रव्यत्वोलेखित्वात् ।

---

1. वच्छेदो द्रव्याणि नवानि भवतीत्ययो - क मातृकायाम् ।
2. उपाधिष्वेवं न
3. नवद्रव्यविभाजकोपाधि इति - क मातृकायाम् ।
4. एवकार: । अविप्रतिपत्त्यर्थ इति ।
5. एवं --- लोकाभावादौ ।
6. व्यवच्छेद्यप्रसि ---
7. नास्ति ।
8. महर्षिणालोकेन --- रिति सिद्धम्
9. न चैव द्रव्याणीति
10. नन्यदमसिद्धम् - क मातृकायाम् ।

[1]ननु तमोऽलीकमेवेति कुतस्तस्य द्रव्यानन्तर्भाव [2]इति चेन्न। तमोऽहं साक्षात्करोमीत्यनुभवबलेनालीकत्वाभावात्। [3]द्रव्यानन्तर्भावश्च तस्यानन्तर्भावात्, द्रव्यत्वव्यवस्थापकगुणाद्याश्रयत्वाच्च। तत्रेतरानन्तर्भावस्तावत्। तमो न सामान्यं नानुगतप्रत्ययनिमित्तत्वाभावात्, तादृशप्रत्ययप्रकारकत्वाभावाद् घटवत्। न चोभयवादिसिद्धतमस्त्वस्यैकस्याभावात् कस्य पक्षतावच्छेदकत्वमिति वाच्यम्, [4]आलोकजन्यनीलविशिष्टश्चाक्षुषसाक्षात्कारविषयत्वस्योभयवादिसिद्धस्य पक्षतावच्छेदकत्वात्। न च भाट्टमते तस्य तमसेन्द्रियग्राह्यत्वान्नचाक्षुषत्वमिति वाच्यम्, चक्षुःपदस्य रुपग्राहकेन्द्रियपरत्वात्। एवं तमोऽनविशेषः। न समवायः, लौकिकप्रत्यक्षविषयत्वात्। न कर्म, संयोगाऽसमवायिकारणत्वाभावात्। [5]न च विनश्यदवस्थस्य कर्मणि व्यभिचारः इति वाच्यम्, अवयविक्रियायाः [6]सकर्तरि यावदवयवक्रियानियतत्वेन तस्य[7] कर्मान्तर्भावेन तत्र व्यभिचाराभावात्। न गुणः गुणवत्त्वेन प्रतीयमानत्वात्, द्रव्यसमवेतत्वाभावाच्च। द्रव्यसमवेतत्वाभावः कथमिति चेत्, परिशेषात्। तथाहि तमो नाऽऽकाशादिसमवेतं सावयवेन्द्रियप्रत्यक्षत्वाद् रुपादिवत्। एवञ्च न पृथिवीसमवेतं गन्धासमानाधिकरणत्वात्। स्नेहासमानाधिकरणत्वोपसर्गासमानाधिकरणत्वाभ्यां जलतेज समवेतत्वाभावः साधनीयः।

नन्वनुद्भूतस्पर्शगन्धादीनां पृथिव्यादीनामेवायं गुणः, तेनोक्ताः हेतवो सिद्धा इति चेत्। न। तमसो गुणत्वे [8]रसादिष्वन्तर्भावादतिरिक्तकल्पने गौरवान्नीलत्वेन प्रतीयमानत्वाच्च। तमो नीलरुपमेव वाच्यम्, तेनोद्भूतस्पर्शवत्त्वनियमेन तादृशगुणवत्याः पृथिव्याः स्वरुपालभ्यप्रसङ्गः। तथा चोद्भूतं नीलरुपात्मकं तमो न पृथिवीवृत्ति उदभूतस्पर्शवदवृत्तित्वात् शब्द[9]वदित्यतः पृथिवीसमवेतत्वाभावसिद्धिः, नीलत्वादेव जलतेजः समवेतत्वाभावः। न च तमो न नीलरुपम्,

1. न तु
2. इति -- बलेन
3. द्रव्यान्तर्भावश्च
4. आलोक --- त्वस्य उभयावाति
5. न च --- वाच्यम्
6. सकर्त्तरि - नास्ति
7. कर्मान्ताभावे
8. अन्तर्भावाभाव --- त्वात्।
9. शब्दवदित्यतः --- सिद्धः

किं वा आश्रयोपाधिकतया तथावभासः । कालिन्दीजल रुपस्यैवेतिं वाच्यम् । आश्रयस्यानुपलब्धेः, स्फटिकादावाश्रयेऽपि नीलरुपच्छायोपलब्धेश्च, तेजोऽभावदशायामपि प्रतीयमानत्वेन [1]तेज:समवेतत्वासम्भवाच्च । अत एवानुभूतरुपस्य तेजस्तमोगुणान्तरमिति प्रत्युक्तम्, तेजसो रुपस्पर्शभिन्नविशेषगुणानाश्रयत्वात् । नापि तम इन्द्रनीलादिप्रभातुल्यातेजोऽन्तररुपम्[2] । आश्रयविशेषाभावान्नीलत्वानुपपत्तेरिति । नापि वायुसमवेतं चाक्षुषत्वात् । तस्मादखिलद्रव्यासमवायान्न गुणत्वम् । द्रव्यत्वेऽपि न[3] वाय्वाद्यन्यतरत्वं रुपवत्त्वात् नीलरुपवत्वाच्च न जलत्वं तेजस्त्वं वा । न च नीलवत्त्वात्पृथिवी एवास्तु तम वाच्यम् गन्धाभावात् । अनुदभूत: स: तेजोऽस्तीति चेत् अनुद्भूते मानाभावात् । किञ्च उद्भूतरुपं [4]पृथिव्यामुद्भूतस्पर्शवत्त्वनियमात् तमसोऽपि त्वचाग्रहणप्रसङ्ग । न [5]चोद्भूतरुपेषु तमो उद्भूतस्पर्शाभावान्नायं नियम इति वाच्यम्, तस्योद्भूतस्पर्शवत्त्वाच्च चक्षुर्गोलकावच्छिन्नत्वं चातद्ग्रहणाच्च । तस्मान्न प्रसिद्धद्रव्येष्वन्तर्भाव: ।

नन्वेवं षट्पदार्थवैधर्म्यादभाव एव तमोऽस्त्विति चेत् । न । नवीने नासहत्वात् । तथाहि घटाद्यभावस्य न तथात्वमतिप्रसङ्गाच्च । न चालोकवदपि [6]मध्यागारं प्रविशत: प्रौढापनीततन्वीकृतनयनस्य पुंस: आलोकवत्यपि [7]गृहेऽऽलोकग्रहादशायामप्यन्धकारवद् गृहमध्यमिति प्रथमग्रहात् । प्रथमगृहीतस्य [8]त्यागायोगादालोकज्ञानाभाव एव तम इति वाच्यम्, तम: चाक्षुषत्वेन तद्ग्रहे चक्षुषरन्वयव्यतिरेकानुपपत्ते:, निमीलितनयनस्य तमोग्रहापत्तेश्च । नापि आलोकभाव:, तत्र [9]चान्योन्याभावप्रागभावानामतिप्रसङ्गकत्वात्तदत्यन्ताभाव एव तथा । तत्र चोत्कर्षापकषोत्पत्तिविनाशाभावाद् [10]गाढं विरक्तमुत्पन्नं विनष्टं तम, इत्यादिप्रत्ययानुपपत्तिरितिप्रसङ्गात् ।

---

1. तेज: सम --- अतएव ।
2. प्रभातुल्यतेजोऽन्तररूपम् ।
3. न वा --- त्वं रूपरत्वात्
4. पृथिव्या: भूतस्पर्शवत्व
5. उद्भूते धूमे न भूतस्पर्शाभाव:
6. मध्यागारं प्रविशत: प्रौढतमेनातपमन्वीकृत्य - गृहे
7. अन्धकार गृहमध्यमिति प्रथमग्रहा - क मातृकायाम् ।
8. त्यागादायोगादलोक --- क मातृकायाम् ।
9. प्रागभावा --- तथा ।
10. गाढं विरलमुत्पन्नं

न च तेजोऽन्तरासम्बलनतत्सम्बलनाभ्यामपकर्षोत्कर्षप्रत्यययावभिव्यक्त्यनभिव्यक्ताभ्यां चोत्पत्तिविनाशप्रत्ययाविति वाच्यम्, यथाश्रुतेनैवोपपत्तौ तादृशकल्पनायां [1]मानाभावात् । तमोऽभिव्यक्तमुत्पन्नमित्यादिप्रत्ययप्रसङ्गात् । न च तेजोऽन्तराऽसम्बलिततेजोध्वंस एव तम इति वाच्यम्, तेनालोकदशायां [2]कालान्तरीयतेजोध्वंससत्त्वेऽपि नातिप्रसङ्ग: । प्रथमतेज:पदञ्च [3]परप्रकाशकत्वेन विशेषणीयम् । तेन चक्षुरादिसमवधानेऽपि [4]नान्धकारसत्त्वानुपपत्ते: । एवञ्च तम उत्पन्नमित्यादिप्रत्यय: साधुसङ्गच्छत इति वाच्यम् । यत्र महामहीधरविवरेषु [5]सर्वथारवि रश्मिसञ्चाराभावस्तत्रान्धकारसत्त्वप्रसङ्गात्, तथापि च तमोऽनष्टमित्यानुपपत्तिप्रसङ्गात् । [6]अत एव परप्रकाशवत्तेज:संसर्गाभाव इति प्रत्युक्तम्, संज्ञायामव्याप्ते: । किञ्च समवायसम्बन्धावच्छिन्नाप्रतियोगिताकस्य तादृशसंयोगसम्बन्धावच्छिन्नस्य [7]प्रेतियोगिताकाय वेति तादृशसंसर्गाभावस्य वा तमस्त्वं वाढमस्ति । [8]नाद्य: । आलोकदशायामपि गृहेऽन्धकारसत्त्वप्रसङ्गात् । नान्त्य: । तदानीं [9]रुपादेस्तत्सत्त्वसंयोगसम्बन्धाप्रसङ्गात् । न च [10]द्रव्यनिरुपितविशेषणतावच्छिन्नप्रतियोगिताक: सस्तथेति वाच्यम् [11]अन्धकारदशायामपि रुपादौ तदभावप्रसङ्गात् ।

[12]किञ्च निषेधविषयका । एतादृशसृष्टिकल्पनापेक्षया तद्द्रव्यत्वकल्पनयैव लघुत्वात् । किञ्च प्रलयेऽपि अन्धकारसत्त्वान्न चेष्टापत्ति:[13] "नासीत्तम" इति श्रुतिविरोधात् । किञ्च [14]तमो नाभाव : अधिकरणाविषयकप्रत्यक्षविषयत्वात्, प्रतियोग्यविषयकप्रत्यक्षविषयत्वात् । प्रतियोगिग्राहकविषयकसामग्री विनापि

1. माना --- त्यादि
2. कालान्तरीय तेजोध्वंससत्त्वेऽपि नाति प्रसङ्ग: । नास्ति - क मातृकायाम्
3. परप्रकाशनत्वेन - क मातृकायाम्
4. नार्थाकारसत्त्वानुपपत्ति: - क मातृकायाम् ।
5. सर्वधारविरश्मिस चाराभावस्टवान्धकारासत्त्वप्रसङ्गात् - क मातृकायाम् ।
6. अत्रैव - क मातृकायाम् ।
7. प्रतियोगि --- आलोकदशायाम्
8. नास्ति ।
9 रूपादौ
10. वच्छिन्नप्रतियोगिताक: - क मातृकायाम् ।
11. अर्थकारदशायानपि - क मातृकायाम् ।
12. कि च । एतादृशसृष्टि --- नायालथुत्वात् - क मातृकायाम् ।
13. न आपत्ति: - क मातृकायाम्
14. वामाऽभाव । अधिकरणविषयक - क मातृकायाम् ।

प्रत्यक्षविषयत्वात्, निषेधाऽविषयकप्रती[1]तिविषयत्वाच्च। न च तमस: पदार्थत्वं वाच्यम्, आलोकाभावसमनियततत्त्वात्, लाघवाच्च। स एव तम इति वाच्यम्, उक्तबाधकानामुद्धरणात्, समनियतानामैक्याङ्गीकारेऽतिप्रसङ्गाच्च। [2]तस्माद-नन्तर्भावाद्'' द्रव्यमेव तम: नीलगुणवत्त्वात्, तत्क्रियावत्त्वाच्च, विभागव-त्त्वाच्च द्रव्यत्वेऽपि [3]प्रसिद्धद्रव्येष्वन्तर्भावाभावाद् दशमद्रव्यम्। [4]तदुक्तम्। तम: खलु चलं नीलं परस्परविभागवत् प्रसिद्धद्रव्यवैधर्म्यात् नवभ्यो भेत्तुर्महति।

ननु सुवर्णभिन्नतेजोभिन्नद्रव्य[5]विषयकलौकिकचाक्षुषत्वावच्छिन्नं प्रति महदुद्भूतरुपवदालोकत्वेन कारणत्वं तेनैव तादृशद्रव्यचाक्षुषमिति वाच्यम्, अत्र [6]तेजोभिन्नेतिकारणात् तेजोऽवयविनस्तेजोऽन्तरं विनापि ग्रहे न क्षति:। न च तेजोऽवयवा एव तेजोऽवयविग्रहे हेतुरिति वाच्यम्, संयोगसम्बन्धेनैवालोकस्य विषयप्रत्यक्षहेतुत्वेन तेजोऽवयवानां तेजोऽवयविन्यसम्भावात्। सुवर्णस्य तेजस्त्वपि तेजोऽन्तरं विना न तस्य प्रत्यक्षत्वमिति सुवर्णभिन्नेति। आलोकं विना आलोकभावस्य चाक्षुषत्वमिति द्रव्येति। मानसादौ तस्य हेतुत्वाभावाच्चाक्षुषेति। न चोपनीतभानादेरालोकं विनापि सम्भवात्, तत्र व्यभिचार इति वाच्यम् , [7]न लौकिकत्वेन चाक्षुषत्वस्य विशेषणीयत्वात्। न चाञ्जनवशादालोकं विना चाक्षुषज्ञानदर्शनात्तत्र व्यभिचार इति वाच्यम्। न [8]चाञ्जनाद्यजनन्यत्वेनापि तस्य विशेषणीयत्वात्। एवञ्चमानुषत्वेनापि तस्य विशेषणीयत्वात्। अन्यथा ओलोकं विनापि जायमानेऽपि पेचकादिचाक्षुषे व्यभिचारात्। वस्तुतस्तु [9]अञ्जनादिना तेजोऽन्तरमेवोत्पाद्यते। तत्र चक्षुरवयव एवोपादानमनुद्भूतरुपस्यापि [10]तेजस उद्भूतरुपतेजसो जननदर्शनात्। तत्तेज उदभूतं पेचकादीनां दण्डायमाने चक्षुषि

1. प्रतीति --- काभावसमनियतत्वात्
2. तस्मादन्तर्भावाद् द्रव्यमेव तम इति।
3. अनन्तर्भावात् दशमं द्रव्यम् - क मातृकायाम्।
4. तदुक्तम् - विभागवत्प्रसिद्दद्रव्यवैधर्म्यात् नवभ्योऽन्तेदमर्हतीति।
5. विषयकलौकिकचाक्षुषत्व
6. करणात् --- न चोपानीतभानादे:।
7. लौकित्वेन चक्षुषत्वस्य विशेषणीयत्वात्। न चा जनवशादालोकं विना चाक्षुषज्ञानदर्शनात् तत्र व्यभिचार इति वाच्यम्। नास्ति - क मातृकायाम्
8. अ जनाद्यनन्यत्वेनापि
9. उत्पद्यते - क मातृकायाम्।
10. तेजस - नास्ति ख - मातृकायाम्।

[1]तादृशतेजोत्तरमेवोत्पाद्यत इति न तत्र व्यभिचारः । [2]कारणतावच्छेदककोटौ महदित्याद्युपादानात् तेजः परमाणावुद्भूततया उपादानाच्चाक्षुषसत्त्वेऽपि न चाक्षुषत्वमिति । [3]अनभिभूतेत्युपादानात् सुवर्णस्य सत्त्वेऽपि न तादृशचाक्षुषमिति अयञ्चालोकस्तत्तदवयवावच्छेदेन तत्तदविषयसंयुक्तस्तत्तत्संयुक्ततत्तच्चाक्षुषे हेतुस्तेन दशाद्यावच्छेदेन तेजः संयोगसत्त्वेऽप्य[4]न्धकारस्थपटादेः न चाक्षुषत्वमिति । न च चक्षुःसंयुक्ते [5]घटादौ मूर्त्तयोः समानदेशताविरोध इत्यन्वयादालोकसंयोगसम्बन्धेनाभावात्कथं तथात्वमिति वाच्यम्, तत्र व्याप्तौ देशपदस्य समवायिकारणत्वपरत्वात्, अन्यघटकपालयोः एकभूतलावस्थितत्वेन व्याप्तिप्रसङ्गापत्तेश्च । अत्रैव जलस्थितवराटकादौ बहूनां मूर्त्तानां जलालोकचक्षुषां समानदेशत्वेऽपि न क्षतिरिति द्रष्टव्यम् ।

एवञ्च [6]महारजनिसंयुक्ते पटे महारजनस्य विरलावयवत्वात् तदवयवावच्छेदेन महारजनालोकयोरुभयोरपि समावेशान्न कापि क्षतिः । एवञ्च तमसोऽपि द्रव्यत्वे तच्चाक्षुषेऽऽलोकं विना तन्न स्यात् । तथाच तमस आलोकाजन्यचाक्षुषसाक्षात्कारविषयत्वान्न द्रव्यत्वमालोकाभावादिति । एवञ्च रूपत्वाभावोऽप्यनेनैव साधनीय इति द्रव्यत्वाभावे सिद्धे परिशेषादालोकविशेषाभावरुपत्वमिति चेत् । न । अन्धकारस्य [7]स्वेतरद्रव्यचाक्षुषत्वावच्छिन्नं प्रति प्रतिबन्धकत्वेन तद्दशायां तदनुपपत्तेरालोकस्य तादृशचाक्षुषहेतुतायां मानाभावात् । तथा [8]चान्धकाराभाव एव प्रतिबन्धकाभावतयाऽन्धकारद्रव्येतरद्रव्यचाक्षुषे हेतुः । [9]आलोकश्चान्धकारनिवृत्तावालोकबहुत्वाल्पत्वाभ्यामन्धकारनिवृत्तेरपि बहुप्रतियोगित्वाल्पप्रतियोगि त्वादर्शनात् [10]एवञ्चालोकजन्यचाक्षुषत्वादेर्घटादावेव व्यभिचारः ।

---

1. अदृश्यं
2. अकारणतावच्छे
3. अनभिभूतेप्युपादानात्सुवर्णस्य सत्त्वेऽपि न तादृश चाक्षुषमिति । नास्ति - क मातृकायाम् ।
4. अन्धकारस्थपटादेः
5. पटादौ ।
6. महाराजनसंयुक्ते - क मातृकायाम्
7. चाक्षुषत्वा --- तदनुत्पत्तेः
8. अन्धकाराभावः
9. अन्धकारानिवृत्तौ
10. एवं ---कि च

किञ्च भट्टमते-तमोऽस्तीति [1]तमसेन्द्रियग्राह्यत्वादसिद्धिश्च । न च [2]तादृशमिन्द्रियाणां नास्तीति वाच्यम्, तमः प्रत्यक्ष[3]सकरणकं प्रत्यक्षत्वाद् घटप्रत्यक्षवदिति सामान्यतो दृष्टस्यैवेतरबाधसहकारेण तात्पर्य्यावसायित्वात् । अधिष्टानन्तु तस्य चक्षुरेकदेश इति न किञ्चिदनुपपन्नम् । न च प्रोढालोके तद्विनाशे कथं पुनरुद्भव इति वाच्यम्, [4]अनुद्भूतरुपस्तमस्तेजोविराधित्वाभावेन तेन तद्विनाशात् । वस्तुतस्तु चक्षुःसंयोग एव चाक्षुषत्वावच्छिन्नकार्यतानिरुपित-कारणतावच्छेदकत्वेन वैजात्यं कल्पनीयम् ।

तथा च चक्षुःप्रति[5]योगिकविलक्षणचक्षुसंयोगः कदाचिदत्कस्यचिद-स्तीति तदा [6]तच्चाक्षुषम्, तदभावान्न चाक्षुषमिति किमालोके चाक्षुष-हेतुत्वकल्पनया इति भवदुक्तहेतुरसिद्ध एवेत्यतिरिक्तद्रव्यं तम इति नवैवेति नियमोऽसिद्ध इति चेत् । न । तमो न द्रव्यमालोकाभावग्रहनियतग्रहविषयत्वात् [7]आलोकाभावत्वात्प्रत्यक्षत्वे सति [8]बुद्धित्वाद्यावान्तरसंख्यासमवायित्वाभावाद् वा । स च द्वैतमसी पञ्चतमांसीत्यादिप्रत्ययाभावात् सिद्धः । प्रत्यक्षत्वे सतीतिविशेषणान्नाकाशादौ व्यभिचारः, समवायिकारणत्वाभावाच्च ।

न च तमो [9]नीलगुणादिसमवायिकारणमेवेति वाच्यम्, उद्भूतनीलरुपस्योद्भूतस्पर्शसामानाधिकरण्यनियतत्वेन [10]तत्समवायित्वाभावेन तत्समवायित्वाभावात् । कथं तर्हि नीलं तम इति प्रतीतिः इति चेत् नीलमाकाशमितिवदारोपात् । न च विशेषणस्य नीलस्यारोप्यस्योप-स्थापकाऽभावात्कथं तदारोप इति वाच्यम्, स्मृत्यारोपस्थितेः । अतः एवारोपविषयस्यालोकाभावस्य [11]गृहेऽऽलोकस्याहेतुत्वात् तदितरचक्षुः-संयोगादितत्प्रत्यक्षसामग्रीसत्वे विशेषणनीलस्मृतौ च नीलं तम इति नीलविशिष्टपटचाक्षुषसाक्षात्कारः । तमसि नीलमिति [12]चाक्षुषारापोऽसिद्धः, विशेष्यस्य नीलस्य चाक्षुषसामग्र्यभावात् ।

---

1. महेन्द्रियग्राह्यत्वात् - क मातृकायाम् ।
2. तादृशेन्द्रियं - क मातृकायाम् ।
3. सकारणकं - क मातृकायाम् ।
4. अभावे न ।
5. चक्षुः ।
6. तदा --- किमालोके ।
7. अलोकाभाववत्वात् प्रत्यक्षत्वे सति - क मातृकायाम् ।
8. द्विराद्यवान्तर ---
9. कारणतामेवेति वाच्यम् - क मातृकायाम् ।
10. तत्समवायित्वाभावे - क मातृकायाम्
11. असदंग्रहे
12. चाक्षुष---नीलस्य

[1]किञ्च नीलरुपसामानाधिकरण्यद्रव्यविभाजकोपाधेः रुपान्तरसामानाधिकरण्यनियमेन तमस्त्वस्य द्रव्यविभाजकोपाधित्वे तस्य रुपान्तरसामानाधिकरण्यप्रसज्याच्च । न च रुपसमवायिकारणत्वाभावेऽपि तमश्चलतीति प्रत्ययक्रियासमवायिकारणं तम इति वाच्यम्, [2]अन्धतमसि तथाप्रत्यक्षाभावात्, छायायामस्तीति चेत्तत्रापि [3]गत्यारोपेण तदुपपत्तेः । [4]गत्यारोपश्चावरकद्रव्ये गच्छति तादृशतेजोऽभावस्यान्यदेशतानिबन्धनः । आवरकत्वं तेजःसंयोगप्रतिबन्धक द्रव्यत्वम् । न च [5]नारोपेणोपपत्तौ कथमारोप इति वाच्यम्, प्रत्ययक्रियायाः उद्भूतस्पर्शव्याप्यत्वेन तदभावे तत्सद्भावस्य वक्तुमशक्यत्वात्, न चायं नियमोऽप्रयोजक इति वाच्यम्, बाधकाभावात् । तथाच छाया यदि प्रत्यक्षत्वे सति गतिमती स्यात्, उद्भूतस्पर्शवती स्यादिति विपर्य्ययपर्यवसायिना तर्केण गत्यभावसिद्धौ [6]तस्या आरोप सिद्ध एव । अत्र तर्के दलद्वयात्मकेऽऽद्यप्रत्यक्षत्वे सति गतिमत्त्वमापादकं तच्च व्याप्यम् । [7]अन्तिममुद्भूतस्पर्शवत्त्वमापाद्य तच्च व्यापकम् । तत्र व्यापकाभावाद् व्याप्याभावसिद्धिरिति ।

तदुक्तमस्मत्पितृचरणैः-

"आद्यमापादकं व्याप्यम्, साध्यमापाद्यमन्तिमम् ।

तत्र चापादक भावः, आपाद्याभावसाधनम्" इति

किञ्च तमसो द्रव्यत्वाङ्गीकारे किं तदसमवेतमुत समवेतद्रव्यमिति । नाद्यः, आकाशादिवदचाक्षुषापत्तेः । नान्त्यः, समवेतद्रव्यत्वावच्छिन्नं प्रति [8]उद्भूतस्पर्शवत्त्वेन कारणत्वात्, तमोऽवयवानाञ्च तदभावात्तदनुत्पादकत्वप्रसङ्गात् । न च तमोऽवयवाः स्पर्शवन्ति एवेति वाच्यम्, तदारब्धे तमोऽवयविन्यपि तत्प्रसङ्गात्, कारणगुणानां कार्यगुणारम्भकत्वात् । न च स्पर्शवत्त्वेन द्रव्यारम्भकत्वेऽन्त्यावयविनोऽपि द्रव्यारम्भकत्वापत्तिरिति वाच्यम्, तत्र

---

1. समानाधिकरण ।
2. अंधस्ततमसि तथा प्रत्याभावात् - क मातृकायाम्
3. तदारोपेण - क मातृकायाम्
4. तदायारोपः - क मातृकायाम् ।
5. उपपत्तेः- क मातृकायाम्
6. तस्योरोप
7. उद्भूत --- व्यापकाभाव
8. स्पर्शव --- ना च

स्वरुपयोग्यतासत्त्वेऽपि [1]कारणान्तरविरहेण कार्यानुदयात्, । [2]न गतिप्रसक्तत्वाच्च तादृशस्पर्शवत्त्वं [3]न कारणातावच्छेदकमिति वाच्यम् । तद्भिन्नत्वेन विशेषणात् । [4]संस्पर्शवत्त्वं न कारणतावच्छेदकं विशेषणात् । स्पर्शे वा तादृशजातिविशेष: कल्पनीय:, स अन्त्यावयविनि नास्तीति न तस्यारम्भकत्वमिति । एतेन तम: परमाणु: कार्यद्रव्यारम्भक: रुपवत्परमाणुत्वात्पृथिवीपरमाणुवदित्यनु [5]मानात्तम:परमाणो: द्रव्यारम्भकसिद्धि: इति परास्तम् ।

ननु स्पर्शवत्त्वेन तथा कारणत्वे मानाभावात् । अनन्तानां स्पर्शानां तथात्वकल्पने [6]गौरवाद् अन्त्यावयविनि व्यभिचाराच्च । न च स्पर्शवत्त्वेन कारणत्वाभावे मनसोऽप्यारम्भकत्वापत्तिरिति वाच्यम्, आरम्भकत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन मनस: [7]प्रतिबन्धककल्पनया तस्यारम्भकत्वानुपपत्ते: । न चैवात्मादिष्वपि एव [8]नानाप्रतिबन्धककल्पनापेक्षया स्पर्शवत्त्वेन कारणत्वमेव लघु इति वाच्यम्, स्पर्शत्वस्याप्येकस्याभावात् । न च स्पर्शवत्त्वेन तेषामनुगम इति वाच्यम्, [9]स्पर्शत्वस्यातिप्रसक्तित्वेनाग्रगमकत्वाभावात् । वस्तुतस्तु मूर्त्तत्वमेव द्रव्यारम्भकत्वावच्छेदकम्, [10]मूर्त्तत्वस्य क्रियासमवायिकारणत्वेन सिद्धसामान्याभावस्य कारणतावच्छेदकताकल्पने लाघवात् । न च भूतत्वेन साङ्कर्य्यापत्तिस्तस्य जातित्वे बाधका इति वाच्यम्, कारणतावच्छेदकत्वेन सिद्धजातौ साङ्कर्य्यस्यादोषत्वात् । अन्यथा [11]शरीरत्वादिना साङ्कर्य्येण पृथिवी - त्वादेरप्यतथात्वप्रसङ्गात् । न चैवं मनसोऽपि तथात्वापत्तिरिति वाच्यम्, प्रसिद्धपरमाण्वतिरिक्तमन:सद्भावे प्रमाणाभावात् ।

अस्तु वा एकत्वनिष्टो जातिविशेषो द्रव्यारम्भकतावच्छेदक: । तच्च फलवल्कलमिति । द्रव्यानारम्भकेषु आत्माद्यन्तावयविषु तादृशमेकत्वं नास्तीति

---

1. का --- नुदयात् ।
2. न चातिप्रसक्तत्वात् - क मातृकायाम्
3. स्पर्शवत्त्वं न - क मातृकायाम्
4. संस्पर्शक्त्वं --- विशेषणात् - नास्ति
5. अनुमानात् --- परास्तम्
6. गौणत्व च,
7. प्रतिबन्धक ---त्ते: ।
8. प्रतिबन्धकापेक्षया - क मातृकायाम्
9. अनुपमकत्वाभावात्
10. मूर्त्तित्वस्य --- सामान्यभावस्य
11. शरीरवादिना - क मातृकायाम्

न तेषामारम्भकता। [1]तमसस्तु [2]तादृशैकत्वात्स्पर्शान्तो वेत्यारम्भकत्वमिति चेत्। न। तमस आरब्धत्वे तमोऽवयवानां कपालवत्पृथग्ग्रहणापत्तेः।

यानि इहारब्धद्रव्याणि, तेषामवयवाः पृथगुपलभ्यन्ते, यथा -घटादौ कपालादयः। न तथा तमोऽवयवा उपलभ्यन्ते इति तमो नारब्धम्। तथाहि तमो नारब्धमनुपलभ्यमानसाक्षादारम्भकावयवत्वादाकाशादिवत्। किञ्च यानि समवेतद्रव्याणि [3]प्रायशस्तेषामसमवायिकारणनाशादेव यत्रारम्भकसंयोगनाशात्तमोऽवयविनाशस्तत्र पृथक्तमोऽवयवग्रहापत्तिः। घटनाशानन्तरं कपालग्रहवदिति सिद्धं तमोऽनारब्धमिति। तस्माद्गुणवत्त्वादीनामसिद्धेः द्रव्यत्वाभावात् पदार्थान्तरानन्तर्भावाच्च परिशेषादालोकविशेषाभाव एव तमः।

स च त्रिविधः- [4]अर्द्धतमस-अवतमस-तामसच्छायाभेदात् त्रयाणां सामान्यलक्षणम्। परप्रकाशकयावत्तेजःसंसर्गाभावत्वमर्थतामसत्वम्। घटग्राहकतेजःसहकृतघटरुपग्राहकयावतेजःसंसर्गाभावो अवतमसः। [5]आलोकाजन्यनील[6]विशिष्टरुपवदिन्द्रियजन्यसाक्षात्कारविषयत्वं तामसच्छायायाः। अत्र प्रथमविशेषणेन नार्द्धतमसेऽतिव्याप्तिः। तावन्मात्रोपादाने च विरोध इति [7]विशिष्टमुपात्तम्। घटग्राहकयावत्तेजःसंसर्गाभाव इत्युक्ते तथैवान्धतमसेऽतिव्याप्तिरिति समस्तमुपात्तम्। घटरुपग्राहकतेजः[8]सम्बलितशुक्लत्वव्याप्यजातिग्राहकयावत्तेजःसंसर्गाभावः छाया। देशविशेषावच्छिन्नत्वेनैव प्रतीयमानस्तेजोऽभावो वा। अत्र च संसर्गाभावानामननुगतत्वेऽपि [9]संसर्गारोपजन्याप्रतीतिविषयत्वेनैकेनोपाधिना ध्वंसादीनामनुगमः। सर्वत्र लक्षणे विशिष्टव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावमादायातिप्रसङ्गवारणार्थं तदन्यत्वेन प्रतियोगित्वाधिकरणत्वेन वाऽभावो विशेषणीयः।

---

1. तमस्तु - क मातृकायाम्
2. स्पर्शाभावेऽप्यारम्भकत्वमिति - म मातृकायाम्
3. प्रायश --- नाशात्
4. अर्द्धतमसावतमसच्छायां --- याणां सामान्य
5. अस्मात्स्थानात् आरब्धम्।
6. इन्द्रिय साक्षात्कार - क मातृकायाम्
7. विशिष्ट --- ग्राहकया
8. संवर्जित
9. संसर्गा --- विषयात्वेन

द्रव्यनिरुपितदैशिकविशेषणतावच्छिनावृत्तिताकसंयोगस[1]म्बन्धाव-च्छिन्नप्रतियोगिताकतादृशाभावस्यैव तथात्वमिति न [2]पूर्वपक्षोक्तदूषणावकाशः। न चैवं प्रलयेऽतिव्याप्तिस्तद्वृत्तिताया द्रव्यनिरुपिततद्विशेषणतावच्छिन्न-त्वभावात् व्यवहारकालीनत्वे नैतद[3]भावस्य विशेषणात्, श्रुतेरन्यत्र तात्पर्येण तत्र तत्सद्भावेऽपि [4]क्षत्यभावाच्च। न च तस्याऽभावत्वे तस्य [5]प्रतियोग्यधिकरणो-भयनिरूप्यत्वेन् प्रतियोगिस्मरणमधिकरणज्ञानञ्च विना कथं प्रत्यक्षत्वमिति वाच्यम्, असिद्धेः। प्रतियोगिज्ञानं विना तमोग्रहाभावात् रात्रावन्धकारप्रत्ययो हि न रात्रिप्रतिसन्धानं विना रात्रिप्रतिसन्धानञ्च न तेजोग्रहो विनेति, [6]रात्रेर्देशविशेषाव-च्छिन्नोत्पत्तिककमलप्रतिबन्धकवत्तेजोसहकृततादृशतेजोविशेषाभाववत् [7]प्रलयकालोपोधिरुपत्वात्। दिवसे छायादिग्रहणे तेजोग्रहणं स्पष्टमेव। यद्वा आलोकं विना कथं तेजोऽभावस्य च चाक्षुषत्वमिति चेत्। न। [8]योग्यानुप-लब्धिश्च प्रतियोगिसत्वापादानापादितप्रतियोगिकोपलब्धिभावरूपत्वेनालोक-भावोऽपि तस्यानापायात्।

यद्वा-यदालोकः स्यात्, तदोपलभ्येतेत्यापादानस्य तदानीमपि वक्तुमशक्यत्वात्। तेजोग्रहे तेजोत्तरग्रहस्याहेतुत्वमपि इत्युक्तमेवाधस्तात्। इह [9]अङ्गणेऽन्धकार इति प्रत्ययादधिकरणाग्रहोऽप्यसिद्धः। [10]न चाङ्गणादिग्राहक-कालीकाभावात् कथं तद्भानमिति स्मरणादुपनीतभानसम्भवात्, तमोऽस्तीत्यादौ तमसस्तु अस्यालोकाभावघटितत्वेन निषेधाऽविषयकप्रतीतिविषयत्वमसिद्धम्। एतेनारोपितं नीलरूपमेव तमसि मतमपास्तम्।

---

1. सम्बन्धा --- भावस्यैव
2. पूर्वपक्षो न च दूषणावकाशः।
3. एतद्भावस्य - क मातृकायाम्।
4. क्षत्यभावाच्च।
5. प्रतियोगि --- न प्रतियोगि
6. रात्रेर्देशविशेषावच्छिन्नोत्पत्तिककमलप्रति --- षक्तेजोऽसहकृत --- योज्यम्। नास्ति - क मातृकायाम्।
7. प्रलयकालत्वरूपत्वात् - क मातृकायाम्
8. योग्यानुपलब्धेरभावग्राहकत्वेन च तादृशलोकस्य प्रवेशात् - योज्यम्।
9. इहाङ्गणे
10. न च --- कथम्

आलोकं विना रूपारोपसम्भवात्, नीलं तम इति [1]सहप्रयोगानुपपत्तेश्च। किं यत्र क्वचिदारोपितं नीलरूपं वा [2]तथालोकाभावो वा। नाद्यः नीलरक्तवस्त्रादावप्यन्धकारप्रसङ्गात्। नान्त्यः। आलोकाभावस्यावश्यकत्वेन लाघवात्। तस्यैव तथात्वमिति। तस्मादन्यत्रान्तर्भावादालोकाभाव एव तम इति। तथाच सूत्रम् - ''द्रव्यगुणकर्मनिष्पत्तिवैधर्म्यादभावस्तम'' (वै.सू.5-2-19) इति। तेन सिद्धं न चैव द्रव्याणीति संक्षेपः।

गुणप्रकरणम्

द्रव्यपदार्थे उद्दिष्टे तदुपजीविततया गुणपदार्थमुपदिशति-

(मू)गुणाः च रुपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोग-विभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्चेति कण्ठोक्ताः- सप्तदश। चशब्दसमुच्चिताश्च गुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दाः सप्तैवेत्येवं चतुर्विंश तिर्गुणाः॥

यद्यपि गुणत्वावच्छेदेन द्रव्योपजीवित्वं गुणत्वस्य नित्येश्वरज्ञानादिवृत्तित्वाद् गुणत्वसामानाधिकरण्येन च तदुपजीवित्वं नानन्तरोद्देशप्रयोजकं [3]द्रव्यत्वसामानाधिकरणेनापि संयोगाद् दृष्टेश्वरज्ञानादिगुणोपजीवितत्वस्य सत्त्वाच्च, तथापि द्रव्यत्वावच्छेदेन सर्वेषां द्रव्याणां गुणजनकत्वं गुणत्वावच्छेदेन तु न [4]द्रव्यजनकत्वमित्यनेनैव पुरस्कारेण द्रव्योद्देशानन्तरं गुणोद्देश इति द्रष्टव्यम्।

[5]यत्तु द्रव्यनिरूपणानन्तरं द्रव्यगुणकर्मसामान्यविशेषेत्यादौ विभागभाष्ये गुणोद्देशस्तत्क्रमेणैव द्रव्योद्देशानन्तरं गुणोद्देश इति, तन्न। तत्राप्येतादृशसङ्गतेरेव वक्ष्यमाणत्वात्। यद्वा द्रव्याणां स्वातन्त्र्येण प्रधानत्वात् [6]प्रथमतस्तत्रैव शिष्यजिज्ञासेति तन्निवृत्तावप्रधानेषु गुणेषु वक्तव्यत्वं [7]भवत्यवसरस्य वा सङ्गतित्वम्।

1. सहप्रयोग --- रापितं
2. तथालोकाभावे वा
3. द्रव्य --- संयोगाद्
4. द्रव्यजनत्व ---
5. यत्तु --- तन्न।
6. प्रथमथस्तत्रैव - क मातृकायाम्।
7. भवत्यावसरस्य

[1]अत्र गुणत्वसाक्षाद्व्याप्यजातिपुरस्कारेण विभागः । साक्षाद्व्याप्यत्वं तद्व्याप्यजात्यव्याप्यत्वे सति तद्व्याप्यत्वम् । शुक्लत्वादिवारणाय सत्यन्तम् । रूपत्वादेरपि[2]रुपरसान्येतरत्वव्याप्यत्वाज्जातिरिति । विशेष्यञ्च सत्तादावति-व्याप्तिवारणाय । एवञ्च शुक्लत्वाद्यवान्तरधर्मपुरस्कारेण गुणानां बहुत्वेऽपि न क्षतिरिति द्रष्टव्यम् ।

कण्ठोक्ता इति । महर्षिणैव रुपरसगन्धस्पर्शाः संख्या परिमाणानि पृथक्त्वं संयोगविभागौ बुद्धयः सुखदुःखेच्छाद्वेषप्रयत्नाश्च गुणादिति तत्तद्वाचक-शब्देनैवोक्ता इत्यर्थः ।

चशब्देति । चशब्दः प्रयत्नाश्चेति । सूत्रावयवस्थ इत्यर्थः । तस्यानुक्तसमुच्चयार्थत्वा[3]त्तन्त्रान्तरसिद्धगुणभावानामेषां समुच्चायकत्वमित्यर्थः ।

अदृष्टेति । [4]अत्र गुणत्वसाक्षाद्व्याप्यजात्येव अदृष्टत्वजात्यभावाददृष्टशब्देन धर्मत्वाधर्मत्वजातिमतोस्तयोरेवग्रहणम् । विहितक्रियाजन्यता - वच्छेदकत्वेन सुखत्वावच्छिन्नकार्यतानिरुपितकारणतावच्छेदकत्वेन वा निषिद्धक्रिया[5]जन्यतावच्छेदकत्वेन, दुःखत्वावच्छिन्नकार्यतानिरुपितकारणता-वच्छेदकत्वेन वा तयोरदृष्टत्वजात्यभावाददृष्टशब्देन जातित्वासिद्धेः । अदृष्टस्य चैतदुभयान्यतरत्वात्तत्र च नैकं [6]कार्यं नैकं कारणमिति न कारणतावच्छेदकत्वेन न कार्यतावच्छेदकत्वेन वा जातित्वसिद्धिः ।

ननु विहितक्रियमाणाननुगतत्वाद् विहितक्रियात्वस्य चानुगतस्यैकस्या-भावान्न तत्त्वं कारणतावच्छेदकम्, किन्तु अन्यत्र ज्योतिष्टोमत्वादिकमेव । तथा च तन्निरूपितकारणताप्रतियोगिककार्यतायामति [7]प्रसक्तत्वाद् धर्मत्वं नावच्छेदकम् । एवञ्च सुखमात्रेण धर्ममात्रस्य न हेतुत्वम् । अन्यत्र ज्योतिष्टोमधर्मा-ज्जातिकुसुमदानजन्यस्वर्गापत्तेः । तथा च विशिष्टैव कार्यकारणभावस्याति-प्रसज्यभयाय [8]वक्तव्यमिति सुखत्वस्य कार्यतावच्छेदकत्वेन मानाभावः ।

1. अत्र --- विभागः --- नास्ति ।
2. रूपरसार्थतर ---
3. तन्त्रान्तर - क मातृकायाम्
4. अत्र - जात्यैव
5. जनता
7. कार्यं --- कारणमिति
6. प्रसक्तत्वाद् - क मातृकायाम्
8. वक्तृत्व इति - क मातृकायाम्

किञ्च सुखत्वस्यैव नवीनमते ईश्वरसुखवृत्तितया अतिप्रसक्तत्वञ्च। [1]एवञ्च तत्त्वावच्छिन्नकार्यतानिरुपितकारणतावच्छेदकत्वेनैवातीतधर्मत्वेऽपि सञ्चारणायेति न तयोर्जातित्वसिद्धिरिति चेत्। न। यद्विशेषयोः कार्यकारणभावो बाधकं विना तत्तत्सामान्ययोरपीतिन्यायेन विशेषकार्यकारणभावस्यैव सामान्यकार्यकारणभावे मानत्वात्। तत्र यद्यपि विहितक्रियात्वं न जातिस्तथापि तादृशविधिजन्यप्रवृत्तौ जातिविशेषः कल्पनीयः। तत्त्वावच्छिन्नकारणतानिरुपितकार्यतावच्छेदकत्वेन च सर्वासु विहितक्रियासु एका जातिः। तत्त्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकतया च धर्मत्वसिद्धिः[2]।

एतेन सुखत्वस्य नित्येश्वरसुखत्ववृत्तित्वेनातिप्रसक्तत्वाज्जन्यसुखत्वस्य चाननुगतत्वाद् धर्मत्व[3]स्यातीन्द्रियत्वेनाननुगतप्रत्यक्षाभावाच्च न धर्मत्वजातिरिति प्रत्युक्तम्। एवञ्च निषिद्धक्रियाविषयनिवृत्तिष्वपि जातिविशेषः कल्पनीयः इति। तदवच्छिन्नप्रतिबन्धकताप्रतियोगिकप्रतिबन्धकताप्रतियोगिकप्रतिबन्धकतावच्छेदकत्वेनाधर्मत्वजातिसिद्धिः। तादृशजातौ चाहं विहितक्रयासु प्रवृत्तेः निषिद्धक्रियासु च निवृत्तेरित्यन्यप्रवृत्तिनिवृत्तिवैलक्षण्येन जायमानोऽनुभव एवमानम्। एवञ्च धर्मत्वाधर्मत्वे कार्यतावच्छेदके बाधकाभावे सत्कार्यमात्रवृत्तिधर्मत्वाद् गन्धवदित्यनुमानमुक्तविपक्षबाधकसहितमत्र प्रमाणं वेति द्रष्टव्यम्। ननु धर्मोऽधर्मवृत्तिगुणत्वव्याप्यजातिमान् निर्विकल्पकजी[4]वयोनियत्वान्यर्थस्मृत्यहेत्वतीन्द्रियात्मविशेषगुण[5]त्वाद् धर्मवदित्यनुमानादधर्मत्वस्य च तद्वृत्तित्वे बाधात् पक्षधर्मबलात् धर्माधर्मोभयवृत्तिजातिसिद्धिः तच्चादृष्टम्। तदन्यविशेषणाच्च निर्विकल्पकजीवनयोनियत्नयोः[6]स्मृतीतिविशेषणाच्च भावनायामीश्वरज्ञानादौ चातीन्द्रियेति [7]विशेषणात् न सुखादौ व्यभिचार इति चेन्न। एतदुभयवृत्तिजातेः प्रमाणान्तरासिद्धत्वेन तत्साधने बाधात्,

1. एतेन
2. तत्त्वावच्छिन्न --- कल्पनीयः --नास्ति
3. अतीन्द्रियत्वेन --- प्रत्युक्तम्।
4. जीवयोनि --- स्मृत्यहेतु
5. गुणत्वाद् --- धर्मतत्बलात्
6. स्मृतीति विशेषणानवभावनायाम्
7. विशेषणात् - नास्ति - क मातृकायाम्

[1]धर्मेत्तरात्मगुणत्वस्योपाधित्वाच्च। न च भोगत्वा[2]वच्छिन्नकार्यतानिरूपित कारणतावच्छेदकतया अदृष्टत्वजातिसिद्धिरिति वाच्यम्, भोगत्वस्य सुखदुःखा-न्यतरानुभवरूपत्वेनाननुगतत्वात्। न च समानकालीनसमानाधिकरण-साक्षात्कारविषयताव्याप्यजातिमदनुभवत्वेन तयोः [3]अननुगम इति वाच्यम्, तस्याप्युपाधिरूपत्वेनानुगमकत्वाभावात्। किञ्च तयोः सुखदुःखयोरेव तद्हेतुत्वेन भोगहेतुतायां मानाभावाच्च एतेन [4]जन्यत्वावच्छिन्नकार्यतानिरूपितकारणता-[5]वच्छेदकयोरदृष्टत्वासिद्धिरिति प्रयुक्तम्। जन्यत्वस्याननुगतत्वेन कार्यतानवच्छे-दकत्वात्, धर्माधर्मत्वयोरेव गुरुत्वसाक्षाद्व्याप्यजातिमत्त्वाभ्यामेव विभाग इति।

चतुर्विंशतिरिति। तत्रापि विभागस्य न्यूनाधिकव्यवच्छेदफलत्वाच्च-र्विंशतित्वे लब्धे पुनस्तदग्रहणं सुखप्रत्यर्थम्। कण्ठोक्तानां समुच्चितानां चैकविभाजकोपाध्यवच्छिन्नत्वप्रदर्शनार्थञ्च। ननु संख्यायार्गुणवृत्तित्वेन गुणत्वा-[6]भावात्पृथक्त्वस्यान्योन्याभावेनान्यथासिद्धेः, परत्वापरत्वयोश्च संयोगविशेष-त्वेनैवा[7]तिरिक्तत्वाभावाच्चतुर्विंशतिरिति विभागोऽनुपपन्न इति चेन्न। संख्यादीनां [8]तत्र व्युत्पादयिष्यमाणत्वात्। ननु संख्यायाः गुणत्वेन गुणवृत्तित्वाभावात्कथं चतुर्विंशतिर्गुणा [9]इति चेत्, लक्षणया प्रयोगात्। लक्षणा तादृशातिशयसंख्या-जनकोऽपेक्षाबुद्धिविषयत्वेन। एवं गुणा इत्यत्र बहुवचनमपि तादृशापेक्षाबुद्धि-विषयत्वेन लक्षणया समर्थनीयम्। न च सुब्विभक्तौ न लक्षणेति वाच्यम्, अन्यथाऽनुपपत्त्या तादृशरूपगम्यमानत्वात्। सुब्विभक्तौ न लक्षणेत्यस्य सुब्विभक्तं विभक्त्यन्तरार्थे न लक्षणेत्यपि केचित्। एतेन कण्ठोक्त्यास[10]मुच्चयेन चतुर्विंशतिसंख्याजनकापेक्षाबुद्धिविषया[11]रूपादयो गुणत्वेन व्यवहर्त्तव्या इ[12]त्यखण्डवाक्यार्थः।

---

1. धर्मोतर - क मातृकायाम्
2. अवच्छिन्न --- दृष्टत्व---
3. अनुगम
4. क्रियता
5. दकयो --- गतत्वेन।
6. भावात्पु --- परत्वापरत्वयोः
7. एवगतार्थत्वात्
8. गुणत्वस्य --- योज्यम्
9. इति --- जनको -- नास्ति।
10. समुच्चयो न
11. विषयरूपादयो - क मातृकायाम्
12. अखण्डवाक्यार्थः।

ननु [1]व्यवहार्यताव्यवच्छेदकस्यैकस्याभावात् कथमनुगतो गुणव्यवहारः, गुणत्वेन जात्या तथेति चेन्न। गुरुत्वधर्मादिसाधारण्येनानुगतप्रतीत्यभावात्। उपसर्जनादिषु च [2]गुणत्वाप्रतीतेः, रूपादिसाक्षात्कारानन्तरं सर्वेषां तादृशगुणत्व-प्रतीतेश्च रूपादिचतुर्विंशतिमात्राऽसाधारणतया तस्याप्रसिद्धेः। न च गुरुत्वादीनामतीन्द्रियत्वात्तथानुगतप्रत्ययाभावात्, [3]उपसर्जनादिषु उपचारात्, तथाप्रत्ययात्, सामान्यवान् कर्मान्यः परिमाणानाश्रयो [4]गुण इत्युपदेशजन्य-संस्कारसचिवेनाध्यक्षेण रुपादिषु तत्साक्षात्काराच्च तस्य तेष्वसाधारण्यमिति वाच्यम्, तस्या कार्यवृत्तित्वेन कार्यतावच्छेदकताभावाद् गुणमात्रकार्थ-स्यैकस्याभावेन कारणतावच्छेदकत्वाभावेन च जातित्वसिद्धेः। न च कारणतावच्छेदककार्यतावच्छेदकत्वयोरभावे[5]ऽपि अनुगतप्रत्ययवत्त्वाज्जाति-त्वासिद्धिरिति वाच्यम्, अनुगतप्रत्ययस्य धर्मादावभावेन तत्साधारण्यसिद्धि-प्रसज्यादित्युक्तत्वात्। न च सामान्यवानित्येकत्वलक्षणयोगित्वेन तथा जातिसिद्धिरिति वाच्यम्, [6]एकलक्षणायोगत्वस्य [7]जातित्वसाधकत्वात्। अन्यथा वहिरिन्द्रियग्राह्यजातीयविशेष[8]णगुणत्वाद् रूपलक्षणयोगित्वेन स विभुस्त-त्सा[9]धारण्येकजातिसिद्धिप्रसज्यात्।

एवञ्च गुणपदशक्यतावच्छेदकतया गुणत्वसिद्धिरिति परास्तम्। किन्तु पदादिशक्यतावच्छेदकतया विभुत्वादिजातिसिद्धिप्रसज्याच्च। किञ्च [10]अक्षादिनानार्थपदेषु इन्द्रियविहितकादिसाधारण्येकजातिसिद्धिः [11]प्रसङ्गश्च। न च गुणत्वाजात्यभावेऽपि सामान्यवान् इत्यादिलक्षणं कर्मान्यत्वे सत्यसमवायिना गुणत्वरूपो वा धर्मस्तादृशव्यवहारप्रयोजक इति वाच्यम्, तस्याननुगतत्वे-

---

1. व्यवहार्यतावच्छेदक --- अभावात्
2. गुणत्वप्रतीतेः।
3. उपसर्जनादिषू --- तथाप्रत्यय
4. गुणक्रियोपदेशजन्यसंस्कारः - क मातृकायाम्।
5. भावे --- बकाजाति
6. एकलक्षणयोगित्वस्य
7. जातित्वासाधकत्वात्
8. गुणत्वरूपक---
9. साधारण------एव च।
10. आख्यादिनानार्थपदेषु - क मातृकायाम्।
11. प्रजज्यः - क मातृकायाम्।

नानुगतव्यवहारप्र[1]योजकत्वाभावदिति चेत्। न। संयोगविभागो[2]भयत्वावच्छिन्नसमवायिकारणत्वाभाववद्वृत्त्यसमवायिकारणतायाः प्रत्येकं रूपादिचतुर्विंशतिवृत्तेरनुगतधर्मावच्छेद्य[3]त्वात्, रूपादीनाञ्च सर्वत्रानुगतत्वाभावात्, तादृशकारणतावच्छेदकत्वेन गुणत्वजातिसिद्धेः दूरपवादत्वात्। एवञ्च [4]कर्मान्यत्वासमानाधिकरणोऽसमवायिकारणतावच्छेदकत्वेनापि गुणत्वजातिसिद्धिः। गुणत्वजातिसिद्धौ रूपादयो रूपत्वातिरिक्तसत्ताव्याप्यजातमन्तः सामान्यवत्त्वाद् घटवदित्यनुमानमपि तत्र प्रमाणं[5]तत्र तत्रोक्तं प्रसरत्वे वेति द्रष्टव्यम्। गुणत्वलक्षणं [6]विभुवृत्तिसत्तासाक्षाद्व्याप्यजा[7]तिमत्त्वम्। तच्च सर्वषां गुणानामनुगतव्यवहारकारणम्। गुणत्वञ्च गुणानां लक्षणमिति जिज्ञासायामपीदमुत्तरमिति द्रष्टव्यम्।

कर्मप्रकरणम्

एवं गुणरपदार्थे तदिष्टे गुणविशेषसंयोगाद् [8]कारणत्वादुपजीव्यत्वाद् [9]गुणोद्देशानन्तरं कर्मण्युद्दिशति -

(मू) उत्क्षेपणापक्षेणाकुञ्चनप्रसारणगमनानि पञ्चकर्माणि । गमनग्रहणाद् भ्रमणरेचनस्यन्दनोर्ध्वज्वलनतिर्यक्पतननमनोन्नयनादयो गमनविशेषा एव न जात्यन्तराणि।

उत्क्षेपणेति। ननु गुणत्वसामानाधिकरण्येन कर्मकार्थत्ववत् तत्कर्मण्यपि संस्कारादिजन्यत्वात् कर्मत्वसामानाधिकरण्येनापि गुणकार्यसम्भवादुद्देश्यतावच्छेदकसमानाधिकरणं कर्मगुणकारणत्वं [10]नानन्तरोद्देश्यव्याप्यमिति चेत्। न। गुणविशेषसंयोगविभागोभयजनकतायाः कर्ममात्रवृत्तित्वात्, कर्महेतुताया[11]श्च

1. व्यवहारश्चप्रयोजकत्वाभावादिति - क मातृकायाम्।
2. अवच्छिन्ना
3. . छेद्यत्वात् - भावात्।
4. कर्मार्थन्यत्वसमा ---
5. तत्र --- वेति
6. विभुवृत्तिवृत्तीसत्ता
7. जातित्वम्
8. कारणत्वात् - नास्ति
9. गुणोद्दे ---ति
10. नान्तरो क मातृकायाम्।
11. तायाश्च --- वच्छिन्नतादृश

गुणमात्रवृत्तित्वादुद्देश्यतावच्छेदकावच्छिन्नतादृशगुणविशेषकारणताया: एवानन्तरोद्देश्यव्याप्यत्वेनादृढत्वात् । गुणानां द्रव्यमात्रवृत्तित्वात्कर्मणाञ्च कतिपयद्रव्यवृत्तित्वात् तादृशजिज्ञासानन्तरं कर्मसु वक्तव्यत्वज्ञानादवसरसङ्गतिस्त[1]दुद्देशोऽपीति केचित् ।

हस्तस्थितस्य [2]मुषलादेर्हस्तविभागपूर्वकोर्ध्वदेशसंयोगजनिका [3]क्रिया उत्क्षेपणम् । तादृशसंयोगविशेषजनकतावच्छेदिका क्रियात्वव्याप्यजाति: उत्क्षेपणम् । तादृशस्य मुषलादेरधोदेशसंयोगजनिका क्रिया अपक्षेपणम् । तद्वृत्तिक्रियात्वव्याप्यजाति अपक्षेपणम् । प्रसारितवस्त्रचर्मादिरन्योन्यावयवाभिमुखेन संयोगविशेषजनिका क्रिया आकुञ्चनम् । तद्वृत्तिक्रियात्वव्याप्यजाति आकुञ्चनत्वम् । एतेनाकुञ्चितावयवानां विभागविशेषजनिका क्रिया प्रसारणम् । [4]तद्वृत्तिक्रियात्वव्याप्य: प्रसारणत्वम् । गमनञ्च निरवच्छिन्नसंयोगविशेषजनिका उत्तरसंयोगजनिका वा क्रिया, तद्वृत्तिक्रियात्वव्याप्यजातिर्वा गमनत्वम् । तासाञ्च [5]जातित्वे तादृशकार्यनिष्टं वैलक्षण्यं प्रयोजकम् । कर्मत्वञ्च [6]जातिविशेष: सत्तासाक्षाद्व्याप्य: कर्मत्वाकारानुगतप्रतीतिसाक्षिकश्च ।

ननु परमाण्वादिकर्मसाधारण्येनानुगतप्रत्ययोऽसिद्ध:, धात्वार्थादावपि क्रियात्वप्रतीतेरतिप्रसक्तश्च, न च धात्वार्थादावपि औपचारिक एव स इति वाच्यम्, मानाभवावात्, तथाच कार्यतावच्छेदकत्वाभावेन तस्य जातित्वासिद्धेरिति चेत् । न । स्वोत्तरभाविभावभूतानपेक्ष्यसंयोगविभागोभयत्वावच्छिन्नकार्यताप्रतियोगिककारणतावच्छेदकत्वेन तादृशजातिसिद्धे: । तादृशजातिश्च संयोगविभागयोरनपेक्ष्यकारणं कर्मेत्येतादृशोपदेशजन्यसंस्कारसा[7]चिवाध्यक्षगम्येति कर्मादौ कस्यचित्तथाप्रत्ययाभावेऽपि न क्षतिरिति द्रष्टव्यम् ।

कर्मत्वस्य नित्यमात्रवृत्तिसत्तासाक्षाद्व्याप्यजातित्वं हि लक्षणम् । तच्च कर्मणां लक्षणम् । अत्र पञ्चग्रहणमेवकारश्चाप्रतिपत्त्यर्थं पञ्चेति । पञ्चत्वे

---

1. अपि --- क मातृकायाम्
2. मूसलादे
3. क्रिया --- वच्छेदिका
4. तद्वृत्ति -- प्रसारणत्वम् - नास्ति ।
5. ज्योतित्वे ।
6. ज्योतिविशेष:
7. साचिवाध्यक्षोजन्येत इति ।

संख्याजनकापेक्षा बुद्धिविषया इत्यर्थः। ननूत्क्षिपतीत्यादावपि मुषलमूर्ध्वं गच्छतीत्यादिप्रत्ययादिकमपि गमनविशेष एवेति पञ्चत्वमसिद्धमिति चेत्। न। अत्र मुषलेगमनप्रतीतावपि उत्क्षेपणगमनप्रतीत्यभावेन तत्र प्रतीयमानाया-स्तादृशक्रियायास्ततो भिन्नत्वात्। ननूत्क्षेपणत्वादिव भ्रमणत्वादीनामपि कर्मत्वव्याप्यजातित्वात्तैरपि विभागः कर्तव्यः इति पञ्चत्वमसिद्धमेवेत्याशङ्क्य तेषां कर्त्तव्यत्वसाक्षाद्व्याप्यत्वाभावान्न क्रियाविभाजकोपाधिमत्त्वमिति दर्शयति- **गमनग्रहणादिति**। भ्रमणमव्यवस्थायाः नानादेशावच्छिन्नसंयोगजनिका क्रिया। मूर्त्तद्रव्यान्तरस्य मूर्त्तद्रव्यान्तराद् विभागविशेषपूर्विकाधः [1]संयोग जनिका क्रिया **रेचनम्**। **स्यन्दन** मिति पाठेन निरवच्छिन्नसंयोगजनिका क्रिया। गमनविशेषादिति गमनत्वजात्याश्रयव्यक्तिविशेषा इत्यर्थः। तथाच तत्र गमनत्वा-तिरिक्तं न सामान्यमस्तीत्यर्थः। विलक्षणव्यवहारस्तत्तत्कार्यवशादित्येव[2]ध्येयम्।

न तु जात्यान्तराणि। न तु गमनत्वाभिन्नकर्मत्वसाक्षाद्व्याप्यजातिमन्त इत्यर्थः। तथा च भ्रमणत्वादीनां गमनव्याप्यत्वे कर्मत्वसाक्षादव्याप्यत्वाभावान्न विभाजकमिति नाधिक्यमित्यर्थः। ननूत्क्षेपणादिवद् भ्रमणादीनामपि तत्तत्संयोगविशेषज[3]नकत्वेन विलक्षणतया प्रतीयमानत्वादु[4]त्क्षेपणत्वादिव भ्रमणत्वादीनामपि कर्मसाक्षाद्व्याप्यत्वम्, [5]अतथात्वे वा नोत्क्षेपणत्वादीनामपि तथात्वमिति चेन्न। भ्रमणत्वादिवत् निष्क्रियमाणत्वादीनामपि जातित्वे साङ्कर्य्यापत्तेः।

तथाहि-एकस्यामेव नाडिकायामेकस्मादपवरकादपवरकान्तरान्तं गच्छन्त्यां कामिन्यां उभयोरियं निष्क्रमणीयं प्रविशतीतिबुद्धियुपायां तादृश-बुद्धिरुत्पद्यते। तथा च एकस्यामेव क्रियायां तादृशबुद्धिवशात् निष्क्रियमाण-त्वप्रवेशनत्वयोः समावेशोऽन्यत्र गृहनिष्क्रमणप्रवेशनत्वयोश्चान्योन्यपरिहारेण वर्त्तमानत्वमिति भवत्येव साङ्कर्य्यमिति। निष्क्रमणत्वादिना भ्रमणत्वादेरपि साङ्कर्य्यमिति। तेषां जातित्वाभावेन न विभाजकत्वमिति दिक्।

---

1. संयोग --- स्यन्दनमिति
2. अवधेयम् --- गमनावभिन्नकर्म ---
3. जनकत्वे न
4. त्वादुत्क्षे --- नामापि
5. तथात्वे

सामान्यप्रकरणम्

द्रव्यत्वादीनां त्रयाणां द्रव्यत्वादिरुपेणोद्देश्याद् द्रव्यत्वादेश्च सामान्यरूपत्वात्तज्ज्ञानं विना कुतोऽपि द्रव्यादुद्देश्यः ? प्रयोजनं किमिति तदुद्देशानन्तरमुपादानसङ्गत्या सामान्यपदार्थमुद्दिशति-

(मू) सामान्यं द्विविधं परमपरञ्च । अनुवृत्तिप्रत्ययकारणम् । तत्र परं सत्ता महाविषयत्वात् । सा चानुवृत्तेव सामान्यमेव । द्रव्यत्वाद्यपरम् अल्पविषयत्वात् । तच्च व्यावृत्तेरपि हेतुत्वात्सामान्यं सद्विशेषाख्यामपि लभते ।

सामान्यमिति । द्रव्याणां त्रयाणां सामान्याश्रयत्वात् तदुद्देश्यानन्तरं [1]प्रसङ्गादाश्रितनिरूपणमिति तदुद्दिशति-सामान्यमिति केचित् । तत्र च सामान्यवृत्तिधर्मत्वञ्च संयोगादिसाधारण्याद्यत्वनित्यादिव्यक्तिवृत्तित्वेनापि सामान्यवृत्तित्वसम्भवेनाभिमतसामान्यस्वरूपलाभालाभाच्च । नित्यत्वे सति अनेकसमवेतं सामान्यमिति सामान्यलक्षणं सामान्यपदेनैव सूचितम् । [2]तत्र नित्यत्वे सतीति अनुपादाने संयोगेऽतिव्याप्तिः अनेके[3]त्यनुपादाने ईश्वरज्ञानादौ, समवेतेप्यनुपादाने च समवायात्यन्ताभावादावतिव्याप्तिः । नित्यमेकमनेक[4]वृत्तित्वस्याप्यायतमेवार्थः । तत्रापि वृत्तिपदस्य समवायसम्बन्धेन वृत्तिमत्त्वपरस्यावश्यकत्वाद् एकपदवैय्यर्थ्याच्च ।

[5]ननु सामान्यं द्विविधं सखण्डाखण्डभेदात् । तत्र सखण्डं भूतत्वा[6]दौ औपाधिकं सामान्यमिति सामान्यव्यवहारान्तरेषु समवेतत्वाभावात् लक्षणमव्यापकमिति वाच्यम्, जातिरुपसामान्यस्यैवात्र लक्षणत्वाद्, भूतादीनामपि गुणरूपत्वेन समवेतत्वाच्च ।

---

1. प्रसङ्गाद्
2. तत्र नित्यत्वे सती - इति अनुपादाने संयोगेऽतिव्याप्तिः - नासित - क मातृकायाम् ।
3. नेकेऽ --- नादौ.
4. वृत्तीत्यस्य
5. न च - क मातृकायाम्
6. भूतत्वादावनौपाधिक - नास्ति क मातृकायाम् ।

अनुवृत्तिप्रत्ययकारणमिति । अनुगतप्रत्ययासाधारणकारणत्वम्, अनुगतप्रत्यक्षप्रकारकम्वा, लक्षणान्तरसामान्यपदसूचितं वा ? केयम् ? अनुगतप्रत्ययश्च । [1]नानाधर्मविशेष्यकएकधर्मप्रकारकप्रत्यय इति चौपाधिक-साधारणम् । ननु द्रव्यत्वादिवद्भूतत्वादीनामपि जातिमेवेति न सखण्डाखण्ड-भेदेनौपाधिकत्वादिव्यवस्थेति चेत् । न । बाधकसद्भा[2]वासद्भावाभ्यामेव जात्युपाधिव्यवस्थोपपत्ते: ।

तथाहि अत्र जातित्वेन बाधकम् । तत्रोपाधित्वं यथा भूतत्वादौ । यत्र तु बाधकम्, तत्रोपाधिकत्वम्, यथा भूतत्वादौ । किं तत्र बाधकमिति चेत् । द्रव्य-व्यक्तित्वभिन्नव्यक्तिकत्वात्साङ्कर्य्यम्, तत्र बुद्धित्वज्ञानत्वयोस्तु [3]तुल्यव्यक्तिक-त्वान्न पृथक्त्वमिति । तथा च विषयताविशेषवद्वृत्तिज्ञानत्वं न बुद्धित्वातिरिक्तं सामान्यम्, तद्व्यक्तित्वं समवाप्य स्वव्यक्तिकत्वाविषयताविशेषवदिति । तत्रैकधर्मकजातिद्वयासिद्धौ विनिगमनाविरहेण कार्यकारणतावच्छेदकद्वय-कल्पनापत्ति: दूषकतावीजम् । एवमभिन्नव्यक्तिकत्वं स्वाश्रयाप्रतियोगिकाऽ-न्याभावाधिकरणवृत्तित्वम्, तादृशमपि जातित्वे बाधकम्, यथा आकाशत्वं न जाति: । स्वाश्रयवृत्त्यन्यव्यक्त्यवृत्तित्वाद् एतद्घटवत् । तादृशसामान्याङ्गीकारे एतादृशदृष्टान्तबलेन सामान्यमात्रस्यानुगतप्रत्ययहेतुताभावे दूषकताबीजम् ।

साङ्कर्य्यञ्च । परस्परात्यन्ताभावसमानाधिकरणत्वे सत्येकाधिकरण-वृत्तित्वम् । तथाच परस्परात्यन्ताभावसमानाधिकरणयो: समानाधिकरणयोरपि धर्मयोर्न जातित्वम्, यथा- भूतत्वमूर्त्तत्वयो: । तथा च मूर्त्तत्वं न जाति: भूतत्वयाप्यत्वे सति मूर्त्तत्वाव्यापकत्वे सति मूर्त्तत्वसमानाधिकरण-त्वादन्यत्ववत् । भूतत्वं हि पृथिव्यादिचतुर्ष्वेव मूर्त्तत्वसामानाधिकरणमपि आकाशे तदभावसमानाधिकरणमिति । मूर्त्तत्वञ्च मनसि तदभावसमानाधकरणमिति

---

1. नानाधर्मिविशेषयक
2. सद्भावासद्भ्यामेव - क मातृकायाम् ।
3. द्विव्यक्तिकत्वात् न - क मातृकायाम् ।

साङ्कर्य्यान्न द्वयोर्जातित्वम्। न चोक्तानुमानमप्रयोजकमिति वाच्यम्, समानाधिकरणसामान्ययोः परस्पराव्याप्यव्यापकभावस्यैव स्वाधिकरण-वृत्तित्वप्रयोजकतया तदभावस्यैव प्रकृतेऽनुकूलतर्करूपत्वात्। तथाहि भूतत्वं यदि मूर्त्तत्वव्याप्यजातिः स्यात्, मूर्त्तत्वसमानाधिकरणत्वे सति मूर्त्तत्वासमाना-धिकरणो न स्यात्। एवं यदि मूर्त्तत्वाव्यापिका जातिः स्यात्, मूर्त्तत्वाधिकरणा-नधिकरणो न स्यात्। समानाधिकरणजात्योश्च परस्परव्याप्यव्यापकभावो-ऽनुभवसिद्धः। समानाधिकरणानां सत्ताद्रव्यत्वपृथिवीत्वघटत्वादीनां सत्तागुणत्वरूपत्वशुक्लत्वतमस्त्वादीनां व्याप्यव्यापकभावस्यानुभवसिद्धत्वाद्, व्यधिकरणयोः द्रव्यत्वगुणत्वयोः घटत्वपटत्वयोरेकाधिकरणवृत्तित्वाभावस्या-प्यनुभवसिद्धत्वात्।

अत्र च व्यधिकरणजात्योरेकसमावेशे सति यत्र व्यक्तिविशेषे गोत्वाश्वत्वयोस्तन्तुत्वकपालत्वयोर्वा समावेशस्तत्र जात्योस्तद-व्याप्यवृत्तित्वप्रसङ्गः। तदारब्धस्य द्रव्यस्योभयजातिमत्त्वप्रसङ्गः। तथाहि विजातीयानामनारम्भकमित्यादिप्रवादस्य व्यभिचारप्रसङ्गश्च दूषकतावीजम्। ननु साङ्कर्य्यत्वजातित्वबाधकत्वे प्रत्यक्षसिद्धबहुतरजातिविलोपापत्तिः। शरीरत्वेन साङ्कर्य्यात्पृथिव्यादीनां चतुर्णामपि जातित्वं न स्यात्। पृथिवीत्वं हि शरीरत्वपरिहारेण घटादौ वर्त्तमानम्। शरीरत्वञ्च तत्परिहारेण जलीयशरीरादौ वर्त्तमानम्। उभयमपि पार्थिवशरीरे वर्त्तमानम्। एवं जलादीनामपि द्रष्टव्यम्। एवं तेजस्त्वादीनां साङ्कर्य्याद्घटत्वाश्वत्वगोत्वादीनामपि जातित्वात्पदप्रसङ्गः। तथाहि तेजस्त्वं सौरालोकादौ घटत्वात्यन्ताभावसमानाधिकरणम्। घटत्वं धर्मादिः घटे तदत्यन्ताभावसमानाधिकरणम्। उभयसौवर्ण्ये घटे समानाधिकरणमिति साङ्कर्य्यात्। न च घटत्वं नावयविवृत्तिः। किन्त्वारम्भकसंयोगविशेषवृत्तिः। तथाच तेजस्त्वेन सहतस्य सामानाधिकरण्याभावान्न तेन साङ्कर्य्यर्यमिति चेत्। न। तथात्वे घटो द्रव्यमिति प्रत्ययानापत्तेः घटत्वस्य द्रव्यवृत्तित्वाभावात्। न च तेजस्त्वादिव्याप्यघटत्वादिकं नानेनैवमिति वाच्यम्, सौवर्ण्यघटादिसाधारण्येन घटत्वकारानुगतप्रत्ययाभावप्रसङ्गात्।

पार्थिवगवादौ तदभावसमानाधिकरणम्। एवञ्च गोत्वमपि सुरभ्यादौ तेजस्त्वसमानाधिकरणम्। अश्वत्वमप्युच्चैःश्रवप्रभृतिषु तेजस्त्वसमानाधिकरणं सत् [1]पार्थिवाश्वेषु तदभावसमानाधिकरणं सज्जातिर्न स्यात्। एवञ्च दण्डत्वमपि वंशत्वादिना साङ्कर्य्यं न भवेज्जातिरिति दण्डत्वघटत्वादिना कार्यकारणभावोऽपि [2]विलीयेत। एवञ्चान्यत्र घटत्वादावपि वल्कलत्वादिना साङ्कर्य्यप्रसङ्गो दर्शयितव्यः इति न तस्य जातित्वे बाधकमिति चेत्; मैवम्। जातित्वबाधकत्वयोः कार्य्यतावच्छेदककारणतावच्छेदकत्वयोरभाव एव साङ्कर्य्यस्य दूषकत्वम्। तत्सद्भावेऽपि तादृशप्रमाणबलादेव तस्य जातित्वसिद्धौ पश्चादुपस्थितानामपि साङ्कर्य्यं न दूषणायकम्। गन्धत्वावच्छिन्नकार्यतानिरुपितकारणतावच्छेदकत्वेन पृथिवीत्वजातिसिद्धौ पश्चादुपस्थितस्य साङ्कर्य्यस्यात्र दूषकत्वाभावाच्छरीरत्वस्यैव जातित्वे दूषणम्। तत्तत्कार्यतावच्छेदकत्वकारणतावच्छेदकत्वयोरुभयो अन्यभावाच्च। न च तत्र तदुभयाभावादेव जातित्वाभावसिद्धौ किं साङ्कर्य्येणेति साङ्कर्य्यस्यापि तदुभयाभावोपस्थापकत्वेन नादूषकत्वाभावात्। न चैवं मूर्त्तत्वमपि क्रियात्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतया जातिः स्यादिति वाच्यम्, साङ्कर्य्यस्य भूतत्वमेव जातित्वदूषकत्वेन तत्र च तथात्वाङ्गीकारेऽपि क्षत्यभावात्। एवञ्च यत्रोभयोरपि सङ्कीर्णयोर्जात्योः कार्यतावच्छेदकत्वादिनियमः। तत्र सत्यपि साङ्कर्य्ये तदुभयोरपि जातित्वं यथा - दण्डत्वघटत्वसुवर्णत्वादीनामिति संक्षेपः।

ननूक्तत्रितयमात्रस्य जातित्वबाधकत्वे सामान्यविशेषत्वसमवायादीनामपि जातित्वप्रसङ्ग इति अनवस्थालक्षणव्याघातसम्बन्धाभावानामपि जातित्वबाधकत्वं वक्तव्यम्। तथाहि सामान्येष्वपि सामान्याङ्गीकारे तत्रापि सामान्यापत्तेरनवस्थितसामान्यपरस्परापत्तिः इत्यनवस्थासामान्यस्य जातित्वे वा बाधकम्। एवञ्च विशेषत्वस्य जातित्वविशेषाणां सामान्यवान् चलनात्मकः परिमाणानाश्रयो गुण इति गुणलक्षणापत्तौ विशेषत्वव्याघात इति सोऽपि विशेषत्वस्य जातित्वे बाधकः। एवं समवायस्य जातित्वाभावे

1. पृथिव्याश्वेषु - क मातृकायाम्। 2. विलीयेत् - क मातृकायाम्।

समवायसम्बन्धाभाव एव प्रयोजक इति एतत्त्रितयमवश्यं जातिबाधकत्वाभ्युपगन्तव्यम्। तदुक्तम्-

"व्यक्तेरभेदस्तुल्यत्वं, सङ्करोऽथानवस्थितिः।
रुपहानिरसम्बन्धो , जातिबाधकसंग्रहः॥"

इति चेत्।न।सामान्यादीनामपि कार्यत्वादवच्छेदकत्वाभावेन जातित्वाभावात्। न च सर्वत्रकार्यत्वादवच्छेदकत्वाभावस्यैव जातित्वाभावसाधकत्वे किमभिन्नव्यक्तिकत्वादीनां जातित्वबाधकत्वाङ्गीकारेणेति वाच्यम्, तेषामपि कार्यत्वाद्यवच्छेदकत्वाभावो ज्ञायकत्वेनैव दूषकत्वात्, असिद्ध्याद्युन्नायकत्वेनैव व्यभिचारादेर्दूषकत्ववत्।

किञ्च सर्वसामान्येषु सामान्यम् ? सामान्यमित्यनुगतप्रत्ययबलेनैकसामान्याङ्गीकारेण तस्य चैकत्वेन तद्वृत्तिधर्मस्य एकवृत्तिवृत्तित्वेनैक-जातित्वाभावात्सामान्ये सामान्याङ्गीकारे सामान्यरूपधर्मप्रसिद्ध्याऽनवस्थाप्रसञ्जनमपादयितुमशक्यम्। ननु सर्वसामान्यवृत्तिसामान्यस्य घटत्वादिकं चादाय सामान्यान्तरितसिद्धौ च पुनः तत्सामान्यं पटत्वादिकं चादाय सामान्यान्तरितसिद्धीत्यनवस्थाप्रसङ्गः इति चेत्। न। सर्वसामान्य वृत्तिसामान्यस्य घटत्वादिवृत्तित्वेन पुनस्तदा आदाय सामान्यान्तराङ्गीकारे मानाभावात्।

एवञ्च विशेषणानामपि जातिमत्त्वे स्वरूपव्याघातो न हेतुः। स्वरूपव्याघातो हि गुणत्वापत्तिः, अत्यन्तव्यावर्त्तकत्वाभावापत्तिर्वा। नाद्यः। तत्र जातिसत्त्वेऽपि कर्मत्वव्यधिकरणसमवायिकारणत्वाभावेन गुणत्वापादानसम्भवात्। नान्त्यः। विशेषाकारानुगतप्रत्ययबलेन विशेषत्वरूपाखण्डोपाधिसद्भावेऽपि विशेषाणां धर्मग्राहकप्रमाणबलेन यथात्यन्तव्यावृत्तिहेतुत्वम्, तथाजातिमत्त्वे तन्नानुपपन्नमिति, न तस्यापि जातिमत्त्वे बाधकत्वम्। वस्तुतस्तु विशेषणमतीन्द्रियत्वादनुगतप्रत्ययाभावादेव विशेषत्वं न जातिरिति किं तद्बाधकोपन्यासेन साधकाभावादेव तस्या जातिस्वाभावसिद्धिः। किञ्च विशेषणामेव गगनकुसुमायमानतया तद्वृत्तिधर्मे जातिबाधप्रमाणं चेति विचित्रायितमिति न किञ्चिदेतत्।

एवञ्च समवायस्याखण्डदण्डायमानतया एकव्यक्तित्वेन तद्वृत्तिधर्मे एकव्यक्तिसत्त्वमेव बाधकमिति व्यर्थमेव [1]सम्बन्धाभावस्य जातिबाधकत्वोपवर्णनमिति नान्यभावस्य बहुव्यक्तिवृत्ते सम्बन्धाभावो जातित्वे बाधकः। [2]अन्यथा ह्यभावाकारानुगतप्रत्ययबलेनाभावत्वं जातिः स्यात्। [3]पदसम्बन्धाभावस्तद्बाधको न स्यात्। तदुपादाने च समवायस्य [4]भाववृत्तिधर्मव्याप्यत्वेनाभावत्वे तदभावात्सम्बन्धाभावस्य जातिबाधकत्वमवश्यमङ्गी [5]कर्त्तव्यमिति चेत्, न। अभावस्य स्वरुपसम्बन्धविशेषरूपत्वेन [6]विलक्षणानुगतप्रत्ययहेतुत्वाभावेनैव जातित्वाभावात्। भावभिन्नत्वस्य तथात्वे चाखण्डादेव तस्य न जातित्वमिति कं तदर्थं बाधकान्तराङ्गीकरणमिति भ्रान्तिपल्लवेन।

कतिविधमिति जिज्ञासानुरोधादाह -परमित्यादि। परं व्यापकम्, बहुव्यक्तिवृत्त्यर्थः। अपरं व्याप्यम्, अल्पव्यक्तिवृत्त्यर्थः। ननु घटादिस्वरूपातिरिक्ते घटत्वादिसामान्ये मानाभावः। नहि प्रत्यक्षं घटव्यतिरेकेण घटत्वादिकं किञ्चिद्वस्त्वन्तरमालम्बतेऽसिद्धत्वाद् विकल्पसहत्वाच्च। तथाहि किं घटत्वं नित्यमनित्यम्वा? नित्यत्वे घटोत्पत्तिः पूर्वमपि तत्प्रतीतिप्रसङ्गः। [7]ननु घटान्तरे तत्प्रतीतिर्भवत्येवेति चेत्, तथाहि अपूर्वोत्तरघटोत्पत्तिदाशायां घटत्वस्य [8]कथं तेन सम्बन्धः। न च घटान्तरात्तस्य तत्र गमनं सम्भवति अमूर्त्तत्वात्। न च यत्र घट उत्पद्यते तत्रैव तिष्टतीति वाच्यम्, तथा सति भूतलत्वादीनामपि घटत्वापत्तेः। तत्र समवायसम्बन्धे[9]नाभावान्न तेषां तत्त्वापत्तिरिति वाच्यम्, समवायसम्बन्धेन तस्य तद्वृत्तित्वाऽप्रसिद्ध्या तत्रावृत्तित्वप्रसङ्गात्। नान्त्यः। अनित्यत्वे सति भवदुक्तजा[10]तिलक्षणभावेन तस्य जातित्वाभावप्रसङ्गात्। तस्माद्घ[11]टादिव्यावृत्तिस्वरूपमेव घटत्वम्। तदुक्तम्-

1. सम्बन्धाभावर --- वहुव्यक्ति
2. अन्यथादि क मातृकायाम्
3. यदि सम्बन्धभाव
4. अभाववृत्ति ---
5. कर्त्तव्य --- रूपसम्बन्ध
6. विलक्षणत्वेन --- घटादिस्तरूपातिरिक्तं
7. न च - क मातृकायाम्
8. कथं तेन सम्बन्धः। न च घटान्तरान्तस्य तत्रागमनं नास्ति - क मातृकायाम्
9. नाभावान्न।
10. व्यालक्षणाभावेन - क मातृकायाम्
11. अष्टादि

न याति न च तत्राऽसीत् न चोत्पन्नं न चांशवत् ।
जहाति पूर्वं नाधारमहो व्यसनसन्ततिः ॥
(प्र.वा. 3.152)

इति । अतो धर्मिस्वरूपातिरिक्ते सामान्ये प्रमाणं दर्शयति - अनुवृत्तीति । यदपि घटत्वादिसामान्ये प्रत्यक्षमपि प्रमाणं वक्तुं शक्यते जातिप्रत्यक्षे [1]व्यक्तितायाश्चान्यतमत्वात्, तथापि विप्रतिपन्नं प्रति तदसिद्धमिति प्रमाणान्तरोपन्यासः । अनुवृत्तिप्रत्ययत्वञ्च नानाधर्मविशेष्यकत्वे सत्येकधर्म-प्रकारकनानाज्ञानत्वम् । तथा च यदि सामान्यं [2]न स्यात्, तद्भिन्नेषु अनुगताकारप्रत्ययो न [3]स्यादिति तर्क एव तत्र मानम् । वस्तुतस्तु नीलघटसंयुक्तः शुक्लो घटो नीलघटवृत्तिपटाद्यवृत्तिधर्मवान् तद्विशेष्यकज्ञान-समानप्रकारकज्ञानविशेष्यकत्वात् नीलघटसंयुक्तपीतपटवत् इत्यनुमानाद् धर्मस्वरूपातिरिक्तसामान्यसिद्धिरनेकग्रन्थेनोक्तम् । धर्मस्वरूपस्य विशेष्यत्वेन प्रकारकत्वाभावादिति । [4]न चान्यत्र व्यावृत्तेरेवानुगतव्यवहारोऽस्त्विति किमतिरिक्तसामान्येन वाच्यम्, अत्र व्यावृत्तिर्हि अघटव्यावृत्तिः, सा च घटत्वाद्यभावे सर्वघटानामेकरूपेणोपादातुमशक्यत्वात् । घटान्तरे एतद्घटा-न्यत्वस्यैव [5]सत्त्वे नात्र व्यावृत्तिः नास्तीति तत्र घटत्वाकारानुगत-प्रत्ययानापत्तिरिति दिक् ।

अत्र च सामान्यस्य प्रत्यक्षत्वे योग्यव्यक्तिसमवायस्तन्त्रं [6]तन्द्रमत्त्वोपदेशविशेषजन्यः संस्कारश्चक्षुरादिसहकारि कुत्रचित् । तेन सत्यपि मणिविशेषेन्द्रियसंयोगे प्रभावितशेषाश्रयः पद्मरागपदवाच्यः इत्युपदेशज-न्यसंस्काराभावो न क्रियोपदेशजन्यसंस्काराभावेन पद्मरागत्वादिप्रत्यक्षम् [7]। एवं ब्राह्मणत्वादावपि द्रष्टव्यम् ।

---

1. व्यक्तियोग्यतायास्तन्द्रत्वात् ।
2. नास्याभिन्नेष्वनुगताकार
3. स्यादतर्के एवात्र मानम् ।
4. ननु
5. सत्त्वेन तद्व्यावृत्ति
6. वर्न्द्रमुपदेशविशेषः
7. प्रत्यक्ष्यः

तच्च प्रत्येकपरिसमाप्त्यवृत्ति तथाच द्रव्यत्वव्याप्यव्याप्यजातेर्न परमाणुवृत्तित्वम्। अन्यथा क्षीरत्वादीनां परमाणुवृत्तित्वे कस्यचित्तथात्वं कस्यचिन्नेति विनिगमनाविरहेण सर्वेषां परमाणूनां तथात्वापत्तिरिति तदारब्धस्य तथात्वापत्तिः। कारणवृत्तिव्यापकजातेः कार्यवृत्तित्वनियमादिति प्राञ्चः। वस्तुतस्तु तन्तुत्वादेः पटाद्यवृत्तित्ववत् परमाणुवृत्तेरपि क्षीरत्वस्य तदारब्धद्रव्यविशेषेऽवृत्तित्वाभावो न दोषाय। तपोभाजकादृष्टविशेष-संस्कृतदीयमानविलक्षणसम्बन्धस्यैव क्षीरत्वादिप्रयोजकत्वादिति उच्छृङ्खलाः।

द्विविधं सामान्यं दर्शयति - तत्रेति। तत्र द्विविधसामान्यमध्ये निर्धारणे सप्तमी। परमिति। अत्र सत्तापक्षः। परमिति साध्यः। महाविषयत्वादिति हेतुः। तत्र परत्वस्यापि महाविषयरुपत्वाद् हे[1]तुसाध्ययोरविशेषापातात्। परशब्देन परत्वेन व्यवहारो लक्षणीयः। तथाच सत्तासामान्यं परमिति व्यवहर्त्तव्यम्। महाविषयत्वादिति व्यतिरेकी। यद्यपि सत्ताया अपि सामान्याद्यविषयत्वान्न महाविषयत्वं नास्ति, तथापि द्रव्यत्वाद्यपेक्षया महाविषयत्वं हेतुरिति द्रष्टव्यम्।

वस्तुतस्त्वपरत्वं द्रव्यत्वादिव्यापकम्। द्रव्यत्वसमानाधिकरणात्यन्ता-भा[2]वप्रतियोगितानवच्छेदकधर्मत्वमिति यावत्। महाविषयत्वञ्च सामान्यवत् नात्र वृत्तित्वम्, तेन न हेतुसाध्ययोरविशेष सत्येव ज्यायादिति। ननु सत्तायाः सामान्यवृत्तित्वेन प्रतीयमानायाः [3]कार्यतानवच्छेदकायाजातित्वमेव दुर्लभम्।

कुतस्तस्याः सत्तायाः व्यापकजातित्वेनोदाहरणम्? तथाहि सत्ता न जातिः सामान्यादिवृत्तित्वात् सामान्यवत्। एवं कार्यतावच्छेदकत्वा-भावाप्रमेयत्ववत् कारणत्वानवच्छेदकत्वाद् भूतत्ववदिति। अनुगतप्रत्ययमात्रस्य गतप्रसञ्जकत्वात् तर्हि तादृशजात्यभावे कथं सदित्यनुगताकारप्रत्यय इति चेत्। न। प्रामाणिकत्वोपाधेरेव तथात्वव्यवहारात्। अतएव व्यक्तिमात्रं सत्ता। तद्धितः स्वार्थ इति जरन्मीमांसकाः। न च रूपादयो द्रव्यवृत्तिसा[4]मान्यवन्तः सामान्यवत्त्वाद् घटवदित्यनुमानात्तद्वृत्तिजातिसिद्धौ द्रव्यत्वस्य बाधात्

1. हेतुसाध्ययोः --- व्यवहारो --
2. अत्यन्ताभाव --- महाविषयत्वं
3. कार्यताद्यवच्छेदिका
4. सामान्यत्वात्।

द्रव्यादित्रितयसाधारणतया यत्सामान्यं सिध्येत्, तदेव सत्ता इति वाच्यम्, अनुमानस्यानुकूलतर्काभावेन प्रभाजकत्वादिति[1] ।

अत्र केचित् -निमित्तकारणताऽतिरिक्तकारणता अनुगतध[2]र्मावच्छेद्या: कारणत्वादित्यनुमानात्तदवच्छेदकानुगतधर्मसिद्धौ तस्य जातित्वे बाधकाऽभावात् समवायिकारणत्ववति द्रव्येऽसमवायिकारणत्ववतोर्गुणकर्मणोरे[3]काजाति: सिद्ध्यति ।

सैव सत्तेति । तन्न । तादृशकारणताया: अननुगतत्वेन तस्यानुगत-धर्मावच्छेद्यत्वे मानाभावात् । पारिमाण्डल्यादौ तादृशकारणताया: अभावेन तत्साधारण्येन सत्तासिद्धस्य भावप्रसङ्गाच्च । परे तु कारणतावच्छेदक-त्ववत्कारणतावच्छेदकाऽवच्छेदकत्वेनापि जातित्वसिद्धि: । तथाच ध्वंसत्वावच्छिन्नं प्रति जन्यभावत्वेन कारणत्वोक्तौ भावत्वस्य बहुपदार्थघटिततया तत्प्रवेशे गौरवमिति जन्यसत्त्वेनैव तथात्वं वाच्यम् । तथाच सत्तारुपसामान्याभावे तस्य तदवच्छेदकत्वं न स्यादिति, कारणतावच्छेदकाव[4]च्छेदकतया तत्सिद्धिरिति, समवायितावच्छेदकत्वेन सत्ताजातित्वसिद्धिरिति कारणताव-च्छेदकत्ववत्तदवच्छेदकत्वस्यापि जातित्वसाधकत्वात् । एवं ज्ञातसमवायिताव-च्छेदकत्वेन संसारीश्वरसाधारणासत्त्वसिद्धिरिति वदन्ति । न च सत्ताया: जातित्वे तस्या: सामान्यावृत्तित्वाभावात्सामान्यं सदित्यादिप्रत्ययो न स्यादिति वाच्यम्, -सामान्यविशेषयोरे[5]कार्थसमवायेन समवायाभावयोश्च स्वाश्रयसम्बन्धमात्रेणो पचारात् तथा प्रत्ययोपपत्ते: ।

अभावस्य सत्ताविरोधित्वेनैव प्रतीतेस्तत्र [6]सदिति व्यवहार इति प्राञ्च: । स्वतन्त्रास्तु । द्रव्यसामान्यादिष्वे[7]वकारेणाननुभूयमानस्य सदिति प्रत्ययस्य द्रव्यादिषु साक्षात्सम्बन्धनिमित्तत्वं सामान्यादिषु परम्परासम्बन्धे निमित्तत्वमिति

---

1. चेत्
2. धर्मावच्छेदाकारणत्वात्
3. एकान्तर - क मातृकायाम् ।
4. अवच्छेदकयोरसिद्धिरिति ।
5. एवार्थसमवायेन - क मातृकायाम् ।
6. न (सहितप्रत्यय) इति प्रा च: ।
7. एकाकारेण

विनिगमनाविरहेण हेतोर्निर्धारयितुमशक्यत्वात्सर्वत्रैकरूप्यमेव वक्तव्यं पदार्थत्वमेवोपाधिः। तदुपाधिस्तत्प्रत्ययकारणं न सत्ता, तस्या असार्वत्रिकत्वादिति। नन्वेवं मानं सिध्येदेव प्रमाणान्तराभावात् न च द्रव्यत्वं स्वभिन्नसामान्यव्याप्यं सामान्यत्वसमानाधिकरणात्यन्ताभावप्रतियोगिसामान्यत्वाद् घटत्ववदित्यनुमानात् सिद्धिरिति वाच्यम्, तस्याप्रयोजकत्वादिति चेन्न सिध्यतु किं न छिन्नमित्याहुः। तस्या अपरसामान्यापेक्षया वैलक्षण्यमित्या[1]हुः।

सा चेति । सा अनुपदं निरुक्ता सत्ता। अनुवृत्तेरेवेति। साक्षात्परम्परासाधारण्येन पदार्थमात्र इति शेषः। सामान्यवत्यनुवृत्तेः हेतु[2]त्वादित्यपि केचित्। अनुवृत्तिरनुगताकारप्रत्ययः। एवंशब्देन व्यावृत्तिबुद्धिव्युदासः।

अपरमुदाहरति-द्रव्यत्वादिति । आदिपदेन द्रव्यत्वादिव्याप्यपृथिवीत्वादितद्व्याप्यघटत्वादिगुणत्वरूपत्वशुक्लत्वादिपरिग्रहः। अत्रापरत्वं यत्किञ्चित्[3]सामान्यनिष्ठाऽन्योन्याभावप्रतियोगितावच्छेदकत्वम्। अल्पविषयत्वञ्च सत्तासमानाधिकरणात्यन्ताभावप्रतियोगिजातित्वमिति न हेतु[4]साध्ययोरविशेषः। अथवा व्यवहारः साध्यः अल्पविषयत्वादिति। यद्यपि द्रव्यत्वादेः पृथिवीत्वापेक्षयाऽधिकविषयत्वमस्त्येवेत्यसिद्धो हेतुस्तथापि सत्तापेक्षयाल्पत्वस्य तथात्वान्नासिद्धः। [5]तदपेक्षया व्याप्यत्व[6]रुपा। परत्वस्य साध्यत्वाद् यो हि यदाश्रयैकदेशवृत्तिः सस्तस्य व्याप्यः।

द्रव्यत्वञ्च सत्ताश्रयैकदेशवृत्तिवद्व्याप्यम्। एवं पृथिवीत्वादिकं द्र[7]व्यत्वाश्रयैकदेशवृत्तीति तद्व्याप्यम्। एवं यदाश्रययावद्व्यक्तिवृत्तित्वे सति तदनाश्रययत्किञ्चिदव्यक्तिवृत्तिः सस्तद्व्यापकः। यथा सत्तासामान्यं द्रव्यत्वाश्रययावद्वृत्तित्वे सति तदनाश्रययत्किञ्चिदव्यक्तिवृत्तीतिभवत्येव व्यापकम्। एवं पृथिवीत्वापेक्षया द्रव्यत्वं व्यापकम्। द्रव्यत्वापेक्षया च पृथिवीत्वादिव्याप्यमिति द्रष्टव्यम्। परसामान्यापेक्षया च [8]अपरसामान्य

1. आहु - सा चेति - क मातृकायाम्
2. हेतुत्वा ---दास
3. स्वावनिष्ठा - क मातृकायाम्।
4. साध्ययो --- अल्पविषयत्वात्।
5. तदनपेक्षया
6. रूपापरत्वस्य
7. द्रब्य--- यदाश्रयावत्।
8. अपरसामान्ये --- पुनरर्थे

वैलक्षण्यमाह- तच्चेति । च पुनरर्थे । तदूद्रव्यत्वाद्यपरसामान्यं पुनः सामान्यमित्यत्रानुवृत्तिहेतुत्वादिति पूरणीयम् । तेन द्रव्यत्वाद्यपरसामान्यमनुवृत्तिप्रत्ययहेतुत्वात्सामान्यं सत्ताव्यावृत्तिबुद्धिहेतुत्वाद् विशेषाख्यानामपि लभत इत्यन्वयः । तत्र व्यावृत्तेरन्योन्याभावरूपत्वेनाजन्यत्वात् तद्धेतुत्वं न सम्भवतीति व्यावृत्तिपदं तद्बुद्धिपरम् । सा च स्वाश्रयस्य तदनाश्रययावद्व्यक्तिनिष्टान्योन्याभावप्रतियोगित्वप्रकारिका बुद्धिः । विशेषाख्यानामिति । विशिनष्टि व्यावर्तयति इतरभिन्नत्वेन ज्ञापयति स्वाश्रयमिति यावत् । तेन विशेषपदं यौगिकमिति द्रष्टव्यम् ।

विशेषप्रकरणम्

सामान्यविशेषेषु निरूपितेषु तदैककार्यकारित्वसङ्गत्या विशेषपदार्थमुद्दिशति-

(मू) नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः । ते च खल्वत्यन्तव्यावृत्तिबुद्धिहेतुत्वाद् विशेषा एव ।

[1]नित्येति । अनुवृत्तिप्रत्ययहेतुत्वेन सामान्यपदार्थे उद्दिष्टके प्रत्ययविशेषहेतुत्वेन सामान्यस्यैव सिद्धिरुत पदार्थान्तरस्यापीति जिज्ञासायां व्यावृत्तिबुद्धिहेतुत्वेन विशेषपदार्थमुद्दिशति -नित्येति । केचित्तु अत्रान्त्याविशेषा इति लक्ष्यनिर्देशः । अन्यथा वक्ष्यमाणविधेयतावान्मात्रस्यैव गमकत्वे लक्षणेन तत्प्रवेशे नित्यद्रव्येत्यादेर्वैयर्थ्यापत्तेरिति द्रष्टव्यम् । विशेषत्वं व्यावृत्तिबुद्धिजनकत्वम् । तच्च सामान्यविशेषेऽप्यस्तीति तेषां लक्ष्यत्वं माभूदिति अन्त्यादिति । अन्तेऽवसाने व्यावृत्तिकानां [2]परमाणौ सत्तेति अन्त्याः । येऽभ्योऽपरे [3]व्यावर्त्तकाः न सन्तीत्यर्थः, एतेषां धर्मिग्राहकप्रमाणबलेन स्वाश्रय[4]व्यावर्त्तकत्ववस्त्वव्यावर्तकत्वस्यापि सिद्धेः [5]व्यावर्तकान्तरे वैलक्षण्यमित्यर्थः । नित्यद्रव्यवृत्तित्वञ्च [6]लक्षणम् । तदर्थश्च । अनित्यद्रव्यवृत्त्यावृत्तिनित्य-

1. नित्येति --- नित्येति = नास्ति ।
2. परमावधौ
3. व्यावर्त्तिका
4. व्यावर्त्तिकत्वस्यापि - क मातृकायाम्
5. व्यावर्त्तिकान्तर
6. विलक्षणम् - क मातृकायाम् ।

वृत्तिवृत्तिपदार्थविभाजकोपाधिमत्त्वम् । अत्रावृत्यतानुपादाने गुणत्वमुपपादाय [1]रुपादावतिव्याप्तिः [2]स्यात् । तन्मात्रोपादानेन चानित्यवृत्तिगुणत्वादिकमादाय[3]पुनरति व्याप्तिः स्यादिति अतो विशेष्यम् ।

वस्तुतस्तु विशेष्यमनुपादेयमेव विशेषाणान्तु नित्यमात्रसमवेतत्वेन विशेषत्वरूप[4]पदार्थविभाजकोपाधिरुक्तरुपो भवत्येवेति लक्षणसमन्वयः । पदार्थविभाजकोपाधिपदोपादानाच्च परमाणुवृत्तितद्रुपत्वादिकमादाय तत्र जातिप्रसङ्गः । अनित्यवृत्तिवृत्तिभिन्नपदार्थविभाजकोपाधिभिन्नमत्त्वमिति तत्त्वम् । परे तु नित्यद्रव्याऽन्त्यासमवेतत्वे सति नित्यसमवेतत्वमित्यर्थः ।अत्रापि सत्यतानुपादाने गुणादावतिव्याप्तिः, तावान्मात्रोपादाने या समवेताकाशादावतिव्याप्तिरिति विशिष्टोपादानम् । तत्र विशेषाणां कालिकसम्बन्धेनान्यत्रापि वृत्तेः सम्भवात्सत्यत्वेऽसमवेतेति । विशेष्ये च समवायानुपादानेऽभावादतिव्याप्तिः स्यात् ।[5]अतस्तद्गर्भिता । नित्यद्र[6]व्यान्यासमवेतत्वं नित्यद्रव्यान्यसमवेतजातित्वाभावस्तेन न तत्परमाणुरूपादावतिव्याप्तिः । [7]न चात्मत्वादावतिव्याप्तिरिति वाच्यम्, अनेकाऽसमवेतत्वेन विशेषणादित्याहुः । वस्तुतस्तु एकव्यक्तिमात्रसमवेतमात्रवृत्तिपदार्थविभाजकोपाधिमत्त्वञ्च । गुणत्वादीनाञ्च संयोगादिवृत्तित्वान्न [8]तदीयरूपादावतिव्याप्तिः । अनित्यद्रव्याऽसमवेतसमवेतमात्रवृत्तिपदार्थविभाजकोपाधिमत्त्वं वा तत् । अनित्यद्र[9]व्य समवेतं यत्समवेतं तन्मात्रे वर्त्तते यः पदार्थविभाजकोपाधिमत्त्वमिति लक्षणसमन्वयः ।

अत्र यद्यप्योद्देशप्रस्तावे लक्षणाभिधानमनुचितम्, तथापि लक्षणं विना उद्देशस्य कर्त्तुमशक्यत्वात् तदभिधानमिति भावः । ननु यथा द्रव्यत्वादीनां व्यावर्तकत्वे स्वाश्रयेषु अनुवृत्तिप्रत्ययहेतुत्वमविरुद्धं [10]तद्वदेव विशेषेष्यपि किं न स्यादित्यत आह - ते चेति । तेषां हि धर्मग्राहकप्रमाणबलेन

1. कपादौ - क मातृकायाम्
2. नास्ति
3. पुनरपिव्याप्तिः
4. पदार्थाविभाजक
5. अतस्त --- ता -- नितऽ
6. द्रव्यार्थासमवेतत्वं
7. नापरमाणू - क मातृकायाम्
8. तदादाय रूपादा - क मातृकायाम्
9. द्रव्यासमवेतं
10. अर्थादिवविशेपि - क मातृकायाम्

स्वस्वाश्रयव्यक्तिमात्रव्यतिरिक्तनिष्टभेदप्रतियोगित्वप्रकारकबुद्धिजनकत्वाद् विशेषपदवाच्यत्वम्, न तु द्रव्यत्वादिवत्सामान्यविशेषपदवाच्यत्वमित्यर्थः। कथं धर्मिग्राहकप्रमाणबलेनैषामत्यन्तव्यावृत्तिबुद्धिहेतुत्वमिति चेत्। इत्थम्। न [1]स्वर्गाद्यकालीनत्वसमानजातीयानां समानगुणकर्मणां परमाणूनां परस्परं विभिन्नकार्यकारित्वादेककार्यकारिणामपि आरम्भसंयोगदर्शनाद् योगिनां व्यावृत्तत्वेन बुद्धिविनाशत्वाच्च परस्परं व्यावृत्तिः इति वक्तव्यम्। सा च तत्प्रकारकप्रमा। न च स्वरुपनिमित्तास्वरूपस्य व्यावर्तकत्वाभावादन्यथा घटादावपि [2]तस्य व्यावर्तकसम्भवे धर्मान्तरविलेपापत्तेः। नाप्यन्योन्याभाव-निमित्ता, तस्य वैधर्म्यान्तरव्याप्यत्वेन तदभावे तस्याप्यभावात्। नापि पृथक्त्वनिमित्ता तस्याप्यवध्यावधिमद्भावनिरुप्यत्वेन व्यावृत्तित्वग्रहापूर्व-मशक्यत्वात्। तस्मादन्यस्य व्यावर्तकस्याभावाद् धर्मान्तरमेव तथा कल्पनीयम्।

सः च प्रत्येकव्यक्तिमात्रवृत्तिः। अत्र [3]द्वित्रिचतुरादिवृत्तित्वे तेषां परस्परं व्यावृत्तित्वानापत्तेः। तेषां च स्वाश्रयव्यावर्तकत्ववत् स्वव्यावर्तकत्ववत् स्वव्यावर्तकत्वमन्यथा तेष्वपि विशेषान्तरकल्पनेऽनवस्थापत्तेश्च। एवञ्च समानजातीयानां समानगुणकर्मणां परमाणूनां व्यावलोकत्वेन ''यो धर्मोऽङ्गीकरणीयः'' [4]इतिन्यायेन[5]द्यणुकप्रभृतीनां चानित्यद्रव्याणामाश्रभेदादेव व्यावृत्त्यभिबुद्ध्युपपत्तौ न तदर्थं व्यावर्त्तकान्तरापेक्षेति। न चैवंमाकाश-कालदिशामेकैकत्वेन सजातीयव्यावृत्त्यभावाद् विजातीयव्यावृत्तेश्च शब्दपरत्वापरत्वासमवायिकारणसंयोगविशेषबलादेव सिद्धेः एवमीश्वरस्य नित्यज्ञानादिमत्त्वेनैव जीवात्मनां [6]तत्तददुष्टवशेन परस्परव्यावृत्तिसिद्धे -र्नाकाशादिविशेषसिद्धिरिति वाच्यम्। इष्टापत्तेः। न हि यावान्नित्यद्रव्यवृत्तित्वं तेषां प्रमाणाभावाद् व्यावृत्तिबुद्ध्यन्यथानुपपत्त्या[7]कल्पनात् यत्र तदुपपत्तेस्तत्रैव [8]कल्पते न सर्वत्र। अतएवोक्तसमानजातीयेषु सामान्यगुणकर्मसु परमाणूषु

1. स्वर्गादिकाले हि
2. तस्य --- भावनिमित्ता
3. चतुरादिवृत्तित्वे - क मातृकायाम्।
4. नास्ति।
5. सविशेषपदार्थाद् - क मातृकायाम्।
6. तत्तद्दृष्टवशेन - क मातृकायाम्।
7. अनुपपत्त्याकल्पनात्।
8. कल्प्य न्ते

भवितव्यं व्यावर्तकत्वेन धर्मेणेति। तस्मादेतेषां कुत्राप्यनुवृत्तिहेतुत्वाभावादन्तव्यावर्तकत्वेन विशेषपदवाच्यत्वमिति।

अत्र नवीना:- विशेषाणामिव नित्यद्रव्याणामपि स्वरूपेणैव व्यावृत्तिबुद्ध्युपपत्तौ न तदर्थविशेषपदार्था[1]ङ्गीकारे इति तेषामाकाशकुसुमायमानत्वात्तेषामुद्देश्योऽनुचित इति। न चैवं घटादावपि स्वरूपस्य व्यावर्तकत्वापत्तिरिति वाच्यम्, तत्र प्रत्यक्षसिद्धानां सामान्यगुणकर्मणां व्यावर्तकत्वसम्भवेन स्वरूपस्य व्यावृत्तिकत्व[2]कल्पनायां मानाभावात्, व्यावर्तकान्तराऽसम्भवे हि अन्यथानु[3]पपत्त्या तथाकल्पनाच्च। न च रूपादिसम[4]वायित्वे सति यत्समवायिव्यक्तेर[5]र्थव्यावृत्तितत्तदसमवेतसमवेतशून्यधर्मसमवायातिव्याप्ति:। तथाहि घटादेर्व्यावृत्तिपटाद्यसमवेतसमवेतशून्यं यत्पटत्वादितत्समवायीति तद्दृष्टान्तबलेन परमाणुष्वपि परस्परासमवेतसमवेतशून्यधर्मसिद्धि:। अत्र [6]द्रव्यत्वादिभिर्योगजप्रत्यासत्तेर्हि दूरत्वादिदोष:। प्रतिनियतपरमाणुसमवेत[7]द्यणुकादिभिरेतद्[8]व्यक्तित्वादिभि: सिद्धसाधनवारणाय क्रमेण विशेषणानि। समवायित्वे सतीति विशेषणाद् घटादिद्रव्यव्यावृत्ताभावव्यक्तेस्तादृशधर्मसमवायित्वाभावेऽपि घटादिव्यावृत्त्यवधिभूताभाव[9]-समवेतत्वाप्रसिद्धावपि न क्षति:। [10]द्रष्टव्या व्याप्तिवलादस्य धर्मस्य सिद्धि:।

स एव वि[11]शेषपदार्थ इति न तेषां गगनकुसुमायमानत्वमिति वाच्यम्, अनुकूलतर्काभावेन व्याप्तेरप्रयोजकत्वात्, समानजातीयानित्य[12]द्रव्ययो: व्यभिचाराच्च। न च तत्रापि परस्परासम्बन्धेन विशेषपदार्थमादायैव साध्यसत्त्वान्न व्यभिचार इति वाच्यम्, परस्परासम्बन्धेनैतादृशसाहचर्यस्य कुत्राप्यनिष्टत्वात्। यो यस्माद् व्यावर्तते, स तद्वृत्तिधर्मवान् इत्येव लाघवाद्व्याप्ति:। तद्वृत्तिधर्म: चैतद्व्यक्तित्वा[13]दिकमपीति ततोऽपि विशेषसिद्धि:।

1. अंगीकार
2. तथा कल्पनायां - क मातृकायाम्
3. अनुपपत्ते: - क मातृकायाम्
4. समवायित्वे
5. अर्थ व्यावृत्तं - क मातृकायाम्
6. द्रव्यत्वादिभि --- प्रतिनियत
7. रूपादिभि
8. एतद्व्यक्तित्वादिभिश्चासिद्ध्यसाधनत्ववारणाय
9. भावसमवेतत्वाप्रसिद्धौ - क मातृकायाम्
10. नास्ति
11 सविशेष:
12. द्रव्ययो:
13. मपातिन - क मातृकायाम्।

यत्तु व्यावर्तकधर्मं विना स्वरूपस्य व्यावर्तकत्वे वाह्यमतप्रवेशापत्तेः [1]व्यावृत्तिकत्वेन विशेषसिद्धिरिति चेत्। तन्न। विशेषसमवाययोः स्वरूपेणैव व्यावर्तकत्वेन तत्र धर्मान्तरानङ्गीकारेऽपि वाह्यमतप्रवेशाभाववत्प्रकृतेऽपि तथैवोपपत्तेः। [2]व्यावर्तिकत्वस्य व्यावर्तकधर्मप्रयुक्तत्वनियमेऽपि पृथक्त्वा-ऽन्योऽन्याभावादेरेव तादृशोऽस्तीति न तदनुरोधेनापि तत्सिद्धिः। न चान्योन्या-भावपृथक्त्वादेर्वैधर्म्य[3]व्यावृत्तत्वाद्, वैधर्म्यं विना तदसम्भव इति वाच्यम्, [4]एतदव्यक्तित्वादेरव वैधर्म्यत्वात्।

न च प्रतियोगिप्रत्यक्षसिद्धत्वात्ते दूरपह्नव इति वाच्यम्, [5]न रूपे श्रोत्रवृत्ति-नेतिन्यायेनातीन्द्रियपदार्थेषु योगिप्रत्यक्षस्याप्यभावात्, योगजापेक्षासहदूर-त्वादिदोषमात्रोत्तेजकत्वात्। तदुक्तं [6]शब्दमण्यालोके योगजधर्मो हि न योगजरसं चाक्षुषयतीति वस्तुसम्भवप्रचयेन वर्त्तमानो यस्येन्द्रियस्य यद्योग्यं तद्व्यवहृतमपि [7]ग्राहयतीत्यसन्निकृष्टरुपमेव कल्पते, शब्दानेषः शृणोतीति योजनशतादित्या-परमण्वादिप्रत्यक्षत्वप्रतिपादकागमाभावादिति। अत एवोक्तं - "तर्हि तं एव सशपथं पृच्छता" किमतिरिक्ताविशेषपदार्थ [8]ईक्षते न वेति। तस्मात् प्रमाणाभावान्नास्ति विशेषपदार्थ इति।

केचित्तु सर्गादिकाले समानजातीयानां परमाणूनां व्यावर्तकाभावे स्वरूपसङ्करोत्पत्तौ स्वरूपमप्यव्यावर्तकं स्यादित्यसङ्कीर्णधर्मस्वरूपसिद्ध्यर्थमेव धर्मस्वरूपसिद्धिरित्याहुः।

---

1. व्याव नत्वेन - क मातृकायाम्।
2. व्यावत्तकेत्वस्य - क मातृकायाम्
3. व्याप्यत्वाद्
4. एतदव्यक्तिकत्वादेरेव
5. न रूपे श्रोत्रवृत्तितेतिन्यायेन - क मातृकायाम्
6. राद्धमणौ - (शब्दमणौ)
7. ग्राह्यतीतिसन्निकष्टसरूप - क मातृकायाम्
8. साक्षात्तेन - क मातृकायाम्

समवायप्रकरणम्

नित्यद्रव्यसमवेतत्वेन विशेषपदार्थोद्देश्ये कृते समवेतत्वस्य समवायघटिततया तदुपोद्घातेन समवायोद्देशमारभ्यते ।

(मू) अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्धः इहप्रत्ययहेतुः सः समवायः ।

[1]अयुतसिद्धानामिति । यद्वा द्रव्यादिपञ्चकरुपसम्बन्धनिरुप्यत्वात्समवायस्य तदुद्देशानन्तरं तमुदिशति- अयुतेति । युमिमि[2]श्रणाश्रिताविति धा - तोस्ते[3]नायुतमिश्रितौ सिद्धौ । ययोः परस्येह सम्बन्धं विना एकस्याविद्यमानतया नियमोऽस्तीति अयुतसिद्धौ । यदुभयसत्ताधिकरणं कालत्वव्यापकं [4]यदुभयसम्बन्धाधिकरणकालत्वं, तत्त्वमयुतसिद्धमिति यावत् । भवति हि द्रव्यगुणो[5]भयसत्ताधिकरणकालत्वव्यापकं तदुभयसम्बन्धाधिकरणकालत्वम् । दण्डपुरुषोभयाधिकरणकालत्वव्यापकन्तु न तदुभयसम्बन्धाधिकरणत्वं विशकलिततदुभयाधिकरणकालस्य तत्सम्बन्धाधिकरणत्वाभावात् । तावेवायुतसिद्धौ द्वौ विज्ञातव्यौ ययोः द्वयोः, अविनश्यदेकमपराश्रितमेव तिष्टति इत्यस्य द्वयमेवार्थः । तत्राविनश्वदित्यस्य विशेषनित्यद्रव्यस्थलेऽव्यावर्तकत्वेन अविवक्षितत्वात् ।

एवं जातिव्यक्तिस्थलेऽपि व्यक्तेः जात्याश्रितत्वाभावादवयवावयविनौ गुणगुणिनौ क्रियाक्रियावतोः जातिव्यक्तिविशेषनित्यद्रव्ये चेति । समवायस्यैकत्वेन विभागो नास्तीति लक्षणरुपतया देशमात्रमेव कृतमिति लक्षणम् । अयुतसिद्धानां परस्परं च सम्बन्धस्तत्त्वं - [6]जातेश्च नित्यत्वेन तत्रापि तस्य वैय्यर्थ्यानुप्रवेशः । अयुतसिद्धौ चावयविनौ गुणगुणिनौ क्रियाक्रियावतोः जातिव्यक्ती विशेषनित्यद्रव्ये चेति समवायस्यैकत्वेन विभागो नास्तीति लक्षणरूपतया देशमात्रमेव कृतमिति

---

1. अयुतसिद्धानां -- तमुदिशाति = योगः
2. श्रता -- क मातृकायाम्
3. तेन --- नियमोऽस्ति
4. यदुभयासम्बन्ध --- कमातृकायाम्
5. उभय --- त्वाभावात् ।
6. अभावाज्जातेः ह्यनित्यत्वेन तत्रापि तस्य वैय्यर्थ्यात् न प्रवेशः ।

लक्षणम्। अयुतसिद्धानां परस्परं यः सम्बन्धस्तत्त्वं, तद्दण्डपुरुषादि-संयोगातिव्याप्तिवारणायायुतेत्यादि। सम्बन्धत्वं विशेषणविशेषाभ्यामन्यत्वे सति विशिष्टधीविषयत्वं, विशिष्टधीनियामकत्वम्वा। तेनायुतसिद्धयोः जातिव्यक्त्योर्यः एकपदवाच्यत्वादि सम्बन्धस्तत्रनातिव्याप्तिः। भागान्तरप्रवेशे गौरवाद् व्यर्थविशेषणत्वाच्च तावन्मात्रमेव लक्षणम्।

प्राञ्चस्तु प्रागभावाऽप्रतियोगिसम्बन्धत्वं समवायत्वम्। न च विभोः नित्यसंयोगोऽस्तीति तत्रातिव्याप्तिरिति वाच्यम् तयोः कर्माभावेन संयोगा-भावात्संयोगजन्यसंयोगस्य तत एवाभावाच्च। [1]सम्बन्धत्वं पूर्ववत्तेन वाच्यवाचकभावादौ न प्रसङ्ग इत्याहुः। वस्तुतोऽसमवेतमात्रवृत्तिपदार्थ-विभाजकोपाधिसद्भावत्वमेव तदिति द्रष्टव्यम्। ननु गुणगुणिनोस्तादा-[2]त्म्याभ्युपगमेन भेदाभावात्सम्बन्धस्यैवाभावस्तस्य भेदगर्भत्वात् तेषां तादात्म्यमिति चेत् ? शुक्लो घट इति सामानाधिकरण्याभावाद् घटादिव्यतिरेकेण शुक्लस्य कुत्राप्यनुपलम्भाच्च। ननु सामानाधिकरण्ये नानुभवः सिद्धः शुक्लः पट इति मदभिलापस्तु मतुब्लो[3]पादाश्रयलक्षणया वेति चेत्, मानाभावात्। "अरुणीयं क्रीणातीत्यादावरुण्यादेः श्रुतक्रयसाधनत्वाबाधापत्तेश्च। तस्यामूर्त्तत्वेन क्रियादिसाधनत्वाभावात्। तत्त्वादिव्यतिरेकेण पटान्तरस्य वस्त्वन्तरस्योपलम्भात्तयोरपि तादात्म्यम्। द्रव्यमेव चल इति सामानाधिकरण्यक्रियापि[4] एव सामान्यादावपि द्रष्टव्यम्।

एवञ्च समवायोऽसिद्ध एवेत्याशङ्क्यते अपां सम्बन्धसिद्ध्यर्थं प्रथमतस्तद्भेदे प्रमाणं दर्शयति - आधारेति। अयं भावः - यदि गुणगुण्यादीनां तादात्म्यं स्यात्, तस्य भेदघटितत्वात्। तथा च घटादिरूपादिभ्यो भिन्न-तदधिकरणत्वेन प्रतीयमानत्वात्, यदधिकरणत्वेन प्रतीयतेतत्तद्भिन्नम्, यथा वदधिकरणत्वेन प्रतीयमानं कुण्डादि ततो भिन्नमिति भेदसिद्धिः। एवं भेदसिद्धौ सामानाधिकरण्यव्यपदेशे लक्षणया, न तु मतुब्लोपादिनैषः साधनीयः।

---

1. सम्बन्धत्वं पूर्ववत्३
2. अभ्युपगमेनानाभेदाभावात् - क मातृकायाम्।
3. वापाद्याश्रयलक्षणया - क मातृकायाम्।
4. द्रव्यमेव।

[1]अरण्यादीनां द्रव्यपरिच्छेदद्वारेण [2]क्रियादिसाधनत्वम् । किञ्च यदि घटादयो रूपाद्यभिन्नाः स्युः रूपादिवत् नीरूपा स्युरिति तर्कादपि भेदसिद्धिः । किञ्च घटादीनां रूपाद्यभिन्नत्वे रूपादिवत्तेषां तूपलम्भप्रसङ्गः । न च भेदाभेदाभ्युपगमेनैवागमादिकं परिहरणीयमिति वाच्यम्, भेदाभेदयोर्विरोधेनैकत्र वृत्तिताविरोधात् । ननु घटत्वाभावे पटत्वाभावक्रियादिप्रत्ययस्याभेदेऽपि दृष्टत्वान्नाधाराधेयमात्रं भेदसाधकमिति चेत् । न । तत्र तस्यौपचारिकत्वेन वास्तवत्वाभावात्प्रकृते चोक्तबाधकेनाधाराधेयभावस्यैव वास्तवत्वादिति ।

[3]नन्वयुतसिद्धानां भेदसिद्धावपि समवायस्यातीन्द्रियत्वेन प्रत्यक्षाऽसम्भवात्तदव्याप्यलिङ्गान्तराभावाच्च कथं तत्सिद्धिः इत्यत आह-**इहेति** । इह गवि गोत्वमित्यादि[4]प्रत्ययस्याऽसाधारणसम्बन्धं विना अनुपपत्तेस्तदन्यथानुपपत्त्या तत्कल्पनमित्यर्थः । इहानुमानमपि । इह गवि गोत्वमित्यादिप्रतीतिः स्वरूपभिन्नासाधारणसम्बन्धनिमितविषयताविशेषानवगाहभावद्वयविषयपदार्थे प्रत्ययत्वात्, इह कुण्डे वदरमिति प्रतीतिवत्, अत्रान्यस्यासाधारणसम्बन्धस्याभावापरिशेषात् समवायसिद्धिः । प्रथमविशेषणादिह घटे ज्ञानमित्यादौ, द्वितीयविशेषणाच्चेह भूतले घटाभावे तृतीय विशेषादिह पुरोवर्त्तिनि रजतमित्यादिभ्रमरूपे प्रत्यये न व्यभिचारः । [5]नन्वेतदप्रयोजकं मानाभावादिति चेत्, रूपादिसाक्षात्कारानुपपत्तेरेवात्रानुकूलतर्कत्वेन प्रमाणत्वात्, तथाहि यद्रूपादिकमिन्द्रियसम्बन्धं [6]न स्याल्लौकिकसाक्षात्कारविषयो न स्यादिति तर्कोप[7]जीवनात् । रूपादिसाक्षात्कार इन्द्रियसम्बन्धजन्यः लौकिकसाक्षात्कारत्वाद् घटसाक्षात्कारवदित्यनुमानेन परिशेषसहायेन संयुक्तसमवायसिद्धौ नोक्तानुमानप्रयोजकमिति । किञ्च ज्ञानेच्छादीनां धर्मसुखादीनां [8]कार्यकारणभावसामानाधिकरण्यप्रत्यात्यासत्त्येव वाच्योऽन्यथा प्रसज्यात् । सामानाधिकरण्यञ्च स्वाधिकरणसमवेतत्वम्, न स्वरूपसम्बन्धविशेषस्तस्यानुगतत्वेन

1. आरण्यादीनां
2. कृत्यादि
3. नन्ययुतसिद्धानां - क मातृकायाम्
4. प्रत्यक्षस्य
5. नन्वेतदप्रयोजकं
6. न स्यात् लौकिक
7. तर्कोपजीविनारूपादि--
8. कार्यकारणभावः समानाधिकरण --- प्रसङ्गः ।

[1]कारणतानियामकत्वाभावात्। एवञ्च [2]तन्तुपटयोर्विशेषकार्यकारणभावस्तादात्म्यसमवायान्यतरसम्बन्धेन वाच्यम्, यत्र समवायेन स पटस्तत्र तादात्म्येन सम्बन्धेन स तन्तुरिति, अन्यथा तन्त्वन्तरे तत्पटोत्पत्तिप्रसङ्गापत्तेः। न च तत्पटं प्रति तत्पटप्रागभावाश्रयतन्तुत्वेन कारणत्वमिति तन्त्वन्तरे प्रागभावान्न तत्र प्रसङ्गः इति प्रागभावस्य प्रतियोगिसमवायदेशत्वनियमेन प्रागभावाश्रयतायामपि प्रतियोगिसमवायस्यैव तन्त्रत्वात्। एवं चैतादृशकार्यकारणभावानुरोधेन समवायसिद्धिरिति।

एवञ्च समवायिकारणत्वव्यवस्था। द्रव्यनाशविशेषेऽसमवायिकारणनाशाजन्ये समवायिकारणनाशहेतुत्वव्यवस्थाऽपि तत्साधकेति। न चेह प्रत्ययानुपपत्त्या समवायिकल्पने "इह भूतले घटाभाव, तादृशप्रत्ययानुरोधेनाभावसा[3]धारण्येन तत्सिद्ध्यापत्तिरिति वाच्यम्, तत्र समवाये बाधकसत्त्वेनेह भूतले घटाभाव इति प्रतीतेः [4]नतत्साधकत्वम्, अत्र स्वरूपसम्बन्धविषयत्वेनान्यथासिद्धत्वात्। किञ्च तत्र बाधकमिति चेत्, ध्वंसादेः समवेतत्वे कपालादेरन्यत्र तदभावेन कपालादिकमेव तत्समवायिकारणं कल्पनीयम्, जन्यसमवेतस्य समवायिकारणजन्यत्वनियमात्। तथा च समवेतनाशं प्रति समवायिकारणनाशस्य हेतुत्वात्कपालनाशे घटनाशस्यापि नाशापत्तौ घटादुन्मज्जनप्रसङ्गः एव बाधक इति संक्षेपः।

स चायमेको नित्योऽतीन्द्रियश्च तन्नानात्वे मानाभावात्, तल्लिङ्गस्येहप्रत्ययस्य सर्वत्राऽविशेषादेकसम्बन्धसिद्धेश्च। ननु समवायस्यैकत्वे स्पर्शसमवायस्यापि रूपप्रतियोगिकत्वात्तद्वति वायौ रूपविशिष्टप्रत्ययापत्तिस्तत्सम्बन्धस्य विद्यमानत्वादिति वाच्यम्, वायुवृत्तिसमवाये रूपनिरुपितत्वाभावेन तद्विशिष्टप्रत्ययप्रसङ्गाभावत्वाद् रूपादिनिरूपिततत्त्वस्य रूपादिभेदेन भिन्नत्वात्। [5]अतएव पाकरक्ते श्यामसमवायसत्त्वेऽपि न श्यामत्वविशिष्ट-

1. कारणतायाः नियामकत्वाभावात्।
2. चतुष्टयोर्विशिष्यकार्यकारण।
3. साधारण्यं न
4. न तत्साधकत्वं, अत्र नास्ति - क मातृकायाम्
5. अतएव = नास्ति - क मातृकायाम्

प्रत्ययप्रसङ्ग:। रूपसमवाय: स्पर्शसमवाय इत्यादिनानात्वप्रत्ययोऽपि निरुपितत्वादिभेदनिबन्धन:। उत्पादकविनाशसामग्र्यभावादीश्वरज्ञानादि-समवायस्थले कादाचित्कत्वस्य वक्तुमशक्यत्वान्न नित्य:। किञ्च समवायस्य कादाचित्कत्वे कदाचिद्घटादावपि घटत्वाद्यभावापत्ति:। समवायस्या-खण्डदण्डायमानैकरुपतयाऽतीन्द्रियाकाशादिप्रति[1]योगिकत्वासम्बन्धप्रत्यक्षे च यावत्सम्बन्धप्रत्यक्षस्य हेतुत्वादत्र च तदसम्भवादतीन्द्रियत्वम्। ननु सम्बन्धप्रत्यक्षे[2]सम्बन्धप्रत्यक्षमात्रं तन्त्रं यावद्घटितमिति चेत् घटाकाशसंयोगादे: अपि प्रत्यक्षापत्त्या तत्र यावत्त्वस्यावश्यकत्वात्। न च संयोगप्रत्यक्षे तथाहेतुत्वेऽपि सम्बन्धमात्रप्रत्यक्षे न तथेति वाच्यम् कार्यकारणभाव-द्वयकल्पनापेक्षया निरूक्तकार्यकारण भावकल्पनाया एव लघुत्वात्। न च सम्बन्धातीन्द्रियत्वे विशिष्टप्रत्ययानुपपत्तिरिति वाच्यम्, मदीयशरीरमित्यादौ मदीयत्वादिनिरूपकस्य मददृष्टजन्यत्वस्यातीन्द्रियत्वेऽपि मदीयत्वाविशिष्ट-शरीरप्रत्यक्षस्यानुभाविकत्वेन तत्प्रत्यक्षस्य तत्र तन्त्रत्वात्।

प्रभाकरास्तु नानारुपादिव्यक्तीनां विभिन्नधर्मावच्छिन्नानामुत्पाद-विनाशकल्पनापेक्षया लाघवत्वादेकस्यैव तौ कल्प्यते। तेन रक्तं रूपं नष्टं तदुत्पन्नमित्यादिप्रतीतय: समवायस्य नावगाहन्ते, तेनैकैक एव नीलरूपादिव्यक्तयो नित्या उत्पत्तिविनाशशालिसमवाया[5]स्तासामभिव्यञ्जक इति चेत्। न। शुक्लादिव्यक्तीनामेकैकत्वे शुक्लेतरत्वादिप्रत्ययानापत्ते:। नन्वेकस्यैवरूपव्यक्ते-र्विजातीयरूपसम्बन्धाऽसम्बन्धाभ्यां शुक्लत्वशुक्लतरत्वादिप्रत्यय इति चेत्। न। रूपस्य व्याप्यवृत्तितया तत्र विजातीयसम्बलनाऽसम्भवात्, सर्वत्रैव शुक्लेतरत्वादिप्रत्ययापत्ते:। रूपं नष्टमित्यादिप्रतीते: समवायो नष्ट इत्याद्यप्रतीतेश्च [6]समवायस्य नोत्पादविनाशशालित्वम्। संयोगस्य द्रव्यमात्रसमवेतत्वात् समवाये समवायाभ्युपगमे चानवस्थानात् स्वरूपसम्बन्धेनैव वर्तत इति सर्वमन्यत्समवायग्रन्थे निरूपयिष्यते।

---

1. प्रतियोगिकत्वात्।
2. सम्बन्धिमात्रं प्रत्यक्षम्।
3. मन्नन्यत्वस्य
4. अनुभवितत्वेन
5. तेषामभिव्य जक इति - क मातृकायाम्।
6. न - योग:

नन्वन्ये स्वत्वक्तिवैशिष्ट्यसादृश्यसंख्यादयोऽपि पदार्थाः तत्त्वव्यवहार-जनकत्वेनाशक्यापह्नवाः। प्रसिद्धपदार्थेषु वैधर्म्यान्नान्तर्भवन्तो दृश्यन्ते। तथाहि क्वचिद् वस्तुविशेषकस्य क्रयप्रतिग्रहयाजनाध्यापनविभागपितृमरणोपादानादिभ्यः स्वत्वमुत्पद्यते। दानत्वविक्रियादिभ्यश्च [1]नश्यतीति ममैतद्द्रव्ये क्रयस्वत्वमुत्पन्नं विक्रियानष्टमिति सर्वेषामबाधितानुभवबलात्स्वत्वं पदार्थान्तरमास्थेयम्। तच्च स्वत्वं न द्रव्यत्वरूपम्। विक्रियादिकालेऽपि तत्स्वत्वेन स्वत्वं नष्टमिति न यथेष्टप्रतीत्यनापत्तेः। विनियोग ईक्षणादिस्तद्योगत्वं तद्विषयता, तच्च क्रियादिना जन्यते, विक्रियादिना विनश्चतीति वाच्यम्। [2]एवञ्च विषयत्वस्य स्वरूपानतिरिक्तत्वेन पूर्वदोषानतिवृत्तेः। चौर्य्याद्यानीतेऽपि तथाविनियोगसम्भवेन तत्राऽपि स्वत्वापत्तेश्च। न च चौर्य्याद्यानीतस्य परस्वं नाददीतेत्यनेन प्रतिषेधान्न यथेष्टविनियोगविषयत्वमिति वाच्यम्। [3]एवं एतादृशनिषेधाविषयत्वं स्वत्वमित्यागतं तथा चात्माश्रयापत्तिः एतादृशनिषेधाविषयत्वे [4]सति तत्त्वं स्वत्वमित्यागतम्। तथाऽऽत्मासत्त्वरूपं चाश्रयापत्तिः। [5]तादृशनिषेधस्य स्वत्वघटित्वात्। किञ्च

पिण्डीदीनां स्वजनेऽपि, पुत्राद्यनुमितं विना।
[6]विभक्तानां पित्रादीनां ,परस्परानुमितिना ॥
[7]स्थावरं द्विपदञ्चैवं, यद्यपि स्वयमर्जितम्।
असम्भूयसुतान् सर्वान्, तदपि न च [8]विक्रियम् ॥
अविभक्ताविभक्तावा ,दायादाः स्थावरे समाः।
नैकः कुर्य्यात् क्रयं दानं, [9]परस्परमतिं विना ॥

इत्यादिना यथेष्टं दानादिविनियोगस्य निषिद्धत्वान्न तत्र स्वत्वापत्तिः। न च विनियोगपदेन रक्षणादिकमेव गृहीतमिति वाच्यम्, दूरतरनिखातद्रव्यादौ

1. नश्यतीति - नष्टमिति
2. विषयत्वस्य - द्यनीतेऽपि
3. एवं चैतादृशनिषेधाविषयत्वं स्वत्वमित्यागतं तथा चात्मात्माश्रयापत्तिः।
4. सति तत्त्वम् - नास्ति
5. तादृशनिक्षेपस्य - क मातृकायाम्
6. भ्रात्रादीनां
7. स्थावर - क मातृकायाम्
8. विक्रियः।
9. परस्परमतं विना - क मातृकायाम्

[1]तद्भावापत्तेः । न च तत्र योग्यताऽस्तीति वाच्यम्, योग्यताया इदानीमप्य-निरुपणात् ।

किञ्च देवतोद्देशेन दीयमाने गवादौ देवतानां स्वत्वं "शिवस्वं नाददी ते" त्यागमबलेनास्थेयम् । तेषाञ्च विनियोगाभावात्तत्रोक्त[2]लक्षणयाऽव्याप्तिः । "सप्तविभागमन्वय" मित्याद्युक्तस्वत्वापादकोपायविषयत्वमेव तदिति वाच्यम् । [3]आत्माश्रयलक्षणस्य स्वत्वघटितत्वादिति भावपत्तेः। आत्माश्रयापत्तेश्च ।

[4]बृद्धौ च मातापितरौ, सती भार्य्या सुता सुतः ।
अप्यकार्यं शतं कृत्वा, भर्त्तव्या मनुरब्रवीत् ॥

इति किञ्चाप्यकार्यमित्यादिना निषिद्धोपायानामप्यनुज्ञातत्वेन तदुपायार्जितेऽपि स्वत्वानापत्तेश्च । एतेन स्वसमानकालीनयावद्विक्रियादिप्रागभावविशिष्टक्रिया ध्वंस एव स्वत्वम् । क्रीत्वा विक्रीयते च । क्रयध्वंसस्वत्वेऽपि तस्य विक्रियाप्राग-भावविशिष्टत्वाभावान्न तत्र स्वत्वमिति प्रत्युक्तम्, अननुगतत्वात् । मातृमरणादि-सत्वेषु द्रव्येषु स्वत्वव्यवहारानापत्तेः । पितृमरणस्य द्रव्यवृत्तित्वाभावात् ।

किञ्च क्रयत्वादेरमूल्यप्रदानपूर्वक[5]सत्वापादाकमनोव्यापारविशेषा-दिरूपतया आत्माश्रयापत्तेश्च । एतेन यद्व्यतिकरेण यथेष्टाविनियोगविषय-त्वासम्भवस्तद्विषयत्वं स्वत्वमिति प्रत्युक्तम् । तस्मात्पदार्थान्तरमेव स्वत्वमिति, तच्च क्रियादिभिरुत्पद्यते, विक्रियादिभिः [6]विनश्यते । न च क्रियादीनामननु-गतत्वात्तेषां [7]कथमनुगतस्वत्वकारणमिति वाच्यम्, [8]एकशक्तिमत्त्वेन सर्वेषां तेषामनुगतत्वेन हेतुत्वाच्च । किमत्र मानमिति चेत्, 'परस्वं नाददीते' त्यादिरागमः, क्रियादिप्रत्यक्षजन्यसंस्कारसचिवं प्रत्यक्षञ्च । किञ्च न स्वत्वद्रव्यविशेषो गुणादावपि वृत्तेः । अन्यथाऽरूणया क्रीणाति इत्यादेरूत्पादे क्रयसाधनत्वानुप-पत्तिः । कुत्राप्यसमवायित्वाभावाद् गुणादिवृत्तित्वाच्च न गुणः । [9]न वा कर्म,

1. तदभावापत्तेः । 2. लक्षणाप्याप्तिः । 3. आत्माश्रया---भावापत्तेः = नास्ति
4. बृद्धौ च मातापितरौ सती भार्य्या सुतः शिशुः ।
अप्यकार्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत् ॥ -क मातृकायाम् नास्ति ।
5. मूल्यप्रदानपूर्वकस्वत्वापादकमेकोव्यापारविशेषादि - क मातृकायाम्
6. विनश्यति 7. अननुगतस्वत्व --- क मातृकायाम्
8. एकशक्तिमत्वे न 9. नित्याधसमवधान -- क मातृकायाम् ।

अनुवृत्त्यादिबुद्धिहेतुत्वाभावाच्च । न सामान्यादित्रयान्तर्गतम्, विधिमुखेन प्रतीयमानत्वाच्च । नाभावः, सम्यक्त्वेनाप्रतीयमानत्वात् । अतः सिद्धमतिरिक्तमेव पदार्थान्तरस्वत्वमिति ।

एकस्मादेव व[1]ह्नेर्मण्याद्यसमवधानदशायां दाह उत्पद्यते । तत्समवधानदशायां नेति सर्वजनसिद्धम् । तत्र फलोपहिते फलानवच्छिन्न [2]व्यावृतो धर्मोऽवश्यमङ्गीकार्य्यः कुठारादौ तैक्ष्णयवत् । मण्यादिना वह्न्यादेः [3]स एव धर्म [4]प्रतिषिध्यते । स च [5]धर्मः कार्यैकोन्नेयत्वादतीन्द्रियोऽव्यासज्यवृत्तिश्च तन्मात्रनियतत्वात् । अव्यासज्यवृत्तित्वे सति कार्यानुकूलातीन्द्रियधर्मत्वं शक्तित्वमदृष्टवदात्मसंयोगपरमाणुपरिमाणं न कस्यापि कार्यस्य कारणं, तस्य कारणत्वे परमाण्वारब्धस्य अणुतरत्वापत्तिः । [6]परमाणुत्वतैक्ष्ण्यादिषु अतिव्याप्तिवारणाय क्रमेण विशेषणानि । दाहावच्छिन्नो वह्निः दाहानुकूलाव्यासज्यवृत्त्यतीन्द्रियधर्मसमवायाजनकत्वादात्मवत् । आत्मनि च तादृशो धर्मऽदृष्टः इति न दृष्टान्ताऽसिद्धिः । ननु कार्यमात्रं प्रति प्रतिबन्धकाभावस्य हेतुत्वाद् दाहादौ [7]न मण्यादेः प्रतिबन्धकत्वात्तद्दशायां [8]दाहानुत्पत्तिः । तदभावे च सामग्री[9]समवधानाद् भवत्येवं कार्यमिति किमतिरिक्तशक्तिकल्पनयेति चेत्, कारणताया प्रतिबन्धकाभाववृत्तित्वस्या [10]भाववद्वृत्तित्वस्य वक्तुमशक्यत्वात् । तथाहि प्रतिबन्धकाभावस्य प्रतिबन्धकाभावत्वेन कारणत्वमुत मण्याद्यभावेन ।

नाद्यः । अन्योऽन्याश्रयात् । तदभावस्य कारणत्वे गृहीते कारणभूताऽभावप्रतियोगित्वात्माप्रतिबन्धकग्रहः । प्रतिबन्धकत्वेऽगृहीते च तद्भावत्वेन कारणत्वाग्रह इति । न च कार्यानुत्पादप्रयोजकत्वमेव प्रतिबन्धकत्वमिति नान्योऽन्याश्रय इति वाच्यम्, कार्यानुत्पादस्य कार्यप्रागभावरूपतया तत्र मण्यादीनां

1. व्यावृत्तौ कार्यः कुठारादौ तैक्ष्ण्यवत् । 2. व्यावृत्तौ कार्यः कुठारादौ तैक्ष्ण्यवत् ।
3. वव्यावृत्त्याधाराधेयभावस्य - योगः । 4. प्रतिबध्यते । 5. धर्मकार्याकोन्नेयत्वात्
6. परमाणुपरिमाणं न कस्यापि कार्यस्य कारणं, तस्य कारणत्वे परमाण्वारब्धस्य अणुतरत्वापत्तिः । - क मातृकायां नास्ति ।
7. तमस्त्वादेः - क मातृकायाम् 8. दाहानुपपत्तिः ।
9. समवधानोभावत्येकवकार्यमिति - क मातृकायाम् 10. अभाव --- त्वस्य - नास्ति ।

कारणत्वघटितप्रयोजकत्वाभावेनाऽसम्भवापत्तेः । न च प्रयोजकत्वं तदग्रिमक्षण-सम्बन्धानुकूलत्वं दाहादिप्रागभावादेरग्रिमक्षण[1]सम्बन्धानुकूलत्वं प्रयोजकत्वं मण्यादेस्तस्मिन् सति दाहानुत्पादेन तत्प्रागभावस्योत्तरकालानुवृत्ते इति वाच्यम्, अन्तिमकालस्यापि तत्प्रयोजकत्वेन तत्साधारण्येन प्रतिबन्धकत्वापत्तेः, प्रतिबन्ध-कत्वस्यैकस्याभावेन तदभावत्वे कारणताया: ग्रहीतुमशक्यत्वा[2]दननुगतत्वाच्च ।

न द्वितीय: । उत्तेजकसमवधाने मण्यादौ सत्यपि दाहदर्शने व्यभिचारेणाकारणत्वाच्च । न चोत्तेजकाभावविशिष्टमण्याद्यभावत्वेन कारणत्वमिति यत्रोत्तेजकप्रतिबन्धकोभयस्तत्रापि विशेषणाभावप्रयुक्तविशिष्टा-भावसत्वान्न व्यभिचार इति वाच्यम्, उत्तेजकस्य प्रतिबन्धकप्रतिबन्धकत्वेन तत्प्रवेशेपुनरात्माश्रयापत्तेः । न चोत्तेजकव्यक्तिभ्रमग्राहकया प्रातिस्विकरुपे-णोपादाय तत्तदभावविशिष्टमण्याभावत्वेन कारणत्वमिति नोक्तो दोष इति वाच्यम्, प्रतिबन्धकतदभावे वैशिष्ट्यस्य निर्वक्तुमशक्तत्वात्, अभावेन सह मण्यादे: सम्बन्धाभावात् न च तदधिकरणकालवृत्तित्वमेव तत्, उत्तेजकसमवधान-दशायामपि उत्तेजकभावाधिकरणे महाकाले स्थूलकालोपाध्येवातादृशमण्यादे: वृत्तित्वात् तदानीमपि दाहापत्तेः । किञ्चोत्तेजकाभावाधिकरण[3]समयविशेष-वृत्तित्वविशिष्टमणित्वस्य गौरवेण प्रतियोगितानवच्छेदकत्वात्तन्मण्याद्यभावत्वेन कारणत्वं वाच्यम्, ततश्च तत्पूर्वकालादिवृत्तित्वविशिष्टप्रतियोगिकव्या सज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकतत्तन्मण्याभावस्य मणिकालेऽपि सत्त्वेन तदानीमपि दाहापत्तेः । अन्यथा तत्रैव व्यभिचारेण कारणताभङ्गापत्तिः । किञ्चैव मणिसंयोगोत्पत्तिकाले दाहापत्तिः, तदुत्पत्तेः पूर्वं तेन सम्बन्धेन मण्यभावस्य विद्यमानत्वात् ।

न च प्रतिबन्धकसामग्र्याऽपि प्रतिबन्धकत्वान्न तथेति वाच्यम्, सामग्र्याऽपि प्रतिबन्धकत्वे मानाभावात् । तत्सामग्र्याऽपि सामग्रीत्वेन प्रतिबन्धकत्वेऽतिप्रसङ्गाच्च । न च कार्यकालवृत्तित्वेन प्रतिबन्धकाभावस्य

---

1. सम्बन्ध प्रयोजकत्वम् - क मातृकायाम्

2. अननुकवाख - नास्ति - क मातृकायाम् 3. समयस्य

हेतुत्वम् । तदानीञ्च कार्याभावेन कार्यकालवृत्तित्वाभावात् प्रतिबन्धकाभावस्य न कारणत्वम्, अवश्यं चैतदभ्युपगन्तव्यम् । अन्यथा स्वेच्छाधीननिरन्तरपरामर्श-संशयप्रतिबन्धकविशेषदर्शनरूपप्रथमपरामर्शस्य नाशे द्वितीयपरामर्शोत्पत्तिक्षण एव संशयापत्तेस्तन्नैरन्तर्य्यानुपपत्तेः इति वाच्यम्, यद्धर्मविशिष्टस्य कार्यकालवृत्तित्वं तस्यैव कारणतावच्छेदकत्वमिति सर्वतान्त्रिकसिद्धतया [1]कार्यकालवृत्तित्वस्य कार्यपूर्वकालेऽभावेन तस्य कारणतावच्छेदकत्वाभावात् । न च यदवलीढस्य [2]कार्यप्राक्कालवृत्तित्वं तस्य कारणतावच्छेदकत्वमिति वाच्यम्, घटादिकं प्रति द्रव्यत्वादेरपि कारणतावच्छेदकत्वप्रसङ्गाच्च । किञ्चानुमितिप्रतिबन्धिकायाः सिद्धेरभावस्यानुमितिं प्रति हेतुत्वं न स्यात्, अनुमितेरपि सिद्धत्वेनानुमितिरुपकार्यकाले सिध्यभावस्याभावात् । न च सिद्ध्यभावभिन्नप्रतिबन्धकाभावस्य कार्यकारणवृत्तित्वेन कारणत्वमिति वाच्यम्, मानाभावात् । अतएव कार्यपूर्वकालवृत्तित्वस्य कारणताघटकप्रत्यासत्तित्वं तद्रूप्रत्यासत्त्याभावाच्च न प्रतिबन्धकोत्पत्तिकाले कार्यमिति प्रत्युक्तम् । रासभादेरपि घटकालवृत्तित्वप्रत्यासत्त्या घटादिकं प्रति कारणप्रसङ्गाद् एवं प्रतिबन्धकाभावस्य कारणत्वं दुर्वचमिति शक्तिसत्त्वे कार्यं तद्भावे कार्याभाव इत्यवसेयमिति ।

एवंवह्नेरेतद्वह्निसमवेतगुणकर्मसामान्यभिन्ननिरवयवधर्मसमवायवह्नित्वा[3]-देस्तदन्यवह्निवदित्यनुमानात्पक्षधर्मतबलात् शक्तिसिद्धिरिति वदन्ति । एवं तृणारणिमणीनामननुगतानां वह्नित्वावच्छिन्नं प्रति कारणत्वमनुगतैकशक्तिमत्त्वं विना न सम्भवतीति तदन्यथानुपत्त्याऽपि शक्तिसिद्धिः[4] । [5]न च तृणादीनां वह्नित्वावच्छिन्नं प्रति न कारणत्वं व्यभिचारात् । किन्तु वह्नित्वावान्तरजात्य-वच्छिन्नं प्रत्येवेति वाच्यम् । [6]तादृशजातेस्तृणादिजन्यतावच्छेदकतया

1. कार्यकारणवृत्तित्वस्य - क मातृकायाम्
2. कार्यकालवृत्तित्वं - क मातृकायाम्
3. वाह्नित्वादेतदन्यवह्निवत् ।
4. इति वदन्ति - योगः ।
5. एवं तृणारणिमणी नामननुगतानां वह्नित्वावच्छिन्नं प्रतिकारणत्वमनुगतैकशक्तिमत्त्वं विना सम्भवतीति तदन्यथाऽनुपपत्त्यापि शक्तिसिद्धिः । - योग
6. अदृशजातेः

तृणादिकारणताग्रहात्पूर्वं तद्ग्रहासम्भावाद् वह्निसामान्यार्थिनस्तृणादौ प्रवृत्त्यनापत्तेश्च। [1]एवं दोहदादीनां वृक्षादौ शक्तिविशेष एव जन्यते। तथा "ताम्रमम्लेन शुद्ध्यती" त्यादौ ताम्रमम्लसंयोगाच्छून्यरुपशक्तिमद् भवतीति वाक्यार्थ:। स चाम्लसंयोगेनाम्ले काश्चन शक्तिविशेषो जन्यते, स एव शुद्धपदार्थ: ।स च मल संयोगादिना नश्यति। न त्वम्लादिसंयोगध्वंसशुद्धिभावत्वेन प्रतीयमानत्वात्, ध्वंसस्यानन्तत्वेन मलसंयोगदशायामपि तदापत्तेश्च। न च समानकालीनयावच्छौचापादकप्रागभावविशिष्टाऽम्लादिसंयोगध्वंस एव, तथा मलसंयोगे जातेतत्प्रागभावस्य नाशादम्लादिसंयोगध्वंसस्य तथात्वमिति वाच्यम्, गौरवादशौचापादका[2]ननुगमाच्च।

एवञ्च प्रतिष्टया देवतादौ शक्तिविशेषो जन्यते। स एव पूजनसंस्कारादिहेतु:। न च स्वसमानकालीनया[3]वदस्पृश्यप्रागभावविशिष्टं[4] प्रतिष्टितध्वंस एव तथेति वाच्यम्, उक्तदोषत्वात्। प्रागभावविशिष्टस्य तदधिकरणकालवृत्तित्वरूपत्वेन तदधिकरणमहाकालवृत्तिध्वंसस्याशौचदशायामपि सत्त्वेनातिप्रसञ्जकत्वाच्च। एवं ब्रीहीन् [5]प्रोक्षतीत्यादौ प्रोक्षणादिना ब्रीह्यादौ शक्तिविशेषो जन्यते। अन्यथापत्तेस्तस्याश्च [6]सम्बन्धान्तराभावात् सिध्यति। शक्तिर्नापह्नोतुं शक्यते। तस्याश्च सम्बन्धान्तराभावात्स्वरूपमेव सम्बन्ध:, न समवाय:, तस्या: सर्वपदार्थप्रतियोगित्वेनाभावसामान्यादौ शक्त्यभावप्रसङ्गात्। [7]अभ्युपगमेनाप्यभावे वह्निरेतद्वह्निसमवेतगुणकर्मसामान्यभिन्ननिरवयवत्वधर्मसमवायो वह्नित्वादित्यनुमाने समवायीतिपदं सम्बन्धमात्रपरम्।

यत्तूक्तम् - प्रमाणबलेन सर्वपदार्थसाधारणशक्तिसिद्धौ तद्वृत्त्यान्यथानुपपत्त्या समवायोऽपि सार्वत्रिक एव कल्पते इति। तन्न। समवायस्य भावमात्रवृत्तित्वाभ्युपगमेऽप्यभावे तद्वृत्तित्वाभ्युप गमस्यात्यन्तमसम्भावितया

---

1. एवं दोहदादीनां --- न च समानकालीन
2. अनुगतात्। - क मातृकायाम्।
3. यावदसुखस्पर्शादि - क मातृकायाम्
4. प्रतिष्ट:
5. प्रोक्षतीत्यादौ - क मातृकायाम्
6. तथागमवशात्सिध्यन्ती:
7. अनुमानेनेयं समवायो - नास्ति

समवायिकारणनाशा[1]ऽसमवायि कारणनाशयोरेकशक्तिमत्त्वेन न द्रव्यं नाशं प्रति कारणत्वं तत्र शक्तौ समवायाभावात्। [2]तस्याः सर्वपदार्थवृत्तित्वेन [3]द्रव्यादिप्रसिद्धपदार्थान्तर्भावादतिरिक्तत्वम्।

एवं भूतल घटाभाववत् भूतले घटाभावः इत्यभाव भूतलयोः वैशिष्ट्यं प्रतीयते। तच्च न स्वरूपसम्बन्धविषयः समवायोच्छेदप्रसङ्गात्। तेनेह भूतले घटाभाव इति प्रतीतिरसाधारणसम्बन्धनिमित्तका यथार्थेहप्रत्ययरूपत्वात्, कुण्डे वदरमिति प्रतीतिवत्। न चानुकूलतर्काभावः विशिष्टप्रतीतेः सम्बन्धं विनानु[4]पपद्यमानत्वेन तस्यैवानुकूलतर्कत्वाद् विपक्षबाधकश्चेति समवायासिद्धिप्रसङ्गः।

एवञ्च वैशिष्ट्यं सिध्यदुक्तपदार्थेषु अनन्तर्भावादतिरिक्तमेव। एवं चैत्रमैत्रसदृश इति सर्वषां प्रतीतिविषयतया सादृश्यमनुभूयते। तच्च न तद्गतभूयोधर्मवत्त्वं तन्निष्टधर्माणामन्यत्राभावात्। न च तद्वृत्तिधर्मवृत्तिजातिमद्भूयधर्मवत्वमेव सादृश्यम्, [5]चैत्रमैत्रवृत्तिर्यो धर्मः शुक्लादिगुणस्तद्वृत्तिर्या जातिः शुक्लत्वादिः तत्तच्छुक्लरूपं मैत्रस्य सादृश्यमिति वाच्यम्, इदं ज्ञानमेतज्ज्ञानसदृशमिदं रूपमेतद्रूपसदृशमिति प्रतीत्यानापत्तेः, गुणवृत्तिजातिमद्धर्माभावात्, घटत्वमेव तयोः सादृश्यमित्यादिव्यवहाराभावाच्च। तस्मात्सर्वपदार्थवृत्तित्वेनानुभूयमानत्वाद् गुणादिष्वनन्तर्भावात्पदार्थान्तरमेव सादृश्यम्।

संख्यायारपि गुणादिवृत्तित्वेन प्रतीयमानत्वात्पदार्थान्तरमेव। न च गुणादावेकार्थसमवायात् प्रतीतिरिति वाच्यम्, चतुर्विंशतिर्घटा इति प्रतीत्यपेक्षया चतुर्विंशतिर्गुणा इति प्रतीतेः वैलक्षण्याभावात् न च विषयवैलक्षण्यं[6]प्रयत्नवैलक्षण्यमिति वाच्यम्, [7]अथेति एवं धिया भेद इति व्युत्पत्तेः। किञ्च एकार्थसमवायस्य विशिष्टबुद्धिजनकत्वे घटत्वादावपि द्वित्वादिविशिष्टप्रत्ययापत्तिस्तस्मादपि पदार्थान्तरमेव।

1. अनुमानेनायं - क मातृकायाम्
2. नाशा समवायिकारणनाशा --- प्रतिकारणध्वे
3. तस्य - क मातृकायाम्
4. द्रव्यादिप्रसिद्ध्यपदार्थान्तर्भावात्।
5. अनुपपधमानत्वे - क मातृकायाम्।
6. चैत्रवृत्तिधर्मः।
7. प्रतीत्यो वैलक्षण्यं

पदार्थोपसंहार:

एवञ्चाधारत्वादिकमपि पृथक् पदार्थान्तरमेवेति । सत्वादीनां तेषामुद्देश: कथनकृत इत्यत आह-

(मू) एवं धर्मैर्विना धर्मिणामुद्देश: कृत: ।

एवमिति । एवमुक्तेन क्रमेण धर्मैर्विना धर्मिणां धर्मा एव परं [1]नोद्दिष्टा धर्मिण: सर्वे उद्दिष्टा एव । [2]अतिरिक्तत्वेन शङ्कितेन[3]पदार्थानामेष्वन्तर्भावादिति भाव: । उद्देश्यपदं च जिज्ञासानुकूलशब्दप्रयोगमात्रपरम्, तेन सामान्यादीनां लक्षणकरणेऽपि न दोष: । तथाहि सत्वं नाम यद्व्यतिरेके यथेष्टविनियोग-विषयत्वा[4]निर्णयस्तद्विषयत्वम्, तच्च स्वसमानकालीनयावत्क्रियादिप्राग-भावविशिष्टक्रियादिध्वंस: । एवञ्च पितृमरणमपि सत्वनिरूपकताघटकसम्बन्धेन यावद्विक्रियादिप्रागभावविशिष्टं [5]पित्र्यद्रव्येषु वर्त्तत इति भवति । तत्र पुत्रस्य सत्वमिति । क्रियादिकञ्च सत्वाद्यघटितं वैशिष्ट्योपादेयम् । उद्यत्कीर्त्तन-पूर्वकधर्मशास्त्राभ्यनुज्ञातद्रव्यविनियोगोपायत्वं क्रयत्वम् । [6]परेण स्वकीय-विनियोगाऽविषयत्वेनोद्दिष्टस्य द्रव्यस्य विनियोगहेतुमतो व्यापारविशेषत्वम्, प्रतिग्रहत्वनित्यादिरूपेण सत्त्वाद्यघटितमेव क्रियादिलक्षणं कर्त्तव्यम् । नन्वेवं सत्वस्याभावत्वापत्ति: । किञ्च सत्वस्य पदार्थान्तरत्वे गुणादौ तदनुत्पत्त्यापत्ति: इष्टापत्तेश्च [7]तथात्वासत्वेनैवातादृशध्वं साधिकरण [8]समवायसम्बन्ध एव तथा ज्ञातिमरणादावपि तदुत्तरसमवायसम्बन्धस्य द्रव्यवृत्तित्वात्, तदनन्तरं तत्र सत्वापत्ति: । किञ्च [9]सत्वस्य पदार्थान्तरत्वे गुणादौ तदनुपपत्त्यापत्ति: । समवायिकारणाभावात् न च गुणादिकमेव तत्र समवायकारणमिति वाच्यम्, [10]अत्यन्ताप्रसिद्धतापातात् । एतेन शक्त्यादिकमपि व्याख्यातम् ।

---

1. नोद्दिष्टधर्मिण: - क मातृकायाम्
2. अतिरिक्तत्वेनाशक्तीनां - क मातृकायाम्
3. पदार्थानामेष्यन्ति भावात् इति भाव: ।
4. निश्चयस्तत्त्वं
5. पित्राद्रव्येषु
6. परेण - नास्ति - क मातृकायाम्
7. तथात्वसहने वा
8. समय
9. सत्त्वस्य पदार्थान्तरत्वे गुणादौ तदनुपपत्त्यापत्ति: - नास्ति । क मातृकायाम्
10. अत्यन्तमपसिद्धान्तापत्ति: ।

न चैव गुणवृत्तिसत्त्वे गुणसमवायिकारणं समवायिकारणमिति वाच्यम्, तथा सति तस्य गुणसमवायत्वानुपपत्तिः ।

यत्तु देवतानां क्रयप्रतिग्रहाद्यभावात् तद्ध्वंसान्त तेषां सत्वं स्यादिति तत्र तेषां [1]सत्वाभावेऽपि परकीयवि[2]नियोगविषयमात्रेण [3]शिवसत्वव्यवहारः । अतिरिक्तसत्वा[4]दिवादिमतेऽपि क्रियादे[5]स्तदुत्पादकत्वे न तदभावेन सत्वाभावेन तेनाप्येवाभ्युपगममानत्वाच्च । क्रियादिध्वंस इत्यादिपदेन धर्मशास्त्राभ्यनुज्ञात-द्रव्यमात्रोपायपरिग्रहः ।

न चैवं ब्राह्मणादीनां [6]कृष्यादार्जिते सत्वं न स्यादिति वाच्यम्, कृष्यादप्यापत्तौ ब्राह्मणादिकर्तृकत्वेनाभ्यनुज्ञातत्वात् । एवञ्च सज्जातिरप्रतिग्रहत्वे शास्त्रानुज्ञातत्वात्तदर्जितेऽपि न सत्वव्याघातः । चौरस्य स्वामित्वाद् भावे धनमस्वामिनि विक्रीतं पूर्वस्वामित्वं समाप्नुयादित्यादावपि हतद्रव्यस्याऽ-पूर्वस्वामित्वानुपपत्तेश्चौर्यादिकमपि सत्वापादकमिति वाच्यम्, तत्राकार्यपदेन विहितिनिषिद्धेतरस्योपादानात्, पूर्वस्वामीत्यत्रोपपदस्यैकमात्रत्वादिति । अत [7]एवास्वामीत्युक्तम् । एवञ्च तत्तद्ध्वंसविशेषस्तत्तत्समवायसम्बन्धो वा सत्वमिति नातिरिक्तपदार्थसिद्धिः । वह्न्यादावपि कार्यानुकूलतया नातीन्द्रियधर्मसिद्धिः । क्वचित् कार्याभावस्य प्रतिबन्धकाभावरूपकारणविरहादेवोपपत्तेः । अत्र प्रतिबन्धकाभावस्य तत्तन्मण्याद्यभावत्वेन कारणत्वम् । न प्रतिबन्धकाभावे-नोक्तदोषापत्तेः । अत्र च विरोधिताघटकसम्बन्धावच्छिन्नप्रतियोगिताकत्वं विशेषणम्, तेनोत्तेजक प्रतिबन्धकोभयसत्वेऽपि तत्र प्रतिबन्धकस्याविरोधि-त्वान्निरूक्तसम्बन्धावच्छिन्नप्रतियोगिकस्तद्भावो वर्त्तते इति न व्यभिचारः । मणित्वाद्यवच्छिन्नत्वमपि प्रतियोगितायां निवेशनीयम् । तेन विशिष्टाभावा-दिव्युदासः । प्रतिबन्धकोत्पत्तिकाले कार्यानुत्पादस्तु क्वचित्प्रतिबन्धकसामग्र्या-प्रतिबन्धकत्वं कल्पनीयम् ।

---

1. स्वत्वाभावेऽपि
2. विनियोगाविषय
3. शिवस्वत्वादि ---
4. मत्त्वे - क मातृकायाम्
5. तनुत्पादकत्वे - क मातृकायाम्
8. कृष्याद्यर्जिते - क मातृकायाम् ।
7. एव स्वामीत्युक्तम्
8. विरोधिताधारक

क्वचित्प्रतिबन्धकाभावकारणतायां कार्यकालवृत्तित्वस्य प्रत्यासत्तित्व-कल्पनायोपपादनीयम्, तेन सिद्ध्यभावस्य तया प्रत्यासत्त्या कारणत्वाभावेऽपि न क्षतिः। नियतान्वयव्यतिरेकानुविधानबलेन क्वचिदेव तथाकल्पनात्। कार्यानुत्पादस्य कादाचित्कत्वेन तदुपादकशक्तिकल्पनमुक्तानुमान ञ्चानुकूल-तर्काभावप्रयोजकम्, कारणत्वमपि न शक्तिविशेषो मानाभावात्, तथाप्रतिषिद्ध-त्वात्, किन्तु कार्याभावव्याप्यभावप्रतियोगित्वम्। व्याप्तिश्च कालिकी, तेन दण्डादौ नाप्रसङ्गः। आकाशाभावस्य घटाद्यभावाव्याप्यत्वेन न तत्र [1]घटाकारणत्वापत्तिः। विलक्षणसम्बन्धविशेषणव्यापकतया विवक्षितत्वात्। तेन च सम्बन्धेनाकाशाभावस्य शब्दाभावं प्रति व्याप्यत्वमिति स्वसमवेत-शब्दादावाकाशस्य कारणत्वम्।

[2]घटाद्यभावं प्रति तदभावस्तेन सम्बन्धेन व्याप्ये न भवतीति न तस्य घटाद्यकारणत्वमिति। वस्तुतस्तु कार्याभावाप्रयोजकाभावप्रतियोगित्वं कारणत्वम्। प्रयोजकत्वञ्च इदमेतस्य प्रयोजकमिति प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः। दण्डाभावे च घटाभावः प्रयोजकत्वाद् दण्डे पटकारणत्वं न[3]रासभाकाशदण्डादौ। तदभावस्य घटाभावप्रयोजकत्वाभाावात्। शब्दाभावे आकाशाभावस्य प्रयोजकत्वमिति भवति तस्य कारणत्वम्।

यत्त्वन्यथासिद्धनियतपूर्ववर्त्तित्वमेव तत्, [4]यत्त्वन्यथासिद्धत्वेन तद्विशेषणीयम्। अन्यथासिद्धिश्च त्रेधा, येन सहैव यस्यान्यं पूर्ववर्त्तित्वं गृह्यते, तत्तेनान्यथासिद्धम्। यथा दण्डेन दण्डत्वरूपादिकम्। [5]यस्याकाशस्यार्थं प्रति शब्दं प्रति पूर्ववर्त्तित्वं गृहीत्वैव अन्यं प्रति घटं प्रति पूर्ववर्त्तित्वं गृह्यते, यस्यान्यं प्रति पूर्ववर्त्तित्वं गृह्येत; तत्तेन तथा। यथा घटपाकस्थले रूपादिकं प्रति शब्दप्रागभावादिति, तेनाकाशादावतिव्याप्तिरिति चेत्, न। सर्वेषामन्यथासिद्धानां पूर्वत्वघटिततया तस्य तत्प्रागभावावच्छिन्नसमयवृत्तित्वरूपतया [6]प्रागभावस्य

1. घटत्वाकारणत्वापत्तिः - क मातृकायाम् 2. घटाद्यभावं प्रति - घटाद्यकारणत्वमिति - नास्ति
3. नासत्ताकाशादौ - क मातृकायाम् 4. यत्त्वन्यथासिद्धं - क मातृकायाम्
5. यस्या अन्यं प्रति पूर्ववर्तित्वं गृह्यते - क मातृकायाम् 6. प्रागभावत्वस्य

प्रतियोगिजनकाभावत्वरुपतया कारणलक्षणे चक्रकापत्तेः । न च [1]विनयाभावत्वेन प्रागभावस्य तत्र प्रवेश इति तत्र वाच्यम्, विनाशित्वस्य विनाशरुपाजनकत्वेऽ-ऽत्माश्रयापत्तेः, प्रतियोगित्वस्याप्यत्र [2]जनकतापर्यवसानात्, दण्डत्वादिवदीश्वर-ज्ञानादेरप्यन्यथासिद्ध्यापत्तेः कारणत्वाभावप्रसङ्गाच्च । किञ्च भ्राम्यादिकं प्रति पूर्ववीर्त्तित्वं गृहीत्वैव दण्डादेर्घटपूर्ववर्त्तित्वमिति भ्राम्यादिना दण्डादेरन्यथासिद्ध-त्वेनाकारणत्वापत्तिः । न च व्यापारेण [3]व्यापारिणोऽन्यथासिद्धिरिति वाच्यम्, तन्मन्त्रपाठस्य प्रमाणाभावेनाप्रयोजकत्वात् । किञ्च शब्देनान्यथासिद्धत्वाद् घटादाविव स्वसमवेतसंयोगादावप्याकाशस्याकारणत्वापत्तिरिति वाच्यम्, सर्वत्रान्यथासिद्ध्यैवातिप्र[4]सङ्गनिराकरणेनाविशिष्टद्वयवैय्यर्थ्यत्वाच्च [5]नियत-पदवैय्यर्थ्याच्च नियतपदस्य प्रयोजनासम्भवात् । तेन कारणत्वरूपतया न शक्तिसिद्धिः ।

यत्तु तृणादीनामेककार्यजनकतयैकधर्मसिद्धिरिति [6]तदपि मन्दम् । तज्जन्यवह्नीनां [7]तृणत्वादिवैलक्षणस्यानुभवसिद्धत्वेनै ककार्यजनकत्वाभावात् । एवञ्च दोहदाद्यवयवसम्बन्धविशेष एवं [8]तत्तत्कालमनुवर्त्तमानस्त [9]त्तत्फल-विशेषहेतुरिति । एवञ्च कामिनीचरणाभिधातध्वंस एव [10]तत्पुष्पविशेषहेतुरिति । स च समयविशेषावच्छिन्नं फलविशेषहेतुरिति । एवञ्चाशौचापादकव्यक्तिः प्रातिस्विकरूपेणादाय यावत्तत्संसर्गाभावविशिष्टाम्लादिसंयोगध्वंसाधिकरण-समवायसम्बन्धः शौचम् । [11]स्वसमानकालीनयावदस्पर्शस्पर्शादिप्रागभाव-विशिष्टप्रतिष्टाध्वंसाधिकरणसमवाय सम्बन्धप्रतिष्टापूजानमस्कारादिहेतुः, व्रीहीन् प्रोक्षति, स्रूचः [12]सम्माष्टीत्यादौ तत्प्रयोगकालावच्छिन्नप्रोक्षणादिध्वंस-

1. विनश्वभावत्वेन क - मातृकायाम्
2. जनकत्वपर्यवसानादण्डत्वादिवदीश्वरज्ञानादेरप्यन्यथासिद्ध्यापत्याकारणत्वाभावप्रसङ्गात् ।
3. व्यापारिणो नान्यथासिद्धिरिति.
4. प्रसङ्गातिरेकण - क मातृकायाम्
5. नियतपदवैययर्थ्याच्च नियतपदस्य प्रयोजनासम्भवात् नास्ति - क मातृकायाम्
6. तदप्यन्यम् - क मातृकायाम्
7. ताण्डवत्वादि
8. तत्काल - क मातृकायाम्
9. तत्कालविशेषहेतुः -क मातृकायाम्
10. तत्तत्कालपुष्पादिहेतुः - क मातृकायाम्
11. समानकालीन - क मातृकायाम्
12. समष्टीत्यादौ - क मातृकायाम्

स्तत्तदपूर्वप्रयोजक इति न कुत्राप्यतिरिक्तशक्तिसिद्धिः ।

[1]सादृश्यमपि स्ववृत्तिधर्मत्वम्, साजात्यस्य तद्वृत्तिधर्ममात्रम्, न तु तत्तद्वृत्तिजातिमत्त्वम्, तेन गुणादावपि गुणान्तरसादृश्योपपत्तिरिति नातिरिक्तशक्तिसिद्धिः ।

अधिकरणाभावयो: वैशिष्ट्यञ्च स्वरूपसम्बन्धविशेषो न पदार्थान्तरम् । विशिष्टप्रतीतेश्च स्वरूपेणैवोपपत्तेः भूतलादीनामननुगतत्वादभावस्य चैकरूपत्वात्। वैशिष्टस्मभावस्वरूपमेव, तत्र विशेषणत्वं सम्बन्धत्वं प्रकारभेदेनेति वाच्यम् । तदनुपपन्नम् । [2]अतिरिक्तसमवायसिद्धिश्च धर्मधर्मिणोरन्यतरस्याप्यनुगताभावात् । संख्यापि गुण एव । कर्मण्यन्यत्वे सत्यसमवायिकारणजातीयत्वात् । एकत्वस्य कर्मभिन्नस्य द्वित्वादिकं प्रति असमवायिकारणत्वम् । गुणत्वं विना न सिध्यत्तत्तत्सजातीये सर्वत्र गुणत्वं व्यवस्थापयति, न चैकत्वस्य द्वित्वाद्यसमवायिकारणत्वमसिद्धमिति वाच्यम् ।

भावकार्यमात्रस्याऽसमवायिकारणजन्यत्वनियमेन संख्यान्यस्य समयायि यिकारणस्य तत्राभावेन परिशेषात्तत्सिद्धेः । क्वचिद् गुणादौ संख्यादिप्रत्ययश्चारोपात् । न च घटत्वादावपि द्वित्वादिप्रत्ययप्रसङ्गः इति वाच्यम्, आरोपे सति निमित्तानुसरणमितिन्यायात् । तेन सत्वादीनामुक्तपदार्थविभाजकोपाधिव्याप्यतया तदुद्देश्येनैवादेश कृत इति न तेषां पृथगुद्देशः इति भावः ।

साधर्म्य प्रकरणम्

किञ्च तेषां साधर्म्यमिति प्रश्नानुरोधेन पदार्थोद्देशानन्तरं साधर्म्यं निरुपयति-

(मू०) षण्णामपि पदार्थानामस्तित्वज्ञेयत्वाभिधेयत्वानि । आश्रितत्वञ्च अन्यत्र नित्यद्रव्येभ्यो ।

---

1. अस्मिन् स्थाने - सादृस्यमपि स्ववृत्तिधर्मसजातीयतत्तद्धर्मत्वसजात्यं च तत्तद्वृत्तिधर्मवृत्ति मात्र
2. अतिशक्तिसमवायसिद्दिश्च - का मातृकायाम।

षण्णामिति। यद्यपि साधर्म्यमपि पदार्थोद्दिष्टमपि तस्य पदार्थैकरूपत्वात्तथापि शिष्यसुखप्रतिप्रत्त्यर्थं धर्मत्वपुरस्कारेणैव पृथगुच्यत इत्यदोषः। पदार्थानामित्यनेनैव सामञ्जस्यं षड्ग्रहणमभावव्यावृत्त्यर्थम्। अपिरभिव्याप्तौ, [1]समुच्चयार्थान्तराभावात्। यद्यप्य[2]स्तित्वधीविषयत्वमभावेऽतिव्याप्तम्, तथापि प्रतियोगिज्ञानाजन्यस्वमात्रवृत्तिधर्म प्रकारकज्ञानविषयत्वं विवक्षितम्। प्रतियोगित्वं विरोधित्वम्, तेन संयोगादौ नाव्याप्तिः। अभावे प्रमेयत्वप्रकारकज्ञानं यद्यपि प्रतियोगिज्ञानजन्यम्, तथापि तन्न। स्वमात्रवृत्तिधर्मप्रकारकमिति न तत्राऽतिव्याप्तिः। अभावस्य भावव्यावृत्तधर्मरूपतया प्रकारकमिति ज्ञानं भावादिरूपप्रतियोगिज्ञानजन्यमेवेति द्रष्टव्यम्।

यत्तु सम्बन्धान्यत्वे सति सविकल्पकसत्ताविषयत्वं तत्त्वम्, तदा आकाशादावव्याप्तम्, तेषामतीन्द्रियत्वेन सविकल्पकवेद्यत्वात्तदर्थं प्रकारान्तरानुसारेण गौरवात्। ज्ञेयत्वं ज्ञानविषयता, तच्च भगवज्ज्ञानाय सर्वदा सर्वेषामस्तीति नाव्याप्तिः शङ्का।

अभिधेयत्वं शब्दशक्तिविषयत्वम्। अस्माच्छब्दादयमर्थो बोधव्य इतीश्वरेच्छा। यद्यप्येतद्द्वयमभावेऽतिव्याप्तम्, तथापि भावत्वेनेदं द्वयं विशेषणीयमिति न दोषः। अन्यथा षड्ग्रहणस्याभावव्यावृत्ताऽस्तित्वलक्षणानुधावनस्य च वैय्यर्थ्यापत्तेः।

एषामेकदेशव्यावृत्तसाधर्म्यमाह-आश्रितत्वमिति। नित्यद्रव्येभ्योऽन्यत्र षट्सु पदार्थेष्वाश्रितत्वमित्यर्थः। आश्रितत्वं समवायेन सम्बन्धेन [3]वृत्तिमत्त्वञ्च, तच्चानित्यद्रव्याणामवयवद्रव्येषु गुणानां द्रव्यमात्रे, कर्मणां मूर्त्तद्रव्येषु सामान्यस्य द्रव्यत्रये, विशेषाणां नित्यद्रव्याणां नित्यद्रव्येषु समवायायुतसिद्धेषु यथायथं बोध्यम्।

न समवायस्य समवायान्तराभावात्कथं तस्य समवायेन वृत्तित्वमात्रमिति वाच्यम्, तस्य समवायान्तराभावेऽपि स्वरूपसम्बन्धेन वृत्तित्वात्, स्वरूपस्य समवायातिरेकात्, [4]तेषां परमाणूनां संयोगसम्बन्धेन वृत्तिमत्त्वेऽपि न क्षतिः।

---

1. समुच्चयान्तराभावात् - क मातृकायाम्
2. अस्तित्वमस्तीतिधीः
3. वृत्तित्वं- क मातृकायाम्
4. तेन

यत्तु समवायसमवेतभिन्नभावत्वमाश्रितत्वं नित्यद्रव्याणां समवायित्वे[1] रूप्यसमवेतत्वेन तद्भिन्नभावस्य तदन्यमात्रे सिद्धत्वादिति । यद्वा संयोगान्यसम्बन्धेनावृत्तिस्तद्भिन्नभावत्वं वा तदिति चेद् । तन्न । तदक्षरत्वात् । नित्यद्रव्याणि विहाय नित्यद्रव्या[2]न्यत्वमित्यर्थपर्यवसाने उद्देश्यविधेययोरभेदपाताच्च । द्वितीये च परमाण्वादीनामपि स्वरूपसम्बन्धेन वृत्तिमत्त्वात् संयोगान्यसम्बन्धेनावृत्तिमत्त्वमसिद्धम् ।

उक्तसमुच्चयान्तराभावादनुक्तसमुच्चयार्थश्चकारः । तेन मूर्त्तद्रव्याणि विहायान्यत्रभावमात्रे रूपातिरिक्तसम्बन्धेन स्वान्यजनकतावच्छेदकधर्माभाववत्त्वरूपनिष्क्रियत्वम् । तेनाभावे निष्क्रियविनष्टे च द्रव्ये नातिव्याप्तिः । अभावस्य स्वरूपसम्बन्धेन तद्वा तद्वत्वादद्वितीये [3]स्पन्दनजनकतावच्छेदकतावच्छेदकस्य परिमाणविशेषस्य वाऽसम्भवात् ।

यत्तु कर्मवद्वृत्तिद्रव्यत्वव्याप्यव्याप्यजातिशून्यभावत्वमिति । तन्न । तत्र यद्यपि यत्किञ्चित्कर्मवद्वृत्तिव्याप्याजात्यभावस्तदापृथिव्यादावतिव्याप्तिः । तत्र जलत्वाद्यभावसत्त्वात् तादृशजातित्वावच्छिन्नप्रतियोगिताकाभावस्तु गुरूधर्मस्यानवच्छेदकत्वादेवाप्रसिद्धिः । एवमिन्द्रियवृत्तिद्रव्यत्वव्याप्यजातिशून्यत्वमित्यत्रापि द्रष्टव्यम् । एवं विभुद्रव्याणि विहाय नित्यमहत्त्वानधिकरणभावत्वमित्यादि द्रष्टव्यम् ।

समवायान्तानां सर्वेषां साधर्म्यमाह-

(मू) द्रव्यादीनां पञ्चानामपि समवायित्वमनेकत्वञ्चेति ।

द्रव्यादीनामिति । समवायित्वं समवायनिरूपकत्वम् । सामान्यविशेषयोरपि स्ववृत्तितानियामकसमवायनिरूपकत्वात्तदव्याहतम् । यत्तु समवायित्वं समवेतत्वम्, तच्च नित्यद्रव्येषु अव्याप्तमिति समवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वम् । तत्र पदार्थविभाजकोपाधिपदं भावपदार्थविभाजकोपाधिपरम् । [4]अन्यथापरत्वमादाय समवायेऽतिव्याप्तेः । अनेकत्वञ्च

1. सत्यसमवेतत्वेन
2. न्यत्वपर्यवसाने - क मातृकायाम्
3. स्वान्यजनकता --- क मातृकायाम्
4. अन्यथाभावत्वमादाय - क मातृकायाम्

स्वविभाजकोपाधिव्याप्यधर्मावच्छिन्नभेदवत्त्वम् । समवाये च स्वविभाजकोपाधेः समवायत्वस्य व्याप्यधर्मभावान्न तत्राऽतिव्याप्तिः । घटसमवायत्वादीनां घटसमवायत्वानतिरिक्तत्वात् ।

यत्तु स्वाश्रयप्रतियोगिकान्योन्याभावसमानाधिकरणपदार्थविभाजकोपाधिमत्त्वमिति तत्स्वाश्रयाणामननुगतत्वात् [1]दुर्निरूपणम् । अनेकत्वं स्वरूपभेद इति मूलाननुगतमपि द्रष्टव्यम् । चकारादसमवेतमात्रवृत्तिपदार्थविभाजकोपाधिशून्यत्वम् । एकपदार्थमात्रवृत्तिपदार्थविभाजकोपाधिशून्यत्वमित्यादिकं द्रष्टव्यम् ।

द्रव्यातिरिक्तानां साधर्म्यमाह-

(मू) गुणादीनां पञ्चानामपि निर्गुणत्वनिष्क्रियत्वे ।

गुणादीनामिति । निर्गुणत्वे गुणात्यन्ताभावः । निःसंसर्गाभाव-[2]मात्रबाधकत्वेप्यऽत्यन्ताभावे लक्षणा । अन्यथा गुणध्वंसप्रागभाववति द्रव्येऽतिव्याप्तेः । न चैवमपि निर्गुणविनष्टेऽतिव्याप्तिरिति वाच्यम्, तत्र मानाभावात् । भावो वा गुणवदवृत्तिपदार्थविभाजकोपाधिमत्त्वं विवक्षितमिति न तत्रातिव्याप्तिः । एवं निष्क्रियत्वमित्यत्रापि कर्मवदवृत्तिभावविभाजकोपाधिमत्त्वं विवक्षितमिति निष्क्रियविनष्टे विभुद्रव्यञ्च नातिव्याप्तिः ।

[3]त्रिकस्य साधर्म्यं क्रमेणाह । द्रव्यादित्रिकस्य साधर्म्यमाह -

(मू) द्रव्यादीनां त्रयाणामपि सत्तासम्बन्धः, सामान्यविशेषवत्त्वं, स्वसमवायार्थशब्दाभिधेयत्वं, धर्माधर्मकर्त्तृत्वञ्च । कार्यत्वानित्यत्वे कारणवत्तामेव । कारणत्वञ्चान्यत्र पारिमाण्डल्यादिभ्यः । द्रव्याश्रितत्वञ्चान्यत्र नित्यद्रव्येभ्यः ।

द्रव्यादीनामिति । सत्तेति । नन्वेकार्थसमवायादिभिः सत्तासम्बन्धः सामान्यादिषु वर्त्तत एव । अन्यथा [4]सामान्यं सदिति प्रत्ययानापत्तेः । तत्कथं द्रव्यादित्रयस्यैवेतत्साधर्म्यमिति चेत् । न । सम्बन्धपदेन साक्षात् समवायस्य

1. दुनिरूपणम् - क मातृकायाम्
2. वोधकत्वेप्यत्यन्ताभावे - क मातृकायाम्
3. तर्कस्य
4. सामर्थ्यं

विवक्षितत्वात् । सत्ता च द्रव्यत्वादिव्याप्तिका जाति: तथा प्रतिपादितमधस्तात् । सामान्यविशेषद्रव्यत्वपृथिवीत्वादय: तद्वत्त्वं तत्समवाय: । स्वसमवायेन वैशेषि[1]कसङ्केतितार्थशब्देनाभिधेयत्वम् । यद्यप्यर्थशब्दोऽर्थतो ''ज्ञायते असावर्थ इति व्युत्पत्या ज्ञेयमात्रवचनकस्तथापि वैशेषिकपरिभाषया नि[2]रूपपदस्यार्थ-शब्दस्य द्रव्यादित्रयवाचित्वम् । [3]परिभाषा च तेषां व्यवहारलाघवाय, सत्ता च परिभाषाया: निमित्तमिति वक्तृतात्पर्यवशात्क्वचिदर्थशब्देन त्रयोऽभिधीयन्ते । क्वचित्प्रत्येकमिति । योगशासने मिलित ,एव ध्यानधारणासमाधित्रिके संयमपदं पारिभाषिकं वर्त्तत इति । न तस्य प्रत्येकं प्रयोग: धर्मकर्त्तृत्वमधर्मकर्त्तृत्वमिति साधर्म्यद्वयसूचनाय चकार:। कर्त्तुत्वं जनकत्वम् ।

यद्यपि धर्मजनकत्वमेवाधर्मेण धर्मजनकत्वञ्च धर्मेऽजनितधर्माऽधर्मोभयव्यक्तौ चोभयमव्याप्तम्, तथापि धर्मजनकवृत्तिभावपदार्थ-विभाजकोपाधिमत्त्वं विवक्षितम् । भावेति करणाद् धर्माऽधर्मप्रागभावयोर्नातिव्याप्ति: पदार्थविभाजकोपाधिघटितसाधर्म्यकरणे चोभय: यत्र धर्माधर्मयोरपि [4]संग्रहाद्यत्वमेव [3]एवं गोभूहिरण्यादिदीयमानं ह्रीयमाणञ्च धर्माधर्मौ जनयति । न च तद्दानहरणे एव धर्माधर्महेतुर्नद्रव्यमिति वाच्यम्,द्रव्यनिरूपितयोस्तयोर्हेतुत्वेन निरूपकस्यापि द्रव्यस्य तत्र हेतुत्वात् । [6]दानमात्रस्य हेतुत्वे विपदनादेरपि धर्महेतुत्वं स्यात् । [7]जनकत्वम्वा प्रयोगसाधारणं ग्राह्यम् ।

गुणो गङ्गाजलचण्डालसंयोगादिधर्माधर्मरूपादृष्टस्य कर्मतीर्थयात्रा-म्लेच्छदेशगमनादि । ननु यथाद्रव्यस्य तत्तत्क्रियानिरूपकत्वेन धर्माधर्म-साधनत्वमेव सामान्यादीनामपि द्रव्यपरिच्छेदमुखेन धर्माऽधर्महेतुत्वम् । यागादे: धर्मकारणतायाञ्च समवायस्य प्रत्यासत्तित्वमिति सोऽपि तद्विधायककारणमिति ।

1. संकेतिनार्थ
2. निरुपपदस्यार्थशब्दस्य द्रव्यत्वादिति त्रय बादित्वं
3. परिभाषा च --- कर्तृत्वं जनकत्वम् - नास्ति
4. संग्रहात्वं भवत्येव
5. एवं द्रव्यं - क मातृकायाम्
6. दानमात्रस्य हेतुत्वे विपदानादेरपि धर्महेतुत्वं स्यात् ।
7. जनकत्वम्वाप्रयोजकं साधारणं ग्राह्यम् ।

निरूक्तसाधर्म्यद्वयं [1]तेष्वतिव्याप्तमिति चेद् । धर्माधर्मरूपादृष्टसाधनत्वस्य श्रोत्रैकगम्यतया सामान्यादीनाञ्च विधिनिषेधाविषयतया तद्धेतुत्वाभावात् । कथं तदुभयाविषयकत्वमिति चेत् । नित्यत्वेनाव्यापारत्वात् ।

नापि व्यापारित्वेनानित्यधर्मानाश्रयत्वाद् उभयविधिनिषेधविषयत्वे न सम्भवतीति नादृष्टहेतुत्वम्, समवायस्य प्रत्यासत्तितया उपक्षीणस्य नादृष्ट-कारणत्वम् । कारणत्वं चान्यत्र पारिमाण्डल्यादिभ्य एव, प्रागभावप्रतियोगित्वञ्च । अनित्यञ्च । भावत्वे सति ध्वंसप्रतियोगित्वम् । अत्र भावत्वाऽप्रवेशे ध्वंसस्य कार्यत्वात् त्रयाणामित्यनुवृत्तिरसङ्गता स्यात् । अकारणस्यापि प्रागभाव-स्यानित्यत्वे कारणवत्तामेवेति नियमोऽनर्थकः न स्यादिति । कारणत्वञ्चेति । पारिमाण्डल्यं परमाणुपरिमाणं तदादिर्येषां द्वयं द्व्यणुकपरिमाणादीनामादिपदेन द्व्यणुकपरिमाणनित्यमहत्त्वादिपृथक्त्वपरत्वापरत्वानि, अन्त्यावयवि[2]द्वित्व-रूपगन्धरसपृथक्त्वपरिमाणानि, विनश्वदवस्थसंयोगविभागवेगकर्माणि, अन्त्यःशब्दो भावनाख्यः संस्कारश्च गृह्यते । अन्त्यावयविस्पर्शाऽविघातं प्रति हेतुत्वान्न तस्य ग्रहणम् । एतानि विहायान्येषां द्रव्यगुणकर्मणां कारणत्वम् । निर्विषयभावकार्यं प्रति कारणत्वम् ।

एतेन योगिप्रत्यक्षस्य विषयजन्यत्वं पारिमाण्डल्यादेश्च योगिप्रत्य-क्षविषयत्वादिति मते, जायमानकारणतावादिमते च पारिमाण्डल्यस्य स्वप्रत्यक्षे लिङ्गानुमितौ च हेतुत्वादन्त्यावयविरूपंरसादीनां स्वप्रत्यक्षत्वं प्रति विषयत्वेन ध्वंसं प्रति प्रतियोगित्वेन हेतुत्वात्तद्व्युदासो नोपपद्यते । सामान्यादीनां स्वप्रत्यक्षत्वं प्रति हेतुत्वाद् ग्रहणञ्च नोपपद्यत इति प्रत्युक्तम् । तेषां स्वविषयप्रत्यक्षध्वंसं प्रति हेतुत्वात् । यद्यप्युत्पन्नविनष्टेऽव्याप्तिः योग्यता [3]चाभिन्नत्वे च पारिमाण्डल्यादाव[4]तिव्याप्तिः । एवं निर्विषयकभावकार्यत्वावच्छिन्नकार्य-तानिरुपितकारणताश्रयवृत्तिपदार्थविभाजकोपाधिमत्त्वमिति विवक्षितयाऽ-प्रसिद्धिः । तादृशकार्यतयाप्रसिद्धेः, अन्त्यावयविरूपादावतिव्याप्तिश्च । तथाप्यादिपदेन तस्यापि संग्रहान्नातिव्याप्तिरिति द्रष्टव्यम् ।

1. तेक्ष्यति व्याप्तमिति चेत् ।
2. द्वित्वरूप - क मातृकायाम्
3. गर्भकत्वे
4. अव्याप्तिः - क मातृकायाम्

यत्तु अत्रादिपदेन ज्ञानस्यापि संग्रह इति । तन्न । ईश्वरीयज्ञानस्य जन्यमात्रं प्रवृत्तिहेतुत्वात् । अस्मदादिज्ञानस्योपादानप्रत्यक्षविधेयात्तत्तदकार्यविशेषहेतुत्वा-त्तदवच्छेदानुपपत्तेः । न च ज्ञानपदं मोक्षोऽव्यवहितप्राक्काले[1] वृत्तिज्ञानपरमिति वाच्यम्, तथापि योगप्रत्यासत्तिजन्यतया सविषयत्वेनोपादानप्रत्यक्षविधया तत्र तत्र हेतुत्वात् । न च ज्ञानपदं निर्विकल्पकज्ञानपरमिति तस्य विशिष्टज्ञानं विनाऽन्यत्राहेतुत्वेन निर्विषयभावकार्यं प्रति अहेतुत्वादिति वाच्यम्, तस्य विप्रतिपन्नत्वात् । अतिरिक्तविषयतावादिमते [2]विषयतापक्षे विषयंप्रति हेतुत्वाच्च । परमाणुद्वित्वस्य द्व्यणुकपरिमाणजनकत्वात् तस्यान्त्यावयविगुणमध्ये पाठः ।

द्विपृथक्त्वादिकं सार्वत्रिकग्राह्यमिति द्रव्याश्रितत्वमिति । त्रयाणां मध्ये नित्यद्रव्येभ्योऽन्यत्र द्रव्याश्रितत्वं द्रव्यरूपसमवायिकारणजन्यत्वम् । द्रव्यसमवेतपरत्वे सामान्यविशेषयोरतिव्याप्तेः । अत्र समवायिकारणजन्यत्व-मित्येतावति वक्तव्ये द्रव्यस्यैव समवायिकारणत्वमिति समवायिकारणपदम् । नित्यद्रव्येभ्यः इत्यत्र द्रव्यपदमुपलक्षणम् । नित्यगुणानामप्यन्यत्रालक्ष्यत्वात् । चकारा[3]त्कर्मणः संयोगविभागवेगेभ्यश्चान्यत्र गुणाऽसमवायिकारणत्वम् । इदञ्च द्वित्वादिकं प्रत्येकत्वसमवायिकारणमते द्रष्टव्यम् । चकारान्नित्यद्रव्येभ्योऽ-न्यत्रजन्यत्वे सति द्रव्यनाशनाश्यवृत्तिपदार्थविभाजकोपाधिमत्त्वमिति द्रष्टव्यम् ।

अन्तिमत्रयस्य साधर्म्यमाह-

(मू) सामान्यादीनां त्रयाणां स्वात्मसत्त्वं बुद्धिलक्षण-त्वमकार्य्यत्वमकारणत्वमसामान्यविशेषवत्त्वं नित्यत्वमर्थ-शब्दानभिधेयत्वञ्चेति ॥

सामान्यादीनामिति । स्वात्मसत्त्वं स्वात्मनैव स्वरूपेणैव सत्त्वं सदितिव्यवहारजनकत्वम्, न तु सत्तायोगित्वेनेत्यर्थः । बुद्धिलक्षणत्वमिति अनुवृत्तिबुद्धिर्व्यावृत्तिबुद्धिश्चेति । बुद्ध्यो बुद्धिपदेन प्रातिस्विकरूपेणोप-

1. वृत्ति --- तया
2. विषयताविशेष
3. कर्मणः - नास्ति क मातृकायाम्

पादितव्याः। [1]ताश्च लक्ष्यत्वे जन्यते एभिरिति बुद्धिलक्षणत्वम्। तथा चानुकूलवृत्तिबुद्धिव्यावृत्तिबुद्ध्यन्तरबुद्ध्यसाधारणकारणगुणान्यभावत्वं विवक्षितम्। बुद्धिपदञ्च ज्ञानसामान्यपरम्, न प्रत्यक्षपरम्, तेन विशेषसमवाययोर्ना[2]व्याप्तिः। संयोगस्याभावस्य चेह भूतले घटाभाव इतीहेति बुद्ध्यसाधारणकारणत्वात्तत्रातिव्याप्तिवारणाय गुणान्यत्वेत्यादि।

अकार्यत्वमिति। प्रागभावप्रतियोगित्वे पदार्थविभाजकोपाधिशून्यभावत्वम्। तेन नित्यद्रव्येषु नातिव्याप्तिः। आदिमद्वृत्तिपदार्थविभाजकोपाधिमत्त्वविवक्षणेऽभावेऽतिव्याप्तिः। तद्वृत्तिपदार्थविभाजकोपाधेरभावत्वस्य भावत्वाभावरूपतया ध्वंसस्वरूपत्वेन ध्वंसवृत्तित्वाभावात्। सामान्यस्य प्रागभावप्रतियोगित्वे कार्यत्वापत्तौ व्यक्तिरेव समवायिकारणत्वं स्यात्। भावकार्यस्य समवायिकारणजन्यत्वनियमात्। तथा च तन्नाशे सति तन्नाशो वक्तव्यः। समवेतकार्यनाशं प्रति समवायिकारणनाशस्य हेतुत्वात्। तथा च प्रागुत्पत्तीदानीन्तनघटव्यक्तौ भिन्नभिन्नधर्माश्रयत्वेनाननुगतत्वात् सामान्यमेव तन्न स्यात्। न च स्वर्गाद्यकालीनतया घटव्यक्त्या घटत्वं जन्यते। [3]चरमत्वव्यक्त्या नाश्यते, [4]मध्यमवृत्तिव्यक्तिभिस्तदभिव्यज्यत इति वाच्यम्, मानाभावात्। प्रथमव्यक्तिनाशस्यानाशकत्वे चरमव्यक्तिनाशस्याप्यनाशक्यत्वाच्च। एवं नित्यद्रव्याणां कदाचिद्विशेषाभावे तद्दशायां वैधर्म्यनियतोऽन्योन्याभावस्तेषां न स्यादिति ते[5]षामैक्यापत्तावनन्तरोत्पन्नानां विशेषाणां न व्यावर्तकता स्यादिति [6]स्वरूपव्याघातः। एवञ्च समवायस्य प्रागभाावप्रतियोगित्वे [7]प्रागभावाऽप्रतियोगित्वस्वरूपसम्बन्धस्वरूपव्याघातः। अनवस्थितसमवायपरम्परासम्बन्धप्रसङ्गश्च। भावकार्यस्य समवायिकारणजन्यत्वानियमेन समवायेऽपि तथात्वापत्तेः। न च समवायिकारणं विनापि तदुत्पद्यत इति वाच्यम्, समवायो

1. नाश्च लक्ष्यन्ते नन्यन्ते एभिरिति।
2. न व्याप्तिः।
3. चरमव्यङ्गया - क मातृकायाम्-
4. मध्यमवृत्तिव्यक्तिभिस्तदभिव्यज्यात्
5. तेषमन्थापत्तौ - क मातृकायाम्
6. स्वरूपाव्यायातः।
7. प्रागभावप्रतियोगि

यदि भावत्वे सति जन्यः स्यात्समवायिकारणाजन्यो न स्यादिति तर्कविरोधेन तथोत्पादस्य वक्तुमशक्यत्वात्, ईश्वरादिषु तज्ज्ञानसमवायस्यानादित्वस्य सुव्यक्तत्वाच्च । न च तत्रापि [1]सम्बन्धत्वेनानित्यत्वमनुमेयम् अप्रयोजकत्वात्, ज्ञेयत्वादिरूपसम्बन्धे व्यभिचाराच्च । एवं घटघटत्वादिसमवायो रूपसम्बन्धो वा नित्यः, समवायादीश्वरज्ञानसमवायादित्यनुमानात्तत्सिद्धिः । न च नित्यसम्बन्त्वमुपाधिः, गगनादौ साध्याव्यापकत्वादेकसमवायसिद्धौ साधव्यापकत्वाच्चेति सिद्धमेषामनादित्वमिति ।

अकारणत्वमिति । यद्यपि सामान्यस्य स्वप्रत्यक्षं प्रति समवायस्य कर्मसंस्कारादिकार्यकारणभावप्रत्यासत्तितया तत्तत्कार्यं प्रति कारणत्वमस्त्वेव, तथापि ज्ञानान्यकार्यं प्रति प्रत्यासत्तीतरविधेयाकारणत्वाभावो विवक्षित इति नाप्रसङ्गः ।

असामान्यविशेषवत्त्वमिति । [2]सामान्यविशेषः व्याप्यसामान्यानि । अनुवृत्तिबुद्धिहेतुत्वे सति व्यावृत्तिबुद्धिहेतुर्यत्सामान्यं [3]द्रव्यत्वादितद्विरह इत्यर्थः । तत्र यदि सामान्यं सामान्यवत्स्यात्, घटादिवदनुवृत्तिबुद्धिहेतुर्न स्यादिति धर्मिग्राहकप्रमाणबलेन तस्य निःसामान्यत्वसिद्धिः । न [4]त्वनवस्थानात्, आपाद्यायाः धर्मिपरम्परायाः असिद्धत्वेन तदसिद्धेः । यत्तु यदि सामान्यवत्स्यादत्र द्रव्यादित्रयान्यतमं स्यादिति भिन्नरूपसामान्याव्यवस्था एवानवस्थेति । तत्रापि सामान्यवत्त्वमात्रेण द्रव्याद्यन्यतमत्वे मानाभावः ज्ञेयत्वादेरिव जातिमत्त्वस्यापि तत्प्रयोजकत्वे मानाभावात् ।

एवं विशेषार्यदि सामान्यवन्तः स्युरत्यन्तव्यावृत्तिवुद्धिहेतवो न स्युरिति विशेषाणां सामान्यत्वाभावसिद्धिव्यावर्त्तकत्वरूपस्वरूपव्याघातः । यत्तु विशेषार्यदि कर्मान्यत्वे सति परिमाणानामा[5]श्रयत्वे सति सामान्यवन्तः स्युर्गुणाः स्युरिति गुणत्वापत्तिः स्वरूपव्याघात इति । तन्न । सत्यपि सामान्यवत्त्वे कर्मान्यत्वे

1. सम्बन्धत्वेननित्य - क मातृकायाम् 2. सामान्यविशेषः व्याप्यसामान्यानि - क मातृकायाम्
3. द्रव्यत्वादितर्विरह - क मातृकायाम् 4. त्ववस्थानात् - क मातृकायाम्
5. आश्रयत्वे --- व्यायात् ।

सत्यसमवायिकारणत्वस्य गुणत्वजातेर्वाऽभावेगुणत्वस्यापादयितुमशक्यत्वात्। एवं समवायो यदि सामान्यवान् स्यात् समवायाश्रयः स्यादिति तर्कात्समवाया-श्रयत्वसिद्धौ समवाये समवायत्वाभावस्य प्रत्यक्षसिद्धत्वात् स्वरूपव्याघात इति [1]स्वरूपव्याघातादेव त्रिषु सामान्याभावसिद्धिः। असामान्यविशेषवत्त्वमित्य-त्रासामान्यवत्त्वमित्येव साधर्म्यं विशेषणग्रहणमुपलक्षणार्थमिति, व्याख्याने सत्ताविरहरूपस्वात्मसत्त्वस्यैवेति एवंलाभेन तत्साधर्म्यस्य पौनरूक्त्यापत्ते-स्तस्मात्सामान्यविशेषा एव द्रव्यत्वादयः। तद्रहितत्वं पूर्वं सत्ताभावत्वमुक्तम्। इदानीन्तु द्रव्यत्वाभाववत्त्वमित्यपौनरुक्त्यम्।

नित्यत्वमिति। नित्यत्वमिति ध्वंसाप्रतियोगित्वम्, यद्व्याप्याकाशा-दावव्याप्त्यम्। तथापि ध्वंसप्रतियोगिवृत्तिसमवेतशून्यभावत्वं विवक्षितमिति [2]तेषु नातिव्याप्तिः। एतच्च [3]सामान्यादीनामुक्तन्यायेन नानादित्वसिद्धावनादि-भावस्य नित्यत्वनियमादुत्पादकसामग्र्यभावे ध्वंसानन्तरं पुनरुत्पादासम्भवे सामान्यादिव्यवहारविलोपप्रसङ्गाच्च द्रष्टव्यम्।

[4]**अर्थशब्दानभिधेयत्वमिति**। अर्थशब्दानभिधेयत्वं निरुपपदार्थ-शब्दानभधेयत्वम्, न तु पदार्थशब्दानभिधेयत्वम्। चकाराकारणाभावप्रयुक्ता-भावप्रतियोगिनिष्ठात्यन्ताभावप्रतियोगिभावपदार्थविभाजकोपाधिमत्त्वम्। इदञ्चोपलक्षणम्। जन्यधर्माश्रयत्वं द्रव्यत्वं द्रव्यातिरिक्तानाम्। नित्यवृत्ति-तावच्छेदकपदार्थविभाजकोपाधिशून्यत्वं विशेषातिरिक्तानाम्। अनित्यताव-च्छेदकपदार्थविभाजकोपाधिशून्यत्वं कर्मातिरिक्तानाम्, स्वसमानाधिकरण-लौकिकप्रत्यासत्तिजन्यसाक्षात्कारविषयताव्यापकव्यतिरेकधर्मवत्त्वं विशेषसम-वायातिरिक्तानाम्। असमवायिकारणत्वाभाववत्त्वं गुणकर्मातिरिक्तानाम्। गुणकर्मणोस्त्वसमवायिकारणत्वम्। तत्तु असमवायिकारणवृत्तिपदार्थविभाजको-पाधिमत्त्वम्। तेनान्त्यावयविरूपादौ गगनपवनसंयोगादौ नाव्याप्तिः। असम-वायिकारणत्वं चात्मविशेषगुणान्यत्वे सति कार्यकारणान्यविशेषकार्थसमवाय-प्रत्यासत्त्यवच्छिन्नकारणत्वाभावव्याप्यजात्यसमानाधिकरणधर्मसमवायित्वम्।

1. व्याघात् --- विशेषवत्वं
2. केषु - क मातृकायाम्
3. उक्तन्यायेन
4. अन्यशब्दार्थ ---

अत्र सत्यन्तादीच्छाद्येकार्थसमवायप्रत्यासत्तिश्चाभिकारणाश्रयेषु ज्ञानादिषु [1]नातिप्रसङ्गः । अन्यतरोपादानं पटरूपाऽसमवायिकारणतन्तुरूपपटाऽसमवायिकारणतन्तुद्वयसंयोगादिना ग्रहणार्थम् । तादृशप्रत्यासत्त्यवच्छिन्नत्वञ्च कारणतायामवयवाऽवयविनावित्यादौ द्वित्वादिकं प्रत्यवयविनो द्रव्यस्याऽसमवायिकारणत्वव्युदासार्थः । न च तादृशकारणतासमानाधिकरणसत्ताव्याप्यजातिमत्त्वमित्येव वक्तव्यम् । द्वित्वादिपृथक्त्वादावतिव्याप्त्यापत्तेः । उक्तकारणत्वासमानाधिकरणेति करणे रूपादावव्याप्तिः । रूपत्वादेरन्त्यावयविरूपनिष्टतया तादृशकारणत्वाभावसमानाधिकरणत्वात्तादृशकारणत्वाभावव्याप्यजातिः परत्वापरत्वादिः । तदसमानाधिकरणधर्मो रूपत्वकर्मत्वादिरिति लक्षणसमन्वयः ।

न चैव परिमाणमात्रस्य लक्ष्यत्वे परममहत्त्वादावतिव्याप्तिरिति वाच्यम्, इष्टापत्तेः । अत्र तादृशकारणत्वाभावव्याप्यजात्यसमानाधिकरणपरिमाणत्वस्य सत्त्वात् । न चैवं संयोगादेर्विभागाद्यसमवायिकारणत्वापत्तिः । न चेष्टापत्तिः । सर्वतान्त्रिकाणां तथाव्यवहाराभावेन तस्य तथात्वाभावादिति व्याप्तिरिति वाच्यम्, विभागाऽसमवायिलक्षणे संयोगाद्यवृत्तित्वेन तादृशधर्मस्य विशेषणे न तत्र तत्समवायित्वाभावात् सामान्यतोऽसमवायिषु कारणत्वं तस्य तान्त्रिकानुमतमेवैति कृतमप्रकृतेन । अत्राऽसमवायिकारणत्वं गुणकर्मणोः सम्भवमात्रेण [2]साधर्म्यात् । तेनाऽसमवायिकारणत्वं केषामवयवगुणानां तद्वृत्तिधर्मवत्त्वं सर्वेषां गुणानामिति द्रष्टव्यम् । तेन गुणभाष्ये बुद्ध्यादीनां निमित्तकारणत्वेन परत्वादीनामकारणत्वेन परिगणनं न विरूद्धमिति द्रष्टव्यम् । एवं समवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वं समवायातिरिक्तानामित्यादिकं यथायथमुक्तम् ।

एवं सन्मुख्याकारेण पदार्थानां साधर्म्यमुक्त्वा द्रव्याणामेवेदानीं साधर्म्यमाह-

(मू) पृथिव्यादीनां नवानामपि द्रव्यत्वयोगः । स्वात्मन्यारम्भकत्वं, गुणवत्त्वं, कार्यकारणाविरोधित्वम्, अन्त्यविशेषवत्त्वञ्च । अनाश्रितत्वनित्यत्वे चान्यत्रावयविद्रव्येभ्यः ।

1. नातिव्याप्तिः ।

2. साधनम् - क मातृकायाम्

पृथिव्यादीनामिति। तादृशत्वापेक्षितानां मर्यादामाह-नवानामिति। द्रव्यत्वेति । द्रव्यत्वं संयोगत्वावच्छिन्नकार्यतानिरुपितकारणतावच्छेदको जातिविशेषः। तत्संयोगस्तत्समवायः। द्रव्यत्वञ्च यथा जातिः तथोक्तमधस्तात्। नन्वाकाशादिसाधारण्येन द्रव्यमित्याकारानुगतप्रत्ययाभावादनुगतव्यञ्जका-भावाच्च न द्रव्यत्वं जातिरिति चेत्। न। आकाशादावपि संयोगकारण-तावच्छेदकतया तत्सिद्धेः। गुणात्यन्ताभावाभावश्चानुगतस्तद्व्यापकः। उत्पत्तिक्षणावच्छिन्नेऽपि द्रव्ये तत्प्रागभावरूपस्य गुणात्यन्ताभावस्य विद्यमानत्वात्। गुणतत्प्रागभावध्वंसानां गुणात्यन्ताभावानधिकरणवृत्तित्वे-नानुगमान्नाननुगमदोषः। एतेन सामान्यवृत्तितावच्छेदकस्य समवायस्यैकत्वात् तद्रुपादावपि द्रव्यत्वस्य वृत्त्यापत्तिः। तद्वृत्तितानियामकस्य स्वसमवायाभिन्नस्य रूपत्वसमवायस्य तत्रापि विद्यमानत्वादिति प्रत्युक्तम्। गुणत्वादिसमवायस्य द्रव्यत्वनिरूपितत्वाभावाद्, द्रव्यत्वस्य स्वव्यवस्थापकगुणात्यन्ताभावेन [1]तत्राभावात्, स्वनिरूपिततत्समवायस्यैव वृत्तितानियामकत्वात्। [2]निरूपकत्वञ्च स्वसम्बन्धविशेष इति प्रागेव व्युत्पादितम्।

[3]समवायिकारणत्वं तद्व्यवस्थापकमिति केचित्। तन्न। अननुगतत्वात् उत्पन्नविनष्टे तदभावाच्च। न च द्रव्यत्वस्य संयोगकारणतावच्छेदकत्वेऽपि जातित्वं कुत इति वाच्यम्, बाधकं विना अवच्छेदकताया जातित्वनियतत्वादित्युक्तत्वात्। न च संयोगकारणतावच्छेदकत्वेन [4]द्रव्यत्ववत् स्पर्शसमवायिकारणवच्छेदकत्वेन पृथिव्यादिषु चतुर्ष्वेकजातिसिद्धिरिति वाच्यम्, स्पर्शत्वस्याकार्यवृत्तित्वेन कार्यतावच्छेदकत्वाभावात्, जन्यस्पर्शत्वगौरवेण [5]तथात्वाभावाज्जन्यस्नेहत्वा-देश्चान्यथानुपपत्त्या तथात्वकल्पनादिति।

यत्तु जन्यद्रव्यत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतयाप्येक-जातिसिद्धौ तथा साङ्कर्य्यान्न जन्यस्पर्शकारणतावच्छेदकतया जातिसिद्धिरिति

1. तत्रा ---मकत्वात्।
2. निरूपिकतत्व च - क मातृकायाम्
3. समवायकारणत्व - क मातृकायाम्
4. द्रव्यत्ववत् --- पृथिव्यादिषु --
5. तथात्वभावात्।

तथाहि जन्यद्रव्यकारणतावच्छेदिका जातिर्नान्त्यावयविवृत्तिः जन्यस्पर्शकारणतावच्छेदिका च न परमाणुवृत्तिरूभयञ्च द्वणुकादौ समानधिकरणमिति । तन्न । अन्त्यावयविनोऽपि स्वरूपयोग्यतया तत्र जन्यद्रव्यकारणतावच्छेदकजातिसत्त्वे बाधकाभावात् । अन्यथा जन्यजलत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकजलत्वजातेस्तत्राप्रसिद्धिप्रसङ्गादिति । न च गुणात्यन्ताभावेनैवानुगतद्रव्यव्यहारसिद्धौ न द्रव्यत्वसिद्धिरिति वाच्यम्, तस्य च तदव्यवस्थापकतयानुगतव्यवहारहेतुत्वात् । [1]अन्यथा गोत्वाद्यसिद्धिप्रसङ्गादिति कृतं पल्लवितेन ।

स्वात्मन्यारम्भकत्वमिति । स्वात्मन्यारम्भकत्वं स्वसमवेतकार्यसमवायिकारणत्वम् अत्र समवायिकारणत्वमित्येवलक्षणमित्यस्य वैय्यर्थ्यत्वात् । समवायतादात्म्योभयसम्बन्धावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं समवायिकारणत्वं, कार्यतावच्छेदकसमवायाश्रयकारणत्वं वा तत् ।

[2]गुणवत्त्वमिति । गुणवत्त्वं गुणात्यन्ताभावाभावः, न तु गुणनिरुपितसमवायः । तस्योत्पत्तिक्षणेऽभावात् तद्गवत्त्वं दैशिकविशेषणतासमवायान्यतरसम्बन्धेन इदं द्रव्यं द्रव्यत्वव्यवस्थापकम् । द्रव्यत्वन्तु द्रव्यव्यवहारे प्रयोजकमिति द्रष्टव्यम् ।

कार्यकारणेति । गुणो हि ज्ञानादिच्छादिना स्वकार्येण नश्यते । एवं संस्कारः [3]स्मृत्यनुभवः । संस्कारेण कारणेनापि [4]संयोगादिना कार्यस्य [5]रूपादेः रूपान्यशब्दादेः नाशः । कर्मञ्च संस्कारेण संयोगेन वा नश्यते, गुणकर्मणी कार्यकारणान्यतरविरोधिनी द्रव्यजातीयं तु न कार्यकारणोभयविरोधिः, घटादिना वा कपालादेः कपालादिना वा घटादेरविरोधात् । इत्थञ्च यद्यपि न यथाश्रितं रूपादौ नित्यगुणादावतिव्याप्तेः (गतिव्याप्तेः) । किञ्च कार्यकारणोभयानाश्यत्वविवक्षायां तु कर्मण्यतिव्याप्तिः । अन्यतरानाश्यविवक्षायां तु कार्यकारणपदयोः स्वकार्यकारणपरतयाऽऽत्मादिद्रव्येऽव्याप्तिः । क्वचिद् द्रव्यस्यापि स्वकारणेन

1. अन्यथा स्नानादिना जोत्वाद्य ---
2. गुणत्त्वम् - क मातृकायाम्
3. स्मृत्याऽनुभवः ।
4. अग्निसंयोगेन
5 .रूपादेः - क मातृकायाम् ।

स्वकार्येण वा नाशाच्च तत्राव्याप्तिश्च । तथापि कार्यकारणस्योपलक्षितया नाश्यावृत्तिजातिमद्वृत्तिपदार्थविभाजकोपाधिमत्त्वमनेन विवक्षितम् । गुणकर्मवृत्तिजातीनां नाश्यवृत्तित्वनियमेन न तत्रातिप्रसङ्गः । आत्मत्वमनस्त्वे आदाय द्रव्यमात्रे लक्षणसमन्वयः । परममहंत्वन्तु न जातिर्मानाभावात् । तेन न गुणदावतिव्याप्तिः प्रत्यक्षत्वेन [1]जातिः विशेषणीया । यत्तु अदृष्टेतरकार्यगुणनाश्य-वृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वं तदिति । तन्न । गौरवाद् घटादीनां प्रयत्नवदात्मसंयोगनाश्यत्वेन द्रव्यत्वस्य तद्वृत्तितया असम्भवाच्चेति दिक् ।

अन्त्येति । यद्यप्येतद्घटादावतिव्याप्तम् । अन्यत्रावयविद्रव्येभ्यः [2]इत्यनुषङ्गोऽपि आकाशादीनां शव्दादिरूपव्यावर्तक[3]धर्मवत्त्वेऽपि न विशेषपदार्थवत्त्वमित्येतत् [4]तत्रातिव्याप्तिः । अन्त्यविशेषवद्वृत्तिसत्तेतरजाति-मत्त्वविवक्षणे तु कालदिगादिषु सत्तेतरजातिपदेन द्रव्यस्य प्रवेशे तस्यैव गमकत्वेऽन्यतरवैय्यर्थ्यम् । तथाप्यन्त्यविशेषकवृत्तिपदार्थविभाजकोपाधिमत्त्वं विवक्षितम् । अत्र द्रव्यत्वस्य विभाजकोपाधिमत्त्वेन प्रवेशान्न वैय्यर्थ्यमिति ध्येयम् ।

अनाश्रितत्वमिति । समवायसम्बन्धेनावृत्तिमत्त्वमित्यर्थः । तेन परमाण्वादीनां संयोगेन वृत्तावपि न क्षतिः ।

नित्यत्वञ्च - द्रव्यत्वविशेषितं ग्राह्यम् । तेन नित्यगुणेषु सामान्यादौ नातिव्याप्तिः । चकारविपर्य्ययेण नित्यद्रव्येभ्योऽन्यत्रान्त्यविशेषरहितद्रव्यत्वं समवेतद्रव्यत्वमनित्यद्रव्यत्वमित्यपि द्रष्टव्यम् ।

द्रव्याणामेवावान्तरसाधर्म्यमाह-

(मू) पृथिव्युदकज्वलनपवनात्ममनसामनेकत्वापरजाति-मत्त्वे । क्षितिजलज्योतिरनिलमनसां क्रियावत्त्व-मूर्त्तत्व-परत्वाऽपरत्व- वेगवत्त्वानि ।

---

1. जातिविशेषणीय - क मातृकायाम्
2. अनुषगेष्यहप
3. धर्मवत्त्वेन विशेष -- क मातृकायाम
4. तत्राव्याप्तिः

पृथिवीति। अनेकत्वमिति एकद्रव्यविभाजकोपाधिसमानाधिकरण[1]-बाहुलसंख्याश्रयत्वम्। घटपटाकाश इति [2]प्रतीत्या आकाशस्य बहुत्वसंख्याश्रयत्वेऽपि [3]तादृशबहुत्वसंख्यानानाद्रव्यविभाजकोपाधिसमानाधिकरणमिति न तमादायातिव्याप्तिः, स्वसमानाधिकरणद्रव्यविभाजकोपाध्यत्यन्ताभावासमानाधिकरणबहुत्वसंख्याश्रयत्वं वा। स्वाश्रयप्रतियोगिकान्यो[4]न्याभावसमानाधिकरणद्रव्यविभाजकोपाधिमत्त्वं वा अपरजातिर्द्रव्यत्वव्याप्य जातिः [5]पृथिवीत्वादिः।

[6]क्षित्यादीति। इदमुपलक्षणम्। संस्कारसमानाधिकरणद्रव्यविभाजकोपाधिमत्त्वमपि द्रष्टव्यम्। पृथिवीत्यादीनां चतूर्णां वेगस्थितिस्थापकसमानाधिकरणत्वादात्मत्वस्य भावनासमानाधिकरणस्येश्वरेऽपि [7]प्रवृत्तेर्न तत्राव्याप्तिः। मनस्त्वस्य वेगसामानाधिकरण्यान्न तत्राव्याप्तिरिति।

क्रियावत्त्वमिति। [8]क्रियास्पन्दः। तत्समवायिवृत्तिद्रव्यविभाजकोपाधिमत्त्वम्। तेन क्रियापदस्य धात्वर्थमात्रपरतया [9]नातिप्रसङ्गेन वोत्पत्तिविनष्टेऽव्याप्तिः। यद्यप्युत्पन्नविनष्टे मानाभावस्तथापि [10]उत्पन्न सर्वतान्त्रिकविरोधश्चेति द्रष्टव्यम्। अव्याप्तेरपि दोषत्वेन तस्य परिहाराय विवक्षयाऽऽवश्यकत्वात्। एवमन्यत्रापि द्रष्टव्यम्।

मूर्त्तत्वमवच्छिन्नपरिमाणवत्त्वम्। अवच्छिन्नत्वमिति व्यवहारविषयत्वम्। अन्यथा गगनादिपरिमाणस्यापि गगनत्वाद्यवच्छिन्नत्वादत्रातिव्याप्तिप्रसङ्गात् क्रियात्वावच्छिन्नाकार्यतानिरूपितकारणतावच्छेदकतया सिद्धो जातिविशेषो वा मूर्त्तत्वम्।

---

1. वहु - म मातृकायाम्
2. प्रतीत्याकाशस्य - क मातृकायाम्
3. तादृशबहुत्वसंख्यानानाद्रव्य -- नास्ति - क मातृकायाम्
4. अन्योन्याभावानसमानाधि - क मातृकायाम्
5. पृथिवीत्यादि - योगः नास्ति क मातृकायाम्
6. तद्वत्तातत्समवायः
7. प्रवृत्तेस्तत्राव्याप्तिः - क मातृकायाम्
8. क्रिया स्त्वन्यः - क मातृकायाम्
9. प्रसङ्गो न
10. सन्दिव - क मातृकायाम्

परत्वापरत्वे दिक्पिण्डसंयोगाऽसमवायिकारणकगुणविशेषो वक्ष्यते। वेगः संस्कारविशेषो[1] न तु निरन्तरगतिसत्तासन्तानमात्रम्, येन क्रियावत्त्वमित्यनेन पुनरूक्तं स्यादिति।

(मू) आकाशकालदिगात्मनां सर्वगतत्वं, परममहत्त्वं, सर्वसंयोगिसमानदेशत्वञ्च । पृथिव्यादीनां पञ्चानामपि भूतेन्द्रियप्रकृतित्वबाह्यैकैकेन्द्रियग्राह्यविशेषगुणवत्त्वानि।

आकाशेति । सर्वगतत्वमिति । अत्र विभुद्वयसंयोगाऽ[2]भावात् सर्वपदं मूर्त्तपरम्। गतिश्च संयोगः, तेन यावन्मूर्त्तप्रतियोगिकसंयोगाश्रयत्वम्। मूर्त्तत्वव्यधिकरणसर्वमूर्त्तप्रतियोगिकसंख्याश्रयत्वम्। घटघटोभयसंयोगस्य मूर्त्तत्वव्यधिकरणत्वाभावात् तस्याकाशाद्यवृत्तित्वेऽपि न क्षतिः।

यत्तु संयोगित्वावच्छिन्नप्रतियोगिताकमूर्त्तत्वानिष्टात्यन्ताभावप्रतियोगित्वमिति। तन्न। आकाशादिसंयोगस्य मूर्त्तत्वमात्रवृत्तित्वेऽपि आकाशादीनामवृत्तित्वस्य सर्वतान्त्रिकसिद्धतया संयोगित्वेनाकाशादिकं न [3]मूर्त्तेषु वर्त्तत इति तादृशाभावप्रतियोगित्वरूपलक्षणस्यासम्भवात्।

परममहत्त्वञ्च जन्यत्वानधिकरणमहत्त्वाश्रयत्वम्। सजातीयप्रतियोगिकोत्कृष्टत्वव्यवहारप्रयोजकत्वेन सिद्धो जातिविशेष इति केचन। तन्न। सजातीयप्रतियोगिकापकृष्टत्वव्यवहारहेतुत्वेन त्रसरेणुमहत्त्वेऽपि लक्षणजातिसिद्धौ उत्कर्षापकर्षोभयव्यवहारप्रयोजकतावच्छेदकजात्या साङ्कर्य्येण [4]त्रयाणामपि जात्याभावात्। अपकर्षानाश्रयमहत्त्वाधिकरणत्वं तदित्यपि केचित्।

एतस्य [5]इयत्ताव्यवहारजनकत्वाभावेऽपि परिमाणान्तर्गतत्वं वक्ष्यते-

सर्वेति। सर्वाणि संयोगानि द्रव्याणि समानदेशानि समानाधिकरणानि [6]यस्येति

---

1. ननु निरन्तरगतिसत्ता न मात्रम् - क मातृकायाम्
2. अभावात्पदं मूर्त्तपरम् - क मातअकायाम्
3. मूर्त्तिषु
4. त्रयाणामपि जातित्वाभावात्। अपकर्षानाश्रयमहत्वाधिकरणत्वं तदित्यपि केचित् - क मातृकायाम् नास्ति।
5. इयन्ताव्यवहार
6. नास्येति

व्युत्पत्त्या वृत्त्यनियामकसम्बन्धेन यावद्द्रव्याधिकरणसम्बन्धत्वमर्थः। पूर्वमाकाशादिसंयोगो मूर्त्तेषु वर्त्तते। इदानीन्तु मूर्त्ताधिकरणसम्बन्धत्वमुक्तमित्यपौनरुक्त्यम्, न तु गगनादीनां मूर्त्तवृत्तित्वं मूर्त्तानां वाकाशावृत्तित्वं साधर्म्यद्वयार्थं इत्यपौनरुक्त्यमिति। तत्र मूर्त्तानामाकाशवृत्तित्वे[1]विरोधः। सर्वतान्त्रिकविरोधश्चेति द्रष्टव्यम्। चकारात्पूर्वोक्तक्रियावत्त्वमूर्त्तत्ववेगविरहो द्रव्यत्वविशेषतो ग्राह्यः।

पृथिव्यादीनामिति। भूतत्वं न जातिः कार्यतावच्छेदकत्वाद्यभावात् मूर्त्तत्वेन संस्काराच्च। भिन्नभिन्नत्वेनानुगतव्यवहारानुपपत्तेः। किन्तु औपधिकं सामान्यं तदपि ज्ञानात्समानाधिकरणविशेषगुणवत्त्वं वा। न चोत्पत्तिक्षणेऽव्याप्तिः, विशेषगुणात्य[2]न्ताभावाभावत्वरूपायोग्यतायार्विवक्षिततत्वात्। महदिन्द्रियग्राह्यगुणत्वव्याप्यजातिमदविशेषगुणवत्त्वं वा। गुणत्वव्याप्यव्याप्येत्यु[3]पादानाच्च तादृशसंस्कारवद् भावनावत्त्वेनात्मन्यतिव्याप्तिः। इन्द्रियप्रकृतित्वमिन्द्रियानिन्द्रियोभयवृत्तिद्रव्यविभाजकोपाधिमत्त्वम्। वहिरिन्द्रियवृत्तिद्रव्यविभाजकोपाधिमत्त्वं वा। न त्विन्द्रिय[4]प्रकृतत्वमिन्द्रियहेतुत्वमाकाशेऽव्याप्तेः। नापि तत्स्वभाववत्त्वं मनस्यतिव्याप्तेः।

बाह्येति - अत्रैकैकपदं प्रतिनियतपरम्। प्रतिनियतपदयोर्विशेषपदयोर्वैकल्पिकोपादानेन साधर्म्यद्वयम्। तेन स्वाश्रयाश्रयग्राहकयावदिन्द्रियाग्राह्यविशेषगुणवदिन्द्रियग्राह्यगुणवृत्तिजातिमदाश्रयत्वम्। स्वाश्रयाश्रयग्राहकत्वं [5]यत् किंचिद् भेदवत्त्वं ([6]स्वाश्रयाश्रयाग्राहकत्वञ्च किंचिद्भेदवत्त्वं।) रूपत्वादिजातेः स्वाश्रयाश्रयघटादिग्राहकयावदिन्द्रियान्तर्गतत्वगिन्द्रियग्राह्यतया विशेषगुणवच्चक्षुर्ग्राह्यतया च तामादाय लक्षणसमन्वयः।

[7]संख्यादेश्च स्वाश्रयाश्रयग्राहकयावदिन्द्रयग्राह्यतया न लक्षणघटकत्वमिति न संख्यादिकमादायातिव्याप्तिः। परमाण्वादेश्च तादृशजातिमदाश्रयत्वान्न

1. मानाभावः - क मातृकायाम्
2. अत्यन्ताभावाभावरूपं - क मातृकायाम्
3. त्यपादानाच्च - क मातृकायाम्
4. प्रकृतत्वमिन्द्रियहेतुत्वम् आकाशाव्याप्तेः।
5. यत्किंचिद्भेदवत्वं - नास्ति क मातृकायाम्
6. नास्ति - ख मातृकायाम्
7. संख्यादेश्च - घटकत्वमिति - नास्ति

तेष्वव्याप्तेः। न तु द्रव्यग्राहकयावदिन्द्रियाग्राह्यवहिरिन्द्रियान्तर्गतत्वात् त्रिगुणवद्गुणवृत्तिगुणत्वव्याप्यजातिमत्त्वं तत्। इन्द्रियग्राहकयावदन्तर्गतेन मनसा घटसंयोगादीनामग्रहणेन तादृशसंयोगादिकमादाय कालादावतिव्याप्तिः। न च तादृशग्राह्यत्वेन जातिरेव विशेषणीया। [1]संयोगत्वादेस्तु द्रव्यग्राहकैश्चक्षुस्त्वङ्-मनोभयस्तत्र तत्र संयोगविशेषे ग्रहणात् नोक्तातिव्याप्तिरिति वाच्यम्, सत्तागुण-त्वयोः उक्तविवक्षयैव कारणेन गुणत्वव्याप्यपदवैय्यर्थ्यापत्तेरिति दिक्। मनो-भिन्नेन्द्रियजन्यप्रत्यक्षविषयविशेषगुणवृत्तिगुणत्वव्याप्यजातिमदाश्रयत्वं तेन न परमाण्वादावव्याप्तिः।

(मू) चतुर्ण्णां द्रव्यारम्भकत्वस्पर्शवत्त्वे, त्रयाणां प्रत्यक्षत्व-रूपवत्त्वद्रवत्वानि। द्वयोर्गुरुत्वं रसवत्त्वञ्च।

चतुर्णामिति। चतुर्ण्णां पृथिव्युदकतेजोवायूनां द्रव्यारम्भकत्वमिति। द्रव्यत्वे सति द्रव्यनिरूपितसमवायाश्रितत्वम्। तेन नान्त्यावयविन्यव्याप्तिः। द्रव्यसमवायिवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वम्वा। स्पर्शवत्त्वं स्पर्शसमवायि-कारणवृत्तिविभाजकोपाधिमत्त्वं, तेन [2]नोत्पन्नविनष्टाऽव्याप्तिः। न वा चित्रस्पर्शानङ्गीकर्त्तृनये सुकुमारकाठिनावयवारब्धेऽवयवावयविन्यव्याप्तेः। [3]अत्रापकृष्टगुणत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वम्। अपकृष्टेति विशेषणान्न मनस्यतिव्याप्तिः। अपकृष्टमहत्त्ववद्वृत्तिद्रव्यत्वव्याप्य जातिमत्त्वम्। आत्मन्यतिप्रसङ्गवारणायापकृष्टेति। परमाणुसंग्रहार्थं [4]द्रव्यत्वमिति। शरीरसमावायिकारणतावच्छेदकजातिमत्त्वमिन्द्रियसम-वायिकारणतावच्छेदकजातिमत्त्वम्; तेन न घटादावतिव्याप्तिः सावयवेन्द्रिय-ग्राह्यविशेषगुणवत्त्वमित्यादिकं द्रष्टव्यम्। स्थितिस्थापकाख्यः संस्कारः स्पर्शविशेषवन्मात्रवृत्तिरिति मते तद्वत्त्वमपि द्रष्टव्यम्।

त्रयाणामिति। त्रयाणां पृथिवीजलतैजसां प्रत्यक्षत्वं विशेषगुणवदिन्द्रि-यलौकिकप्रत्यासत्तिजन्यप्रत्यक्षविषयत्वाव्याप्यद्रव्यत्वव्याप्यजातिमत्त्वम्। तेन

1. संयोगदेस्तु - क मातृकायाम
2. विशिष्टाव्याप्तिः - क मातृकायाम्।
3. अत्रापकृष्टगुणत्व - क मातृकायाम्।
4. द्रव्यत्व --- इन्द्रिय ---

नात्मादावुपनयविधयाभासमाने वाय्वादौ नातिप्रसङ्गो, न वा परमाण्वादाव तीन्द्रियोऽव्याप्तिः रूपवत्त्वम्। रूपवद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वम्, तेनोत्पन्नविनष्टे नाऽव्याप्तिः। न वा विजातीयरूपवन्नानावयवारब्धस्यावयविनो [1]नीरुपत्वाङ्गीकर्तृमते तत्र नातिव्याप्तिः। द्रवत्ववत्त्वं वायुवृत्तिद्रवत्व-व्यापकजातिमत्त्वम्, तेन न घटादावव्याप्तिः।

द्वयोरिति - गुरुत्वं रसवत्त्वञ्च, द्वयोः पृथिवीजलयोः गुरुत्वं नाम पतनविशेषाऽसमवायि[2]कारणगुणविशेषको तद्वत्त्वं तत्समवायः। गुरुत्व-जन्यतावच्छेदकपतनत्वावान्तरजातिमत्पतनमपि द्वयोरिति द्रष्टव्यम्। [3]रसो माधुर्य्यादिस्तद्वत्त्वं तत्समवायः। पूर्ववद् बोध्यः। विषयतातिरिक्त-सम्बन्धेनालोकजन्यप्रत्यक्षविषयताव्याप्यतावच्छेदकधर्मवज्जातिमत्त्वं परप्रकाशकतावच्छेदकजात्यभाववद्रूपवत्त्वमप्युपलक्षितव्यम्।

(मू) भूतात्मानां वैशेषिकगुणवत्त्वम् । क्षित्युदकात्मनां चतुर्दशगुणवत्त्वम् । आकाशात्मनां क्षणिकैकदेशवृत्तिविशेषगुण-वत्त्वम् । दिक्कालयोः पञ्चगुणवत्त्वम् । सर्वोत्पत्तिमतां निमित्तकारणत्वञ्च । क्षितितेजसोर्निमित्तिकद्रवत्वयोगः । एवं सर्वत्र विपर्य्ययात् साधर्म्यं वैधर्म्यञ्च वाच्यमिति।

भूतानामिति। भूतानां पृथिवीजलतेजोवाय्वाकाशानामात्मनाञ्च वैशेषिकेति। [4]स्वाश्रयेतरेभ्यो विशिषन्ति व्यावर्तयन्ति इति विशेषाः। त एव वैशेषिकाः विनयादित्वात्, स्वार्थे ठक्। विशेषः स्वाश्रयव्यावृत्तिबुद्धिः। सैव प्रयोजनं येषामिति वा। तदस्य प्रयोजनमिति ठक्।

तत्त्वञ्च द्रव्यविभाजकोपाधिव्याप्यतावच्छेदकजातिमद्गुणत्वम्, तादृशजातिगुणत्वादिगुणवत्त्वादि। न च रूपस्पर्शाऽव्याप्तिः। रूपत्वादीनां पृथिवीत्वादिव्याप्यतावच्छेदकत्वाभावादिति वाच्यम्, [5]तथात्वेन तदुपादानेन

---

1. रूपत्वङ्गीकर्तृमते 2. कारणगुणविशेषः - क मातृकायाम्।
3. रसोमाधुर्य्या 4. स्वश्रयमितिरमितरेभ्यो 5. तथात्वेन --- अन्वयात् = नास्ति

तत्रापि लक्षणसमन्वयात् । नीलत्वशुक्लतरत्वाभास्वरत्वादीनां तथात्वेन तदुपादानेन तत्रापि लक्षणसमन्वयात् । न चैवमपि [1]जलीयशुक्लरूपे अव्याप्तिः, [2]तत्र शुक्लत्वरूपत्वयोरपि तदवच्छेदकत्वाभावादिति वाच्यम्, जलीयशुक्लरूपेऽपि स्वसमानाधिकरणपाकपाकजरुपप्रतिबन्धकतया विलक्षणजातिसिद्धौ तत्रापि लक्षणगमनसम्भवाच्च । सा च जातिर्न तैजसे शुक्लरूपे तेजसि तेजःप्रतियोगिकसंयोग[3]रूपकारणाभावेनैव । तादृशरूपानुत्पत्तौ प्रतिबन्धककल्पनायां मानाभावात् । एवञ्च स्पर्शरसादीनामनुभवसिद्धतत्तदवान्तरजातिभेदमादाय लक्षणसमन्वयः ।

नन्वेवं संयोगेऽतिव्याप्तिः । संयोगत्वव्याप्यकठिनत्वादेः [4]पृथिवीत्वव्याप्यतावच्छेदकत्वात्, एवं शब्दविशेषजनकतावच्छेदककठिनावयवविभानिष्टजातिविशेषमादाय विभागः, तेजोजन्यतावच्छेदवेगनिष्टवैजात्यमादाय वेगे चातिव्याप्तिरिति चेत् । न सर्वत्रोक्तस्थलेऽन्यतरकर्मजन्यतावच्छेदकजात्या साङ्कर्य्यप्रसङ्गेन निविडत्वादेः जातित्वाभावात् । [5]भावे वा संयोगाद्यवृत्तित्वे न जातिर्विशेषणीया ।

केचित् भावान्यवायुवृत्तिस्पर्शावृत्तिधर्मसमवायान्यत्वे सति [6]गुणत्वसंयोगजन्यद्रव्यत्वान्यगुणत्वं तत् । वस्तुतस्तु-

रूपं गन्धो रसः स्पर्शः, स्नेहस्सांसाद्धिको द्रवः ।
बुद्ध्यादिभावनान्ताश्च, स्पर्शो वैशेषिको गुणाः ॥ (का - ४४)

इति तान्त्रिकसिद्धरूपादिव्यक्तिरूपमादाय तदन्यतरगुणत्वमेव वैशेषिकगुणत्वमिति द्रष्टव्यमिति कृतं पल्लवितेन । लौकिकप्रत्यक्षविशेषगुणसमानाधिकरणद्रव्यविभाजकोपाधिमत्त्वमपि द्रष्टव्यम् ।

---

1. जातीयशुक्लं
2. तत्र - नास्ति का मा॰तृकायाम् ।
3. रूपानुपपत्तौ
4. पृथिवीत्वं - क मातृकायाम्
5. भावे वा निविडसंयोगस्य उभयकर्मजन्यत्वेनभरीयकर्मजन्यतावच्छेदकसंयोगत्वाजातिसव्याप्यतया सांकर्य्याद् भावः ।
6. गुरुत्वसंयोगजन्य द्रवत्वान्य ---

क्षित्यादिकेति । यद्यपि पृथिव्याञ्च चतुर्द्दशगुणास्तेनाऽऽत्मनि, तथापि तादृशापेक्षाया बुद्धिविषयगुणवत्त्वमभिप्रेतम् । यद्यपीदं न सर्वं पृथिवीव्यापकं घटादौ द्रव्यत्वाभावात्, इश्वरे संस्काराद्यभावाच्च न सर्वात्मसाधारणम्, तथापि जातीन्द्रियगुणत्वव्याप्यजात्यवच्छिन्नगुणत्वव्याप्यजात्यवच्छिन्नगुणसमानाधिकरणद्रव्यविभाजकोपाधिमत्त्वं [1]विवक्षितम् । [2]अतीन्द्रियमुपजातीन्द्रियगुणत्वव्याप्याजातयोगुरुत्वत्वधर्मत्वाऽधर्मत्वभावनात्वानि तदवच्छिन्नार्थे गुणार्गुरूत्वादयस्तत्समानाधिकरणको यो द्रव्यविभाजकोपाधिपृथिवीत्वं जलत्वमात्मताञ्च तद्वत्त्वघटादेरीश्वरस्यापीति नाव्याप्तिः । न च घटो वायुसंयोगमादाय वाय्वादावतिव्याप्तिरिति वाच्यम्, गुणपदेन तादृशविशेषगुणव्यक्तिमात्रस्यैव विवक्षितत्वात् । वास्तवस्तु तादृशद्रव्यविभाजकोपाधिमत्त्वमित्येव वक्तव्यम् । [3]तथाच नातिव्याप्तिसम्भावनापि इति द्रष्टव्यम् ।

आकाशात्मनामिति ।आत्मत्वबहुत्वाभिप्रायेण बहुवचनं क्षणिकेति । क्षणिकविशेषगुणवत्त्वमेकदेशवृत्तिविशेषगुणवत्त्वमिति साधर्म्यादर्थे तात्पर्यम् । क्षणिकत्वञ्च स्वोत्पत्त्यधिकपञ्चम[4]क्षणाव्याप्तित्वम्, तेन नापसिद्धान्तो, न वापेक्षाबुद्ध्याद्यसंग्रहः ।एकदेशवृत्तित्वञ्च स्वात्यन्ताभावसमानाधिकरणत्वम् । न चैतद्द्वयमीश्वरेऽव्याप्तमिति वाच्यम्, आत्मपदेन सुखसमवायिकारणस्यैव विवक्षितत्वेन तस्यात्रालक्ष्यत्वात् । प्रथमे द्वित्वादिकम्, द्वितीये संयोगादिकमादायातिप्रसङ्गनिराकरणाश्रयमुभयत्र विशेषणपदम् । ईश्वरस्य लक्ष्यत्वे तु तादृशद्रव्यविभाजकोपाधिमत्त्वं तु विवक्षणीयम् । [5]निरवयवेन्द्रियग्राह्य[6]विशेषगुणसमानाधिकरणत्वद्रव्यविभाजकोपाधिमत्त्वं समुदितार्थ इत्येकं साधर्म्यमित्यपि केचित् ।

---

1. विवक्षितम् - नास्ति - क मातृकायाम्
2. अतीन्द्रियगुणं --- नास्ति - क मातृकायाम्
3. (अस्मिन् स्थले) न त्वनधिकगौरवा --- सम्भावनापीति द्रष्टव्यम् योगः ।
4. क्षणव्यापित्वम् - क मातृकायाम् ।
5. निरवेन्द्रिय - क मातृकायाम् ।
5. गुण - क मातृकायाम् ।

दिक्कालयोरिति - पञ्चगुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागा-स्तद्वत्त्वं तत्समवायः एतदतिरिक्तगुणानाश्रयत्वे सत्येतत्समवायित्वमित्यर्थः। सर्वेति- सर्वाणि [1]यान्युत्पत्तिमन्ति जन्यानि [2]तानि प्रति निमित्तकारणत्वमित्यर्थः। स्वसमवेतसंयोगादिकं प्रति निमित्तकारणत्वाभावात्तदतिरिक्तकार्य[3]परं सर्वपदम्। किमत्र मानमिति चेत्। अद्यजातो गृहे जात इत्यादिप्रतीतय एव। एता हि नाधिकरणत्वमात्रविषयतया [4]उपक्षीणा इह कपाले घटो जात इतिवदुत्पत्ति-कारणत्वोल्लेखित्वात्, अधिकरणत्वस्य कारकविशेषत्वेन कारणत्वघटितत्वात्। केचित्तु बाधकादधिककारणत्वेऽपि न कारणत्वं यथा गोत्वादिकं गवादेः। न चेह तथाबाधकमस्ति। न चैता उपाधीनामेवकारत्वमवगाहन्ते न कालदिशोरिति वाच्यम्, उपाधीनामननुगतत्वेन कारणतायास्तयोरेव विश्रामात्। न चेह तथा बाधकमस्ति। न च कालस्यापि दिक्कालयोः पूर्ववृत्तित्वात् पूर्ववृत्तित्वा-विशेषाज्जन्यमात्रं प्रति कारणत्वमस्त्विति वाच्यम्, प्रमाणाभावाच्छब्दे-नान्यथासिद्धत्वाच्च।

अत्र घट एतद्घटाऽसाधारणकारणविशेषगुणवद्भिन्नद्रव्यजन्यो जन्यत्वात् पटवदित्यनुमानाद् दिक्कालजन्यत्वसिद्धिरित्यपि केचित्। न चात्मनामदृष्टद्वारा सर्वोत्पत्तिमन्निमित्तकारणत्वम[5]स्येवेति कुतस्तयोरेवेतत् साधर्म्यमिति वाच्यम्, अधिकरणतया तथाकारणत्वस्या[6]न्यत्राभावात्। इदमुलपक्षणम्। सर्ववृत्तिमधिकरणत्वं सर्वाधिकरणत्वं वा आकाशादीनामपि कालवृत्तित्वात्। अन्यथा शब्दादिपूर्वकालवृत्तित्वाभावे शब्दादिकं प्रत्यकारण-त्वप्रसङ्गात्। परत्वापरत्वसमवायिकारणसंयोगाश्रयविभुत्वमित्यपि द्रष्टव्यम्।

क्षितितेजसोरिति - नैमित्तिकत्वं तेजःसंयोगासमावायिकारणत्वम्। घृतादौ पार्थिवे, तैजसे सुवर्णे च तेजःसयोगाऽसमवायिकारणकद्र[7]वत्वं प्रत्यक्षसिद्धम्। यद्यप्येतन्न [8]घटभूतसुवर्णभिन्नतेजस्साधारणम्, तथापि

1. यान्युत्पत्तिमन्ति 2. नास्ति 3. पद
4. पक्षणाः - क मातृकायाम्। 5. मस्त्वेवेति एतयोरेवैतत् - क मातृकायाम्
6. स्यात्राभावात् 7. द्रव्यत्वं - क मातृकायाम् 8. घटादिसाधारणं

तादृशद्रवत्ववद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वमिति [1]नाव्याप्ति: । इदमुपलक्षणम् । आत्मातिरिक्तानां मनोग्राह्यभिन्नगुणवत्त्वं परोपभोग्यकार्यानुकूलत्वञ्च । मनोऽतिरिक्तानामात्मग्राहकेन्द्रियभिन्नत्वम् । पृथिव्या: पाकजविशेषगुणवत्त्वं दिक्कालमनसां विशेषगुणशून्यत्वम् । वाय्वाकाशदिक्कालमनसां प्रत्यक्ष-वृत्तिद्रव्यविभाजकोपाधिमत्त्वम् । वाय्वादीनामरूपत्वम् । आत्ममनसो: शरीरावच्छिन्नज्ञानजनकतासंयोगाश्रयत्वमित्यादिना यथायथं बोध्यम् ।

ननु साधर्म्यवैधर्म्ययोरुभयोरपि जिज्ञासितत्वात् तत्तत्पृथग्वैधर्म्य-निरूपणं किमिति न कृतमित्यत आह- **एवेति** । विपर्य्ययादिति । हेत्वनुरोधेन साधर्म्यमित्यत्र व्यतिरेकीति पूरणीयम् । तेन व्यतिरेकीति यत्साधर्म्यं गन्धवत्त्वादि तदेव विपर्य्ययाज्जलादिभ्यो व्यावृत्ते: वैधर्म्यमिति साधर्म्यस्यैव वैधर्म्यरूपत्वान्न तस्य विपर्य्ययाद् व्यावृत्ते: वैधर्म्यम्, यदेव वैधर्म्यम्, तदेव विपर्य्ययादनुवृत्ते: साधर्म्यम् । यद्वा साधर्म्यं विपर्य्ययं प्राप्य वैधर्म्यम्, वैधर्म्यमपि विपर्य्ययं प्राप्य साधर्म्यम् । यथा पृथिव्या साधर्म्यं गन्धवत्त्वम्, तद्विपर्य्ययो निर्गन्धत्वम्, जलादीनां साधर्म्यम्, एवं जलादीनां वैधर्म्यगन्धवत्त्वं तद्विपर्ययो निर्गन्धत्वं पृथिव्या वैधर्म्यमिति । एवमन्यत्राप्यूहनीयमिति ।

अत्र सर्वेषु लक्षणेषु तत्तद्धर्मवत्त्वं तत्तद्वृत्तितानियामकसंयोगसमवाया-दिसम्बन्धेन बोध्यम्, तेन कालदिशो: कालिकदैशिकविशेषणताविशेषेण तद्वत्त्वेऽपि न तयोरतिव्याप्ति: । ननु ज्ञेयत्वादिना [2]साधर्म्यत्वमसिद्धम्, तस्य लक्षणरूपत्वेनेतरभेदानुमाने केवलव्यतिरेकिविशेषरूपत्वात् । न च ज्ञेयत्वादीनां तथात्वं केवलान्वयित्वादिति चेत् । न तेषामुपरञ्जकत्वेन लक्षणत्वाभावात् । द्रव्यत्वादिसाधर्म्याणान्तु लक्षणत्वं तेषामितरभेदानुमितिषु व्यतिरेकिरूप-त्वात्तेषामपि कालिकादिसम्बन्धे कालोपाधिस्वन्यादिवृत्तित्वेन व्यभिचारान्न तथात्वमिति चेत् । न । तन्निरूपितसमवायादिसम्बन्धेनैव तेषां लक्षणत्वात् ।

1. न-व्याप्ति: ।

2. साधर्म्यसिद्धम् ।

वैधर्म्यप्रकरणं, पृथिवीनिरूपणञ्च

एवञ्च द्रव्यादीनां द्रव्यत्वादिभिः गुणादिभ्यो भेदे सिद्धेऽपि द्रव्याणामेव प्रत्येकं भेदसिद्धेरपेक्षितायाा कुतः सिद्धिरित्यपेक्षायामाह-

(मू) इहेदानीमेकैकशो वैधर्म्यमुच्यते । पृथिवीत्वाभिसम्बन्धात् पृथिवी । रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रव्यत्वसंस्कारवती । एते च गुणनिवेशाधिकारे रूपादयो गुणाविशेषः । सिद्धाः चाक्षुषवचनात् सप्तसंख्यादयः ।

इहेति - यद्वा पृथिव्यादयो नवद्रव्याणि इत्युक्तं तदसङ्गतम् । जलादिव्यावृत्तिपृथिवी[1]स्वरूपज्ञानेन तथा परिगणनस्य कर्त्तुमशक्यत्वान्न तेषामसाधारणैः पृथिव्यादिभिरेव तत्सिद्धिरिति वाच्यम् । तेषामव्याप्यनिरूपणानिरूपणादित्याशङ्क्य तन्निरूपणं प्रतिजानीते-इहेति । इहप्रकरणे इदानीमवसरप्राप्तौ समुदितसाधर्म्यनिरूपणान्तरं प्रत्येकसाधर्म्ये जिज्ञासोदयेन वक्तव्यत्वज्ञानादवसरस्तन्निरूपणे सङ्गतिरिति भावः । पृथिव्यादिप्रतिद्रव्यं संख्यैकवचनाच्च वीप्सायामिति । वीप्सायां शस्प्रत्ययोपा[2]दानं धर्माणां बहुवचनज्ञापनार्थम् । वैधर्म्यं जलादिव्यावृत्तः सकलपृथिव्यादि वृत्तिकर्मः ।

तत्र पदार्थमध्ये द्रव्यस्य प्रथममुद्देशेऽपि पृथिव्या एव प्रथमसमुद्देशात्प्रथमतस्तामेव निरूपयति - पृथिवीत्वेति । पृथिवीत्वं नाम सामान्यविशेषः । तेन सहाभिमतसम्बन्ध समवायस्वरूपः । न त्वेकार्थसमवायादिकालिकदैशिकविशेषणताविशेषादिः । ननु पृथिवीत्वं न सामान्यं घृततैलादिसाधारण्येनानुगतपृथिवीव्यवहारस्य सर्वेषामभावात् । [3]अभियुक्तानां तथाव्यवहारात्तत्सिद्धिरिति चेत् परमाण्वादिसाधारण्येन तद्व्यवहारायाभावात् । अभियुक्तानां

1. स्वरूपाऽकालेन - क मातृकायाम् ।
2. उपादानं --- कर्मः (धर्म)
3. अभियुक्तानां तथाव्यवहारस्यापि अभावात् - क मातृकायाम् ।

तथात्वव्यवहारस्याप्यभावात् । न च गन्धत्वावच्छिन्नकार्यतानिरूपित-कारणतावच्छेद[1]कत्वेन तत्सिद्धिरिति वाच्यम्, सुरभि: समीरण इति प्रतीतिबलेन वाय्वादेरपि गन्धवत्त्वेन तत्कारणताया [2]अतिप्रसक्तत्वात् । न च [3]वायूपनीत-चम्पकभागानामेव सगन्धो न वायोरिति वाच्यम्, चम्पकादिभागानां वाय्वानुप-लम्भात्, वृक्षाद्व्यवस्थितचम्पकभागानां सच्छिद्रतापत्तेः । न चादृष्टाकृष्टैः परमाणुभि: भूयस्तदारम्भ इति वाच्यम्, मानाभावात् । [4]न नखादिच्छिन्नभागस्य तथारम्भकतापत्तेः । किञ्च पाषणादौ गन्धाभावेन तत्कारणतापृथिवीत्व-न्यूनवृत्तिरिति न तत्र पृथिवीत्वमवच्छेदकत्वम् । न च तदपि गन्धवदेव । तथाहि पाषाणादिभस्मसु तावद्गन्ध उपलभ्यते । पाषाणावयवानाञ्च पाषाणादि-भस्मारम्भकत्वम् । यद् द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्तेः । एवञ्च गन्धवदारम्भकत्वेन तेषां गन्धवत्त्वसिद्धौ पाषाणादिकं गन्धवद् गन्धवदारब्धत्वात् घटवदित्यनुमानादुद्भूतगन्धबोधेऽनुद्भूतगन्धसिद्धिरिति वाच्यम्, चित्रगन्धानभ्युपगमेन [5]गन्धस्याव्याप्यवृत्तित्वानभ्युपगमेन च सुरभ्यसुरभ्यवयवारब्धेन निर्गन्धत्वस्य सत्त्वेन तत्र हेतोर्व्यभिचारित्वात् । एवञ्च पाषाणारम्भकत्रसरेणुद्व्यानां विजातीयगन्धवद् द्व्यणुकाद्यारब्धतया निर्गन्धत्वेन तादृशावयवपरम्परैवपाषाणाद्यारम्भसिद्धौ तेषां निर्गन्धत्वसिद्धौ तत्रानुभूत-गन्धस्यापि बाधिततत्वात् । एतेन पाषाणादिकमपि गन्धवदेव, तद्गन्धस्यैव तु द्रव्यान्तरघर्षणमभिव्यञ्जकमतो[6] नान्यदेततत्प्रत्यक्षमिति निरस्तम् । घर्षण-दशायामपि घृष्यमाणचन्दनादिः सगन्धस्यैव तत्रानुभवात्, तद्विलक्षण-गन्धान्तराननुभवाच्च[7] ।

एवञ्च नीलरूपसमवायिकारणतावच्छेदकतया तत्सिद्धिरिति प्रत्युक्तम् । तत्कारणतायाः यत्किञ्चित्पृथिवीवृत्तित्वेन पृथिवीत्वस्य तत्रावच्छेदकत्वा-

---

1. दकयोः
2. अत्र प्रसक्तत्वात् - क मातृकायाम् ।
3. वायूपनीतविततचम्पकभागानामेव - क मातृकायाम् ।
4. नास्ति ।
5. गन्धस्चव्याप्यवृत्तित्वाभ्युपगमेन ।
6. नान्यं तत्प्रत्यक्षमिति ।
7. तद्धि लक्षणगन्धान्तराननुभवाच्च ।

भावात्। न च पाकजविशेषगुणानां द्रव्यान्तरेष्वभावात् पृथिव्यामेव नियमेनोपलम्भात् पाकजविशेषगुणत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतया तत्सिद्धिरिति वाच्यम्, पीलुपाकनये पाकजविशेषगुणकारणताया अपि सर्वपृथिवीत्वाभावात्। अन्यत्रानुपपत्तौ च संयोगनिष्टवैलक्षण्यविशेषस्य [1]नियामकत्वं कल्पनीयम्।

एतेन रूपत्वव्याप्यजात्यवच्छिन्नकार्यतानिरुपितकारणतावच्छेदकतया तत्सिद्धिरिति प्रत्युक्तम्। तादृशकारणताया अपि सर्वपृथिव्यव्याप्यकत्वादिति पृथिवीत्वस्याकार्यत्वेन सुतरां न कार्यतावच्छेदकत्वमिति न पृथिवीत्वसामान्यसिद्धिरिति चेत्। न। [2]निविडसंयोगत्वावच्छिन्नकार्यतानिरुपितकारणतावच्छेदकतया तत्सिद्धेः। निविडत्वञ्च संयोगत्वव्याप्यजातिविशेषः क्षीरतैलादावपि उपष्टम्भकपार्थिवभागानां कदाचित् [3]पिण्डीभावदर्शनेन तादृशसंयोगस्य तत्रापि सम्भवाच्च। अत्रैव चिरस्थापिततैलभाण्डादावधोभागावच्छेदे निविष्टभागोपलम्भः।

न च गन्धकारणतावच्छेदतया तत्सिद्धिः। वाय्वादौ गन्धाभावस्य वक्ष्यमाणत्वेऽपि पाषाणादौ तदभावेन गन्धकारणताया पृथिवीत्वावच्छेद[4]कत्वाभावात्। गन्धत्वव्याप्ययोः सुरभित्वासुरभित्वयोः कार्यतावच्छेदकत्वस्याव[5]श्यकत्वेन गन्धत्वस्य तथात्वे मानाभावाच्च। किञ्च चम्पकगन्धत्वावच्छिन्नं प्रति चम्पकत्वादिना तत्तद्गन्धत्वावच्छिन्नं प्रति तच्चम्पकत्वादिना कारणत्वमिति कार्यकारणभावद्वयेनैवाऽखि[6]लातिप्रसङ्गसम्भवे तथाकारणताया मानाभावात्। चम्पकगन्धे च सुरभित्वव्याप्यो जातिविशेषो। स एव कार्यतावच्छेदकः। संयोगनिष्टनिविडस्य सर्वसाधारणतया तत्कारणत्वञ्च सर्वपृथिवीमात्रवृत्तीति भवति तत्कारणतावच्छेदकतया पृथिवीत्वसिद्धिः।

1. नियामकत्वमी - क मातृकायाम्
2. निवर्त्तसंयोग
3. पिण्डीभावदर्शिनेन - क मातृकायाम्
4. अवच्छेद्यत्वाभावात्।
5. अवश्यकत्वे न
6. नैवाखिलात् प्रसङ्गयङ्गसम्भवे।

न चान्यतरकर्मजन्यतावच्छेदकसंयोगत्वव्याप्यसाङ्कर्य्यान्तस्य जातित्वमिति वाच्यम्, उभयकर्मजन्यतावच्छेदकजातिव्याप्यतयैव तत्स्वीकारात्। उक्तानुगतव्यवहारस्यैव तत्र प्रयोजकत्वादिति। वस्तुतस्तु विलक्षणस्पर्शसमवायिकारणतावच्छेदकतया तत्सिद्धिः। जलादिस्पर्शापेक्षया पृथिवीस्पर्शे वैलक्षण्यस्यानुभवसिद्धत्वात्। ननु पृथिवीत्वं जातिः पृथिव्याः लक्षणम्, तच्च पृथिवीस्वरूपासिद्धावाश्रयसिद्धावाश्रयसिद्धम्, तत्सिद्धौ च लक्षणं व्यर्थं तत्सिद्ध्यर्थत्वात्तस्यैवेति चेत्, न। स्वरूपासिद्धावपि इतरव्यावृत्तिसिद्धेः लक्षणाधीनत्वेन तदर्थकरणात्। इतरभेदानुमितौ व्यतिरेकसहचारगृहीतव्याप्तिकहेतोरेव लक्षणशब्दवाच्यत्वात्।

यत्तु तन्मात्रवृत्तिधर्मस्य लक्षणत्वमिति। तन्न। क्रियावत्त्वादीनामपि द्रव्यलक्षणत्वापत्तेः। अस्तु तथेति चेत्। न। आकाशादावव्याप्तेः। ननु घटादावपीतरभेदस्य प्रत्यक्षसिद्धत्वात् तदर्थमपि लक्षणं व्यर्थमिति चेत्। पक्षतावच्छेदकावच्छिन्नेतरभेदस्यासिद्धत्वात्। न च तस्यापि प्रसिद्धत्वेन व्याप्तिग्रहाद्यभावभावात्कथमनुमितिरिति वाच्यम्, व्यतिरेकित्वेन हेत्वभावसाध्याभावयोः एव व्याप्तिग्रहस्य हेतुतया साध्यप्रसिद्धेस्तत्रानपेक्षिततत्वात्। न च प्रतियोगिज्ञानस्याभावज्ञानतया साध्यज्ञानं विना कथं तदभावज्ञानमिति वाच्यम्, अत्र हि साध्याभावस्य भावरूपत्वेन प्रतियोगिज्ञानानपेक्षिततत्वात्।

तथाहि। [1]यत्तादात्म्यत्वेनेतरभेदः तत्तत्र पृथिवीत्वाभाव इति इतरपृथिवीत्वभावयोः एव तादात्म्यदैशिकविशेषणताभ्यां व्याप्तिग्रहः, येन सम्बन्धेन यद्रूपावच्छिन्नं प्रति येन सम्बन्धेन व्यापकत्वम्, तेनैव सम्बन्धेन व्याप्यत्वम्, तेनैव सम्बन्धेन व्यापकतावच्छिन्नाप्रतियोगिताकाभावस्तेन रूपेण तद्रूपावच्छिन्नाभावापादकः। दैशिकविशेषणताविशेषेण पृथिवीत्वाभावाभावरूपपृथिवीत्ववति [2]तेन तादात्म्येनेतरावच्छिन्नाभावः सिध्यन् [3]इतरभेदरूप एव सिध्यतीति न तत्र साध्यप्रसिद्ध्यपेक्षाक्लेशादर इति। तदुक्तम्। यत्र

1. यत्तादात्म्येनेतरत् तत्पृथिवीत्वाभाव।

2. तेन - नास्ति क मातृकायाम्

3. नियतभेदरूप - क मातृकायाम्

त्वभावव्यापकताहेत्वभावस्य ज्ञायते तत्र साध्यप्रसिद्धिरङ्गम् । तेन विना तदग्रहात् । यत्र तु भावव्यापकताहेत्वभावस्य न तत्र तदङ्गं तेन विनाऽपि तत्सम्भवादिति । ननु तथापि साध्यप्रसिद्ध्यभावे कथं साध्यविशिष्टज्ञानं विशेषताज्ञानसाध्यत्वाद् विशिष्टज्ञानस्य तथा चेतरभेदज्ञानं विना कथमितरभिन्नत्वप्रकारिकानुमितिरिति चेत् । न । प्रथममितरभेदविशेष्यकानुमितेरेव स्वीकारात् । तदाकारश्च पृथ्वी नेतराणीत्याकारार्थः ।

वस्तुतस्तु घटादिप्रसिद्धस्यैवेतरभेदस्य पृथिवीत्वावच्छिन्ने सिषाधयिषितत्वेन साध्यज्ञानस्य सुलभत्वात् । [1]पक्षताबललभ्यविशेषस्य कुत्रापि अनुमितेःपूर्वमज्ञानाच्च । न चैवं घटादेः [2]दृष्टान्तत्वासम्भवेन कथं व्यतिरेक्यादर इति वाच्यम्, तस्यापि प्रत्यक्षत्वेन दृष्टान्तत्वाभावात्पक्षतावच्छेदेनैक्यलाघवाय तत्प्रत्यक्षत्वस्यावश्यकत्वात् । अन्यथा घटत्वादीनां प्रत्येकं [3]पक्षतावच्छेदकत्वे शतः सिद्धसाधनापत्तिश्च । अत एव सपक्षनिश्चयाभावेन नासाधारण्यम् । न च पक्षमात्रवृत्तित्वेनासाधारण्यमिति वाच्यम् । अप्रयोजकत्वात्, शब्दमात्रं पक्षीकृत्यानित्यत्वे साध्ये शब्दत्वादावतिप्रसक्तत्वाच्च । इतरभेदोऽन्योन्याभाव इदमस्मद्भिन्नमिति प्रतीतिनियामकधर्मविशेषत्वम् । तच्चाभावाऽन्योन्याभाव-साधनेऽत्यव्याहुतमिति न तदर्थमनुमानान्तरक्लेशावकाशः । अत्र गन्धवत्त्वं पक्षतावच्छेदकं पृथिवीत्वलिङ्गम्, तेन हेतुपक्षतावच्छेदकयोर्नाभेदनिबन्धनो दोषः । साध्यसाधनादिभेद इवान्वयव्यतिरेकभेदेऽपि व्याप्तीनां भेदात् साध्याभावव्या पकीभूताभावप्रतियोगित्वं व्यतिरेकव्याप्तित्वं तद्वतश्च पक्षधर्मत्वमस्त्येवेति न व्यतिरेकिणि व्याप्तस्य पक्षधर्मताभावेन तादृशपरामर्शाद्यसम्भवे ना[4]नुमित्यनुमानाददोषः । अपनयोऽपीतरव्यापक-पृथिवीत्वाभावप्रतियोगिपृथिवीत्ववती चेयमित्याकारकस्तेन पक्षधर्मे व्याप्त्युन्नायकत्वेन [5]न तस्य वैय्यर्थ्याशङ्कापि । नच नेयमित्याद्यकारक-

1. पक्षतावललभ्याविशेषस्य
2. दृष्टान्ततत्वसम्मतेन ।
3. पक्षतावच्छेदकत्वे सिद्धसाधनत्वापत्तिश्च - क मातृकायाम् ।
4. असम्भवे न अनुमित्य नु माददोषः । तपनयोऽपीतरव्यापकपृथिवीत्वाभाव - क मातृकायाम् ।
5. न - क मातृकायां नास्ति ।

प्राचीनसम्मतोपनयस्यापि स एवार्थ: । एतेन-

साध्याप्रसिद्धिवैषम्यं, व्यर्थतोपनयस्य च ।
अन्वये नैव सिद्धिश्च, व्यतिरेकिणि दूषणम् ॥

इति प्रत्युक्तम् । उक्तरीत्या साध्याप्रसिद्धावपि क्षत्यभावात् । उक्तमार्गेण व्याप्तिपक्षधर्मयो: भिन्नवृत्तित्वरूपवैषम्यस्याभावात् । [1]पृथिवीमात्रस्य पक्षत्वेऽत्यन्ताभावेनान्वयित्वाभावात् । घटादीनां पक्षवहिर्भावे तु दूषणमुक्तमेव ।

यत्तु अस्ति तावदयं घट [2]इत्यादिनान्वयिसिद्धावपि व्यतिरेकिणा निर्दोषत्वात्तदादरेऽपि न क्षति: । उपायस्यानुपायतोपलम्भो न तु नानात्वमिति न्यायादितात्पर्य्यमाहु: । तन्न रमणीयम् । अन्वयिसम्भवे ऋजुमार्गेण सिद्धतोऽर्थस्य वक्रेण साधनताभोगेन व्यतिरेक्युपन्यासस्यानौचित्यापत्ते: । तस्मात्तद्ग्रन्थस्याप्यन्वयसम्भवे तात्पर्यमिति द्रष्टव्यम् ।

यत्तु प्रत्यक्षानुमानागमस्वविषययावत्प्रमाणोपस्थापितं पृथिवीत्वावच्छिन्नं यावन्तीं पृथिवीगन्धवत्त्वेन पक्षीकृत्य पृथिवीप्रकारकपृथिवीफलजन्यज्ञानविषयतारूप: पृथिवीव्यवहार: पृथिवीत्वहेतुकव्यतिरेकि साध्य इति तत्र पटादौ साध्यस्य प्रसिद्धिरिति न व्याप्याद्यग्रहापत्ति: । घृततैलादिसाधारण्येन साध्यप्रसिद्धेरुद्देश्यत्वाच्च [3]नांशत: सिद्धसाधनमिति, [4]तन्न । तादृशज्ञानविषयत्वरूपव्यवहारस्य धर्मिस्वरूपत्वात्तस्य सिद्धत्वेन साधनायोगात् । किञ्च भ्रमसाधारणतादृशज्ञानविषयत्वं जलादावतिप्रसक्तमनपेक्षितञ्च । प्रमारूपतादृशज्ञानविषयत्वं घृतादावितरभेदानुमितिं विना दुर्गममिति । तत एव तद्व्यवहारसिद्धे: किमनेन इति कृतं पल्लवितेन ।

क्षित्यादिकात्मनां चतुर्दशगुणवत्त्वसाधर्म्यमुक्तम् । इदानीमेतस्याद्रव्यत्वसिद्धये तानेव गुणान् विशिष्य दर्शयति-रूपरसेत्यादि । संस्कारस्थितिस्थापको वेगश्च । अत्र रूपादीनां सद्भावमात्रेणैव प्रतिपादनं न त्वसाधारणत्वेन व्यभिचारित्वात् । न रुपगन्धसमानाधिकरणरूपवत्त्वादिकमव्यभिचारीति वाच्यम्, गन्धमात्रस्यैव गमकत्वेनेतरभागवैय्यर्थ्यात् ।

1. पृथिवीमात्रपक्षत्वेन इष्टा अभावे नान्वयिता तावत् ।
2. सुहृदुपदेश इत्यादि ।
3. न सत: - क मातृकायाम् ।
4. तन्न - नास्ति - क मातृकायाम्

एतेषु [1]सूत्रकारसम्मतव्याजेन प्रत्यक्षत्वादिकमेव प्रमाणं दर्शयति - एते चेति। गुणानां विनिवेशो द्रव्येषु समवायः। स च प्रतिपाद्यत्वेनाधिक्रीयते-ऽस्मिन्निति गुणनिवेशाधिकारो द्वितीयोऽध्यायसूत्रमित्यर्थः। रूपादयो रूपरसगन्धस्पर्शविशेषगुणाः पृथिवीविशेषगुणाः पृथिवीत्वव्याप्यतावच्छेदक-गुणवृत्तिजातिमन्त इति यावत्। "रूपरसगन्धस्प[2]र्शवती पृथिवीति" (वै.सू. 2-1-1) सूत्रात् प्रत्यक्षमूलकमेतत्सिद्धिरिति भावः।

संख्यादिप्रमाणमाह - चाक्षुषवचनादिति । यद्यपि संख्यादीनां पृथिवीवृत्तित्वे प्रत्यक्षमेव मानम्, तथापि तत्प्रत्यक्षत्वे तत्प्रयोजकम्, तदपि सद्भावे प्रमाणं दर्शितमिति भाव। संख्यादीनां चाक्षुषत्वे अपिद्रव्यसमवायस्य हेतुत्वेनाभिधानात्। सूत्रकृतेति विशेषः। "संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म च रूपिसमवायात् चाक्षुषाणीति" (वै.सू.4.1.11) सूत्रे रूपैकार्थसमवायस्य लौकिकसंख्यादिविशिष्ट-चाक्षुषत्वावच्छिन्नं प्रति हेतुत्वेन पञ्चम्या उपादानाद्रूपसमवायिन्यां [3]पृथिव्यां तेऽपि सिद्धा इति भावः। रूपिद्रव्यसमवायस्य तत्रासत्त्वे तच्चाक्षुषः [4]नानुपपत्तेरित्याशयः।

गुणत्वे प्रमाणमाह-

(मू) पतनोपदेशाद् गुरुत्वम् । **अद्भिः सामान्यवचनाद् द्रवत्वम्। उत्तरकर्मवचनात् संस्कार इति।**

सामान्यवेगप्रत्यक्षाद्यभावे गुरुत्वात् पतनमिति सूत्रेपतनहेतुत्वेन गुरुत्वस्योपदेशात्पतनवत्यां पृथिव्यां तत्सिद्धिरिति भावः। गुरुत्वस्यातीन्द्रिय-त्वेऽपि गन्धवत्यधः संयोगफलिकाक्रिया। या असमवायिकारणकासमवायि-कारणकाक्रियात्वात् प्रसिद्धक्रियावदिति सामान्यतो [5]दृष्टादितरबाधसहकृतात् तत्सिद्धिरिति भावः।

---

1. मूलकारणसम्मतिव्याजेन - क मातृकायाम्। 2. स्पर्शवती।
3. पृथिव्यान्ते 4. अनुपपत्तिरिति
5. दृष्टादितरवाधसहकृतात्

न च रस एव पतने कारणमिति वाच्यम्, रसोत्कर्षणे पतनोत्कर्षा[1]भावे न तत्र तस्याप्रयोजकत्वात् । अत्र नवीनास्तु नाधःसंयोगफलकक्रियामात्रे गुरुत्वं हेतुः आलोकादस्तीति, तृणक्रियायां व्यभिचारात् । न च पतनसामान्येन गुरुत्वं हेतुः, किन्तु पतनत्वासव्यक्तिरजात्यवच्छिन्ने तादृशजातिरालोकादेरधः-संयोगफलिकायां क्रियायां नास्तीति न व्यभिचार इति वाच्यम्, पतने तादृशवैलक्षण्ये मानाभावात् । गुरुत्वप्रयोगतया तदङ्गीकरणे चान्योन्याश्रयात् । किञ्च क्रियात्वेऽपि समवायिकारणत्वमात्रसिद्धावपि गुरुत्वासमवायिकारण-त्वसिद्धिः । कथम् ? पारिशेषादिति चेत् । लोष्टादेरदृष्टवदात्मसंयोगस्य तदहेतुत्वेन [2]परिशेषाभावाच्च । न चैवं नोदनदशायामपि पतनोत्पत्तिः इति वाच्यम्, नोदनस्य प्रतिबन्धकविकल्पनये तत्परिहाराय सुकरत्वात् । धर्मिकल्पनातो धर्मकल्पनायाः लघुत्वादिति न्यायात् । ननु पतनं स्वसमवायिमात्रसमवेतासमवायिकारणकं पतनत्वसङ्गपतनवदित्यनुमानात् तस्य कारणत्वाभावसिद्धिरिति चेत्, [3]तस्याप्रयोजकत्वात् तादृशात्मसंयोगेन [4]तस्याभावेऽपि वेगादिवैलक्षण्यात्तत्-सिद्धिरिति । अन्यथोर्ध्वज्वलनादिकारणत्वेन तेजसि लघुत्वरूपातीन्द्रियगुण-विशेषसिद्धिः दुर्वारैव स्यादिति नास्ति गुरुत्वं नामगुणान्तरमिति प्राहुः ।

द्रवत्वे प्रमाणमाह- अद्भिरिति । सर्पिजतुमधूच्छिष्टानां पार्थिवानाम-ग्निसंयोगाद्रवत्वम् । अद्भिः (?) सामान्यमिति सूत्रे तेजःसंयोगविशेषात्पार्थिवेषु सर्पिरादिषु द्रवत्वं जलमिवोत्पद्यत इति सूत्रकारवचनात्तेजः संयोगाऽसमवायि-कारणकद्रव्यत्वसिद्धिः पृथिव्यामित्यर्थः । न च जलीयमेव द्रवत्वं संयुक्तसमवायेन क्षीरादावेव सर्पिरादावुपलभ्यत इति चेत् । न । तथात्वे सर्पिरादिद्रवत्वस्य तेजःसंयोगान्यत्वव्यतिरेकानुविधानानुपपत्तेः । क्षीरतैलादौ तु जलीयमेव सांसाद्धिकं द्रवत्वम् । जलावयवानामेव तत्राऽवष्टम्भकत्वात्, तेजःसंयोगान्वयव्यति-रेकाननुविधानाच्च । तदुक्तमस्मत्पितृचरणैः -

संयुक्तसमवायेन, जलीयं क्षीरतैलयोः ।
द्रवत्वं घृतजत्वादौ, स्वकीयं वह्नियोगजम् ।। इति

1. अभावेन
2. परिशेषभावात्
3. तस्याः प्रयोजकत्वात् - क मातृकायाम्
4. तारतम्याभावेऽपि

न च तैले जलावयवसत्त्वे दहनप्रातिकूल्यापत्तिरिति वाच्यम्, तदीयस्नेहोत्कर्षेण दहनानुकूल्याचरणात् । संस्कारे प्रमाणमाह- ''नोदनाद्यमिषोः कर्मतत्कर्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरञ्च'' (वै.सू.5.1.17) । न च नोदनजन्यं प्रथमकर्मद्वितीयकर्मणोऽसमवायिकारणमेव, द्वितीयं तृतीयस्येत्यादि-क्रमेण निरन्तरगतिसन्तान एव वेगः, न तु द्वितीयादिकर्मासमवायिकारणं कश्चन संस्कार इति वाच्यम्, कर्मणि सामानाधिकरण्यप्रत्यासत्त्याकर्मान्तरप्रति-बन्धकत्वेन जनकत्वाभावात् । न च कर्मध्वंस एवोत्तरकर्मजनक इति वाच्यम्, अनुभूयमानविलक्षणतारतम्यवेगस्य ध्वंसेनान्यथयितुमशक्यत्वात् । ध्वंसस्या-नन्त्यत्वेन सर्वदा कर्मोत्पादप्रसङ्गात्, कारणान्तरविरहाच्च । तदा कार्यभावोपपादने च कल्पनागौरवमिति नोदनाजन्यमिषोः कर्मसमवायिकारणकं क्रियात्वादित्य-नुमानादुक्त[1]रीत्या इतरकारणबाधेनेष्टाऽसमवायिकारणत्वसिद्धिः । वस्तुतस्तु वेगे [2]प्रत्यक्षमेव प्रमाणम् । वेगेनायमिषुः यातीति सार्वलौकिकबाधितप्रत्यक्षात् । इदमभ्युच्चयतयोक्तमिति ।

इदमुपलक्षणम् - हठादाकृष्टानां शाखादीनां नियतपूर्वदेशसंयोगादिना प्रतिनियतकार्येण स्थितिस्थापकाख्योऽपि संस्कारोऽत्र द्रष्टव्यः । तस्याती-न्द्रियत्वेऽपि शाखादीनां प्रतिनियतपूर्वदेशसंयोगः समवायिकारणकः संयोगित्वात् सङ्गतवदित्यनुमानादितरबाधसहकृतात्तत्सिद्धिरिति द्रष्टव्यम् ।

एवं द्रवत्वे सिद्धे इतरभेदव्यवस्थाहेतून् गुणविशेषान् विशिष्य दर्शयति-

(मू) क्षितावेव गन्धः । रूपमनेकप्रकारकं शुक्लादि । रसः षड्विधः मधुरादिः । गन्धो द्विविधः- सुरभिरसुभिश्च । स्पर्शोऽस्यानुष्णाशीतत्वे सति पाकजः ।

क्षितावेवेति । घ्राणजन्यलौकिकसाक्षात्कारविषयताव्याप्यगुण-त्वव्याप्यजातिसमवायित्वं गन्धत्वम् । तादृशगन्धाश्रययोग्यत्वं पृथिवीव्यवस्था-हेतुः यद्वा क्षितावेवेत्येवकारेण गन्धत्वावच्छिन्ने क्षितिवृत्तित्वायोगव्यवच्छेदः ।

1. उक्तरीत्येतरकारणबाधे वेगासमवायि मतवत्
2. प्रत्यक्षमेव प्रमाणम् ।

क्षित्यन्यवृत्तित्वव्यवच्छेदः प्रतीयमानेन त्वेवकारस्य मात्रशब्दार्थलक्षणया क्षितिमात्रवृत्तित्वं लक्षणापत्तेः। तेन साक्षाद्विजातीयगन्धवदवयवारब्धे तादृशावयवपरम्परयारब्धे उपलादौ गन्धाभावेऽपि न क्षतिः। न च विजातीय-गन्धवदारब्धेऽप्यवयविनि स्वस्वावच्छेदेन तादृशाभ्यामवयवगन्धाभ्यां गन्धद्वयमारभ्यत इति वाच्यम्। एकस्य [1]जनकत्वाद् घटाद्यसुरभिं प्रति स्वाश्रयसमवेतत्वप्रत्यासत्त्या सुरभितरगन्धस्य प्रतिबन्धकत्वाच्च; व्याप्य-वृत्तिवृत्तिगन्धत्वजातेरव्याप्यवृत्तिवृत्तिताविरोधाच्च। न च पाकजेतरसुरभि-गन्धत्वावच्छिन्नं स्वाश्रयाश्रयसमवेतत्वप्रत्यासत्त्या सुरभिगन्धवत्त्वेनैव पाकजेतरासुरभिगन्धत्वावच्छिन्नं प्रति निरुक्तप्रत्यासत्त्यासुरभिगन्धत्वेन चित्रगन्धत्वावच्छिन्नं प्रति विजातीयगन्धसहितगन्धत्वेन इति कार्यकारणत्रयमेव कल्प्यत इति। [2]प्रति स्वाश्रयाकारास्वाश्रयगन्धत्वावच्छिन्नं प्रति विजातीय-गन्धसहितगन्धत्वेनेति कार्यकारणभावत्रयमेव कल्पत इति विजातीयाभ्याम-प्यवयव[3]गन्धाभ्यामवयविनि व्याप्यवृत्तिरेव चित्रगन्धमारभ्यत इति वाच्यम्, बलवद्बाधकाभावेन विजातीयानारम्भकत्वव्याप्तेः लङ्घयितुमशक्यत्वात्।

गन्धवत्ता प्रतीतेश्च [4]परम्परयाऽवयविगन्धेनोपपादयितव्यत्वात्। एवञ्च निर्गन्धत्वेनैव सर्वैरनुभूयमानं पाषणादिकमपि न गन्धवत्। न च पाकजरूपात्तत्र गन्धवत्त्वमनुभूयमानमुद्भूतगन्धाबाधादनुद्भूतगन्धवत्त्वेन पर्यवस्यतीति। तत्र न बन्धसामान्याभाव इति वाच्यम्, रूपस्यैव पाकजरूपस्यापि तद्व्याप्यत्वे मानाभावात्। किञ्च सुरभित्वासुरभित्वयोरन्यतरावधारणाभावेन [5]विशेष-साम्ग्रयभावे कार्योत्पत्तेर्वक्तुमशक्यत्वाच्च। किञ्च गन्धत्वादीनामतीन्द्रियवृत्तित्वे

1. एकजनत्वात् घटीयसुरभिं।
2. प्रति स्वाश्रयाकारास्वाश्रयगन्धत्वावच्छिन्नं प्रति विजातीयगन्धसहितगन्धत्वेनेति कार्यकारणभावत्रयमेव कल्पत। - क मातृकायाम्
3. शब्दाभ्यां
4. परम्पराऽवयवगन्धेन
5. विशेषसामग्री भावे

जलादौ सार्वलौकिकगन्धाभावप्रत्यक्षापलापापत्तिः [1]योग्यनुपलब्धिभावात्। तेन गन्धस्य पृथिव्यान्याऽवृत्तित्वं न तु सर्वपृथिवीवृत्तित्वमिति। एवमपि गन्धत्वस्य पृथिवीत्वव्याप्यतावच्छेदकत्वाद् विशेषवत्त्वम्। नन्वेतदपि असिद्धम्। वाय्वादावपि सुरभिः समीरणमितिप्रतीतेः [2]वायुः गन्धवान् इति तद्रूपत्वेन प्रतीयमानत्वात् पुष्पवदित्यनुमानात् पृथिवीव्यतिरिक्तेऽपि वाय्वादौ गन्धवत्त्वसिद्धेः। न च वायूपनीतानां चम्पकादिभागानामेव सगन्धस्तेषा-मयोग्यत्वेऽपि गन्धवद् योग्यत्वात् शब्दवद्योग्यत्वात् प्रत्यक्षविरूद्धमिति वाच्यम्, गन्धप्रत्यक्षेण [3]सह समवायस्य हेतुत्वात्। न च तेऽपि महान्त इति वाच्यम्, तच्चाक्षुषापत्तेः चम्पकावयवानां सच्छिद्रत्वापत्तेश्च। न च तेषामुद्भूतरूपाभावात् न प्रत्यक्षमदृष्टाकृष्टैःपरमाणुभिस्ततपूरणान्न तेषां सच्छिद्रतापत्तिरिति वाच्यम्, असिद्धेः चम्पकेऽनुद्भूतरूपावयवाभावात्। प्रत्यक्षं [4]अदृष्टवशात् तत्पूरणे च कादाचिदपि क्षतत्वानुपपत्तेरिति वाच्यम्, असिद्धेः चम्पकेऽनुद्भूतरूपावयवा-भावात्, अदृष्टवशात्पूरणे च कदाचिदपि क्षतत्वानुपपत्तेरिति चेत्। न। वायूपनीतैरद्भूतरूपवद्भिरपि चम्पकाद्यवयवैरनुद्भूतरूपमेवावयवान्तरमारभ्यते। अनुद्भूतरूपतैजस उद्भूतरूपतेजोजनकत्ववदुद्भूतरूपस्याप्यनुद्भूतरूपजनने विरोधाभावात्। अदृष्टस्य [5]फलवल्कलतया क्षतादौ तथा पूरणाभावेऽपि प्रकृते तथादारम्, सद्भावेन तथापूरणे क्षत्यभावाच्चम्पकाद्यवयवानामेव गन्धो न वाय्वादेः कार्यकारणान्तरभावकल्पने गौरवाद् वाय्वादौ सार्वलौकिकगन्धवत्त्वाभावा-पलापप्रसङ्गाच्चेति दिक्।

अन्यदपि पृथिवीत्वव्याप्यगुणान्तरमाह-रूपमिति। क्षितावेव इत्यनुवर्तते। अनेकप्रकारमिति रूपत्वव्याप्यनानाजातिमच्छुक्लनीलपीता-दीत्यर्थः, तेन रूपत्वावान्तरजातिमन्नानारूपसमानाधिकरणद्रव्यविभाजको-

1. योग्यनुपलब्ध्यभावात्
2. वायुगन्धत्वात् प्रतीयमानत्वात्, क - मातृकायाम्
3. सत्समवायस्य तन्त्रत्वात् - क मातृकायाम्
4. अदृष्टाकृष्टैः परमाणुभिस्ततपूरणान्न तेषां सच्छिद्रतापत्तिरिति - क मातृकायाम्
5. फलवलकलतया

पाधिमत्त्वमित्यर्थः, तेन शुक्लरूपस्य पृथिवीव्यभिचारित्वेऽपि शुक्लतरशुक्लतमनीलादिरूपाणां पृथिवीत्वव्याप्यत्वमेव। यद्वाऽनेकप्रकारं विजातीयनानारूपासमवायिकारकं चित्ररूपमित्यर्थः।

[1]शुक्लादीत्येतद्गुणसंविज्ञानबहुव्रीहीति नीलादिपरिग्रहः। शुक्लादि चेदत्र चकारः पूरणीयः। तेन चित्रं रूपं नीलादिरूपञ्च क्षितावेवेत्यधस्तनेनान्वयः। तच्च पृथिव्यामेव नान्यत्र विजातीयनानारूपाणामन्यत्राभावात्। चित्रत्वञ्च विजातीयरूपासमवायिकारणरूपत्वम्। न च विजातीयानामनारम्भकत्वेन नीलपीताभ्यामवयवगताभ्यां नावयविनि एवं रूपमुत्पाद्यत इति न तादृशरूपसिद्धिरिति वाच्यम्, तादृशव्याप्येतरप्रयोजकत्वात्। [2]अन्यथा तत्रावयविनोः नीरुपत्वेऽचाक्षुषत्वापत्तेः। लौकिकसाक्षात्कारविषयतासम्बन्धावच्छिन्नाधेयताकं[3]द्रव्यविशिष्टचाक्षुषत्वावच्छिन्नं प्रत्युद्भूतरूपत्वेन कारणत्वात्। अन्यथा वायुघ्राणादावपि चाक्षुषतापत्तेः। न [4]चाव्याप्यवृत्तिं विना नैव तत्र रूपाणीति वाच्यम्, एकस्यावयवरूपस्य सहकारिविरहेणारम्भकत्वात्, रूपत्वस्य व्याप्यवृत्तिवृत्तेरव्याप्यवृत्तिवृत्तिविरोधाच्च, सविषयावृत्तिव्याप्यवृत्तिवृत्तिजातेरव्याप्यवृत्तिवृत्तिताविरोधाच्च [5]एवं चित्ररूपमित्यबाधितसार्वलौकिकप्रत्ययाच्च। ननु तादृशरूपं प्रति नीलपीतादेः प्रत्येकं व्यभिचारान्न कारणत्वम्। [6]रूपत्वेन न तादृशरूपम्, तादृशरूपं प्रति नीलपीतादेः प्रत्येकं व्यभिचारात्, नापि पृथिवीसमवेतरूपत्वेन तथैव व्यभिचारात्, अतोऽनुगतकारणभावान्न तादृशरूपोत्पत्तिरिति [7]यत्स्वसमवेतं तदन्यधर्मसमवायित्वस्य विजातीयत्वेन विवक्षितत्वात्। चित्रमात्रावयवके च चित्रत्वभिन्नं यत्समवेतमवयवचित्ररूपसमवेतं गुणत्वादितदभिन्नञ्च चित्रत्वमपीति तत्समवायिनोऽवयवचित्ररूपस्यावयविनि [8]चित्ररूपोत्पादकत्वादिति।

---

1. शुक्लादित्यनुगतगुणसंवित् - व्रीहिणा
2. अन्यथातन्द्रावयविनोः
3. द्रव्यत्वविशिष्टया - क मातृकायाम्
4. अव्याप्यवृत्तिना तेनेव - क मातृकायाम्
5. एकं
6. रूपत्वेन न तादृशरूपम्, तादृशरूपं प्रति नीलपीतादेः प्रत्येकं व्यभिचारात् - क मातृकायाम्
7. यत्समवेतं - क मातृकायाम्।
8. चित्रस्पर्शोऽप्यभ्युपगन्तव्यः।

[1]एवं सुकुमारकठिनाभ्यामवयवाभ्यामारब्धेऽवयविनि चित्ररूपस्पर्शोऽप्यभ्युपगन्तव्यः। अव्याप्यवृत्तिनानारूपस्पर्शाभ्युपगमे सविषयावृत्तिव्याप्यवृत्तिवृत्ती इत्यादि व्याप्तिविरोधः। नीस्पर्शत्वे चावयविनोऽ[2]वाचत्वापत्तिः। लौकिकविषयत्वावच्छिन्नाधेयताकद्रव्यत्व-विशिष्टा[3]विशिष्टत्वावच्छिन्नं प्रति उद्भूतस्पर्शवत्त्वेन हेतुत्वात्। तिक्तमधुरावयवारब्धे चावयविनि न [4]चित्ररसाङ्गीकारः, तस्य नीरसत्वेऽपि क्षत्यभावात्। एवञ्च [5]न नानारसावयवारब्धेऽवयविनि स्वाश्रयसमवेतत्वप्रत्यासत्त्या अवयवरसानामुपालम्भः उपचारादेव [6]मधुरार्ककर्कटीषड्रसहरीतकीत्यादिव्यवहारः।

अत्र नवीनाः - नीलरूपाऽसमवायिकारणकं रूपं [7]पीतरूपासमवायिकारणकं न वेति चित्रत्वेन प्रतीयमाने रूपे विप्रतिपत्तिं दर्शयित्वा रूपादिषु विजातीयासमवायिकारणत्वाभावं [8]व्यवस्थापयन्तो विजातीयरूपत्वान्नानावयवारब्धेऽवयविनि भेदादवयवावच्छेदेनाव्याप्यवृत्तीनि नानेनैव रूपाणीत्याहुः। तेषामयमाशयः- समानाधिकरणविजातीयनानारूपसमुदायादेवावयविचित्ररूपव्यवहारोपपत्तावतिरिक्तचित्ररूपकल्पने मानाभावाद्, अव्याप्यवृत्तिनानारूपस्वीकाराच्च। नावयविनोऽचाक्षुषत्वप्रसङ्गः। नान्यावयविनि पीतावच्छेदेन नीलरूपादर्शनादवयविनीलत्वावच्छिन्नं प्रति नीलेतररूपत्वेन प्रतिबन्धकत्वमवश्यमास्थेयमिति कथं नीलावयवावच्छेदेनाप्यवयवनीलेन नीलारम्भः। न च नीलादेः स्वावयवावच्छेदेन नीलाद्युत्पादकत्वेस्वाभाव्यकल्पनेनैव पीतावच्छेदेन नीलाद्युनुत्पाद इति वाच्यम्, तादृशप्रतिबध्यप्रतिबन्धकभावकल्पनामन्तरेण स्वाभाव्यस्यापि वक्तुमशक्यत्वादिति चेत्। न एतादृशप्रतिबध्यप्रतिबन्धकभावाङ्गीकरणे चित्ररूपं तदितररूपत्वेन प्रतिबन्धकत्वे सर्वथा तदविलोपापत्तेः। न च चित्रेतररूपत्वावच्छिन्नं प्रति तदितररूपत्वेन

1. एवं अभ्युपगन्तव्य - नास्ति।
2. वयविनोऽत्वा --- पत्तिः,
3. वाचत्वावच्छिन्नं
4. चित्रत्वस्याङ्गीकारः।
5. नानरसानामुपलम्भः - क मातृकायाम्।
6. तिक्तमधुरार्ककटपत्रसादृशतर्कापादिव्यवहारः - क मातृकायाम्।
7. रूपं नास्ति - क मातृकायाम्।
8. व्यवस्थापयन्तो - क मातृकायाम्।

प्रतिबन्धकत्वमिति वाच्यम्, मानाभावात्। कथं तर्हि पीताद्यवच्छेदेन [1]नीलाद्युत्पत्तिः (?) अवच्छेदकतासंसर्गेणावयविनीलादुत्पत्तिं प्रति समवायेनावयवनीलादेः कारणत्वकल्पनयैवान्यावच्छेदेन तदनुत्पत्तिसम्भवात्।

किञ्चानुगतकारणाभावादपि न तादृशकारणसिद्धिः। न त्वेकं चित्ररूपं प्रति नीलसम्बलिततत्पीतत्वपीतसम्बलितरक्तत्वरक्तसम्बलितश्वेतत्वादिनाऽनुगतेन कारणताग्रहः सम्भवति, न वानुगतकारणाभावेऽनुगतकार्यत्वस्योत्पत्तिः। न च चित्रत्वावच्छिन्नं प्रति विजातीयनानारूपत्वेन कारणत्वं विजातीयत्वं च चित्रत्वभिन्नस्वसमवेतभिन्नधर्मसमवायित्वमित्युक्तमेवेति नानुगतकारणाभाव इति वाच्यम्, निरूक्तरूपस्यापि स्वत्वघटितत्वेनानुगतत्वाभावात्। तस्मादनुगतकारणाभावाद्व्याप्यवृत्तीन्येव तत्र विजातीयानि नानारूपाणीति। न चैवमेकचित्ररूपमिति [2]प्रतीत्यनापत्तिरिति वाच्यम्, [3]एकं वनमिति प्रतीतिवदेकसमूहविषयत्वेनाप्युपपत्तेः। अन्यथा एकत्वेऽसतिचित्रत्वानुपपत्तेः। तदुक्तम्। ''एकं चेत् चित्राताऽकस्माच्चित्रं चेत्, एकता कुतः ? तस्मादेकञ्च चित्रं चेत्येतच्चित्रतरं महदिति। किञ्च शुक्लरक्तावयवारब्धेऽवयविनि शुक्लरक्तोऽयमित्यादिव्यवहारदर्शनात्तत्र शुक्लरक्तत्वादिकमपि चित्रत्वव्याप्यं धर्मान्तरकल्पनीयमिदं रक्तपीतत्वादिकमपि। एवञ्च तेन रूपेणानेककार्यकारणाभावकल्पनाप्रसङ्गः। पीतान्नीलानुत्पद्यत्वं नीलत्वावच्छिन्नं प्रति नीलेतररूपत्वेन प्रतिबन्धकत्वमित्यनन्त[4]प्रतिबन्धकत्वाभाव कल्पनामाप्नोति।

अस्माकन्तु निरूक्तकार्यकारणभावेन नातिप्रसङ्गभङ्गान्नतथाकल्पनमिति वाच्यम्। [5]ननु च नीलमात्रावयवारब्धेऽवयविनि विरोधाभावेन नीलरूपस्य व्याप्यवृत्तित्वात्तद्वृत्तिजातेरूपत्वस्याव्याप्यवृत्तिवृत्तिताविरोधस विषयावृत्तिव्याप्यवृत्तिवृत्तिजातेरव्याप्यवृत्तिवृत्तिविरोधादिति चेत्, [6]अव्याप्यवृत्तिवृत्तिरपि कर्मत्वादेरव्याप्यवृत्तिवृत्तित्वदर्शनेनैतद्व्याप्तेऽभङ्गात् तृणादिकर्मणोव्याप्य-

---

1. नीलादुत्पत्तिः - क मातृकायाम्
2. प्रत्ययानापत्तिः।
3. एक वचनमिति - क मातृकायाम्।
4. प्रतिबन्धक
5. न च
6. व्याप्यवृत्तिवृत्तेरपि

वृत्तित्वेऽपि निश्चयमूले वृक्षे शाखावच्छेदेन विद्यमानस्य कर्मणोऽ-व्याप्यवृत्तित्वात्। न शाखानामेव तत्कर्म न वृक्षस्येति वाच्यम्, तदानीं वृक्षश्चलतीत्यादितत्प्रत्यक्षात्। तेन व्याप्यवृत्तिवृत्तेरपि कर्मत्वस्य व्याप्यवृत्तिवृत्तिदर्शनेनेयं व्याप्तिः। पक्वे पाकरक्ते घटे श्यामरूपादीनामव्याप्य-वृत्तित्वस्य प्रत्यक्षसिद्धत्वेन भग्नकपाले चान्तराश्यामिकोपलब्धेश्च रूपत्वादेः व्याप्यवृत्तिवृत्तित्वाभावाच्च। किञ्च-

लोहितो यस्तु वर्णेन, मुखे पुच्छे च पाण्डरः।
श्वेतः खुरविषाणाभ्यां, स नीलो वृष उच्यते ॥

इत्यादौ तत्तदवयवावच्छेदेन पाण्डरादिरूपवत्त्वमवयविनः स्मृत्या प्रतिपाद्यते, न तु तदतिरिक्तरूपवत्त्वं पाण्डर इत्यापादानानुपपत्तेः।

न च मुखपदेन मुखस्थलोम्नामेवाभिधानम्। अवयवितदवच्छेदेनापि चित्ररूपमेवेति वाच्यम्। लोम्नां स्वाधिकरणसमानरूपत्वनियमेन तत्र पाण्डररूपा भावे लोम्नां तदनुपपत्तिरिति कृतं नातिरिक्तचित्ररूपसिद्धिरित्युन्नीयते। एतेन स्पर्शादिकं व्याख्यातम्। एवं तिक्तमधुरावयवारब्धेऽवयविनि अव्याप्यवृत्तयो नानारसा एव न तु तत्र नीरस, एवावयवि [1]षड्रसा हरितक्यादिसार्वलौकिक-प्रत्ययाविरोधादि दिक्।

स्वतन्त्रास्तु- विजातीयनानारूपवदवयवारब्धेऽवयविनिरूप एवं रूपे स्वविजातीयरूपजनकत्वस्य कुत्राप्यदृष्टत्वात् न चावयवगतनानारूपाणि तत्तदवयवावच्छेदेनावयविव्याप्यवृत्तीनि नानारूपाणि [2]जनयन्तीति वाच्यम्, एकस्याजनकत्वात्तत्तदवयवावच्छेदेनावयविनि तत्तद्रूपकल्पनापेक्षयाऽवयवा-नामेव तथात्वस्य वक्तुमुचितत्वात्। न चावयविनो नीरूपत्वेऽचाक्षुषतापत्तिरिति वाच्यम्, द्रव्यगुणादिचाक्षुषसाधारण्येन चाक्षुषत्वावच्छिन्नं प्रति उद्भूतरूपतत्समवायस्य हेतुत्वात्। अन्यथा द्रव्यचाक्षुषत्वावच्छिन्नं प्रति उद्भूतरूपवत्त्वेन गुणादिचाक्षुषत्वावच्छिन्नं प्रति उद्भूतरूपवत्[3]समवेतत्वेन

---

1. नास्ति 2. जनयतीति 3. समवेतत्वे

हेतुत्वे कार्यकारणभावद्वयकल्पनापत्तिः। तेन नीरूपस्याप्यवयविनो रूपवत्समवेतत्वात् प्रत्यक्षोपपत्तिः। यद्वा विषयाणां द्रव्यगुणादीनामेकशक्तिमत्त्वेनैव चाक्षुषत्वावच्छिन्नं प्रति हेतुत्वमतो न द्रव्यगुणादिविषयत्वभेदेन भिन्न[1]कार्यकारणभावकल्पनापत्तिः। यद्वा तादृशशक्तेश्च फलोन्नेयतया वाय्वादौ तदभावान्न तत्प्रत्यक्षम्। तादृशावयविनि तत्सत्ताप्रत्यक्षत्वमिति न काचिदनुपपत्तिः।

यत्तु चक्षुःप्रतियोगिकविलक्षणं चक्षुःसंयोगत्वेन चाक्षुषत्वावच्छिन्नं प्रति हेतुत्वं चक्षुःप्रतिपत्तिप्रतियोगिकेति करणान्न चाक्षुषः। विलक्षणेति करणान्न वाय्वादेश्च चाक्षुषत्वमिति नोद्भूतरूपवत्त्वेन हेतुत्वं विलक्षणचक्षुस्संयोगित्वात् तादृशावयविनश्चाक्षुषत्वमिति चेन्न। वायौ तादृशसंयोगाभावे इन्द्रियसम्बन्धविशेषणतया तत्र रूपाभावचाक्षुषानापत्तेः। न च तत्र रूपवदन्योन्याभाववद्रूपात्यन्ताभावोऽप्यप्रत्यक्षमिति वाच्यम्, सर्वतान्त्रिकव्यवहारलोपापत्तेरिति। न चैवमेकं चित्रं रूपमिति प्रतीत्यनापत्तेश्चित्रत्वाश्रयस्यैकस्य रूपस्याभावादिति वाच्यम्, चित्रशब्दस्य वनशब्दवत्समूहविशेषवाचित्वात्। स्वाश्रयसमवेतत्वप्रत्यासत्त्या एकावयवेष्वच्छिन्नविजातीयरूपं जातमिति तस्यार्थः। चित्रो घट इति प्रतीतिस्तु विजातीयरूपत्ववत् [2]समवेतत्वविषयतया कल्पनीयेति प्रतिपेदिरे।

द्वयोर्गुरूत्वं रसवत्त्वमिति साधर्म्यमुक्तम्। तत्र यादृशं रसवत्त्वं पृथिव्यामितरभेदव्यवस्थापकं तदाहुः - रस इति । तत्राव्यक्तमधुरमात्रस्य जलवृत्तित्वात्षड्विधोऽपि रसः पृथिवीवृत्तिः। तत्राम्लत्वादिकं पृथिवीत्वव्याप्यतावच्छेदकम्। मधुरत्वस्य पृथिवीत्वव्याप्यतावच्छेदकत्वाभावेऽपि तारतम्यवन्मधुरत्वं भवत्येव तद्व्याप्यतावच्छेदकम्। तत्र यद्वाम्लादिरसवत्त्वमितरभेदानुमाने भागासिद्धम्। तथापि तादृशरसवद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वमभिप्रेतमिति न दोषः। [3]स्वसमानाधिकरणद्रव्यविभाजकोपाधि व्याप्यतावच्छेदकजातिमद्गुणत्वेन अम्लादिरसानामपि विशेषगुणत्वं नानुपपन्नम्।

---

1. कार्यकारणाभाव - क मातृकायाम्। 2. समवेतत्वविषतया येति - क मातृकायाम्।
3. स्वसमानाधिकरणद्रव्यविभाजकोपाधिव्याप्यतावच्छेदकजातिमद्गुणत्वेन आम्लादिरसानामपि विशेषगुणत्वं नानुपपन्नम् - नास्ति क मातृकायाम्।

ननु सुखविशेषजनकघ्राणग्राह्यगुणे एव लौकिकानां गन्धव्यवहारादसुरभिषु पृथिवीत्वं न स्यात्तद्व्यस्थापकगन्धाभावादित्याशङ्क्या सुरभेरपि गन्धवत्त्वात्तदाश्रयस्यापि पृथिवीत्वमिति दर्शयितुं गन्धं द्वैविध्यं दर्शयति - गन्ध इति। [1]तेन गन्धद्वैविध्यस्य क्षितावेव गन्ध इत्येतद्ग्रन्थरूप्यत्वेऽपितद्ग्रन्थनिरूप्यत्वेऽप्यत्र तन्निरूपणं नार्थान्तरमिति भाव: ।

यत्तु पृथिव्यादीनां रूपवत्त्वाऽविशेषेऽपि रूपावान्तरभेदात् परस्परद्रव्यभेद एव गन्धावान्तरभेदात् तद्भेदोऽस्तीत्यत आह - गन्ध इति । तन्न । द्वैविध्यस्योक्ताशङ्का निवर्त्तकत्वाभावात् । न च गन्धस्य पाकजत्वाद् द्वैविध्यस्यापि गन्धस्य पृथिवीत्वव्यभिचारित्वमित्येतत्तात्पर्यकोऽयं गन्ध इति वाच्यम्, गन्धस्य गन्धत्वेनैव पृथिवीत्वव्यवस्थापकत्वेन पाकजत्वस्य तत्राप्रवेशात् । नन्वसुरभित्वं सौरभ्यात्यन्ताभावो न गन्धावान्तरभेद इति चेत् । न । तारतम्यानुपपत्तेः । असुरभिर्गन्ध इति सामानाधिकरण्यप्रत्ययबलेन तस्य गन्धत्वव्याप्यत्वनियमात् । नञोऽपि अधर्मताऽसुरभि इतिवद् विरोधिपरत्वं, न त्वत्यन्ताभावबोधकत्वमप्यग्रे प्रतिपादयिष्यत इति ।

स्पर्शस्य येन रूपेण पृथवीव्यवस्थापकत्वम्, तदाह - स्पर्श इति । अनुष्णशीतस्पर्शस्य वायुसाधारणत्वाद् व्युदासार्थं पाकजेति । तदुपादाने चानुष्णशीतपदवैय्यर्थ्यात् पाकजस्पर्शवत्त्वं पृथिव्यार्लक्षणम् । अनुष्णशीतपदस्य पाकजस्पर्शेऽनुष्णशीतत्वतात्पर्यग्राहकत्वं बोध्यम् । तत्र स्पर्शवत्त्वमात्रं जलादिसाधारणमिति पाकजेति । तावन्मात्रञ्च तेज:संयोगसमवायिकारणकद्रव्यत्वाश्रये सुवर्णादावतिव्याप्तमतः स्पर्शेति । न च पीलुपाकमतेऽवयविन्यव्याप्तिः । तत्र [2]पाकाभावे न पाकजस्पर्शाभावादिति वाच्यम्, पाकान्वयव्यतिरेकानुविधायिस्पर्शवत्त्वस्य विवक्षितत्वात् । पाकान्वयव्यतिरेकानुविधायित्वं चावयविस्पर्शस्यापि तेन विना तज्जनकावयवस्पर्शाभावात् तदिति । अत्र चित्तस्पर्शाभ्युपगमे तादृशस्पर्शवत्त्वमपि पृथिवीत्वव्यवस्थापकमिति द्रष्टव्यम् । अत्र यद्यपि पार्थिवविशेषगुणमात्रे तदीयद्रवत्वे च पाकजत्वाविशेषेण पाकजरूपवत्त्वमपि पृथिव्यार्लक्षणं भवत्येव । तथापि स्पर्शतया तन्नोक्तमिति द्रष्टव्यम् ।

1. तेन --- रूप्यत्वेऽपि - नास्तित । 2. पाकाभावेन ।

ननु स्पर्शे [1]पाकजत्वमसिद्धम् । कारणगुणक्रमेणैव सर्वत्र स्पर्शोत्पत्तेः । न चाशीविषद्रंष्ट्रादिस्पर्शानां विजातीयदुःखविशेषजनकतया वैलक्षण्यं वक्तव्यम् । तत्र चान्यस्य कारणस्याभावात्पाक एव प्रयोजक इति स्पर्शे पाकजसिद्धिः इति वाच्यम्, तद्वैलक्षण्यस्य [2]कारणतावच्छेदकत्वेन जातिरूपतया पाकप्रयोजकत्वाभावात्, तादृशदुःखविशेषे च संयोगविशेषस्य हेतुत्वेन स्पर्शस्य तत्राहेतुत्वात् । अत एव गङ्गाजलादिसंयोगस्यैव [3]धर्मविशेषजनकत्वं स्पर्शस्य त्वभिघातमात्रहेतुत्वात्तस्य च सर्वत्राविशेषान्न स्पर्शवैलक्षण्यसिद्धिः । धर्मविशेषान्न स्पर्शवैलक्षण्यसिद्धिः । एवञ्च प्रौढाप्रौढिदशायामपि [4]कपिकच्छुसंयोगविशेषस्यैव हेतुत्वं तद्दुःखविशेषहेतुत्वम् । ननु कपिकच्छोः प्रौढित्वं विलक्षणस्पर्शवत्त्वं, न तु जात्यन्तरं गौरवात्तेन प्रौढिव्यवस्थापकतया विलक्षणपाकजस्पर्शसिद्धिरिति चेत् । न । विलक्षणावयवाविशेषवत्त्वस्यैव प्रौढिरूपत्वात् । दृश्यतेऽप्रौढिदशापेक्षया प्रौढिदशायां विलक्षणावयवाः [5]कपिकच्छविति [6]देवप्रौढित्वं नान्यद्गौरवात् । अतोऽपि न स्पर्शे पाकजत्वसिद्धिः । ननु पृथिवी[7]विशेषे गुणत्वावच्छिन्नं प्रति पाकजत्वेन हेतुत्वात्तस्य गन्धवत्पृथिवीस्पर्शस्यापि पाकजमनुमेयम्, पृथिवीस्पर्शः पाकजः पृथिवीविशेषगुणत्वाद् गन्धवदिति चेत् । न । विशेषगुणत्वस्यैव पृथिवीविशेषगुणत्वस्याप्रयोजकबाधकाभावात् । विपक्षे बाधाभावाच्च । यत्तु पृथिवीविशेषगुणत्वेन पाकजत्वम्, पाकजत्वेन पृथिवीविशेषगुणत्वमित्यन्यो[8]न्याश्रयान्न पाकजत्वसिद्धिरिति । तन्न । पाकजत्वस्य द्रव्यत्वसाधारण्येन विशेषगुणत्वपाकजत्वाभावान्नान्योन्याश्रयात् । एतेनात्मदशायां सुकुमारस्यापि द्रव्यविशेषस्य पाकानन्तरं कठिनतया त्वाचसाक्षात्कारतया त्रयत्वमिति प्रत्यक्षसिद्धमेव कठिनस्पर्शस्य पाकजत्वमिति । तन्न । वैशेषिकनये पाकजस्पर्शस्य परमाणुवृत्तित्वेन तत्र त्वक्साक्षात्काराभावात् ।

1. पाकजमसिद्धम् - क मातृकायाम्
2. कारणतावच्छेदकतया
3. धर्मविशेषान्न स्पर्शवैलक्षण्यसिद्धिः - क मातृकायाम् ।
4. कपिलच्छु
5. कपिलच्छाविति
6. तदेवप्रदौढत्वं
7. विशेषगुण
8. अन्योन्याश्रयातपाकजत्व --- क मातृकायाम्

किञ्च सुकुमारत्वकठित्वे प्रशिथिलावयवसंयोगकाठिनावयवसंयोगविशेषवृत्तिसंयोगत्वव्याप्ये जातित्वावच्छेदकतासम्बन्धेन तादृशसंयोगोऽवयविन्यपि वर्त्तते इति भवति तत्र सुकुमारादिबुद्धिः। न च संयोगरूपत्वे चाक्षुषापि तद्ग्रहापत्तिः। तादात्म्येन तादृशव्यक्तीनां चाक्षुषं प्रति प्रतिबन्धकत्वात्, [1]तदनापत्तेश्च। चक्षुषा [2]घटग्रहेऽपि कथं तत्र सुकुमारत्वादिसंशय इति चेत्। सुकुमारत्वादिना तद्ग्रहात्, तत्त्वादिग्रहे त्वक्संयोगस्य विशिष्टहेतुत्वात्। न च सुकुमारत्वादेः संयोगत्वव्याप्यत्वेऽन्यतरकर्मजन्यतावच्छेदकसंयोगत्वव्याप्यजात्या [3]सङ्करापत्तिरिति वाच्यम्, तस्योपाधिरूपत्वेऽपि क्षत्यभावात्। न च लाघवात् स्पर्शवृत्तिसुकुमारत्वादिकमपि वाच्यम्, [4]उद्भूतानुद्भूतानभिभूतानन्तस्पर्शवृत्तितया उचितत्वात्। किञ्च पृथिवीस्पर्शो न पाकज अनुष्णशीतस्पर्शत्वाद् वायु स्पर्शवदित्यनुपपन्नं स्पर्शे पाकजत्वविशेषणमिति चेत्। न। पच्यमाने पृथिवीपरमाणौ कश्चिद्गुणः पाकादुत्पद्यते। कश्चिन्नेति सर्वसिद्धम्। तत्र रूपादिकं प्रति विशिष्टपाकस्य हेतुत्वकल्पनायां गौरवात्, प्रतिनियतेन्द्रियग्राह्यगुणत्वव्याप्यजातिमत् पृथिवीगुणत्वावच्छिन्नं प्रति पाकत्वेन हेतुत्वं लाघवात् कल्प्यते स्पर्शस्यापि तादृशत्वाभिभवस्यैव तत्र सामग्रीवशात् सम्पन्नं पाकजत्वम्। एवञ्च पाकजन्यतावच्छेदकतया स्पर्शे वैजात्यसिद्धौ तस्य पृथिवीविशेषगुणत्वम्, अन्यथा तत्र पृथिवीत्वव्याप्यतावच्छेदकगुणवृत्तिजात्यभावे पृथिवीविशेषगुणत्वानुपपत्तेः। एवं सुकुमारत्वकठिनत्वेऽपि स्पर्शव्याप्येन संयोगत्वव्याप्येऽन्यतरकर्मजन्यतावच्छेदकजात्या साङ्कर्यापत्तेरिति दिक्।

ननूष्णशीतस्पर्शाविव स्पर्शतयोरेव लोकानां स्पर्शत्वव्यवहारात्पृथिवीवाय्वोरनुष्णाशीतव्यवहारः तदुभयाभावनिबन्धन इति चेत्। न। पृथिव्यां स्पर्शाभावे त्वगिन्द्रियग्राह्यतापत्तेः। तदुभयाभावमात्रेण [5]स्पर्शाभावप्रतीत्यनुपपत्तेश्च। तेनानुष्णाशीतस्पर्श इति अनुष्णाशीतत्वस्य स्पर्शत्वसामानाधिकरण्यादुष्णादिवदनुष्णाशीतोऽपि स्पर्शभेदः [6]नञश्च सुरादिशब्द [7]इव

1. ष्टापत्तेः। क मातृकायाम् 2. तद्ग्रहेऽपि - क मातृकायाम् 3. संस्कारापत्ति - क मातृकायाम्
4. उद्भूतोभूतानुभूतानन्तस्पर्शवृत्तितामपेक्ष्यलाघवेन संयोगवत्तितया---
5. स्पर्शात् प्रतीत्य - क मातृकायाम् 6. नं 7. इति विरोधिलक्षणया

विरोधिलक्षणया प्रयोग इत्यभिप्रेत्योक्तमनुष्णाशीत इति। नन्वियं पृथिवी सर्गादावुत्पद्यत एवाकाशादिवत् नित्येति। नाद्यः, प्रलये सर्वकार्यद्रव्याणामभावेन समवायिकारणाभावेन तदुत्पत्तेरसम्भावितत्वात्। नान्त्यः, अवान्तरसहत्वाधिकरणपृथिव्यानित्यत्वासम्भवात्।

न च तदधिकरणमपि काचित् पृथिवी अनुपलम्भबाधितत्वादित्याशङ्क्यास्य द्वैविध्यमाह-

(मू) सा च द्विविधा। नित्या चानित्या च। परमाणुलक्षणा नित्या। कार्यलक्षणा त्वनित्या।

सा अनुपदं निरुक्ता। यद्यपि या नित्या सा नानित्या। तथापि पृथिवीत्वं नित्यानित्योभयवृत्तीत्यर्थः। यद्यपि नित्यं पृथिव्यां न प्रत्यक्षप्रमाणम्, तथापि वक्ष्यमाणप्रकारेणात्रानुमानं प्रमाणमिति भावः। न नु प्रत्यक्षदृष्ट्या पृथिव्या च कार्यत्वेनानित्यनित्यादिकं सम्भवतीत्याह- परमाणुलक्षणेति। लक्षणपदं स्वरूपपरम्। परमाणुलक्षणा परमाणुरुपेत्यर्थः। अत्र पृथिवीत्वं [1]निरवयविधर्मवृत्तिः न वेति विप्रतिपत्तिः। पृथिवीत्वं निरवयववृत्तिः सावयववृत्तिजातित्वाद् घटत्ववदिति प्रत्यवयवस्थितेः सर्गाद्यकालीनकार्यपृथिव्युत्पादाऽन्यथानुपपत्त्याऽकार्यपृथिव्यङ्गीकारो दुर्निवारः। तथा च सर्गाद्यकालीनं पृथिवीद्व्यणुकं समवायिकारणजन्यं भावत्वे सति कार्यत्वाद् घटवदिति द्व्यणुकत्वस्य महत्त्वानधिकरणजन्यत्वानधिकरणपृथिवीव्यक्तिविशेषनिरूपतया नाश्रयासिद्धिः। अत्र च पक्षधर्मताबलात्तादृशकारणस्य नित्यत्वाणुत्वसिद्धिः। नित्यत्वाभावे प्रलयवृत्तित्वे सति बहुत्वे सति तादृशकार्यारम्भकत्वानुपपत्तेः। अणुत्वाभावे च विभुत्वाभावे च नित्यत्वासिद्धेः। ननु प्रलये मानाभावः। [2]ध्रुवादौ पृथिवीध्रुवत्यागमबलेन [3]प्रवहस्यैवानादित्वादिति चेत्। न। तत्र प्रमाणयोराम्नायन्याययोरग्रे प्रदर्शयिष्यमाणत्वात्।

4. निरवयवविवृत्ति न वेति - क मातृकायाम्।
2. ध्रुवादौ - क मातृकायाम्
3. प्रवाहितस्य

यत्तु द्रव्यसमवायित्वस्य समवेतत्वाभावासमानाधिकरणत्वेऽनन्तावयवपरम्परापत्तौ मेरूसर्षपयोरनन्तावयवारब्धत्वाविशेषणन्तु द्विपरमाणुत्वापत्तिः। न चारम्भकावयवानां प्रशिथिलनिविडसंयोगविशेषात्साक्षादारम्भकाणां [1]परिमाणतारतम्यमिति वाच्यम्, निरवयवानन्तावयवाश्चारब्धत्वाविशेषेण त्रसरेणु-द्वणुकयोः [2]तुल्यपरिमाणत्वप्रसङ्गस्य दुर्निवारत्वादिति। तन्न। परं प्रतीति तथोपादानसिद्धेः, तेन द्वणुकानभ्युपगमात्।

अत्र नवीनाः - अस्तु द्रव्यसमवायित्वस्य समवेतत्वाभावसामानाधिककरण्यमन्यथाऽनन्तावयवपरम्पराकल्पनाप्रसङ्गात्। तथाप्यसमवेतं द्रव्यसमवायिकारणं त्रसरेणुरेव तस्य प्रत्यक्षसिद्धत्वेन दुरपह्नवत्वात्। न च त्रसरेणुः समवेतश्चाक्षुषद्रव्यत्वाद् घटवदित्यनुमानात्तस्य समवेतत्वसिद्धिरिति वाच्यम्, अप्रयोजकत्वात्, महदारब्धस्योपाधित्वात्। अन्यथा परमाणुः समवेतः कार्यद्रव्यारम्भकत्वात् कपालवदित्यनुमानात्परमाणोरपि समवेतत्वप्रसङ्गात्। अनन्तावयवपरम्परासिद्धिप्रसङ्गस्तूभयत्र समानः। एतेन त्रसरेणुः ध्वंसप्रतियोगी चाक्षुषद्रव्यत्वाद् घटवदिति तस्यानित्यसिद्धौ सर्गाद्यकालीनकार्यस्य समवायिकरणाभावात् पुनरुत्पादप्रसङ्ग इति निरस्तम्।

[3]द्रव्यत्वस्यापिचाक्षुषद्रव्यत्वस्य प्रतियोगित्वे गुणादेः ध्वंसो न स्यादिति भावः [4]प्रयोजकत्वाभावात्, जन्यसत्त्वस्यैव तत्र प्रयोजकत्वेन तस्योपाधित्वात्, अपकृष्टपरिमाणनिबन्धनश्च परमाणुव्यवहारः। मनोऽपि वायवीयत्रसरेणुविशेष एव पृथिव्यादित्रसरेणुत्वाच्च। एवं [5]उद्भूतस्पर्शत्वात् मनस्तु तदभावान्न त्वाचं त्रसरेणोरस्पार्शनहेतुत्वे [6]नास्ति तादात्म्ये न तस्य प्रतिबन्धकत्वं कल्पनीयम्।

---

1. वहुत्वादारब्धत्वाविशेषण - क मातृकायाम्।
2. परिमाणत्व - क मातृकायाम्।
3. द्रव्यत्वस्यैव चाक्षुषद्रव्यत्वस्यापि तत्र - क मातृकायाम्
4. प्रयोजनत्वाभावात् - क मातृकायाम्
5. उद्भूतस्पर्शत्वात् - नास्ति क मातृकायाम्
6. न - क मातृकायाम्

एवं सर्गाद्यकालीनकार्योत्पादोपपत्तौ नातीन्द्रियस्य द्रव्यारम्भकत्वसिद्धिर्मानाभावात्। एवञ्च सजातीयप्रतियोगिकोत्कर्षानाश्रयसजातीयप्रतियोगिकापकर्षानाश्रयमहत्त्वमुभयमपि नित्यम्। तस्मात्तत्त्रसरेणुः नित्यो जन्यमहत्त्वाच्चाधिकरणद्रव्यारम्भकत्वाभावादाकाशवत्। अत्र प्रत्यक्षत्वं सतीति हेतुः विशेषणीयः। तेन प्राचीननये पृथिवीपरमाणुरूपादौ न व्यभिचारः। वस्तुतस्तु स्वमतेनैव हेतुकारणात्मतद्विशेषणोपादानं न वा द्वणुके व्यभिचारः। न चापकृष्टमहत्त्वेऽवयवविशेषः प्रयोजक इति त्रसरेणोः सावयवत्वापत्तिरिति वाच्यम्, परममहत्त्वमित्यत्रापि तस्याप्रयोजकत्वात्। न च त्रसरेणोर्निरवयवत्वे त्रसरेणुसमवेतं कार्यं न महत् निरवयवसमवायिकारणजन्यत्वात् पटवदिति न त्रसरेणुसमवेतस्य महत्त्वसिद्धिरिति वाच्यम्, उक्तानुमाने च द्रव्यत्वाभावस्योपाधितया तस्याप्रयोजकत्वात्। एवञ्च त्रसरेणुर्नित्यमहदारम्भकः नित्यद्रव्यत्वाद् व्योमवदित्यादिकमप्रयोजकमेवेति। एवञ्च त्रसरेणुर्नित्यमहदारम्भको नित्यद्रव्यत्वाद् व्योमवदित्यादिकमप्रयोजकमेवाति। न द्वणुकसिद्धिर्न वा त्रसरेणुसमवेतस्याणुत्वसिद्धिरिति द्रष्टव्यम्। एवञ्च परिमाणं प्रति संख्याया कारणत्वं न कल्पनीयमिति लाघवमित्यवधेयम्। निरवयवसावयवाणुद्वयसिद्धिरिति प्रतिपेदिरे। तथापि पृथिवीद्वैविध्ये [1]व्याघाताभावान्न भाष्यस्य काचिद् व्याहतिरिति संक्षेपः।

ननु परमाणूनां नित्यत्वे पुञ्जतापन्नतत्तत्परमाणूनामेव तत्तत्पार्थिवोपाधिव्यवहारजनकतया तदतिरिक्तपृथिव्यभावात् तद्द्वैविध्यमनुपपन्नमित्यनित्यपृथिवीमुपपादति-कार्यलक्षणेति । लक्षणपदं स्वरूपार्थकं [2]कार्यलक्षणा कार्यरूपेत्यर्थः। तु पुनरर्थे [3]कार्यस्वरूपा पुनर्घटादिरूपामहाभूगोलकादिरूपा पृथिवी अनित्या ध्वंसप्रतियोगिनि प्रागभावप्रतियोगीति वार्थः।

---

1. व्याघाताभावान्नकान्तर्भष्यिस्य
2. कार्यलक्षणाकार्यस्वरूपेत्यर्थः।
3. कार्यरूपापुनर्घटादिरूपामहाभूगोलादिरूपा पृथिव्या - क मातृकायाम्।

[1]अयमभिप्राय: । यदि कूटतापन्ना: परमाणवो घटादिस्तदा तदप्रत्यक्षतापत्ति: । न च कूटतापन्नत्वं कार्यलक्षणत्वनित्या तदनापन्नत्वाभ्यां प्रत्यक्षत्वाप्रत्यक्षत्वे इति वाच्यम्, अप्रत्यक्षत्वस्वभावस्य कूटतापन्नमात्रेण [2]प्रत्यक्षानुपपन्ने: । किञ्च ''घटो नष्ट उत्पन्न: इत्यादिप्र[3]तीतीनां विषयान्तरविषयत्वकल्पनापत्ति: । घटनाशानन्तरं कपालादुपलम्भानुपपत्ति: । परमाणुपुञ्जत्वस्य सर्वत्राविशेषणेन विलक्षणघटादिव्यवहारानुपपत्ति: । द्रव्यत्वव्याप्यव्याप्यजाते: परमाणुवृत्तित्वाभावेन घटत्वादे: परमाणुवृत्तित्वासिद्धेश्च । तस्मादस्त्येव परमाणुव्यतिरिक्तोऽवयविविलक्षणप्रतीतिसिद्ध: । स च कारणान्वयव्यतिरेकानुविधायित्वात् कार्यरूपोऽनित्य एवेत्यवयविरूपा पृथिवीकार्यत्वादनित्येति न द्वैविध्यानुपपत्ति: ।

कार्यपृथिव्याऽ[4]न्यापेक्षया वैधर्म्यमाह-

(मू०) सा स्थैर्य्याद्यवयवसन्निवेशविशिष्टाऽपरजातिबहुत्वोपेताशयनासनाद्यनेकोपकारी च । त्रिविधं चास्या: कार्यम् । शरीरेन्द्रियविषयसंज्ञकम् ।

स्थैर्य्यं स्थिरता । एकाकारणानेककालावस्थानमिति यावत् । तदर्थयोरवयवसन्निवेश: कठिनसंयोगविशेषस्तद्विशिष्टेत्यर्थ: । अवयवसंयोगस्याप्यवच्छेदकतासम्बन्धेनावयविवृत्तित्वादविरोध: ।

यत्तु [5]स्थैर्य्यञ्चावयवसन्निवेशश्चेति विशेषणद्वयं तत्र स्थैर्य्यमात्रस्य चिरकालावस्थायित्वमात्रस्य जलादिसाधारण्यम् । अपरजातीत्यनेनैव तत्तज्जात्यभिव्यञ्जकसास्नादिमत्त्वस्य [6]विलम्बत्वाद् द्वितीयमपि व्यर्थमेव ।

निविडसंयोगविशेषवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वविवक्षणे पृथिवीपरमाणावतिव्याप्ति: । न च तस्यापि लक्ष्यत्वं कार्यपृथिवीमात्रस्य लक्ष्यत्वात् । अस्मन्मते तु तादृशविशेषसंयोगस्यासत्त्वान्नातिव्याप्ति: । आदिपदाद्

1. वायुमभिप्राय: - मातृकायाम् ।
2. प्रत्यनुपपत्ते: ।
3. प्रतीतीता - क मातृकायाम् ।
4. अन्यपेक्षया - क मातृकायाम् ।
5. अन्यपेक्षया - क मातृकायाम्
6. द्वितीयमपि - क मातृकायाम्

[1]गुरुत्वविशेषत्वात् पतनप्रतिबन्धकसंयोगाश्रयत्वम् । अत्र विशेषेति करणान्नौकादिपतनप्रतिबन्धकसंयोगाश्रये जलादौ नातिव्याप्तिः । गुरुत्वविशेषवद्गमनप्रतिबन्धकसंयोगाश्रयत्वम् । गुरुत्ववदिति किरणादालोकादिगतिप्रतिबन्धकसत्त्वेऽपि न क्षतिरिति द्रष्टव्यम् । अपरजातिः पृथिवीत्वव्याप्यजातिः । बहिर्भिः पृथिवीत्वव्याप्यजातिभिर्विशिष्टेत्यर्थः । इदन्तु द्रव्यत्वव्याप्यव्याप्यजातेः परमाणुवृत्तित्वाभावात्कार्यपृथिवीमात्रस्य सम्भवति । अत्रापरजातिश्च संस्थानविशेषाभिव्यङ्ग्या विवक्षिता । तेन जलादावपि कारकत्वादिनानाजातिसत्त्वेऽपि न क्षतिः ।

[2]अस्याः परार्थं दर्शयति - [3]शयनेति । शयनं शय्या आसनं पीठादि । आदिग्रहणं कृष्याद्युपलक्षणम् । उपकारपदं पतनापकृताभिपातप्रहाराद्यपकारोपलक्षणम् । ननु कार्यलक्षणयाऽनित्यत्वमुक्तम् ।

तत्र किं घटादिककार्यमुतान्यादपीत्यत आह - त्रिविधश्चेति । केचित्तु किमेतस्याः शयनादिरूपेणैवं परोपकारित्वं तत्स्वरूपेणापीत्यत आह त्रिविधमिति । तन्न । त्रिविधं चास्याः कार्यमिति [4]कार्यपदोपादानानुपपत्तेः । तिस्रो विधा दर्शयति- **शरीरेन्द्रियविषयसंज्ञकम्** । शरीरमिन्द्रियं विषयश्चेति संज्ञा यस्य कार्यस्य तत्तथा । ननु यद्यपि शरीरत्वं न जातिः पृथिवीत्वादीनां साङ्कर्य्यात् । न च पृथिव्यात्वादिव्याप्यानि नैव शरीरत्वांनि इति वाच्यम्, सर्वसाधारण्येन शरीरत्वाकारानुगत[5]प्रत्ययापत्तेः, कार्य्यावच्छेदकाद्यभावाच्च । नापि भोगावच्छेदकान्तावयवित्वं तच्छरीरावयवातिव्याप्तिवारणाय अन्त्यावयवीति, उत्पन्नमात्रविनष्टे शरीरे मानाभावाच्चेति वाच्यम्, ईश्वरस्य भागाभावेन तदीयशरीरेऽव्याप्तेः । न च तज्जीवविशेषादृष्टारब्धे शरीरे ईश्वरस्य भूतावेशन्यायेनानुप्रवेशात्तत्रापि तदीयभागावच्छेदकत्वमविरुद्धमिति वाच्यम्, तथापि मृतशरीरेऽव्याप्तेः ।

---

1. विशेषत्वात् - क मातृकायाम्
2. अस्यापरार्थं - क मातृकायाम्
3. अयनेति - क मातृकायाम्
4. कार्यपदोपाक्षनानुपपत्तेः - क मातृकायाम्
5. प्रत्यक्षानापत्तेः ।

यत्तु ज्ञानजनकमनःसंयोगवदन्त्यावयविमात्रवृत्तिजातिमत्त्वं तत्। मृतशरीरे च ज्ञान[1]जनकमनःसंयोगवदवृत्तेरन्त्यावयविमात्रवृत्तेश्च चैत्रत्वादिजाते सत्त्वान्न तत्राव्याप्तिः। पूर्वोक्तरीत्या शरीर[2]वृत्तिकृष्णत्वादिकमपि जातिरेव ज्ञानजनकमनःसयोगवद्वृत्त्यैवेति [3]वसुदेवपुत्रादृष्टारब्धशरीरस्य तदीय ज्ञानजनकमनःसंयोगतत्त्वादीनि। तन्न। घ्राणादावतिव्याप्तेः। न च ज्ञानजनकपदं जन्यज्ञानत्वावच्छिन्नकार्यताप्रतियोगिककारणतावच्छेदकवत्परं घ्राणमनःसंयोगस्य ज्ञानजन्यमात्रं प्रतिहेतुत्वाभावान्न तत्रातिव्याप्तिरिति वाच्यम्, तथापि त्वच्यतिव्याप्तेः। सुषुप्त्यन्यथानुपपत्त्या त्वङ्मनोयोगस्य ज्ञानमात्रहेतुत्वात्। न च तत्र मानाभावः ज्ञानसामग्र्यभावेनैव ज्ञानानुत्पत्तौ सुषुप्त्यनुपपत्तेरिति ज्ञानान्तर-सामग्र्यभावेऽपि आत्मप्रत्यक्षसामग्र्या विद्यमानत्वात्। न चात्मगुणग्राहकसामग्र्या आत्मग्राहकत्वनियमेन सुषुप्तिदशायाञ्च योग्यात्मगुणभावेन तद्ग्राहकसामग्र्य-भावान्नात्मप्रत्यक्षापत्तिरिति वाच्यम्, आत्मैकत्वस्य योग्यत्वेन तद्विशिष्टात्म-प्रत्यक्षस्य तदानीं दुर्निवारत्वात्। न च जन्यज्ञानजनकतावच्छेदकतयाऽऽ-त्ममनःसंयोगे जातिविशेषः कल्पनीयः। सुषुप्तिकाले तदभावान्न ज्ञानापत्तिरिति वाच्यम्, जन्यज्ञानाद्यवच्छेदकतया नानाजातिकल्पने गौरवात्। न च जन्यात्म-विशेषगुणत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतयाऽऽत्ममनःसंयोगे सति विशेषः कल्पनीयः। श्वासादिजनकजीवनयोर्न यत्नजनकतया तादृश-विलक्षणसंयोगस्य तदानीमपि सत्त्वेन ज्ञानोत्पत्तेस्तदानीं दुर्वारत्वादिति दिक्।

न च जन्यात्मविशेषगुणत्वावच्छिन्नकार्यतानिरुपितकारणतावच्छेद-कावच्छिन्नमनःसंयोगवदन्त्यावयविमात्रवृत्तिजातिमत्त्वं तत् तेन त्वगादौ नातिव्याप्तिः त्वङ्मनःसंयोगस्य ज्ञानमात्रहेतुत्वेन तादृशहेतुत्वादिति वाच्यम्, कबन्धादिचेष्टाजनकप्रयत्नादेः शरीरमनःसंयोगं विनापि दर्शनेन जन्यात्म-विशेषगुणमात्रे शरीरमनःसंयोगस्य हेतुत्वेनाऽसम्भवापत्तेः। मृतशरीरत्वावच्छेदो-ऽऽत्ममनःसंयोगे सति तत्र ज्ञानादुत्पत्तिवारणाय जन्यात्मविशेषगुणज्ञानत्वावच्छिन्नं

1. जनन - क मातृकायाम्
2. शरीवृत्तिक्लवृत्वादिकमपि - क मातृकायाम्
3. वासुदेव

प्रति प्राणमन:संयोगस्यावश्यं हेतुत्वाभ्युपगमात् । न च प्राणशरीरसंयोग एव तत्र कारणमिति वाच्यम्, विनिगमनाविरहेण तस्यापि हेतुत्वात्, [1]प्राणत्वस्य जातितया तन्मन:संयोगस्य शरीरप्राणसंयोगापेक्षया लघुत्वाच्च । किञ्च नृसिंहशरीरेऽव्याप्ति:, तत्र तन्मात्रवृत्तेर्जातिरभावात्, तस्माच्छरीरत्वं दुर्वचमिति चेत् । न । भोगावच्छेदकतात्पर्य्याद्यधिकरणतावच्छेदकधर्मवत्त्वं तत्त्वं, शरीरावयवानाञ्च पर्य्याप्त्या स्वयंसम्बन्धेन न भागावच्छेदकत्वमिति न [2]तत्राव्याप्ति: । मृतशरीरे च तादृशधर्मस्य तत्तद्व्यक्तित्वस्य विद्यमानत्वान्न तत्रातिव्याप्ति: । एवं नृसिंहशरीरेऽपीति द्रष्टव्यम् । एवमिन्द्रत्वरुद्रस्वादेर्जातित्वाभावेऽपि न क्षतिरिति संक्षेप: ।

इन्द्रियत्वञ्च यद्यपि न जाति: । पृथिवीत्वादिना साङ्कर्य्यात्, इन्द्रियाणामतीन्द्रियत्वेनेन्द्रियत्वाकारानुगतप्रतीत्यभावाच्च । नापि जन्यसाक्षात्कारसाधारणकारणत्वं साक्षात्कारत्वस्येन्द्रियजन्यज्ञानत्व रूपत्वेनान्योन्याश्रयापत्ते:, तत्तन्मन:संयोगेऽतिव्याप्तेश्च । नापि स्मृत्यजनकज्ञानजनकमन:संयोगाश्रयत्वम् । उक्तन्यायेन त्वचो ज्ञानमात्रहेतुत्वात्तत्राव्याप्ते: । यत्र खण्डशरीरे स्मृतिर्नोत्पन्ना, तादृशशरीरेऽतिव्याप्तिश्च । स्वरूपायोग्यत्ववि[3]वक्षातोमनस्यव्याप्ते:, स्वप्नवहनाख्यनाड्यामतिव्याप्तेश्च । नापि शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानजनकमन:संयोगाश्रयत्वम्, अत एवानुद्भूतस्पर्शे वायवीयपिशाचादिशरीरेऽतिव्याप्तेश्च । [4]तद्भूतत्वजाते: विशेषगुणमात्रकृतित्वे न विशेष पदवैय्यर्थ्यापत्ते: तथापि जन्यज्ञानाजन्यजन्यज्ञानत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं तत् । न चानुगतधर्मं विना तादृशकारणतयैव दुर्ग्रहेति वाच्यम्, घ्राणाद्यन्यतमत्वादिना तद्ग्रहसम्भवाच्च । वस्तुतस्तु तत्साक्षात्कारत्वव्याप्यश्चाक्षुषत्वादिजाति: प्रातिस्विकरूपेणोपादाय तदन्यतरत्वावच्छिन्नकार्यतानिरुपितकारणतावच्छेदकधर्मवत्त्वमिन्द्रियत्वं तादृशधर्मश्च युक्त्यादिकमिति सर्वं समञ्जसमिति संक्षेप: ।

---

1. घ्राणत्वस्व
2. तत्रातिव्याप्ति: - क मातृकायाम्
3. विवक्षत्येया - क मातृकायाम्
4. तद्भूतत्वजाते: विशेषगुणमात्रवृत्तित्वे न विशेषपदवैय्यर्थ्यापत्ते: । नास्ति- क मातृकायाम्

विषयत्वञ्च ज्ञायमानत्वेनैव सुखदुःखान्यतरसाधनत्वम्। एतच्च वाय्वादावपि समानम्, [1]वाय्वोवोरप्यनुमीयमानत्वेनैव भोगसाधनत्वात्, अभावसामान्यादीनामपि [2]विषयत्वात् तत्त्वं न जातिः। यद्यप्युक्तमपि विषयत्वं शरीरेन्द्रियादिसाधारणम्, तथापि तेषां ज्ञायमानत्वेनैव सुखादिसाधनत्वं नास्तीति न तत्रातिप्रसङ्गः। वस्तुतस्तु सुखसाधनान्यतरसाधनत्वमेव विषयत्वं शरीरेन्द्रिययोर्विषयत्वं सत्त्वेऽपि शरीरत्वादिपुरस्कारेण विभागो, न विषयत्वेन, यथा प्रमाणादिसूत्रे प्रमाणादीनां प्रमेयत्वेऽपि पृथक्प्रमाणादीनां निर्देशोऽऽचार्य्याणां [3]प्रयासस्तथा विभागदर्शनात्।

वस्तुतस्तु नायं विभागः, किन्तु परोपकारताया एव त्रिविधकथनमिति शरीरादौ विषयत्वसत्त्वेऽपि न क्षतिरिति द्रष्टव्यम्। त्रिविधं चेत्यत्र चकारो [4]व्यवच्छेदार्थकस्तेन वाय्वादीनां चतुर्विधकार्यजनकत्वेऽपि न क्षतिरिति द्रष्टव्यम्।

विजातीयानेकसंस्थानविशेषाभिव्यङ्ग्यद्रव्यत्वव्याप्यनानाजातिशरीरं [5]प्रथितव्यमेव। तत्रैति। तत्र शरीरमध्ये द्विविधे दर्शयति-

(मू) शरीरं द्विविधं योनिजमयोनिजञ्चेति। तत्रायोनिजमनपेक्ष शुक्रशोणितं देवर्षीणां शरीरं धर्मविशेषसहितेभ्योऽणुभ्यो जायते। क्षुद्रजन्तूनां यातनाशरीराण्यधर्मविशेषसहितेभ्योऽणुभ्यो जायते। शुक्रशोणितसन्निपातजं योनिजम्। तत्तु द्विविधम्- जरायुजमण्डजञ्च। मानुषपशुमृगाणां जरायुजम्। पक्षिसरीसृपाणामण्डजम्।

योनिजमित्यादि। ननु योनिशब्दस्य प्रायशः कारणमात्रे प्रयोगादयोनिजमजन्यमित्यर्थपर्य्यवसाने विरोधः शरीरमात्रस्य जन्यत्वनित्य-मादित्यतोऽयोनिजत्वं दर्शयति- तत्रेति। तत्र द्विविधशरीरमध्ये। अयोनिजमिति। तेन योनिशब्दो न कारणमात्रवचननिबन्धनम्। किन्तु [6]शुक्रशोणितसन्निपातपर इत्यर्थः। शुक्रशोणिते च पित्रोः यथाक्रमं बोध्यम्।

1. वाय्वोरप्यनुमीयमानत्वे
2. विषयतात्वम् - क मातृकायाम्
3. प्रयशस्तथा।
4. व्यवच्चेदकः
5. पृथिव्यामेव
6. शुक्लशोणित

ननु तादृशशरीरमसिद्धं योनिजशरीरवदनुपलब्धेरिति अत आह - देवेति। तथात्वेऽवधानात् नोपलभ्यते न त्वभावादित्यर्थः। अत्र देवशब्देनाज्ञानदेवानां कर्मदेवानाञ्च परिग्रहः। तेन देवदत्तादीनामपि स्वर्गापकारार्थमयोनिजमेव। तत्राज्ञानदेवानां शरीरवद्धेतुः "विग्रावोवपोदरः सुबाहुरन्धसो मुद" इत्याद्यागमः। कर्मदेवानां तादृशशरीरवत्त्वे जन्यसुखत्वावच्छिन्नं प्रति शरीरत्वेन यत्कारणत्वं तद्ग्राहकप्रमाणोपबृंहितम्। चैत्रस्तदीययोनिजशरीरातिरिक्तपार्थिवशरीरवान् अदृष्टवत्त्वात् मैत्रवदित्यनुमानं द्रष्टव्यम्। न च योनिजशरीराभ्युपगमे योनिं विना न शरीरमित्यागमविरोधः। योनिशब्दस्य कारणमात्रपरत्वात्। ऋषयो मनुनारदादयः। ननु शरीरत्वावच्छिन्नं प्रति शुक्रशोणितसन्निपातत्वेन हेतुत्वात्कथं तेन विना तदुत्पाद इति चेत्। न संस्थानविशेषवच्छरीरत्वावच्छिन्नं प्रत्येव तथाहेतुत्वात् अस्मदादिशरीरसंस्थानापेक्षया देवादिशरीरस्य निमेषादिलोचनादिरूपवत्त्वादि संस्थानविशेषत्वादिनातादृशशरीरे तस्यां हेतुत्वाभावात्।

कथं तर्हि तादृशशरीरस्योत्पत्तिरित्यत आह - धर्मविशेषेति। अणुभ्यः इतिमूलकारणनिर्देशः। न [1]अणुभिरेव साक्षाच्छरीरारम्भः। तेन [2]येषु शरीरारम्भकधर्मविशेषेषु चाभिवासादिजनकाधर्मसम्बलनं नास्ति, तेभ्योऽयोनिजं शरीरमुत्पद्यत इति भावः।

अन्यदप्ययोनिजं शरीरमाह - क्षुद्रजन्तूनामिति। क्षुद्रजन्तूनां क्षुद्रशरीरावच्छिन्नानामात्मनामित्यर्थः। अन्यथा जन्तुपदस्यात्मपरत्वे तस्य विभुत्वेन क्षुद्रत्वानुपपत्तिः। शरीरपरत्वेन शरीराणां शरीरमन्तराभावादसङ्गत्यापत्तिः। यद्वा क्षुद्रपदमधर्मविशेषत्वेनात्यन्तनिष्कृष्टनाशकपरम्। तेन क्षुद्रशरीरावच्छिन्नानामपि मशकादीनामैहिकदुःखसुखविशेषादिदर्शने यातनाशरीरत्वाभावेऽपि न क्षतिः। एतेनात्र नारकीणामित्यध्याहारोऽपि प्रत्युक्त अनाध्याहारेणैवोपपत्तौ मानाभावात्। यातनासुखाऽसम्भिन्नदुःखं तदर्थं शरीरमिति चतुर्थीतियोगविभागात्समासः।

---

1. त्वभ्यरेव -क मातृकायाम्। 2. चक्षुषु -क मातृकायाम्

न च नारकिशरीरस्यायोनिजत्वेऽपि मानाभावः। देवदत्तीयं दुःखविशेषानुभवावच्छेदकं शरीरं योनिजैस्तद्देवदत्तशरीरातिरिक्तं वा शरीरत्वात् मैत्रशरीरवदित्यनुमानस्यागमोपवृंहितस्य तत्र [1]मानाभावात्।

यत्त्वन्यथानुपपत्तेरेव तत्र मानं योनिजशरीरस्य विलक्षणनरकदुःखावच्छेदकत्वाभावादिति। तन्न। अयोनिजस्याप्युष्णजमशक शरीरस्य तथात्वाभावादिति। नहि अयोनिजमपि मशकादिशरीरं तादृशवेदनाविशेषसहिष्णुर्येन नियमेनार्थापत्त्या तदेव कल्प्येत। तस्मादागमोपवृंहितमनुमानं तत्र प्रमाणमित्येव सम्यक्।

ननु नरकमेवासिद्धं मानाभावादिति चेत्। न। [2]स्वर्गस्यापि असिद्धप्रसङ्गात्। [3]न च [4]स्वर्गकामादिश्रुतिबलात् प्रसिद्धिरिति वाच्यम्, तथात्वे कपूयचरणाः [5]कपूयां गतिमापाद्यन्त इति श्रुतिबलात्तत्सिद्धिरपि दुर्वारा। तत्र कपूयशब्दस्य पुराणादिप्रसिद्धगौरवादिपरत्वात्। वस्तुतस्तु ब्राह्मणो न हन्तव्य इति श्रुतिब्राह्मणहननं न बलवदनिष्टाननुबन्धीष्टं साधनमिति [6]बोधयन्तीति। अर्थात् ब्राह्मणहननस्य नरकरूपबलवदनिष्टानुबन्धित्वं बोधयतीति। सा तत्र प्रमाणम्। न च ब्राह्मणहननाभावविषयकं कार्यमिति तस्यार्थ इति वाच्यम्, हननाभावस्य भावार्थत्वाभावेन विषयत्वाभावात् कृततत्साध्यमध्यस्थो यागादिविषयो मत इति यागादीनामेव तेषां विषयत्वाभ्युपगमादिति सङ्क्षेपः।

योनिशब्दार्थं व्याचक्षाण एव योनिशरीरं दर्शयति-शुक्रेति। शुक्रशोणितयोः सन्निपातो मेलनं तदेव योनिशब्दार्थः। अत्र शुक्रपदमुपलक्षणं विनैव शुक्रवलाका गर्भमाधत्ते इत्यादिप्रसिद्धेः। किन्तु विलक्षणसंयोगजः शोणितविशेष एव विवक्षितः।

ननु द्विविधं शरीरमित्यनुपपन्नं जरायुजादिशरीरभेददर्शनादित्याशङ्क्य जरायुजत्वादेर्योनिजत्वव्याप्यत्वं दर्शयति - तदिति। तद्योनिजमिति।

---

1. मानत्वात् - क मातृकायाम्।
2. स्पर्शस्य - क मातृकायाम्।
3. यत्त्वन्यथानुपपत्तिरेव
4. स्पर्शकामादि
5. स्वपूयां
6. वोधयतीति अर्थात् - क मातृकायाम्

[1]पुनरर्थो जरायुजचर्मापुटकम् । इदन्तु तत्प्रत्यक्षसिद्धव्यवहारोपादानार्थमुक्तमिति द्रष्टव्यम् । पशुपदं अपशवो वा । अन्येषु शवो [2]गोऽश्वा इत्यर्थवादप्रसिद्धेः । गोऽश्वपरम् । मृगपदंतदतिरिक्तपशुमात्रविषयम् । पक्षिणः प्रसिद्धाः । सर्पः सरीसृपाः कुटिलगतयः सर्पवृश्चिकप्रभृतयः मत्स्यादिकमप्यत्रोपलक्षणम् ।

सप्रकारं शरीरमुक्त्वा तत्कार्यमिन्द्रियमाह-

(मू) इन्द्रियं गन्धव्यञ्जकं सर्वप्राणिनां जलाद्यनभिभूतैः पार्थिवावयवैरारब्धं घ्राणम् ।

इन्द्रियमिति । इन्द्रियघ्राणमिति सम्बन्धः । घ्राणत्वञ्च जातिः । सर्वत्र जन्यगन्धसाक्षात्कारेषु जिघ्रामीत्यनुगतमते बाधकं विना जातिविषयत्वेन साक्षात्कारत्वव्याप्यतादृशजातिसिद्धौ तत्त्वावच्छिन्नकार्यतानिरुपित-कारणतावच्छेदकत्वेन तादृशजातिसिद्धेर्दुर्वारत्वात् । एतेनानुगतघ्राणत्वसिद्धौ साक्षात्कारत्वव्याप्यतादृशजातिसिद्धिः । तादृशजातिसिद्धौ च घ्राणत्वसिद्धि-रत्यन्योन्याश्रय इति निरस्तम् । घ्राणमित्यर्थसंज्ञकमित्यपि केचित् ।

तस्यातीन्द्रियत्वान्न प्रमाणमाहुः- गन्धव्यञ्जकमिति । तथा च गन्धोपलब्धिसकरणिकाक्रियात्वात् छिदावदिति सामान्यतो तृणादीतर-बाधसहकृतात् तत्सिद्धिरिति भावः । न च चेष्टादौ व्यभिचार इति वाच्यम्, तदतिरिक्तक्रियात्वस्यैव हेतुत्वात् । न च मनसैवान्यथासिद्धि रिति वाच्यम्, मनसः साधारणकारणत्वेन कारणत्वाभावात्, व्यापारवदसाधारणस्यैव करणत्वात्, सत्यपि मनःसंयोगादौ तादृशज्ञानस्य नियमेनानुत्पत्तेश्च । न च नास्ति-काग्रसंयुक्तमनस्त्वेनैव गन्धसाक्षात्कारं प्रति हेतुत्वम्, अन्यथा च तादृशमनः संयोगाभावान्न गन्धसाक्षात्कारः, उक्तरूपेण तस्या असाधारणत्वमपीति वाच्यम्, उक्तक्रमेणेन्द्रियान्तरविलोपापत्त्या तत्तदागमविरोधापत्तेः, एवं गन्धसाक्षात्का-रार्थमतिरिक्तेन्द्रियसिद्धौ तत्पार्थिवं चाक्षुषादिवृत्तिसाक्षात्कारत्वव्याप्य-जातिमत्करणाद् विततचम्पकभागवत् कुक्कुटोच्चारणाद् वा ।

1. अपुनरर्थे - क मातृकायाम्   2. गोप्या - क मातृकायाम्

[1]यत्तु गन्धोपलब्धः रसाद्युपलब्धजनकशरीरसंयोगिकरणजन्या तदन्यसाक्षात्कारत्वात्तद्रूपसाक्षात्कारत्वाद् रूपसाक्षात्कारवदित्यतो घ्राणस्वरूपसिद्धिरिति। तन्न। स्पर्शसाक्षात्कारं पक्षीकृत्यैवं त्वक्साधनेऽसिद्ध्यापत्तेः। त्वङ्मनोयोगस्य ज्ञानमात्रहेतुत्वेन तस्य रसाद्युपलब्धजनकत्वात्। न च तत्संयोग एव हेतुस्तत्र न त्वगपीति वाच्यम्, सर्वत्र संयोगेनान्यथासिद्धाविन्द्रियाणामहेतुत्वापत्तेः सुखाद्युपलब्धेः मनःकरणत्वानुमानेऽसिद्धेश्च। मनसः साधारणत्वेन करणत्वाभावात्करणजन्येत्यनेनैव मनोव्यावृत्तिसिद्धौ रसादित्यादेर्वैय्यर्थापत्तेः। सुखादिसाक्षात्कारे व्यभिचाराच्च।

यत्त्वत्र दृष्टान्तसिद्ध्यर्थमन्धकारस्थं गोलकम्। घटसाक्षात्कारकारणसंयोगाधिकरणं तेजोवृत्तिघटसाक्षात्कारकारणसंयोगाधिकरणं रूपवत्त्वे सति साक्षात्कारकारणत्वाद् घटवदिति गोलकातिरिक्तचक्षुःसिद्ध्या रूपसाक्षात्कारे निरूक्तसाध्यसिद्धिरिति तदपि स्थवीयः। शरीरे व्यभिचारात्। न च हेतुस्थकारणपदमसाधारणकारणपरमिति वाच्यम्, रूपवत्त्वे सतीत्यस्य वैय्यर्थ्यापत्तेः, दृष्टान्तसिद्धेश्च।

यत्तु तत्पार्थिववत्त्वानुमाने रसाद्यव्यञ्जकत्वे सति गन्धाभिव्यञ्जकद्रव्यत्वात्। गन्धसाक्षात्कारासाधारणकारणतावच्छेदक द्रव्यत्वात्। गन्धसाक्षात्कारासाधारणकारणतावच्छेदकद्रव्यत्वाव्याप्यजातिमत्त्वादिति हेतुद्वयं तदपि न रमणीयम्। प्रथमे गन्धाभिव्यञ्जकं यदि गन्धसाक्षात्कारमात्रं विवक्षितम्, तदा [2]जनितरूपादिसाक्षात्कारे गन्धोपलब्धजनके [3]खण्डघ्राणादौ व्यभिचारः। करणत्वविवक्षायां सत्यन्तपदवैय्यर्थ्यम्। द्वितीये च द्रव्यत्वव्याप्यव्याप्यपदवैय्यर्थ्यम्। न च नवीनशरावादिगन्धाभिव्यञ्जके जले व्यभिचारः। तत्र गन्धसाक्षात्कारकारणतावच्छेदकजलत्वजातेः सत्त्वात् तद्वारणाय तत्सार्थकमिति वाच्यम्, जलपरमाणुकादीनां नवशरावादिगन्धाभिव्यञ्जकत्वाभावेन जलत्वस्य तदवच्छेदकत्वाभावात्, द्रव्यविशेषवज्जन्यजलत्वस्य तदवच्छेदकस्य जातिपदेनैव [4]वारणादिति कृतं पल्लवितेन।

1. यत्तु = नास्ति
2. अजन्ति
3. खण्डप्रगादौ
4. कारणादिति - क मातृकायाम्

[1]प्राणिभेदेनेन्द्रियवैचित्र्यनिराकरणार्थमाह - **सर्वप्राणीनामिति** । ननु पार्थिवत्वस्य गन्धाभिव्यक्तिप्रयोजकत्वे घटादीनामपि तथात्वापत्तिरित्यत आह **अन्त्यावयवानभिभूतैरिति** । तेनान्त्यावयवानभिभूतावयवारब्धपृथिवीत्वमेव तत्र प्रयोजकमिति । एतस्य [2]नासिकाग्रमेवाधिष्टानम् । तेन व्रणादिदूषितनास्तिकानां न गन्धसाक्षात्कार: जन्येन्द्रियाणि विजातीयाभिभूततदवयवारब्धानि । शरीराणि तु विजातीयाभिभूततत्तदवयवारब्धानि । अत एव न तस्य तदभिव्यञ्जकत्वम् ।

ननु शरीरं पाञ्चभौतिकमिति प्रसिद्धे: गन्धवत्तदोष्णादीनामेककर्त्रोपलब्धेश्च विजातीयैरेव पार्थिवावयवै: शरीरमारभ्यते । पार्थिवत्वव्यवहारस्तु पृथिवीभागप्राधान्यादिति चेन्न । विजातीयानामनारम्भकत्वाज्जातेरव्याप्यवृत्तित्वप्रसङ्गात्पृथिवीत्वजलत्वादीनामेकत्र साङ्कर्य्यप्रसङ्गाच्च । तथानभ्युपगमाद् गन्धस्नेहादीनां सामानाधिकरण्यप्रत्यासत्त्या परस्परं प्रतिबध्यप्रतिबन्धकभावदर्शनेनैकत्र समवायेन तदुत्पादस्यासम्भवाच्च । कथं तर्हि पार्थिवादिशरीरे स्नेहाद्युपलब्धिरिति चेत्, संयुक्तसमवायादिति गृहाण, तेन मानुषशरीरपरम्परारम्भकं द्वणुकं शरीरवान् निर्गन्धसमवेतं गन्धत्वाद् घटवदित्यनुमानाच्छरीरस्य विजातीयानारम्भत्वसिद्धिरिति । तन्न । तन्मते एकार्थसमवायेन तत्र गन्धोपलब्धिसमर्थनेन तत्र गन्धवत्त्वे मानाभावाद् गन्धत्वहेतोरसिद्धेरिति ।

विषयमाह-

(मू) विषयस्तु द्वणुकादिप्रक्रमेणाऽऽरब्धस्त्रिविधो मृत्पाषाणस्थावरलक्षण: । तत्र भूप्रदेशा: प्राकरेष्टकादय: मृद्विकारा: । पाषाणो उपलमणिवज्रादय: । स्थावरास्तृणौषधिवृक्षगुल्मलतावतानवनस्पतय इति ।

विषयस्त्विति । द्व्यणुकं परमाणुद्वयारब्धजन्याणुत्वाधिकरणद्रव्यविशेष: । स एवादिर्यस्य प्रक्रमस्य स तथा परमाणुभ्यां द्व्यणुकम्, द्व्यणुकैस्त्रिभि: त्रसरेणु:, त्रसरेणुभिश्चतुरणुकमित्यादिप्रक्रमेणेत्यर्थ: । ननु

1. प्राणभेदेन - क मातृकायाम्

2. वचननासिकाण्डसेवाधि --

द्व्यणुकमेव नास्ति मानाभावादिति चेत्। न। त्रसरेणुर्न निरवयवद्रव्यसमवेतः लौकिकबहिरिन्द्रियजन्यप्रत्यक्षविषयद्रव्यत्वाद् घटवदित्यनुमानात् त्रसरेणोर्नित्यद्रव्यसमवेतत्वबाधे त्रसरेणुः समवेतश्चाक्षुषद्रव्यत्वाद् घटवदित्यनुमानात् तत्सिद्धिः। यद्वा अणुत्वकार्यवृत्तिपरिमाणव्याप्यव्याप्यजातित्वात् महत्त्ववदित्यतस्तत्सिद्धिः। न चाणुत्ववत्त्वं न कार्यवृत्तिमहदनारभ्यमात्रवृत्तिपरिमाणत्वव्याप्यजातित्वात् परममहद्वत्त्ववत्, एवं [1]त्रसरेणुनित्यद्रव्यसमवेतः जन्यत्वे सति महत्त्वाश्रयद्रव्यानारम्भकाः आरम्भकत्वात्कपालवदित्यादिना सत्प्रतिपक्षबाधादिना निरूक्तानुमानप्रतिरोध इति वाच्यम्, निरवयवसमवायिकारणसामग्र्यमहदनारम्भकत्वनियमस्य द्व्यणुकसाधकानुमानेऽनुकूलतर्कतया तस्य बलत्वेन प्रतिरोधाद्यसम्भवात्। अत एव द्व्यणुकावयवाः सावयवा इत्यादिवत् नाप्रयोजकम्।

यत्तु द्व्यणुकाभावे परमाणुभिरेव संहत्य [2]पटाद्यवयविजननेऽनुपलक्षित रेखोपरेखो वा घटादि गृह्येत। आरभ्यारम्भकवादे तु मूर्त्तयो समानदेशताविरोध इति व्याप्तौ देशपदस्य समवायिकारणपरत्वात्। एवमारम्भकसंख्यापकर्षभूमित्वेन द्व्यणुकसिद्धिरिति प्राचीनमतम्। तत्र परमाणुभिः द्व्यणुकमनारभ्यैव त्रसरेण्वारम्भे निखिलदोषनिरासः। अन्यथा द्व्यणुकाभ्युपगमेऽपि तैः सर्वैराहत्य घटादिजनने तद्दोषतादवस्थ्यात्। यत्त्ववयवद्वित्वसंख्यापकर्ष इत्यादिवशात् तत्सिद्धिरिति तदपि स्थवीयः। हस्तरचिततिर्यक्कपालस्थावरादावेकतन्तुकपटे चैकस्यापि जनकत्वेन द्वित्वस्यापि तथात्वाभावादिति प्रतिनियतत्वभावेन तथाकल्पनायां मानाभावाच्चेति दिक्।

मृदित्यादि- तत्र मूर्त्तिकात्वं सामान्यविशेषः। स्वाधिकगुरुत्ववद्द्रव्याभिधातजन्यविभागवद[3]वयवो वा। जलसंयोगविशेष [4]क्लिदमानावयवत्वम्वा विजातीयगन्धवद्द्व्यणुकादिक्रमोत्पन्नपृथिवीत्वम्वा। स्थावरत्वञ्च भोगविशषावच्छेदकत्वे सति चेष्टामात्रत्वम्, न तु सत्यन्तरहितं विशिष्टमात्रम्। मृदादीनामपि तथात्वापत्तेः।

---

1. त्रसरेणुनित्यद्रवत्यसमवेतः - क मातृकायाम्
2. घटाद्य - क मातृकायाम्
3. अवयव त्वम्
4. किलद्यमाना

तत्रेति - तत्र त्रिविधविषयमध्ये इष्टकादिपदाद् द्व्यणुकाद्यवयवजाति-परिग्रहः। उपलेति अविद्यमानावयवाः पर्वताद्यवयवविशेषाः। उपलमणयश्चारुत्मतवैदुर्य्यादयः। मणिपदेन तद्गुटकग्रहणम्। मनस्तैजस्त्वादिति केचित्। बज्रो हीरकम्। तृणान्युपलादि। एवौषधफलपाकान्ताः गुल्मा रूर्णाः। लता-कुष्माण्डप्रभृतयः। अवतानां केतकीप्रभृतयः। वनस्पतयः पुष्पं विना फलवन्तः। अदिशब्दात् तद्विकारपत्रपुष्पतण्डुलादिग्रहणम्। ननु वृक्षादीनां भागावच्छेदकतया शरीरत्वं भागावच्छेदकत्वञ्च। श्मशाने जायते वृक्षः [1]कङ्कगृध्रनिषेवितः 'एकं कण्ठं प्रतिषे'ति इत्याद्यागमात्। किञ्च मूलनिषिक्तदोहदजलादीनाम[2]न्तर्नयनानुकूलो व्यापारोऽमीषां लक्ष्यते, न च प्राणसम्बन्धं विनेति इत्येतेषां प्राणित्वमवश्यं वक्तव्यम्। एवं प्राणित्वशरीरत्वसिद्धौ वृक्षत्वमदृष्टविशेष-जन्यात्ममनःसंयोगनाशरूपमरणावच्छेदकम्। क्षतभग्नसंरोहणानुकूलजीवनयो-नियत्नविशेषावच्छेदकं प्राणिवृत्तिजातित्वात् वृक्षादिशरीरं जीवनावच्छेदकं प्राणित्वादिति वा [3]वृक्षादीनां जीवनादित्वमपि साधनीयम्।

स्वप्नवाहनाडीमनःसंयोगजन्यज्ञानावच्छेदकहेतुसाध्ये दोषविशेषण-जन्यशरीरवृत्तिजातित्वं हेतुः। शुक्लादिशरीरस्य बाधविशेषदोषविशेषजन्य-त्वाभावाद् शुक्लत्वादौ न व्यभिचारः। न तु समानकालीनानेकशरीरवृत्ति-जातित्वादिति शुक्लस्य कार्यव्यूहदशायां शुक्लत्वस्य समानकालीनाने-कशरीरवृत्तिजातित्वे तत्र व्यभिचारतादवस्थ्यात्। न च तस्य तत्त्वज्ञानित्वेऽपि स्वप्नादिकमस्त्विति वाच्यम्, समानकालीनेत्यस्य वैय्यर्थ्यापत्तेः। रुद्रत्वादित्यादौ व्यभिचारश्च। एवं सजातीयगमनानुकूलयत्नाद्यवच्छेदकमपि प्रत्यक्षसिद्धमेवेति तेषां शरीरविशेषवत्त्वेनैव तदन्तर्भावेन विषयत्रैविध्यमनुपपन्नमिति चेत्। न। शरीरस्यापि वस्तुतो विषयतया तदन्तर्भावेऽपि [4]कार्यत्रैविध्यविषयान्तर्भावे विषयत्रैविध्यगणने विरोधाभावात्। वस्तुतस्त्वेषामित्य[5]न्यज्ञानतावच्छेदकतया न शरीरत्वप्रसिद्धिर्लोकानामिति विषयान्तर्भावः कृत इति सर्वं समञ्जसम्।

1. कङ्कगृध्रनिवेवितः नास्ति - क मातृकायाम् 2. अन्ततन्मात्रानुकूलो - क मातृकायाम्
3. वृक्षादिशरीरं 4. कार्यत्रैविध्यविषयान्तर्भावे - नास्ति क मातृकायाम् 5. अतिमन्दज्ञाना

जलनिरूपणम्

उद्देश्यक्रमप्राप्तया आपो निरूपयति-

(मू) अप्त्वाभिसम्बन्धादापः । रूप-रस-स्पर्श-द्रवत्व-स्नेह-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वापरत्व-गुरुत्व-संस्कारवत्यः। एते च पूर्ववत्सिद्धाः।

अप्त्वाभिसम्बन्धादिति। अपस्त्वं नाम सामान्यविशेषस्तेनाभिमतः सम्बन्धसमवायस्तस्मादित्यर्थः। ननु अप्त्वं न जातिः। करकालवणपरमाणु-साधारण्येन तत्प्रतीत्यभावात्। न च कार्यतावच्छेदकत्वेन तत्सिद्धिः, तस्य नित्यपरमाणुवृत्तित्वेन कार्यतावच्छेदकत्वाभावात्। न च कारणतावच्छेदकतया तत्सिद्धिः, अनुगतकार्याभावात्, स्नेहादीनाञ्च नित्यपरमाणुस्नेहादिवृत्तित्वेन कार्यतावच्छेदकत्वाभावात्। न च जन्यस्नेहत्वावच्छिन्नकार्यतानिरूपितकारण-तावच्छेदकतया तत्सिद्धिरिति वाच्यम्, परमाणौ तदसिद्ध्यापत्तेः। न च जन्यजलेषु जन्यस्नेहाकारणतया जलत्वासिद्धौ जलपरमाणुः [1]स्वोपादेयवृत्तिद्रव्यत्व-साक्षाद्व्याप्यजातिमान् रूपवत्परमाणुत्वात् पृथिवीपरमाणुवदित्यनुमानात्तत्रापि तत्सिद्धिरिति वाच्यम्, तत्तद्द्रव्यव्यवस्थापकस्य जन्यस्नेहकारणत्वस्य तत्राभावेऽनुमानेन [2]तत्साधनतासम्भवात्। तत्र च नीरुपयोग्यत्वेनित्यस्य स्वरूपयोग्यस्य फलावश्यं भावनियमेन परमाणावपि जन्यस्नेहावश्यंभा[3]वापाताच्च। न च जन्यजत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतया तत्सिद्धिरिति वाच्यम्, जलान्त्यावयविनि [4]तत्सिद्ध्यनापत्तेः, जलावयविनो जलजनकत्वा-भावाच्च।

किञ्च विनिगमनाविरहेण जन्यस्नेहत्वावच्छिन्नकार्यतानिरूपितकारण-तावच्छेदकतया परमाणुव्यावृत्तिसिद्धिः, जन्यजलत्वावच्छिन्नकार्यतानिरुपित-

---

1. स्वापादेय - क मातृकायाम्
2. तत्साधकसम्भवात् -
3. भाविनियमेन परमाणावपिजन्यस्नेहावश्यं भावापात्ताच्च
4. तत्सिध्यपत्तेः - क मातृकायाम्

कारणतावच्छेदकतया चान्त्यवयविव्यावृत्तिसिद्धिः, तथा च तयोरेव जलावयवेषु साङ्कर्य्यान्न जातित्वमिति । एतेन पृथिवीत्वं गुरुत्ववद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्य-जातिभिन्नं सामान्यत्वात्तेजस्त्ववदित्यनुमानात् सिद्धिरिति प्रत्युक्तम्, अनुकूलतर्कभावेनानुमानस्याप्रयोजकत्वात् । न च जलपदशक्यताच्छेदकतया तत्सिद्धिरिति वाच्यम्, पदशक्यतावच्छेदकतया [1]जातिसिद्धाविन्द्रसिंह-साधारण्येन हरित्वादिजातिसिद्ध्यापत्तेः, विभुत्वादेः जातित्वापत्तेश्च । [2]नापि स्नेहवन्मात्रवृत्तिसंयोगत्वावच्छिन्नकार्यतानिरुपितकारणतावच्छेदकतया तत्सिद्धिः, संयोगस्य व्यासज्यवृत्तित्वेन तन्मात्रवृत्तित्वाभावात्, तादृशसंयोगत्वस्य गुरुत्वेन कार्यतावच्छेदकत्वाभावात्, स्पर्शवन्मात्र-वृत्तिसंयोगत्वादीनामपि कार्यतावच्छेदकत्वापत्तेश्च । तस्मात्साधकाभावान्नास्ति जलत्वमिति चेत् । न । रसाभिव्यंक्तिविशेषत्वावच्छिन्नकार्यतानिरूपित-कारणतावच्छेदकतया तत्सिद्धे, लाघवेन तादृशरसाभिव्यक्तिं प्रति जलत्वेनैव हेतुत्वात् परमाणावपि स्वरूपयोग्यतासत्तायास्तस्या अपि जलान्तरसहकारेण रसाभिव्यञ्जकत्वेन फलोपधानस्य सम्भवाच्च । शीतलशीलामध्यस्थित-जलावयवानामपि स्वरूपयोग्यता [3]अस्त्येव भवति, तत्साधारण्येन जलत्वसिद्धिः । अतएव रसनायाः जलत्वसाधकानुमाने रसाभिव्यञ्जकत्वं हेतुरिति [4]सर्वतान्त्रिकाणामघोषणा । एवं [5]क्लिष्टाक्षराद्यभिव्यक्तिविशेषहेतुतायाः तत्सिद्धिः । परमाणोस्तु तदवयवावच्छेदेन संयोगाभावान्नाभिव्यञ्जकत्वम् । न चैवं स्वरूपयोग्यत्वव्याघातः । अन्यथाऽरण्यविनष्टदण्डादिव्यक्तेरप्यतथात्वा-पत्तिरिति संक्षेपः ।

क्षित्युदकात्मनां चतुर्दशगुणवत्त्वमित्युक्तं तत्र चतुर्दशगुणा उदके इत्यपेक्षायामाह- रूपरसेति । एतेषुप्रमाणमाह- एते च इति। यथा सूत्रकारवचना-त्पृथिव्या गन्धादयः सिद्धाः, तथा "रूपरसपर्शवत्यापो द्रवाः स्निग्धाश्चेति" (वै.सू.2.1.2) सूत्रात् पञ्चविशेषगुणाः जले सिद्धा इत्यर्थः ।

---

1. जातिसिद्धौ इन्द्रसिंहपादंगेन - क मातृकायाम् 2. नाग्नि
3. असत्वे वेति - क मातृकायाम् 4. तान्त्रिकाणायोषणा 5. भि --- क्षराद्य

पृथिव्यामिव चाक्षुषवचनात्सप्तसंख्यादय पतनोपदेशाद्गुरुत्वमुत्तर-कर्मवचनात्संस्कारः वेगस्थितिस्थापकस्तु स्पर्शवत्त्वेनानुमेयः। एवञ्च गुणवत्त्वेन गुणादिभ्यो रूपादिभ्यो भेदसिद्धावपि स जातीयव्यवृत्तिबुद्धिहेतून् रूपविशेषान् विशिष्य दर्शयति इतरभेदानुमाने पक्षतावच्छेदाकार्थं वा।

(मू) शुक्लमधुरशीता एव रूपरसस्पर्शाः स्नेहोऽम्भस्येव सांसाद्धिकञ्च द्रवत्वम् । तास्तु पूर्ववद् द्विविधाः नित्यानित्यभावात् । तासां कार्यञ्च त्रिविधम्, शरीरेन्द्रियविषयसंज्ञकम् । तत्र शरीरमयोनिजमेव वरुणलोके पार्थिवावयवोपष्टम्भादुपभोगसमर्थम् । इन्द्रियं च सर्वप्राणिनां रसोपलम्भकमन्यावयवा (रसव्यञ्जकं-विजात्या)नभिभूतैः जलावयवैरारब्धं रसनम् । विषयस्तु सरित्समुद्रहिमकरकादि इति ।

शुक्लेति - अपाकजत्वमभास्वरत्वमपि द्रष्टव्यम्। तेनापाकजत्व-मभास्वरं शुक्लरूपं जलत्वव्यवस्थाहेतुः। पाकजरूपप्रतिबन्धकतावच्छेदकः शुक्लत्वाद्यवान्तरजातिविशेष एव वा शुक्लपदेन विवक्षितः। तादृशी च जातिर्यथा न तैजसे शुक्लरूपे तथोक्तमद्यस्तात्। शतशः पच्यमानानामप्यपामत्य-न्तानलसंयोगेऽपि पूर्वरूपविजातीयरूपादर्शनात्त[1]द्रूपस्यापाकजत्वम्। जलं न पाकजरूपवदत्यन्तानलसंयोगेऽपि पूर्वरूपविजातीयरूपानाधारत्वात् तेजो-विशेषवत्। जलरूपं न पाकजम्, कारणरूपविजातीयत्वाभावात्तेजोरूपवदिति द्रष्टव्यम्। लाक्षाजलादौ तु रक्तत्वमौपाधिकम्।

नन्वपां शुक्लमेव रूपमित्यसङ्गतम्, कालिन्दीजलादौ नीलरूपस्या-भ्युपलब्धेरिति चेत्। न। तदुपष्टम्भकपार्थिवभागस्य नीलरूपपराम्परासम्बन्धेन तत्रोपलम्भात्। कथमन्यथा वियति वि[2]क्षिप्तानामिव तासां शुक्लत्वोपलम्भा इति। न चालोकरूपेणाभिभवाच्चात्र तथाप्रतीतिरिति वाच्यम्, आलोक-रूपस्याभिभावकत्वाभावात्, अन्यथा सर्वेषामपि नीलद्रव्याणामालोके शुक्लतयोपलम्भापत्तेरिति दिक्।

1. तदरूपस्य - क मातृकायाम्

2. विक्षिप्तानामेव।

मधुर एव रसोऽपाकजोऽव्यक्तिश्चेति द्रष्टव्यम्। अपाकजत्वञ्च पूर्वरसाविजातीयत्वेन पूर्ववद् बोध्यम्। अव्यक्तत्वञ्च मधुरत्वावान्तर-जातिराहित्यम्। न चावान्तरजातिमन्त एव मधुररसस्य प्रत्यक्षत्वात् तदभावे जलीयरसस्याप्यप्रत्यक्षत्वापत्तिरिति वाच्यम्, मानाभावात्। अन्यथा मधुरत्वमात्रस्यासिद्धप्रसङ्गात्। न च जले रसवत्त्वमेवासिद्धम्, गुडादिवद् विशेषाकारेण तदप्रतीतिरिति वाच्यम्, [1]नीरसत्वेऽप्यर्थानां तत्पानानुपपत्तेश्च। न च नीरसत्वेऽपि सर्पाणां पवनपानप्रवृत्तिवत्तदुपपत्तिरिति वाच्यम्, मनुष्याणां तथा प्रवृत्त्यदर्शनात्। रसाभावेष्वन्तःशौचार्थं तथाप्रवृत्तिरिति चेन्न। रसाभाववत्त्वेन जलपानादे विलपुष्ट्यादेः प्रत्यक्षसिद्धस्य हेत्वन्तराभावेनाकस्मिकतापत्तेः। [2]तेनैतादृशतर्कोपबृंहितस्य प्रत्यक्षमेव जलस्य रसवत्त्वे मानम्। तथापि तद्रस्य माधुर्य्ये किं मानमिति चेत्, प्रत्यक्षमेव [3]हरीतकीकषयादिद्रव्यभक्षणानन्तरं पीते पायसि माधुर्य्योपलम्भात्। न च क[4] र्कटीभक्षणानन्तरं [5]पीतस्य पायसः। तथात्वे किं बाधकमिति चेत्, दध्यादेः क्षीरत्वापादानमेव। कथमिति चेत्, यद्द्रव्यध्वंसजन्यं यद्द्रव्यं तत्तदुपादानोपादेयमिति व्याप्तिः। आश्रयनाश-जन्यगुणनाशे व्यभिचारवारणाय द्वितीयद्रव्यपदम्। दोहनादिसंयोगध्वंसजन्ये पुष्पविशेषादौ व्यभिचारवारणाय प्रथमद्रव्यपदम्। शालग्रामध्वंसजन्ये नारकिशरीरे तद्ध्वंसजन्यं दूरदृष्टं हेतुर्न ध्वंस इति न व्यभिचारः। तथाच क्षीरोपादानस्य क्षीरत्वे तदारब्धत्वविशेषाद् दध्यपि क्षीरं स्यात्। अतो न द्रव्यत्वव्याप्यजातेः परमाणुवृत्तित्वमिति क्षीरत्वादिवदवयवविशेषमारभ्यैव स वर्त्ततामिति चेत्। अनुगतव्यञ्जकाभावात्, तैलधृतावसानमनुगतकारणाजन्यत्वेन स्नेहस्य कार्य त्वावच्छेदकत्वाभावेन समानाभावाच्च, घृतादिसाधारण्यैककार्याभावेन कारणत्वावच्छेदकत्वाभावाच्च। तैलत्वन्तु गन्धविशेषाभिव्यङ्ग्यो जातिविशेषः। न च स्निग्धत्वे वीजप्रभवत्वमात्रं तैलत्वं वीजेऽपि तथात्वापत्तेः। तदवच्छिन्ने च वीजत्वं जनकतावच्छेदकम्। अत एव सर्षपस्नेहोऽपि तैलमेव।

1. नीरसत्वेऽनृत्यं विना तत्पानानुपपत्तेश्च - क मातृकायाम्
2. नैतादृशतर्को - क मातृकायाम्
3. हरीतक्यादिकषायाति भक्षणानन्तरं
4. कर्कटी
5. पीतस्य - कथमिति चेत् - मातृकायाम्

केचित्तु तदवच्छिन्ने तिलवीजत्वं जनकतावच्छेदकत्वम्। न तु वीजत्वमात्रं तैलपदं यौगिकरूपं निरुक्तजातिस्तत्र प्रयोगोपाधिः। पाकजपदे पद्मत्त्ववत्। तेन सर्षपस्नेहादौ तैलपदस्यौपचारिकमिति वदन्ति। सामान्य-त्वाभावेऽपि गुणत्वमेव तस्य कथमिति चेत्। तल्लक्षणयोगादिव्यापारिष्टाद् वक्ष्यते। तथापि कथमेतद् विशेषगुणवत्त्वमिति चेत्, तत्कार्यस्य संग्रहस्य जलान्वयवृत्तिरेकानुविधायित्वे तस्यापि तन्निरासत्वात्। संग्रहश्च सक्थुसक्तादीनां पिण्डीभावानुकूलः संयोगविशेषः। न च तत्रसांसाद्धिकमेव द्रवत्वं प्रयोजकं घृतादावप्युपष्टम्भकपानीयावयवद्रवत्वमेव। न च तत्र द्रवत्वस्य नैमित्तिकत्वे पानीयावयव एव मानाभाव इति वाच्यम्, तदभावे स्नेहानुपपत्तेस्तदर्थम्। त्वचाऽपि तस्यावश्याभ्युपेयत्वादिति वाच्यम्, तदुत्कर्षणे संग्रहोत्कर्षाभावे तत्र तस्या हेतुत्वात्। तत्र सिद्धः स्नेहोऽपां विशेषगुण इति।

स्वतो व्यावर्त्तकं गुणान्तरमाह-सांसाद्धिकत्वमिति। सांसाद्धिकत्वञ्च तेनासंयोगासमवायिकारणकद्रवत्वान्यद्रवत्वम्। स च जात्यैक्त्वोपलम्भात् तैल्यमपि तस्य स्यादिति वाच्यम्, [1]कर्कशभक्षणेन रसनाग्रवृत्तिलक्षणाद् गुड इव तत्र तिक्ततोपलम्भात्। कथं तर्हि [2]पाथोधिपूरान्तर्गतानां [3]पायसां लवणेति चेत्, पावद्रव्योपलम्भात् तारतम्यविशेषेण तस्य पाकजत्वमभ्युपगमात्।

यत्तु [4]घनपीतमुक्तस्य माधुर्य्योपलम्भात्तस्य नैसर्गिकं मधुरत्वमिति तन्न। कूपजलादावेव समाधानाभावात्। वनानां पानासम्भवात्। पीतजलस्य तदानीमेव नाशेन तदविमोचनाऽसम्भवाच्च। पीतस्य विमोचनमिति नियमे मानाभावाच्चेति दिक्।

शीत एव स्पर्शः। मध्यन्दिने चोष्णप्रत्ययस्तादृशविकरणसंसर्गोपाधिकः। अत एव तदपगमे तत्र न तदुपलम्भ इति। [5]न च शीतस्पर्शो न जलत्वस्पर्शहेतुः श्रीखण्डक्षोदवृत्तित्वेन तस्य व्यभिचारित्वात्। न च [6]घर्षकजलस्यैव तत्तस्य ततो

1. अस्मात् अस्ति
2. पाथधिपूरान्तर्गतानां
3. नास्ति
4. घन्टापीतमुक्तस्य - क मातृकायाम्
5. न च --- हेतुः - नास्ति
6. घर्षकजलस्य - क मातृकायाम्

विलक्षणत्वादिति वाच्यम्, [1]श्रीखण्डान्तवर्त्तिजलस्यैव घर्षणवहिर्भूतस्य शैत्योपलम्भेन श्रीखण्डे शैत्याभावात्।

स्वरुपतोऽल्पव्यवस्थाहेतुं गुणविशेषमाह - स्पर्श इति। ननु स्नेहसामान्य विशेष एव गुण घृततैलवशादिषु स्निग्धं स्निग्धमित्यनुगताकारेण[2] प्रतीतिहेतुत्वान्न जलस्य गुणस्तत्र कुत्रापि घृतादिवत्प्रतीतेः। तथापि पृथिवीगुणोऽस्तु न सामान्यविशेष इति चेत्। न। तद्गुणः किं तत्सामान्यगुणो [3]भवेन्नुत तद्गुणविशेषः। नाद्यः- स्नेहत्वं यदि पृथिवीसामान्यगुणवृत्तिप्रत्यक्षगुणत्वव्याप्यजातिः स्यात्, तेजोवृत्तिवृत्तिः स्यादिति तर्कोपजीविना स्नेहो न पृथिवी सामान्यगुणः प्रत्यक्षत्वे सति तेजोऽवृत्तित्वाभावात् सत्यन्ताद् गुरुत्वेन व्यभिचारः इत्यनुमानेन तदभावसाधनात्। न द्वितीयः- स्नेहत्वं यदि पृथिवीविशेषगुणवृत्तिजातिः स्यात्, घटवृत्तिवृत्तिः स्यादिति तर्कोपबृंहितेन स्नेहो न पृथिवीविशेषगुणो घटवृत्तित्वाभावाद् घटवदित्यनुमानेन साधनात्। तस्मात् [4]घृततैलवसादिषु वर्त्तमानः सामान्यविशेषः। एवायं न जलस्य विशेषगुण इति चेत्। न। स्नेहो न सामान्यविशेषः सातिशयत्वात् रसवत्। किञ्चास्य तथात्वे परमाणुवृत्तित्वं न स्यात्, द्रव्यत्वव्याप्यव्याप्यजातेः परमाणुवृत्तित्वा[5] भावात् तथात्वे किं बाधकमति चेद् दध्यादेः क्षीरत्वापादानमेव कथमिति चेत् यद्द्रव्यध्वंसजन्यं यद्द्रव्यं तत्तदुपादानोपादेयमिति व्याप्तिः। दोहनादिसंयोगध्वंसजन्येषु विशेषादौ व्यभिचारवारणाय प्रथमद्रव्यपदं आश्रयनाशजन्ये नारकीशरीरे तद्ध्वंसजन्यं दुरदृष्टं हेतुः निध्वंस इति न तत्र व्यभिचारः। तथा च क्षीरोपादानस्य क्षीरत्वे तदारब्धत्वाविशेषाद्यपि क्षीरं स्यात्। अतो न द्रव्यत्वव्याप्यजातेः परमाणुवृत्तित्वमिति क्षीरत्वादिवत्। अवयवविशेषमारभ्यैव स वर्त्ततामिति चेत् अनुगतव्यञ्जकाभावात् घृततैलवसानामनुगतकारणजन्यत्वेन स्नेहत्वस्य कार्यतावच्छेदकत्वाभावेन सामान्याभावाच्च। घृतादिसाधारणैक-

1. श्रीखण्डान्ततक्योतजलस्यैव घर्षणाद् वहिर्भूतस्य - क मातृकायाम्
2. कारण
3. भवन्ने --- विशेषः - नास्ति
4. पुततैल - क मातृकायाम्
5. त्वाभावात् --- वेत्यन्यदेवत् - नास्ति क मातृकायाम्

कार्याभावेन कारणतावच्छेदकत्वाभावात् तैलत्वं नु गन्धविशेषाभिव्यङ्ग्यो जातिविशेषः ।

न च स्निग्धत्वे सति बीजप्रभवत्वमात्रं तैलत्वं बीजेऽपि तथात्वापत्तेः । तदवच्छिन्ने च वीजत्वं जनकतावच्छेदकम्, अतएव सर्षपस्नेहोऽपि तैलमेवेति । केचित्तु तदवच्छिन्ने तीलवीजत्वमेव जनकतावच्छेदकं न तु बीजत्वमात्रं तैलपदं योगरुढम् । नीरुक्तजातिस्तत्र प्रयोगोपाधिः पङ्कजपदे पद्मत्ववत् तेन सर्षपस्नेहादौ तैलपदमौपचारिकमिति चेत्, लक्षणयोगादित्युपरिष्टाद् वक्ष्यते । तथापि कथमेतद्विशेषगुणत्वमिति चेत्, तत्कार्यस्य संग्रहस्य जलान्वयव्यतिरेकानुविधायित्वे तस्यापि तन्नियतत्वात् । संग्रहस्य सक्तुसिकतादीनां पिण्डीभावानुकूलः संयोगविशेषः । न च तत्र द्रव्यत्वमेव प्रयोजकं काञ्चनद्रव्यत्वादिना तदसम्भवात् । न च तत्र सांसाद्धिकमेव द्रव्यत्वं प्रयोजकं घृतादावप्युपष्टम्भकपानीयावयवद्रवत्वमेव ।

न च द्रवत्वस्य निमित्तकत्वे पानीयावयव एव मानाभावादिति वाच्यम्, । तदभावे स्नेहानुपपत्तेः । तदर्थं तस्यावश्याभ्युपेयत्वादिति वाच्यम् । तदुत्कर्षेण संग्रहात्कर्षाभावे तत्र तस्याहेतुत्वात् । अतः सिद्धं स्नेहाऽपां विशेषगुण इति स्वतो व्यावर्त्तकं गुणान्तरमाह - सांसिद्धिकमिति । सांसिद्धिकत्वं च तेजःसंयोगासमवायिकारणकद्रव्यान्यद्रवत्वम् । सः जातिरूपो उपाधिरूपो वेत्यन्यदेतत् चकारोऽम्भस्येवेत्यनुकर्षणार्थः । ननु पार्थिवे क्षीरतैलादौ तदुपलम्भः । न च तेषां तद्वत्त्वे जलत्वमेवेति वाच्यम्, क्षीरस्य पाकजरसत्वेन तैलस्य भौमानलेन्धनत्वेन पार्थिवत्वात् । तथाहि क्षीरं पार्थिवं पाकजरसवत्त्वाद् घृतवत् । तैलं यथा वह्निनाश्यत्वे सति वह्निजनकत्वात्काष्टवत् । वह्नित्वञ्च तेजस्यन्तरजातिविशेषोऽनुगतप्रतीतिसाक्षिकः । सत्त्वान्न पवने व्यभिचारः । न च तैलोपष्टम्भकजलभागे व्यभिचारः, [1]तस्य तैलान्तरीयकत्वेन वह्निजनकत्वे मानाभावात्, तेन पार्थिवे तैलादौ सांसाद्धिकद्रवत्वोपलम्भात् । सांसाद्विकं द्रव्यत्वमम्भस्येवेत्यसिद्धमिति चेत् । न । संयुक्तसमवायेन तत्र तदुपलम्भात् । न च जलस्य

1. तस्य - मानाभावात् - नास्ति

भौमानलमापकत्वात् तत्सिद्धेः तन्नाशापत्तिरिति वाच्यम्, अन्यासंसृष्टस्य तन्नाशकत्वात् तैलसंसृष्टजलत्वेन वा तन्नाशकत्वम्। क्षीरादेस्तु क्षीरत्वादिना पृथक् तन्नाशकत्वम्। प्राञ्चस्तु- जलस्य वह्निनाशकताया स्नेहविशेषः प्रतिबन्धकस्तेन तैले जलसत्त्वेऽपि प्रतिबन्धकसत्वान्न वह्निनाश इति प्राहुः।

नन्वपाकजन्यत्वस्य प्रत्यक्षसिद्धतया प्रलये च तासां नाशे सर्गादौ पुनरुत्पत्तिर्न स्यादित्याशङ्क्यास्य नित्याऽनित्यवृत्तित्वं दर्शयति - नित्येति। अत्रापि पूर्ववदनित्येति। परमाणुलक्षणा नित्या कार्यलक्षणश्चानित्या इत्यर्थः।

भूतान्तर्गतानामेषां कथं पारार्थ्यमित्यपेक्षया कार्यद्वारा पारार्थ्यमिति कार्यविधान् दर्शयति- त्रिविधमिति। ननु शुक्रशोणितयोः [1]पार्थिवत्वनियमत्वाभ्यां कथमपार्थिवं शरीरमारभ्यत इत्यत आह- शरीरमिति । अयोनिजं शुक्र-शोणितसन्निपातानपेक्षमित्यर्थः। अत्र च जलत्वं शरीरारम्भकवृत्तिस्पर्शवद्-वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातित्वात् पृथिवीत्ववत्। शरीरत्वम्वा जलसमवेत-वृत्तिगृह्यमाणरसनाश्रयवृत्तित्वे सति स्पर्शवद्वृत्तित्वे सति रससाक्षात्कार-हेतुसंयोगाश्रयवृत्तित्वाद् रसत्ववत् इत्याद्यनुमानागमोपबृंहितमात्रं प्रमाणमिति द्रष्टव्यम्।

कथं तर्हि नोपलभ्यत इत्यत आह - वरुणलोक इति । तथाच व्यवधानान्नोपलभ्यते न त्वभावादिति भावः। भङ्गुरस्वभावस्य तस्य कथमुपभोगसाधनत्वमत आह-पार्थिवेति। यथा संहतपृथिव्यारब्धमपि शरीरं भूतान्तरानुप्रवेशादुपभोगसमर्थं तद्वदिदमपीत्यर्थः। विजातीयानामेकत्र समवायिकारणत्वाभावेऽपि परस्परसहकारिभावस्यातिविरोधात्।

इन्द्रियमाह - रसनेति । इन्द्रियं सर्वप्राणीनां रसाभिव्यञ्जकं रसनमित्यन्वयः। रसनपदं योगरुढं नाम। रसनत्वावच्छिन्नकार्यतानिरूपित-कारणतावच्छेदको जातिविशेषो वा।

किं तत्र मानमत आह- रसव्यञ्जकमिति। रससाक्षात्कारो व्यापारवद-साधारणकारणजन्यः साक्षात्कारत्वाद् रूपसाक्षात्कारत्वादिति तत्स्वरूपसिद्धौ

1. पार्थिवत्वनियमन्ताभ्यां - क मातृकायाम्

तज्जलीयव्यापारवत्त्वे सति रूपसाक्षात्कारासाधारणकारणत्वाद् [1]दन्तोदकवत् सत्यान्तान्न सर्वसन्निकर्षे व्यभिचारः । न तु रूपाद्यव्यञ्जकत्वे सति [2]रससाक्षात्कारकारणत्वादिति हेतुः । दृष्टान्ते म्लिष्टाक्षररूपाभिव्यञ्जकत्वनवशरावगन्धव्यञ्जकत्वादिसत्त्वेन तस्य [3]साधनवैकल्यापत्तेः । नन्वनुत्पादितरूपसाक्षात्कारे [4]अनुघर्षणादिजनितावयवनाशादिनाश्ये खण्डरसने भागाऽसिद्धिरिति चेत् । न । तत्र मानाभावात् । सत्त्वे वा तत्रापि स्वरूपयोग्यतायाः सत्त्वात् ।

जलस्य तथाशक्तिसत्त्वे जलान्तरेणापि कथं रसनाभिव्यञ्जक इत्यत आह-विजातीयेति । अत एव उष्मादिनाऽभिभवे रसनस्य जडत्वं जलान्तरस्य विजातीयाभिभवान्न तथाशक्तिरिति भावः ।

विषयमाह - विषयस्त्विति । रसत्वादिकं जलत्वव्याप्यजातिविशेषः प्रवाहविशेषं प्रति कारणतावच्छेदकत्वेन सिद्धः । समुद्रत्वं परिमाणविशेषावच्छिन्नजलत्वरूपमुपाधिः, न तु जातिः, क्षीरादिसमुद्रस्याप्यागमसिद्धत्वेन जलत्वादिना साङ्कर्य्यात् । हिमत्वं स्पर्शविशेषजनकतावच्छेदको जातिविशेषः । कारकत्वञ्च प्रतिरूद्धद्रवत्वे सति स्पर्शवत्संयोगेन विलीयमानत्वात्, न जातिरव्याप्यवृत्तित्वात् । न च विलीयमानं जलं ततो भिन्नमिति वाच्यम्, मानाभावात् । आदिपदाल्लवणादिपरिग्रहः । ननु करकादिकं पृथिवीसंयोगवत्त्वात्सांसाद्धिकद्रवत्वानाश्रयत्वाद् घटवत्, एवं लवणं पार्थिवमव्यक्तमधुरान्यरसाश्रयत्वाद् गुडवत्, एवं लवणं न जलमव्यक्तमाधुर्य्यानाश्रयत्वाद् क्षीरादिवदिति तेषां जलत्वमेवाऽसिद्धमिति चेन्न । उक्तहेत्वसिद्धेः । करकादौ हि द्रवत्वप्रतिबन्धकमात्रेण कठिनव्यवहारो न तु वस्तुतस्तु तत्सर्वमिति विलयनानुपत्तेः ।प्रथमहेतौ चानुष्णशीतस्पर्शविशेषवत्त्वमुपाधिः । तत्र स प्रतिपक्षो दूषकतावीजम् । करका न पृथिवी तादृशस्पर्शाभावादिति । ननु व्यभिचारोन्नायकत्वं कठिनसंयोगे पृथिवीत्वव्यभिचाराभावेन तत्साधने बाधात्, करका जलं स्पर्शवत्त्वादित्यनेन शीतस्पर्शत्वादित्यनेन प्रतिरोधाच्च, लवणे च विलयदशायां

1. यतोदकवत् - क मातृकायाम् 2. रस

3. साधनवैकल्यापत्तिः 4. तालुघर्षणादिजनिता - क मातृकायाम्

जलत्वस्य प्रत्यक्षसिद्धत्वात्तदुपलम्भकपार्थिवावयवसमवेतस्य लवणरसत्व-परम्परासम्बन्धेन तत्र प्रतीतिसिद्धिरेव। न च विलीयमानं जलं लवणाद् द्रव्यान्तरमिति वाच्यम्, मानाभावात्, प्रत्यभिज्ञाबाधाच्च। एवं सांसिद्धिकद्रवत्वमपि तत्र प्रत्यक्षसिद्धमेवेति सिद्धं करकादीनां जलत्वमिति संक्षेपः।

तेजोनिरूपणम्

उद्देशक्रमप्राप्तं तेजो निरूपयति-

(मू) तैजसत्वाभिसम्बन्धात्तेजः । रूपस्पर्शसंख्यापरिमाण-पृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारवत् । पूर्ववदेषां सिद्धिः ।शुक्लं भास्वरञ्च रूपम् ।उष्ण एव स्पर्शः नैमित्तकं द्रवत्वञ्च । तदपि द्विविधमणुकार्यभावात्। कार्यञ्च शरीरादित्रयम्।

तेजस्त्वं नाम सामान्यविशेषः। तेनाभिसम्बन्धसमवायस्तस्मात्। तेन कालिकसम्बन्धेन स्पर्शादिवृत्तित्वेऽपि न क्षतिः। न च तेजस्त्वं न जातिः चन्द्रचामीकरग्रीष्मोष्मादिसाधारण्येनानुगतप्रतीतेरसिद्धेः। [1]नचानुगत-प्रतीत्यभावेऽपि कार्यतावच्छेदकतया तत्सिद्धिः। तस्य नित्यपरमाणुवृत्तित्वेन कार्यतावच्छेदकत्वाभावात्। सर्वानुगतैककार्याभावेन कारणतानवच्छेदक-त्वाभावाच्च, उष्णस्पर्शत्वादेरप्यकार्यवृत्तित्वेन कार्यानवच्छेदकत्वाभावात्। न च जन्योष्मस्पर्शत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतया तत्सिद्धिरिति वाच्यम्, तस्य गुरुधर्मत्वेन कार्यतावच्छेदकत्वात्तथात्वे वा उक्तरूपेण साध्यमानायाजातेः परमाणुवृत्तित्वानापत्तेः। परमाणुस्पर्शस्य नित्यत्वेन तत्र जन्यस्पर्शकारणत्वाभावात्। न च तत्र फलोपाधिनाऽभावेऽपि स्वरूपयोग्य-ताऽस्तीति वाच्यम्, तत्र स्वरूपयोग्यतासत्त्वे फलोपाधिनावश्यंभावापत्तेः नित्यस्य स्वरूपयोग्यस्य फलावश्यंभावनियमात्।

---

1. न चानुगतप्रतीत्यभावेऽपि कार्यतावच्छेदकतया तत् सिद्धिः - नास्ति - क मातृकायाम्।

एतेनोक्तरीत्या तेजोऽवयविनि तादृशजातिसिद्धौ तत्परमाणुः स्वोपादेयवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमात्रद्रव्याऽसमवायिकारणसंयोगाश्रयत्वात् पृथिवीपरमाणुवदित्यनुमानात्तत्सिद्धिरिति परास्तम्। अप्रयोजकत्वात्परमाणावनित्यस्पर्शस्यावश्यंभावापत्तेश्च।

एतेन पृथिवीत्वं तेजःसंयोगाऽसमवायिकारणकद्रव्यवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिभिन्नं प्रमेयत्वाद् घटवदित्यादिकमपि परास्तम्, अप्रयोजकत्वात्।

यत्तु तेजःपदशक्यतावच्छेदकतया तेजस्त्वसिद्धिरिति तदपि परास्तम्। पृथिवीत्वादेरपि जातित्वापत्तेः। तस्मात्तेजस्त्वं न जातिरिति चेत्। मैवम्। जन्यतेजस्त्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतया तत्सिद्धेः। न च तेजोऽन्त्यावयविनि तदसिद्ध्यापत्तिः। तत्रापि बाधकाभावेन स्वरूपयोग्यतायाऽसत्त्वात्।

नवीनास्तु - उष्णस्पर्शसमवायिताऽवच्छेदकतया तत्सिद्धेः कारणतावच्छेदकत्ववत् समवायितावच्छेदकस्यापि जातित्वसाधकत्वात्।

उच्छृङ्खलास्तु- तेजस्त्वं न जातिः मानाभावात्, सर्वसाधारण्येनानुगतप्रत्ययाभावात् प्रभात्वादावतिप्रसङ्गाच्च। किन्तु वह्नित्वादिकमेव प्रत्येकं जातिः। गुरूत्वाऽसमानाधिकरणरूपवत्त्वविभाजकोपाधिः, धूमेऽपि धूमतादशायामधोगमनेन गौरवानुमितेनातिप्रसङ्गाभावात्। अस्तु वा [1]जन्यभास्वररूपत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतया तेजःसिद्धिः। न च परमाणौ तद्सिद्ध्यापत्तिः, इष्टापत्तिश्च। परमाणोस्तै[2]जसत्वे तदारब्धस्य तैजसत्वे बाधकाभावात्, क्षीरत्वानाश्रयपरमाण्वारब्धस्यापि क्षीरत्ववत् न च स्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातेः परमाणुवृत्तित्वनियममानाभावात् निरूक्तोपाधिना विभागकरणाच्च नाधिक्यमिति प्राहुः।

एतस्य द्रव्यत्वसिद्धये गुणानाहुः। रूपस्पर्शेति। रूपादय एकादशतेजसो गुणा इत्यर्थः। एषु प्रमाणमाह - पूर्ववदिति। रूपस्पर्शवत्तेजो (वै.सू 2-2-3)

1. अन्यस्वरूपत्वा 2. अतेजसत्वे

इति सूत्रा[1]त्तयोः सिद्धिः चाक्षुषवचनात्सप्तसंख्यादयः सिद्धिः। उत्तरकर्मदर्शनाद् वेगाख्यः संस्कारः सुवर्णादावग्निसंयोगदर्शनाद्द्रवत्वम्। दर्शनादिसामान्यवचनाद् द्रव्यत्वम्।

ननु तेजसो द्रवत्वमसिद्धम्, सुवर्णोपष्टम्भकपार्थिवावयवानामग्निसंयोगाद् द्रवत्वे जातेः [2]द्रुतस्यापि तेजोभागस्य [3]जलेषु प्लवमाने साक्षाद्द्रववदुतत्त्वप्रतीते-रूपपत्तेः, तेजोऽन्तरे द्रवत्वानुपपत्तेस्च। न च तद्द्रव्यत्वस्य पार्थिवत्वेऽग्नि-संयोगनाश्यतापत्तिरिति वाच्यम्, तन्नोशे सुवर्णस्य प्रतिबन्धकत्वेन तदनुपपत्तेः। भवन्मतेऽपि तथैवकल्पनाद् द्रतं [4]सुवर्णमिति प्रत्ययस्तु पीतसुवर्णवदुत्पन्नः। न च तेजसो नैमित्तिकद्रवत्वमिति चेत्। न। द्रवद्रव्यत्वस्यैव रूपपरावृत्तिप्रतिबन्धक-दर्शनेन सुवर्णस्याद्रवत्वे तस्यात्यन्ताग्निसंयोगेऽपि तदुपष्टम्भकपार्थिवविभाग-रूपपराकृत्यादिप्रतिबन्धकत्वानुपपत्तेः। सुवर्णभूतमितिप्रत्ययस्य बाधकं विना भ्रमत्वायोगाच्च।

इतरभेदव्यवस्थाहेतुर्गुणविशेषमाह - शुक्लभास्वरेति। भास्वरत्वं परप्रकाशतावच्छेदको जातिविशेषः। न च शुक्लत्वादिना साङ्कर्य्यमिति वाच्यम्, तस्य शुक्लत्वव्याप्यत्वेन साङ्कर्य्याभावात्। न च वह्न्यादेररूणादिरूपे भास्वरत्वदर्शनात्तस्य [5]तद्व्याप्यत्वमसिद्धमिति वाच्यम्, हरेऽपि शुक्लपदस्यानुपदं व्यवस्थापयिष्यमाणत्वात्।

ननु भास्वरोऽयं वह्निरिति प्रतीतिबलात्सुवर्णभिन्नतेजोभिन्न-द्रव्यचाक्षुषत्वावच्छिन्नं प्रति तेजोवृत्तिरूपविशेषत्वेन कारणत्वापेक्षया लाघवात्तेजोविशेषत्वेन हेतुत्वस्य लघुत्वाच्च भास्वरत्वं तेजोवृत्तिर्न तु रूपवृत्तीति चेत्। न। भ्राष्ट्रस्थवह्न्यादौ वह्नित्वसत्त्वेऽपि तस्य भास्वरत्वाभावे वह्नित्वादिना साङ्कर्य्यात्, तस्य तद्वृत्तिजातित्वाभावात्। विनिगमनविरहेण च तैजस इव तेजोवृत्तिरूपविशेषस्यापि निरुक्तसाक्षात्कारे हेतुत्वाच्च। तेन भास्वररूपवत्त्वं

---

1. सूत्रात्तयोः
2. आदतस्यापि
3. जलेषु प्लवमानमासीद् क्षोदवद्तत्व
4. वसु वर्णमिति
5. तद्व्याप्यत्वमसिद्धमिति वाच्यम्। हरेऽपि शुक्लपदस्थानुपदं - नास्ति - क मातृकायाम्।

तैजसो लक्षणान्तरमिति दर्शितम् ।[1]ननु च चक्षुःसुवर्णादौ भागासिद्धमिति चेत्, तत्रापि तेजस्त्वेन तदनुमानात् । कथं नोपलभ्यत इति चेत्, पार्थिवरूपेण सुवर्णादावभिभवाच्चक्षुरादावननुभवाच्च ।

ननु पार्थिवरूपस्य न तेजोरूपाभिभवकत्वानुभवविरोधेन घटादिरूपस्य तेजोरूपाभिभावकत्वादर्शनादिति चेन्न । अन्यथानुपपत्त्या उपष्टम्भकरूपस्याभिभवकत्वाङ्गीकारात् । अत एव सुवर्णरूपमभिभूतमिति न तत्प्रकाशकम् ।

यत्तु [2]सुवर्णरूपाभिभूतमेवेति केचित् । तन्न । सुवर्णस्याचाक्षुषतापत्तेः । न चेष्टापत्तिः, सुवर्णं पश्यामीत्यनुभवापलापापत्तेः । सुवर्णपदञ्च सुवर्णरूपकथनार्थं शुक्लमेव तेजसो रूपमिति दर्शनार्थं न तु लक्षणप्रविष्टम् । भास्वरपदप्रवेशयोः वैय्यर्थ्यातिव्याप्तिप्रसङ्गात् ।

नन्विदमसिद्धम्, वह्न्यादावरूणादिरूपस्याप्युपलम्भात् । न च दह्यमानेन्धनाद्यलोहितरूपादिनाभिभवात्तथाप्रतीतिः, तदनभिभवे च चन्द्रकिरणादिषु शुक्लत्वं न च [3]तेषामविन्धनतया तत्र तोयरूपेणाभिभवात्तथाप्रतीतिरिति वाच्यम्, तोयरूपस्यानभिभावकत्वात् । वह्न्यादेरभिभूतरूपवत्त्वे सुवर्णादिवत् परप्रकाशकतानुपपत्तेरिति चेत् । न वह्न्यादौ दह्यमानेन यज्ञादिनिष्ठारूपादिरूपेण वह्निनिष्ठशुक्लत्वाभिभवादारूण्यादिप्रतीतिः । न च तत्र स्वरूपस्याभिभवोऽप्रकाशकतापत्तेः । तदुक्तमस्मत्पितृचरणैः-

"रूपत्वव्याप्यशुक्लत्वाभिभवोऽग्नौ प्रकाशके ।
[4]पच्यमानस्य काष्ठादेः रूपसन्निधिकारित ॥" इति

व्यवस्थापकगुणान्तरमाह - उष्ण एवेति । उष्णत्वं स्वेदादिजनकतावच्छेदको जातिविशेषः, स्पर्शत्वव्याप्यः । नन्विदं चामीकरादौ भागाऽसिद्धम् । [5]लक्षणस्य तेजोव्याप्तेरिति चेत्, न तेजस्त्वेन तत्रापि तदनुमानात् । तेजस्त्वं तत्र कथमिति चेत्, भास्वररूपेण तत्रापि तदनुमानात् । तथाहि चन्द्रचामीकरादितैजसं

1. न
2. सुवर्णरूपमतिनुपपन्नमिति । ननु - क मातृकायाम्
3. तेषामपि विद्दतया - क मातृकायाम्
4. दह्यमानस्य
5. लवणस्य तेष्वव्याप्तेरिति - क मातृकायाम्

भास्वररूपवत्त्वा[1]त्स्वमतवदिति। न चोद्भूतस्पर्शवत्त्वमुपाधिः। स्पर्शवत्त्वमात्रस्य प्रयोजकत्वे इतरस्य व्यर्थत्वाभावान्मात्रस्य साधनाव्यापकत्वात्। कथं तर्हि चन्द्रचामीकरादिषु नोष्णस्पर्शोपलम्भ इति चेत्, चन्द्रादिष्वभिभवात्। कथमभिभव इति चेत्, मण्डलावस्थितोपलम्भकजलशीतेन तदुष्णत्वस्य परम्परासम्बन्धेनाभिभवात्, बलवत्सजातीयसम्बन्धस्यैवाभिभवात्।

यत्त्वनुभवात्तस्याग्रहणमिति चेन्न, तथात्वे तेषामस्पार्शनतापत्तेः। लौकिकद्रव्यचाक्षुषत्वावच्छिन्नं प्रत्युद्भूतस्पर्शवत्त्वस्य प्रयोजकत्वात् न तेषामस्पार्शनत्वम्। चन्द्रमहं स्पृशामि 'सुवर्णं स्पृशामी' त्यबाधितानुभवात्। न भ्रमौ बाधकाभावात्, [2]अन्धकारेऽपि त्वचा सुवर्णादिप्रत्यक्षाच्च चक्षुश्चानुभूतोष्णस्पर्शवत्। न च तेजस्त्वमुद्भूतस्पर्शवन्मात्रवृत्तिनियमः। उद्भूतत्वं साक्षात्कारत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदको जातिविशेषस्तदभाव [3]अनुद्भूतत्वम्। यद्वा अनुद्भूतत्वं साक्षात्कारप्रतिबन्धकतावच्छेदको जातिविशेषः, तदभावः[4]न चोद्भूतत्वस्य जातित्वे रूपत्वादिना संकरः। तत्तद्व्याप्यतया उद्भूतत्वस्य नानाङ्गीकारात् गुणत्वव्याप्यव्याप्यजातिमत्त्वम्। अतो न नाननुगम इति वाच्यम्, तैजस्त्वं नोद्भूतस्पर्शवन्मात्रवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातित्वात्पृथिवीत्ववदित्यनेन तादृशनियमबाधात्। तथाहि तेजो नानाविधं भवति। किञ्चिदुद्भूतरूपवत्, यथा सूर्य्यादि। किञ्चिदुद्भूताभिभूतरूपवत्, यथा दीपादि। किञ्चिदुद्भूताभिभूतस्पर्शवत्। किञ्चिदनुद्भूतरूपवत्, यथा चक्षुरादि। तथा किञ्चिदुद्भूतस्पर्शवत् यथा सूर्य्यादि। किञ्चिदुद्भूताभिभूतस्पर्शवत्, यथा चन्द्रादि। किञ्चिदुद्भूतस्पर्शवत्, यथा प्रभाचक्षुरादि। किञ्चिदुद्भूतरूपानुभूतस्पर्शवत् यथा प्रभादि। किञ्चिदुद्भूतस्पर्शानुभूतरूपवत्, यथा ग्रीष्मोष्णादि। किञ्चिदनुद्भूतोभयम्, यथा सूर्य्यादि। किञ्चिदनुद्भूतोभयम्, यथा चक्षुराहित्याद्यूहनीयम्। तत्रानुद्भूतरूपस्यापि तेजसः उद्भूतरूपतेजोजनकत्वम्, तप्ततैलादौ प्रविष्टतेजसो जलादिसंयोगादिना तथादर्शनात्,

1. सम्मतवदिति
2. अर्थकारोऽपि - क मातृकायाम्
3. अनुभूतत्वं
4. न चोदभुतत्वस्य नानाङ्गीकारात् - नास्ति क मातृकायाम्।

जलीयपार्थिवयोस्तूद्भूतरूपस्पर्शयोः सामानाधिकरण्यनियमः धूमेऽप्युद्भूत-स्पर्शसत्त्वात् । अन्यथा गोलकावच्छिन्नत्वचा तदग्रहापत्तेरिति संक्षेपः ।

ननु प्रलये तेजोमात्रनिवृत्तेरागमसिद्धत्वेन पुनः सृष्टिर्न स्यादिति आह- तत्तदीति । तथा चागमे तेजः पदं जन्यतेजः परमित्यर्थः । तदपि तेजोऽस्त्विति । तथा चाणुलक्षणस्य तेजसः प्रलये नाशाभावात्पुनः सृष्टिर्नानुपपन्नेत्यर्थः ।

कथं मतस्य पारार्थ्यमित्यपेक्षायां कार्यादेरिति दर्शयितुं कार्यमाह- कार्यमिति । शरीरादिर्यस्य त्रयस्य शरीरेन्द्रियविषयरूपमित्यर्थः । ननु तैजसः शरीरारम्भत्वमसिद्धम्, तैजस्त्वं शरीरवृत्तिस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्य-जातित्वात् पृथिवीवदित्यतस्तत्सिद्धेः ।

ननु पार्थिवाभ्यां शुक्रशोणिताभ्यां कथं तेजसः शरीरारम्भ इत्यत आह -

(मू) शरीरमयोनिजमादित्यलोके, पार्थिवावयवोपलम्भात् चोपभोगसमर्थम् । इन्द्रियं सर्वप्राणिनां रूपव्यञ्जकमन्यावयवा (नाम) नभिभूतैस्तेजोऽवयवैरारब्धं चक्षुः । विषयसंज्ञकञ्चतुर्विधम्, भौमं दिव्यमुदर्य्यमाकरजञ्च । तत्र भौमं काष्टेन्धनप्रभवमूर्ध्वज्वलनस्वभावं पचनदहनस्वेदनादिसमर्थञ्च दिव्यमबिन्धनं सौरविद्युदादि । भुक्तस्याहारस्य रसादिभावेन परिणामसमर्थमुदर्य्यम् । आकरजं सुवर्णादि । तत्र संयुक्तसमवायाद् रसाद्युपलब्धिरिति ।

अतोऽयोनिजमेवेति ।शुक्रशेणितानपेक्षमित्यर्थः । कथं तर्हि नोपलभ्यत इत्यत आह- आदित्यालोक इति । तथा च व्यवधानान्नोपलभ्यत इत्यर्थः । ननु अनभिभूतो भूतोष्णस्पर्शवता क्लेदेनादिसम्बन्धेन तेन कथमुपभोग इत्यत आह- पार्थिवेति । तथा च तदीयस्पर्शः पार्थिवस्पर्शेन सुवर्णवदभिभूत इति भावः ।

शरीरमुक्तेन्द्रियमाह - इन्द्रियमिति । शरीरभेदेऽपि चक्षुषो वैजात्यनिरा-करणार्थं सर्वप्राणिनामिति ।तेन पार्थिवादिशरीरेऽपि चक्षुस्तैजसत्वमिति भावः ।

अतीन्द्रियं तस्मिन् किं प्रमाणमित्यत आह- रूपव्यञ्जकमिति । रूपसाक्षात्कारो व्यापारवदसाधारणकारणजन्यः साक्षात्कारत्वाद् गन्ध-

साक्षात्कारवदिति चक्षुःस्वरूपसिद्धौ तत्तैजसं रूपसाक्षात्कारककरणत्वादालोकवदिति तस्य तैजसत्वसिद्धिः । तत्र गोलकस्थमेव चक्षुर्मनसंयोगानन्तरं स्वक्रियया निःसरद्गोलकमपरित्यजदेव विषयेण संयुज्यते विषयसंयोगदशायाञ्च तेजसो विसरणशीलतया तस्य यावद्विषयव्यापित्वं कल्प्यते । अत एव चक्षुषः शास्त्रेषु पृथकृत्वाव्यवहारः । अन्यथा तेन स्वाधिकपरिमाणाग्रहानुपपत्तेः ।

यत्तु वचः- पृथकृत्वाभावेऽपि स्वाधिकपरिमाणद्रव्यग्रहोपपन्नस्तद्वच्चक्षुषोऽपि पृथकृत्वाभावेऽपि स्वाधिकपरिमाणद्रव्यग्र[1]होपपत्तेर्न तथाकल्पनमिति तन्न, भूयोऽवयवावच्छेदेन चक्षुःसंयोगस्य चाक्षुषविशेषताहेतोः पृथकृत्वं विनानुपपत्तेः । चाक्षुषे च साक्षात्कारे चक्षुगोलकसंयोगोऽपि कारणमन्यथा [2]प्रच्छन्नार्थस्यापि चाक्षुषसाक्षात्कारापत्तेः । [3]उन्मील्यनिमीलितनयनस्य चक्षुर्विषयसंयोगाभावादेव न चाक्षुषम् । चाक्षुषे च विषयसंयोगवद् विषयोऽपि हेतुः । न चातीतानागतादिस्थले इन्द्रियसम्बन्धाभावात्तदनुपपत्तौ न विषयस्तत्र कारणमिति वाच्यम्, रूपादिनाशानन्तरं तत्समवायस्य सत्त्वेन चक्षुःसंयुक्तासमवायस्य विद्यमानत्वेन रूपचाक्षुषापत्तेः । दुर्वारत्वेन तत्र विषयहेतुतायाः आवश्यकत्वात् । एवञ्च चक्षुःसम्बन्धार्थविषयकसाक्षात्कारजनकं [4]स्पर्शवदिन्द्रयवत् त्वक्त्वात् । घटो वा स्वसम्बन्धेन्द्रियजन्यसाक्षात्कारविषयः प्रत्यक्षद्रव्यत्वात् आत्मवदित्यादितः [5]चाक्षुषप्राप्यकारित्वसिद्धिः ।

ननु चक्षुषः प्राप्तकारित्वे स्फटिकाद्यन्तरितार्थानुपलब्धिप्रसङ्गः । किञ्च चाक्षुषः सम्बन्धार्थग्राहित्वे शाखाचन्द्रमसोर्युगपत्साक्षात्कारानुपपत्तिः । यदि चक्षुः सम्बन्धार्थग्राहकं स्यात् । युगपच्छाखाचन्द्रमसोः ग्राहकं न स्यात्, तस्माच्चक्षुर्न सम्बन्धार्थग्राहकमधिष्टानसम्बन्धार्थग्राहकत्वात् । नन्वत्र [6]चक्षुः स्वरूपसिद्धस्तस्य धर्मग्राहकप्रमाणबलेन प्राप्यकारित्वसिद्धो बाधः गोलकस्य पक्षत्वे सिद्धसाधनमिति चेन्न । रूपग्राहकेन्द्रियत्वेन पक्षीकरणादिति चेत् । न

1. ग्रहोपपत्तेः - नास्ति क मातृकायाम्
2. प्रसन्नार्थ - क मातृकायाम्
3. उन्मील्य
4. रूपवदिन्द्रियवत् त्वगृवत्- क मातृकायाम्
5. चक्षुषः प्राप्यकारित्वसिद्धिः - क मातृकायाम्
6. चक्षुस्वरूपौ तस्य

चक्षुषोऽसम्बन्धार्थग्राहकत्वे कुड्यादिव्यवहितस्यापि ग्रहापत्तेः । न च कुण्ड्यादेः [1]प्रतिबन्धनत्वात्तदनुपपत्तिरिति वाच्यम्, अनन्तानां कुड्यादीनां प्रतिबन्धकत्व-कल्पनापेक्षया विषयसम्बन्धकल्पनायां लघुत्वात् ।

किञ्च पटलादिदूषितनयनस्यापि चाक्षुषापत्तेश्च । न च व्यवहितस्या-योग्यत्वादेव न ग्रहणमिति वाच्यम्, प्रत्यभिज्ञाबलेन घटस्य स्थैर्य्यसिद्धावेक-स्यायोग्यत्वरूपानुपपत्तेः । स्फटिकाद्यन्तरितोपलब्धिस्तु स्फटिकादेः स्वच्छतया तेजोगत्यप्रतिबन्धकतया च तदन्तरितेऽपि चक्षुःसम्बन्धसम्भवादुपपद्यते । शाखाचन्द्रमसोरेकदा ग्रहणमसिद्धम् । यौगपद्यभ्रमस्तु सूक्ष्मकालभेदेनाकलनात् ।

ननु शाखाचन्द्रमसोर्बहुव्यवधानाच्छाखाग्रहणसमनन्तरमेव चन्द्रम-सोग्रहणमिति चेत् । न । तेजसो लाघवातिशयेन तदुपपत्तेः । लाघवत्वं विलक्षणवेगवत्त्वम्, [2]न तु सजातीयसम्बलनं वाह्यालोकस्य तत्सहकारि-त्वाभावात् । अनुमानं चाप्रयोजकं प्रदीपादौ व्यभिचारात्, दृष्टान्तासिद्धेश्च । तस्मात्साक्षात्परम्परया वा स्वसम्बन्धार्थग्राहकमेव चक्षुः । [3]शालिकोपाध्यायस्तु प्रसरदेव गोलकाच्चक्षुवाह्यालोकसम्बलनं सतः युगपदेव शाखाचन्द्रमसो गृह्णातीति । तन्न । बाह्यालोकसम्बलनस्य ग्राहकत्वे पृष्टदेशव्यवहितस्यापि ग्रहणापत्तेः । न चार्जिवेन चक्षुषो निसरणात् पृष्टदेशे तस्याभावान्न ग्रहणमिति वाच्यम्, आर्जिवेनापि निःसरत पृष्टदेशबाह्यालोकसम्बलनेन पृष्टदेशगम-नसम्भवादिति ।

ननु तेजसः परप्रकाशकत्वसामान्ये उष्णादीनामपि तथात्वापत्तिरित्याहुः- [4]**अन्येति** । उष्णादीनामन्याभिभूतावयवारब्धत्वान्न तथात्वमिति भावः । चक्षुरिति । चाक्षुष्यञ्च चक्षुत्वावच्छिन्नकार्यतानिरुपितकारणतावच्छेदको जातिविशेषः ।

इन्द्रियमुक्त्वा विषयमाह - विषयसंज्ञकमिति । त्रिविधानस्य तत्तथा दर्शयति-**भौममित्यादिना** । उदरे भवमुदर्य्यं शरीरावयवाद् यदिति । यत् आकरजमिति खनिराकारस्तत्र जातमिति । तत्र भौमादिनां मध्ये । ननु तैजसं कथं

1. प्रतिबन्धक 2. ननु 3. शालिकोपाध्ययस्तु 4. अन्येति

भौमत्वमत आह-काष्ठेति । काष्टत्वं दाहजन्यभस्मप्रकृतित्वम्, तेनोद्भिदादिकिरणानां सर्वेषां परिग्रहः। इन्धनपदं किरणमात्रं घृततैलादिपरम्। [1]आदिपदात्तत्संयोगादिपरिग्रहः। वस्तुतस्तु अत्रादिपदमभिघातपरम्। तेन लौहाद्यभिघातादिना लौहादौ जायमाने वह्निर्भौम एव। अन्यथा तस्य पञ्चमत्वापत्तेः।

केचित्तु आदिशब्दस्य व्यत्यासेन काष्टादीन्धनप्रभवमित्यर्थमाहुः। तदसत्। व्यत्ययो बहुलमित्यस्य छन्दोविषयत्वेनात्र व्यत्यये मानाभावात्। तेन काष्टेन्धनप्रभवत्वं भौमत्वम्, पार्थिवेन्धनत्वावच्छिन्नकारणतानिरूपितावच्छेदककार्यतावच्छेदको जातिविशेषः, उपाधिरूपत्वेऽपि अन्यथाऽनुपपत्त्या तस्य कारणतावच्छेदकत्वात्।

तस्याभिव्यञ्जकधर्ममाह- [2]उर्ध्वेति। जातिनियमो धर्मः स्वभाव इत्युच्यते। तेनोर्ध्वज्वलनं तादृशजातेरभिव्यञ्जकं गोत्वस्य सास्नादिवत्। वस्तुतस्तु भौमत्वं न जातिः अनुगतकारणाभावेन कार्यतावच्छेदकत्वाभावात्। नाप्यूर्ध्वज्वलनं तदभिव्यञ्जकं भ्राष्ट्रोष्णादौ तदभावात्। उर्ध्वदिगवच्छिन्नस्वावयवसंयोगजनकक्रियावत्त्वं रूपस्योर्ध्वज्वलनत्वस्य जातिनियतत्वे मानाभावाच्च भा[3]ण्डाद्यावृतदीपादौ तदभावाच्च तस्मात्तृणादिजन्यतावच्छेदकजातीः प्रातिस्विकरुपेणोपादाय तज्जातिसत्त्वं भौमत्वम्, तस्य विलक्षणावयवसंस्थानरुपविशेषादिश्चाभिव्यञ्जकः।

एतस्य पारार्थ्यमाह - पचनेति। पचनं रूपपरावृत्तिविक्लितिश्च। स्वेदो वातः श्लेष्णोरपगमः। वपुषो द्रविभाव इत्यपि केचित्। आदिपदाच्छितादिदुःखनाशकत्वं तापादिना दुःखजनकत्वमित्यादि द्रष्टव्यम्।

दिवि भव्यम् - दिव्यम्। आप एव इन्धनं यस्येति इन्धनत्वम्, चात्र तन्नाशहेतुकनाशप्रतियोगित्वम्वा। तज्जनकत्वे सति तन्नाशकत्वम्वा। तेन पवनस्य तेजोमात्रहेतुत्वे [4]इन्धनत्वाभावान्नेवकारासङ्गतिः। न च प्रदीपेऽतिव्याप्तिः,

---

1. आपादादि   2. तदूर्वेति   3. भाण्डाद्या --- नास्ति
3. पार्थिवत्वाभावान्नेवकार - क मातृकायाम्

तैलोपष्टम्भकजलभागस्य तत्र हेतुत्वे मानाभावात् । सुरस्य सूर्य्यस्येदमिति सौरम् । विद्युत् प्रसिद्धा । आदिपदान्तवादिपरिग्रहः, इदन्तु तिर्यग्गमनस्वभावकत्वम् । एतेषां रूपपरावृत्तिविक्लित्तिरूपपाकजनकत्वेऽपि [1]भस्मीभावजनकत्वं नास्ति, वज्रोल्कादिपातेऽपि भस्माभावाभावात् । न च वृक्षादुपरि निपतितवज्रादिना वृक्षदाहे तादृशवह्नौ भ्रमत्वादिव्यत्ययोः साङ्कर्य्यम् । न च दिव्यत्वं न जातिस्तथापि जलकार्यतावच्छेदकतया जातित्वादिति वाच्यम्, तत्र वृक्षादेरिन्धनत्वाभावात्, इन्धनहेतुभस्माभावापत्तेः । केचित्तु "वृक्षादौ दिव्यतेजोऽभिघातभौम तेजो जायते । तच्च जायमानं दिव्यं नाशयति । सम्भवादिति कल्प्यत" आहुः-

[2]उदर्य्यस्य पारार्थ्यं दर्शयन्नेव तस्य लक्षणमाह - भुक्तस्येति । भुक्तस्योदरे निक्षिप्तस्याहारस्योदनादेः [3]आह्रियत, उपादीयत इति व्युंत्पत्त्या [4]आत्परस्य तात्परत्वात् । रसादीत्यादिपरिग्रहान्मलधातुपरिग्रहः । रसत्वादिकं वैदिक-परिभाषया ग्राह्यम् । भेदेनेति तृतीयार्थोऽभेदः । तेनोदरप्रविष्टस्योदनादेः रसादिरुपपरिणामनिमित्तं तेजः उदर्य्यमित्यर्थः । रसादिपरिणामकारणता-वच्छेदकतयोदर्य्यत्वमपि जातिरित्यर्थः । पाकजविशेषजनकत्वे सति तेजस्त्वमिन्धनविशेषाजन्यत्वे सति तेजस्त्वं वा ।

आकारजत्वमिति लक्षणं स्पष्टतयोपेक्ष्य तस्य स्वरूपमाह - आकरजं **सुवर्णादीति** । ननु सुवर्णादेस्तेजस्त्वेपीतत्वादिप्रत्ययो न स्यात्, तत्र शुक्लरूपत्वनियमादेव गुरुत्वरसादिप्रत्ययोऽपि न स्यात्तेषां तेजोवृत्तित्वा-भावादित्यत आह- तत्रेति । [5]तत्र सुवर्णादौ । तथा च तदुपष्टम्भकपार्थिव-भागनिष्टरूपरसादेः परम्परासम्बन्धेन तत्र प्रत्ययः । अत्र सुवर्णस्य तेजस्त्वे बहवो विप्रतिपद्यन्ते । तथा विप्रतिपत्तयः । [6]उद्भूतरूपवत् तेजोविशेषसंयोगाऽसम-वायिकारणकत्वं द्रवत्ववत्त्वं पृथिवीत्वव्याप्यम् । न वा तेजस्त्वं तादृशद्रवत्वसमानाधिकरणम्, न वा निरुक्तं द्रवत्वं पृथिवीमात्रसमानाधिकरणम् ।

---

1. भस्मभाव
2. तदर्थस्य
3. आद्रियते
4. तत्परस्य
5. ततः
6. उद्भूतर्स्पावत् ।

न वा तेजस्त्वं परिप्रकाश्यवृत्तिः न वेत्यादय इति । [1]तत्र सुवर्णं पार्थिवमस्निग्धत्वे सति गुरुत्वाश्रयात् । जले व्यभिचारवारणाय सत्यन्तम् । तदस्य न कथमिति चेत्, तत्कार्यसंग्रहाभावात् । न ह्यत्र [2]द्रवीभूतेन काञ्चनेन किञ्चित्संग्रहीतुं शक्यते । गुरुत्वञ्च [3]तोलनावनतेत्यादिनानुमेयम् । अन्यथा मातृकादिपरिमाणानुपपत्तेः । किञ्च पाकविशेषे रक्तसाम्यता दृश्यते । तत्र सुवर्णस्य नोपष्टम्भकस्य तद्वशेनाधिकमूहत्वादिव्यवहारात् । तेन पाकजरुपस्पर्शवत्त्वेनापि तथात्वमेवं पीतत्वपीततमत्वादिरूपावान्तरजातिमद्रूपवत्त्वादपि ।

ननु अत्रोपष्टम्भकभागस्य पक्षत्वे सिद्धसाधनं तदतिरिक्तसिद्ध्य-सिद्धिभ्यामाश्रयाऽसिद्धिबाधकप्रसङ्गः इति चेत् । न । कथनजन्यद्रवत्वा-धिकरणस्यैव पक्षतावच्छेदकत्वात् । तादृशत्वं भवन्मतेऽ[4]तिरिक्तस्य तेजसो । मम तु पार्थिवस्येति न [5]कश्चिद्विशेषः । ननु गुरुत्वादिकं तत्राऽसिद्धं संयुक्तसमवायेनतत्रप्रतीतिरिति चेत्, साक्षात्सम्बन्धेन बाध एव परम्परासम्बन्धकल्पनात् । किञ्च नैमित्तिकद्रवत्वं पृथिवीत्वस्यैव व्याप्यं घृतादिष्वेपोपलब्धेः, तेजोऽन्तरेऽप्रतीतेश्च । न च तादृशद्रवत्वस्य पार्थिवत्वेऽग्निसंयोगना[6]श्यत्वापत्तिः पार्थिवद्रवत्वस्याग्निसंयोगनाश्यत्वे मानाभावात्, भवन्मते उपष्टम्भकपार्थिवभागद्रवत्वे व्यभिचाराच्च । न च सुवर्णदशायां तदघृतमेवेति वाच्यम्, पीतं घृतमितिप्रत्ययात् सुवर्णस्या-पीतत्वाभावात् । न च शतशः पच्यमानस्यापि उपष्टम्भकभागस्य पार्थिवस्यात्यन्ताग्निसंयोगेऽपि स्वपरावृत्यदर्शनात्तत्र पाकजरुपप्रतिबन्धकं द्रवत्वादिकरणं किञ्चिदतिरिक्तं द्रव्यमभ्युपेयम्, द्रवद्रव्यस्य रूपपरावृत्ति-प्रतिबन्धकत्वदर्शनात् । तच्च न जलं स्नेहानाश्रयादिति उपष्टम्भकातिरिक्त-नैमित्तिकद्रवत्वाधिकरण[7]द्रव्यसिद्धौ गुरुत्वासमानाधिकरणरूपवत्त्वेन तस्य

1. तत्र - नास्ति क मातृकायाम्
2. द्रवभूतेन
3. नास्ति
4. अतिभक्ततेजसः,
5. कश्चिदविशेषः - क मातृकायाम्
6. नाश्यतापत्तिः
7. करणरूपवत्त्वेन तस्य तैजसत्त्वसिद्धिरिति

तेजस्त्वसिद्धिरिति वाच्यम् । घृतसुवर्णान्तः क्षिप्तानां पार्थिवान्तराणां पाकदशायां रूपान्तरपरावृत्तिदर्शनेन तस्य पाकजरुपप्रतिबन्धकत्वाभावात् कथं तर्हि तस्य पाकजरुपानापत्तिरिति चेत्, तादात्म्येन सम्बन्धेन तस्य प्रतिबन्धकत्वकल्पनादिति गृहाण । अन्यथा सुवर्णस्योपष्टम्भकमात्ररूपप्रतिबन्धकत्वं नान्यस्येति स्वभावकल्पनापत्तिः । न 'चाग्नेरपत्यं प्रथमं हिरण्यं', 'हेमवीजं विभावसो' रित्याद्यागमबलात्तेजसमिति वाच्यम्, तस्य स्तुतिपरत्वेन स्वार्थपरत्वाभावात् । किञ्चास्य तेजस्त्वे शुक्लभास्वररूपवत्त्वापत्तिः । न [1]चाभिभवत्वात्तदनुपलम्भ इति वाच्यम् बलवत्सजातीयग्रहणप्रयुक्ताग्रहणस्याभिभवाद् रात्रौ तदभावेन तद्ग्रहणप्रसङ्गात् । न च बलवत्सजातीयसम्बन्ध एवाभिभवो लाघवात्तेन रात्रावपि तदभिभूतमेवेति वाच्यम्, उपष्टम्भकरूपस्य भवदभिमतसुवर्णेऽभावात् । न च परम्परासम्बन्ध एवाभिभूत इति वाच्यम्, [2]महारजनसंयुक्तद्रव्यान्तररूपस्यापि महारजनरूपेणाभिभवापत्तेः । किञ्चाग्निसंयोगेन सुवर्णे द्रवत्वं नाशयित्वा द्रवत्वान्तरमुत्पाद्यते । अत एव घृततमादिप्रत्ययाः सम्यगुत्पद्यन्ते द्रवत्वस्यानुच्छेदे तथा प्रतीत्यनुपपत्तेः । [3]अनुच्छिद्यमानद्रवत्वव्यवहारस्तु पूर्वद्रवत्वध्वंसस्य द्रवत्वान्तरोत्पत्तिर्नित्यत्वे मात्रनिबन्धनः । अत एव तेजस्त्वसाधनेऽनुच्छिद्यमानाऽनित्यद्रवत्वाश्रयत्वादिति हेतुरसिद्ध इति मन्तव्यम् । द्रवत्वेऽनुच्छिद्यमानत्वस्य ध्वंसाप्रतियोगित्वासिद्धेः । द्रवत्वान्तरोत्पत्ति-समानकालीनध्वंसप्रतियोगिद्रवत्ववत्त्वं न तैजसत्वनियममिति पार्थिवमेव सुवर्णमिति । तैजसो [4]विषयश्चतुर्विधानुपपत्तिरिति चेत् । उच्यते । तेजस्त्वं परप्रकाश्यवृत्तिरू[5]पवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातित्वात्पृथिवीवत् । तेजस्त्वं द्रवत्वसमानाधिकरणं रूपवद्वृत्तिद्रवत्वसाक्षाद्व्याप्य[6]जातित्वात् [7]पृथिवी-त्ववत् । तेजस्त्वं द्रवसमानाधिकरणं रूपवद्वृत्तिद्रव्यत्वाव्याप्यजातित्त्वाद्

1. अभिभवाद्रात्तौ - नास्ति क मातृकायाम्
2. महारजनरक्तधृसंयुक्तद्रव्यान्तररूपस्य ।
3. अनुच्छेदमानद्रव क मातृकायाम् ।
4. विषयतातूर्ध्वनुपपत्तिरिति चेत् ।
5. द्रव्यत्व - क मातृकायाम
6. इन्द्रियत्वाधिकरणतेजः सिद्धिः
7. पृथिवीवत् --- तेजः सिद्धि - नास्ति

जलत्ववदिति द्रव्यत्वाधिकरणतेज:सिद्धि: । न चाप्रयोजकत्वं बाधकाभावात् न चान्त्ये रसवद्वृत्तित्वमुपाधि: । अप्रयोजकत्वेन साध्यव्याप्यकत्वाभावात् । एवं सामान्यतो घृततेजोऽन्तरस्य तथात्वाभावात्, सुवर्णादिकमेव तथा सिध्यति। उक्तश्चाम्नायाऽनुकूलतर्कोऽनुसन्धेय: ।

यत्तु अत्यन्ताग्निसंयुक्त: पीतोपष्टम्भकभाग: पाकजविजातीयरूपोत्पत्तिप्रतिबन्धकद्रवद्रव्यसंयुक्तोऽत्यन्तानलसंयोगोऽपि पूर्वरूपविजातीयरूपानाधारपार्थिववत्त्वाज्जलमध्यस्थितवराटिकावदिति सिद्धस्य पार्थिवातिरिक्तद्रवत्वाधिकरणस्य रूपवत: [1]स्नेहाभावेन तेजस्त्वसिद्धि: । तस्य नियमेनोपष्टम्भकमात्ररूपप्रतिबन्धकत्वमिति नातिप्रसङ्ग इति । तन्न। [2]भस्मादावग्निसंयोगे पूर्वविजातीयरूपादर्शनेन व्यभिचारात् । पीलुपाकनये पार्थिवावयविनि व्यभिचारात् । न चात्यन्ताग्निसंयोगेनावयविनो नाशान्न तत्र व्यभिचार इति वाच्यम्, तथासति हेतोरपक्षवृत्तितापत्ते: ।

न च तदारम्भक: परमाणुरेव पक्ष: । तस्य नियमेनोपस्थित्यभावात् । किञ्च दृष्टान्ते जलस्य पाकजरूपमात्रप्रतिबन्धकत्वदर्शनेन प्रकृते घृततेजसो: रूपमात्रप्रतिबन्धकत्वमेव स्यात्, न विजातीयरूपमात्रप्रतिबन्धकत्वम् । न च तस्यैव साध्यम्, पाकेन पीततरपीततमाद्युत्पत्तिदर्शने बाधापत्ते: । किं पीततरादीनामपि पूर्वपीडावृत्तिपीततरत्वादिजातिमत्त्वेन तदवृत्तिजातिमत् वैजातीयसत्त्वेन बाधात् । न च स्ववृत्तिरूपत्वसाक्षाद्व्याप्यजातिशून्यत्वं विजातीयत्वम्, तथापि बाध: पाकेन रक्तसत्तादेरपि दर्शनात् । तत्र तत्प्रतिबन्धकत्वासिद्धि: । तदुक्तं दाहे यस्य च रक्तिमा इति । यद्यपि [3]विवादपदं तैजसमग्निसंयोगविशेषनाश्यतावच्छेदकद्रवत्वव्याप्यजातिशून्यद्रवत्वाधिकरणत्वात् यन्नैवं तन्नैवम्, यथा घृतादीति व्यतिरेकिणा तत्तेज:सिद्धि: । न च घृते उपष्टम्भकभागे व्यभिचारस्तदीयद्रवत्वस्याप्यग्निसंयोगे नाशादिति वाच्यम्, तस्य द्रवत्वाभावात् । पार्थिवद्रवत्वावच्छिन्नं प्रति अग्निसंयोगस्य [4]नाशकत्वकल्पनेन तस्यावश्यं

1. स्वेदाभावेन
2. तस्मादेवा ---
3. विपदपतं
4. नाशकत्वकल्पने न - क मातृकायाम्

नाशापत्तेर्दुर्वारकत्वात् पीतं घृतमिति प्रत्ययस्तु प्रशिथिलावयवसंयोगनिमित्तो भ्रम इति। तदपि न विचारसह्यम्। विवादपदे तादृशजातिशून्यद्रवत्वासिद्धेः संयोगाऽसमवायिकारणकद्रवत्वमात्रं प्रति अग्निसंयोगस्य नाशकत्वकल्पनात्, न तु पार्थिवद्रवत्वमात्रेऽननुगमात्। किञ्च द्रवत्ववति ? [1]द्रवत्वान्तरानुपपत्त्या समानाधिकरणद्रवत्वान्तरं प्रति द्रवत्वस्य प्रतिबन्धकत्वमवश्यमास्थेयम्।

तथा च पूर्वद्रवत्वनाशे तद्घृततरत्वादेरनुत्पत्त्यापत्तिरिति पूर्वद्रवत्वनाशोऽभ्युपेयः। तथा च हेतोरसिद्धिः। न च घृततरत्वादिप्रत्ययोऽसिद्धः [2]अनुभवापलापापत्तेः। पूर्वद्रवत्वनाशकाले च द्रव्यत्वान्तरोत्पत्त्याऽनुच्छेदभ्रमः। किञ्चात्यन्ताग्निसंयोगे तेजोऽवश्यं नाशाभ्युपगमः। पीलुपाकनये तादृशाग्निसंयोगस्यारम्भकसंयोगप्र[3]तिद्वन्द्विविभागजनकत्वनियमात्। तथा च तन्नाशकाग्निसंयोगविच्छेदावच्छे[4]दार्थमध्ये पाकदशायां [5]जलं प्रक्षिपन्ति। कलादेरुन्मकारके कलादाः। तथा चाश्रयनाशे तदाश्रितद्रवत्वस्यानाशे इति महती प्रत्याशा। किञ्च जलीयद्रवत्वं चाग्निसंयोगनाश्यम्, किन्त्वग्निसंयोगादाश्रयनाशे तन्नाश इति तेनोक्तहेतोः व्यभिचारः।

यत्तु [6]उक्तानुमाने जलमध्यस्थितघृतादौ व्यभिचारवारणाय सति विरोधद्रवद्रव्य इति तदपि न किञ्चित्। घृतादिद्रवत्वेऽत्यन्ताभावेन व्यभिचाराभावात्। यद्यप्युपष्टम्भकस्य द्रवत्वाभावव्युत्पादनं तदपि न रमणीयम्, तस्य द्रवत्वे घृतसुवर्णेन तदीयद्रवत्वनाशप्रतिबन्धकोपपत्तेः। तस्मादुक्तानुमानेनैव सुवर्णस्य तेजस्त्वसिद्धिः।

एतेन [7]पारदारिकं सुवर्णवत्तेज एव। न च सांसिद्धिकद्रवत्ववत्त्वाज्जलमिति वाच्यम्, स्नेहाभावेन जलत्वासिद्धौ तस्य संयुक्तसमवायेन सिद्धेः। [8]अत्राकरजमात्ररूपस्पर्शयोरभिभवो न त्वनुभवः। तत्रापि रूपत्वव्याप्यभास्वरत्वस्य स्पर्शत्वव्याप्योष्णस्पर्शत्वस्याभिभवो न सामान्यस्य न

1. द्रवत्वानुपपत्त्या - क मातृकायाम्
2. चानुभवापलापापत्तेः,
3. प्रतिद्वन्दिं
4. अर्थं मध्ये - क मातृकायाम्
5. जप्रक्षिपन्नकलादाः।
6. भूतानुमाने
7. पारमार्थिकं
8. अकरजमात्ते

चाक्षुषत्वास्पार्शनत्वापत्तेरित्युक्तमधस्तात्। अभिभवस्तु बलवत्सजातीय-सम्बन्धविशेष:, तेन रात्रावप्यभिभव एव। विशेषोपादानादुक्तातिप्रसङ्गनिरास:। एवं तेजश्चाक्षुषे नालोकसंयोगो हेतुरिति मते सुवर्णादिभिन्नते[1]जोभिन्नद्रव्य-चाक्षुषद्रव्यचाक्षुषत्वमालोकसंयोगत्वावच्छिन्नकारणतानिरूपितकार्यताया-मवच्छेदकत्वमिति द्रष्टव्यम्। [2]विस्तरस्त्वाकारेऽनुसन्धेय:। तस्मात्सुष्ठूक्तं विषयसंज्ञकं चतुर्विधमिति।

वायुनिरुपणम्

उद्देश्यक्रमप्राप्तं वायुं निरुपयति -

(मू) वायुत्वाभिसम्बन्धाद् वायुः । स्पर्शसंख्यापरिमाण-पृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारवान् । स्पर्शोऽस्या-ऽनुष्णशीतत्वे सत्यपाकजः । गुणविनिवेशात् सिद्धः । अरुपिष्वचाक्षुषवचनात्सप्त संख्यादयः । तृणकर्मवचनात्संस्कारः । स चाऽयं द्विविधोऽणुकार्यत्वात् । तत्र कार्यलक्षणश्चतुर्विधः - शरीरमिन्द्रियं विषयः प्राण इति । तत्रायोनिजमेव शरीरं मरुतां लोके पार्थिवावयवोपष्टम्भात् चोपभोगसमर्थम् । इन्द्रियं सर्वप्रणिनां स्पर्शोपलम्भकं पृथिव्याद्यनभिभूतैः वाय्ववयवैरारब्धं शरीरव्यापि त्वगिन्द्रियम् । विषयस्तूपलभ्यमानस्पर्शाधिष्टानाभूतः स्पर्शशब्द-धृतिकम्पलिङ्. गतिर्यग्गमनस्वभावो मेधादिप्रेरणधारणादिसमर्थः।

वायुत्वमिति। नन्वेव रुपेणोद्देश्ये किं नियामकमिति चेत्, महर्षेरिच्छेव। स्वतन्त्रेच्छस्य नियन्तुमशक्यत्वान्न तत्र प्रत्यनुयोग:। यत्तु गन्धवद्भिन्नत्वेन जलनिरुपणं गन्धवत्त्वाज्ज्ञानाधीनमेवं रसवद्भिन्नत्वेन तेजोनिरुपणं रसवत्त्वाज्ज्ञानाधीनमिति। एवं रसवदभिन्नत्वेन वायुनिरुपणं रुपवज्ज्ञाना-

1. तेजोभिन्नद्रव्यचाक्षुष 2. विस्तरस्वीकरेनुसन्धेय: - क मातृकायाम्

धीनमिति। तदनन्तरं वायुनिरुपणमितिक्रमेण सङ्गत्यभिधानम्। तत्र प्रथमतः पृथिव्यभिधाने सूत्रकृदिच्छैवनियामिकेति सर्वत्र [1]स एव आदातव्यम्। मनोभिन्नत्वेन पृथिव्यादिनिरुपणं मनोनिरुपणाधीनमिति पृथिव्यादेरपि मनोनिरुपणानन्तरं निरुप्यत्वापत्तिरिति न किञ्चिदेतत्। वायुत्वं नाम सामान्यविशेषः, तेनाभिमत इत्यादिपूर्ववत्।

[2]न च वायोरतीन्द्रियतया वाय्वाकारानुगतप्रतीत्यभावात्, नित्यवृत्तित्वेन कार्यतावच्छेदकत्वाभावाच्च तदनुगतकार्याभावेन कारणतावच्छेदकत्वाभावाद् वायुत्वं न जातिः। न च वायुवृत्तिस्पर्शे तेजःसंयोगनाशप्रतिबन्धकतया जातिविशेषः कल्पनीयः। अन्यथा तदीयस्पर्शस्य पाकजतापत्तेः, तेन तादृशस्पर्शत्वावच्छिन्नकार्यतानिरुपितकारणतावच्छेदकतया तत्सिद्धिरिति वाच्यम्, तस्याः परमाणुस्पर्शवृत्तित्वेन कार्यतावच्छेदकत्वाभावात्। न च जन्यत्वविशेषितं तादृशस्पर्शत्वं कार्यतावच्छेदकम्, तथापि तदवच्छिन्नकार्यतानिरुपितकारणतावच्छेदकजातेः परमाणुसाधारण्यानुपपत्तेः। न च [3]जन्यवायुत्वावच्छिन्नकार्यतानिरुपितकारणतावच्छेदकतया तत्सिद्धिरिति वाच्यम्, अन्त्यावयविनि तदसिद्ध्यापत्तेः। न च जन्यस्पर्शविशेषसमवायिकारणतावच्छेदकतया जन्यवायूषु वायुत्वसिद्धौ वायुपरमाणुः स्वोपादेयवृत्तिद्रव्यत्वसाक्षात्कारव्याप्यजातिमान् द्रव्याऽसमवायिकारणसंयोगवदणुत्वात् पृथिवीपरमाणुवदिति परमाणावपि तत्सिद्ध्यापत्तिरिति वायुरुपवत्त्वस्योपलब्धत्वात्। न चानुकूलतर्काभावान्न साध्यव्यापकेति वाच्यम्, भवदुक्तहेतावपि तस्य [4]तुल्यत्वात्। तस्मात् वायुत्वं नाम न [5]सामान्यप्रमाणाभावादिति चेत्, अत्र वदन्ति- ''अस्ति हि वायुवृत्ति [6]स्पर्शेऽन्यस्य अन्यापेक्षया वैलक्षण्यम्, नानादिगुणोपाध्यवच्छिन्नत्वात्, वेगमात्रप्रयोज्यत्वाच्च। तेन तादृशस्पन्दत्वावच्छिन्नकार्यनिरुपितकारणतावच्छेदकतया सर्वसाधारण-

1. तदेवमादतव्यम्
2. ननु
3. वायुत्वाव ---
4. तुल्यत्वात्
5. सामर्थ्यं
6. स्पन्देऽस्पन्दापेक्षया - क मातअकायाम्

वायुत्वसिद्धिः ।'' न च स्तिमितवायो तादृशस्पन्दाभाव इति वाच्यम्, तत्रापि सदागतित्वव्यवहारानुरोधेन तादृशस्पन्दाभाव इति वाच्यम्, तत्रापि सदागतित्वव्यवहारानुरुधेन तादृशस्पन्दस्यावश्यमङ्गीकार्यत्वात् । स्तिमित-त्वादितिव्यवहारस्तु ग्रहादिपतनप्रतिबन्धकसंयोगमात्रनिबन्धनः । एवं जन्यवायुत्वावच्छिन्नकार्यतानिरुपितकारणतावच्छेदकतया तत्सिद्धिः । न चान्त्यावयविनि तदसिद्ध्यापत्तिः । तत्रापि स्वरुपयोग्यतायाः सत्त्वात् । वायुत्वञ्चात्र रुपाऽसमानाधिकरणस्पर्शवत्त्वम्, तेन नात्माश्रयः ।

केचित्तु- अनुगतकार्यादिवल्लक्षणस्यापि जातिव्यवस्थापकत्वा-दत्रानुगतकार्याभावेऽपि अपाकजानुष्णाशीतस्पर्शवत्त्वस्य रुपाऽसमानाधि-करणस्पर्शवत्त्वस्य वा लक्षणस्य सम्भवाद् वायुत्वजातिः सिध्यति - इत्याहुः ।

[1]एतस्य द्रव्यत्वसिद्धये गुणानाह- स्पर्शसंख्येति । स्पर्शादयो नवगुणाः वाय्वोद्रव्यत्वव्यवस्थापकाः इत्यर्थः । ननूष्णशीतयोस्तेजस्तोयमात्रवृत्तित्वादनु-ष्णाशीतत्वस्य पृथिवीवृत्तित्वाद् वायोः स्पर्शोऽसिद्ध इत्यत आह-स्पर्शोऽस्येति । पृथिव्या पाकजानुष्णशीतस्पर्शवत्त्वमस्मिन् [2]पुनरपाकजानुष्णाशीतस्पर्शवत्त्व-मिति कथं पुन:पाकजत्वमिति चेत्, तत्प्रयोज्यसुकुमारत्वाद्यभावात् । स्पर्शस्य हि पाकजत्वं सुकुमारत्वव्याप्यसुकुमारतरत्वाद्यन्यथानुपपत्त्या कल्प्यते, अन्यथा तदाकस्मिकतापत्तेः । वायुस्पर्शे च तदभावान्न तस्य पाकजत्वमिति भावः ।

यत्तूद्भूतत्वादतिरिक्तस्पर्शत्वव्याप्यव्याप्यजातिमत्त्वमात्रं पाकजत्वे प्रयोजकम् । पृथिवीस्पर्शे च कठिनकनितरत्वादीनां तथात्वात्तस्य पाकजत्वं नान्यस्पर्शानामिति तन्न । जलतेज:स्पर्शयोरपि शीतत्वशीततरत्वोष्णत्वो-ष्णतरत्वादिसत्त्वेन पाकजतापत्तेः । न चानुष्णाशीत इत्यसिद्धं शीतो वायुस्तीव्रो वायुरितिप्रतीतिबलेन तयोरपि तत्र सिद्धिरिति वाच्यम्, [3]तोयतपन-सम्बन्धोपायकत्वात्, तदपगमे तथात्व[4]प्रत्ययात् ।

1. एतस्या,
2. अपाकजत्वमिति - क मातृकायाम्
3. तोयघनसम्बन्धो
4. प्रत्यक्षात् ।

ननु वायौ स्पर्शोऽसिद्धः। न च त्वग्व्यापारानन्तरं वायवस्पर्शस्य प्रत्यक्षसिद्धत्वात्सदूरपह्नव इति वाच्यम्, तस्य संयोगमात्रविषयत्वात्। न चाश्रयायोग्यत्वे संयोगोऽतीन्द्रियमाश्रयायोग्यतायास्तत्र तन्त्रत्वात्। अन्यथाऽऽकाशादिसंयोगस्यापि त्वचूत्वोत्पत्तिरिति वाच्यम्, संयोगेऽपि प्रत्यक्षतायां मूर्त्तमात्रसमवेतत्वस्यैव प्रयोजकत्वात्, स्पर्शकल्पनापेक्षया कार्यकारणकल्पनाया एव लघुत्वात्। एवं तृणादिकर्मणि मेघादिधृतावपि पवनसंयोग एव हेतुः।

न च स्पर्शवत्संयोगस्य साधारणादिहेतुत्वदर्शनात्पतनस्य स्पर्शाभावे तत्संयोगस्य न स्यादिति वाच्यम्, प्रयत्नवदात्मसंयोगस्य [1]ब्रह्माण्डादिधारकत्ववदुपपत्तेरित्याशङ्क्य वायोः स्पर्शे प्रमाणं दर्शयति-गुणेति। "स्पर्शवान् वायु"रिति (वै.सू.2.1.4) सूत्रकारवचनात्स्पर्शसिद्धिरित्यर्थः। वस्तुतस्तु स्पर्शत्वप्रकारकानुभव एव तत्र मानम्; न च संयोगस्य च त[2]थात्वेन प्रतीतिः भ्रमत्वापक्षे। न च तादृशानुभवो नास्त्येवानुगतापलापापत्तेः। [3]विषयान्तरकल्पने चानवस्थापत्तेः। किञ्च स्पर्शस्य वायवीयत्वाभावे तदनुमानमपि न स्यात्, नियतलिङ्ग्याभावात्, संयोगस्य द्रव्यमात्रवृत्तित्वे तन्नियतत्वाभावात्। न च संयोगविशेषस्याव्याप्यनिरुपणाद् वायुवृत्तित्वस्य वायुत्वस्य वायुत्वग्रहाद् पूर्वं ग्रहीतुमशक्यत्वाच्च। किञ्च वायौ स्पर्शाभावे तस्याऽऽरम्भकत्वानुपपत्तिः स्पर्शस्यैव द्रव्यारम्भकतायां प्रयोजकत्वादिति दिक्।

संख्यादिषु प्रमाणमाह- अरुपिष्विति। संख्यादीनां चाक्षुषत्वे रूपिद्रव्यसमवायस्य हेतुत्वं वदता सूत्रकारेण नीरुपे वायौ तेषामचाक्षुषमङ्गीकृतमिति। तत्र तेऽचाक्षुषाः सिद्धाः। यद्यप्यत्र वायोः संख्यादिमत्त्वेन प्रत्यक्षं प्रमाणम्, किं तद्वृत्तिसंख्यादीनामचाक्षुषत्वे, तथापि मेघादिधृत्यन्यथोपपत्त्या संयोगसिद्धिः। तत्सिद्धौ च तद्विनाशकत्वेन विभागः, स्पर्शवत्त्वान्यथानुपपत्त्या च मूर्त्तत्वम्। तद्विनाशाभावाच्च परत्वापरत्वे संख्यापृथक्त्वयोश्च वक्ष्यमाणसमूर्च्छनात् सिद्धिः। अरुपिद्रव्यसमवायाच्चाक्षुषत्वसिद्धिरिति मन्तव्यम्।

1. ब्राह्माणदिधारकत्वात्ता 2. तथात्वं न प्रतीतेः भ्रमत्वापत्तेः। 3. विषयान्तर - वस्थापत्तेः - नास्ति।

संस्कारे प्रमाणमाह -तृणेति । 'तृणे कर्म वायुसंयोगात्' (वै.सू.5.1.14) इतिसूत्राद्वायोर्वेगसिद्धिरित्यर्थः । ननुएतावत्तृणेवायुसंयोगसिद्धावपि वायोर्वेगसिद्धिः कथमिति चेत्, इत्थं रूपवद्द्रव्याभिधाताद्यजन्यं तृणं कर्मस्पर्शवद्विलक्षण-वेगवद्द्रव्याभिघातजं विलक्षणकर्मत्वान्नदी[1]पुराभिहतवेतसादिक्रियावत् । विलक्षणत्वञ्च कालिकसम्बन्धेन सजातीयविशे[2]षोत्पत्तिव्याप्यध्वंस-प्रतियोगित्वम् । न चादृष्टवदात्मसंयोगजन्यमेव तृणकर्म नोक्तसंयोगजमिति वाच्यम्, वायुसंयोगाभावदशायामपि [3]तृणे तथाक्रियापत्तेः । अत्राभिघातो वेगजन्यः स्पर्शवत्संयोगः, तेषामभिघातजन्यः इत्येवं साध्यम् । तस्य तद्द्रव्यलाभाय स्पर्शवदित्यादि द्रष्टव्यम् ।

एतेन प्रत्यक्षवृत्तिद्रव्यविभाजकोपाधिशून्यत्वे सति स्पर्शवत्त्वम-वान्तरतारतम्याभाववत्स्पर्शवत्त्वमित्यादिवायुलक्षणं दर्शितम् । नन्वत्र धृत्यादिकार्यवशेनानुमेयत्वाद् धृ[4]त्यादेश्चावयविमात्रनियतत्वमेवेति कृतस्-तस्योत्पत्तिरित्याह- स चायमित्यादि । कथं द्वैविध्यमाह- अणुकार्येति । अनुलक्षणो नित्यम्, कार्यलक्षणश्चानित्यमित्यर्थः । अवयवानवस्थाप्रसङ्गोऽ-णुत्वसिद्धौ मानमिति धृत्याद्यन्यथानुपपत्तिश्चाावयविनि इति द्रष्टव्यम् ।

पारार्थ्यं दर्शयितुमनित्यवायोः भेदान् दर्शयति- [5]अत्रेति । तत्र द्विविधवायुमध्ये । चतस्रो विधार्यस्य स चतुर्विधः । चातुर्विध्यं दर्शयति-शरीरमित्यादि । तत्र विषयमध्ये अयोनिजमेवेति शुक्रशोणितयोः पार्थिवत्वनियमादित्यर्थः । ननु वायवीयशरीरमसिद्धमनुपलम्भादित्यत आह-मरुतामिति । तथा च व्यवधानान्न दृश्यते न त्वभावादिति भावः । नन्वसत्त्वादेवानु[6]पलब्धिसम्भवे व्यवधानान्नोपलभ्यादित्यत कथमिति चेत्, असिद्धेः । वायुत्वं

1. पुरादि हेतवेतसादिक्रियावत्,
2. विशेषोत्पत्तिं
3. तृणेस्तथा - क मातृकायाम्
4. वृत्त्यादेः
5. तत्रेति
6. उपलभ्यात - क मातृकायाम्

शरीरवृत्तिद्रव्याऽसमवायिकारणसंयोगाश्रयवृत्तिस्प[1]र्शवृत्तितद्द्रव्यविभाजकजातित्वात् पृथिवीत्ववदित्यादिवायवीयशरीरसिद्धेः । न च जातित्वे सति प्रत्यक्षत्वं रूप[2]वद्वृत्तित्वात् उपाधिरिति वाच्यम्, तेषामागमबलेन तत्सिद्धौ साध्यव्यापकत्वात् । वायुलोके इत्युपलक्षणम् । पिशाचादिशरीरमत्यनुद्भूतस्पर्शं वायवीयमिति केचित् ।

भङ्गुरस्वभावेन तेन कथमुपभोगसाधनत्वमत आह - **पार्थिवेति** । पार्थिवपदं भूतान्तरोपलक्षकं शरीरस्य पाञ्चभौतिकत्वात् । इन्द्रियमाह - **इन्द्रियमिति** । स्पर्शसाक्षात्कारः अन्धकारकालीनवहिर्द्रव्यसाक्षात्कारवदिति [3]असाधारणकारणः साक्षात्कारत्वात् चाक्षुषसंस्कारवत् सामान्यसिद्धौ तादृशसाक्षात्कारकरणं पक्षीकृत्य तद्वायवीयं स्पर्शसाक्षात्कारजनकव्यापारवत्त्वे सति तदसाधारणकारणत्वात् शरीरासक्तसलिलशैत्याभिव्यञ्जकव्यञ्जकव्यञ्जन-पवनवदिति वायवीयसिद्धिः । शरीरभेदेनेन्द्रियवैजात्यनिराकरणार्थमाह- **सर्वप्राणिनामिति** । वाश्यूवन्तरस्य कथं न तथात्वमाह- **पृथिवीति** । अत एव त्वचः कृष्ट्याद्युपघातेन स्पर्शसाक्षात्कारः । ननु अस्य चक्षुरादिवच्छरीरैकदेश-व्यापित्वे सर्वावयवावच्छेदेन स्पर्शोऽपलम्भ न स्यादिति आह - **सर्वशरीरे** । सर्वावयवावच्छेदेन शरीरसंयोगीत्यर्थः । संयोगस्याप्यव्याप्यवृत्तित्वे तेन सम्बन्धेन त्वचो व्याप्यवृत्तित्वात् सर्वशरीरव्यापित्वमविरुद्धमिति भावः । नहि वृत्तेरव्या[4]प्यवृत्तित्वाप्रयोजकं तथात्वे समवायस्य व्याप्यवृत्तित्वेन संयोगस्याव्याप्यवृत्तितापत्तेः । एतेन संयोगस्याव्याप्यवृत्तित्वेन तेन सम्बन्धेन द्रव्यस्याव्याप्यवृत्तित्वात्प्रत्युक्तः । न च लोमादीनां शरीरत्वाभावात्तदव्यापित्वञ्च न दोषः । ननु तस्य सर्वशरीरव्यापित्वाभावेऽपि वेगवशात्तदवयवावच्छिन्नं तत्तत्स्पर्शोपलम्भकम् । तस्य च वायवीयत्वेन वेगवत्त्वात्तद्वेगस्य

1. स्पर्शवद्वृत्तिद्रब्यविभाजक - नास्ति - क मातृकायाम्
2. रूपवद् वृत्तित्वात् उपाधिरिति
3. असाधारणकारणः साक्षात्कारत्वात् चाक्षुषसाक्षात्कारवत् - नास्ति ।
4. व्याप्यवृत्तित्वे वृत्तिमतोव्याप्यवृत्तित्वप्रयाजके

चालोकवेगवतीन्द्रियत्वान्न प्रत्यक्षसम्भवः । एवं यथाण्वपि मनोविलक्षणवेग-वशात्तत्तदवयवावच्छिन्नं तत्तज्ज्ञानविशेषसुखादिजनकं तद्वदेव त्वचा अपीति किं तस्य सर्वशरीरव्यापित्वाङ्गीकरणेन । एवं यदा रसनया गुडादौ संयुक्तसमवायेन रसो गृह्यते, तदा रसनाग्राधिष्ठितावच्छेदेन त्वगभावान्न तदानीं गुडादित्वाच-साक्षात्कारः । अन्यथा गुड[1]त्वं चरन् रासनयौगपद्यापत्तिः स्यात् । न च त्वक्संयोगे सत्यपि तदानीं त्वङ्मनःसंयोगाभावात् न तदानीं त्वचापत्तिरिति वाच्यम्, तस्य ज्ञानसामान्यहेतुत्वेन रसनादिसाक्षात्कारेऽप्यवश्यमपेक्षणीयत्वात् । न च रसनादिसामग्र्याप्रतिबन्धान्न त्वचापत्तिरिति वाच्यम्, तस्याः प्रतिबन्धकत्वे मानाभावात् । तस्मात् त्वक्संयोगाभावादेव न [2]त्वचामिति त्वचो न सर्वशरीरव्यापित्वमिति चेत् । अत्र वदन्ति अधिष्टानस्य वृद्धिक्षयवतश्चर्मणः पार्थिवस्य यावच्छरीरव्यापिपीतत्वस्य प्रसिद्धसिद्धत्वेन तदधिष्टितस्यापि बाधकं विना तावत्परिमाणत्वकल्पनात्, परिमाणान्तरकल्पने गौरवात् सर्वशरीर-व्यापित्वसिद्धिः । [3]गुडीयरससाक्षात्कारदशायां त्वक् न गुडसाक्षात्कारस्तदानीं चर्ममनःसंयोगाभावाच्चर्मणः संयोगस्यापि त्वचा साक्षात्कारे हेतुत्वात् । अन्यथा कामिनीमालिङ्ग्यशयानस्य स्वप्ने, नान्यवस्तुज्ञानदशायां कामिनीत्वक्त्वापत्तिः । ननु त्वचमपि परित्यज्य मनः [4]पुरीततिमनुप्रविशतीतिरीत्या [5]पुरीतया त्वचाभावे कथं तस्याः सर्वशरीरव्यापित्वमिति वाच्यम्, तस्याः शरीरारम्भकत्वाभावेन तदनवयवत्वादशरीरत्वाच्च । तत्त्वे वा तदन्यशरीरव्यापित्वं ग्राह्यमिति दिक् ।

लोकप्रसिद्धां संज्ञामाह- त्वगिति । इन्द्रियमित्यनेनातीन्द्रियत्वमुक्तम्, तेन चर्मणो न तत्त्वमधिष्टानाधिष्टितसम्बन्धेनाभेदेनारोपात् तथाव्यवहारो लोकानामिति भावः । विषयमाह- विषय इति । तु पुनरर्थे । त्वगादि-व्यावृत्त्यर्थमुपलभ्यमानेति स्पर्शविशेषणम् । [6]अधिष्ठानभूतः समवाय उपलभ्यः

---

1. त्वा ---
2. त्वक्चामिति
3. गुम्भीय
4. पूर्वतमेऽनुप्रवशति
5. पुरीतव्या
1. अधिष्ठानभूतः समवायि

साक्षात्कारस्तेन स्पर्श एव साक्षात्कारमु[1]ख्यविषयो न तु वायुरित्यर्थः। कथमप्रत्यक्षमिति चेत् विशेष्यतासम्बन्धेन जन्यबहिर्द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति उद्भूतरूपवत्त्वेन न तदभावेन तत्प्रत्यक्षत्वासम्भवात्। न चोद्भूतरूपोत्कर्षेण चाक्षुषोत्कर्षादुद्भूतरूपं तत्रैव हेतुर्न प्रत्यक्षमात्रमिति वाच्यम्, निरुक्त-जन्यप्रत्यक्षस्यानुगतकार्यस्यानुगतकारणं [2]विनानुत्पत्तिप्रसङ्गे नान्यथानुपपत्त्या तस्य तत्र कारणत्वात्। न च तत्रोद्भूतस्पर्शवत्त्वमुद्भूतविशेषगुणवत्त्वमात्रम्वा जन्यप्रत्यक्षमात्रेऽनुगतो हेतुरस्त्विति वाच्यम्, तथात्वे ग्रीष्मोष्णादीनां प्रत्यक्षत्वे तद्गतसंख्यादेरपि प्रत्यक्षतापत्तेः। तत्प्रत्यक्षत्वे योग्यव्यक्तिसमवेतत्वस्यैव प्रयोजकत्वात्। तेन ग्रीष्मोष्णाद्यप्रत्यक्षम्। प्रत्यक्षसंख्याद्यनाश्रयत्वादिति अप्रत्यक्षसिद्धौ व्यभिचारान्नोद्भूतस्पर्शादेस्तत्कारणत्वमिति। एवञ्च वायोः प्रत्यक्षत्वे तद्गतसंख्यादिप्रत्यक्षापत्तिरिति सामान्यगुणप्रत्यक्षेणाश्रयप्रत्यक्षस्य तन्त्रत्वादिति वायुरप्रत्यक्षः। तथाहि वायुर्न सावयवेन्द्रियजन्यसाक्षात्कारविषयः निरुपत्वादा[3]काशवत् संख्यानाश्रायत्वात्। एवञ्च मुख्यविशेष्यतासम्बन्धेन [4]द्रव्यवत् सावयवेन्द्रियजन्यप्रत्यक्षत्वावच्छिन्नं प्रति वा उद्भूतरूपवत्त्वेन कारणत्वम्, तेन सामान्यसामग्र्याभावाद् विशेषसामग्रीभावाद् विशेष-सामग्रीसत्त्वेऽपि न [5]स्पार्शनप्रत्यक्षत्वमिति।

यत्तु वायौ विलक्षणवा[6]ह्येन्द्रियसंयोगाभावादेव न स्पार्शनप्रत्यक्षत्वम-पीति चेत्। तन्न। तथात्वे तत्र स्पर्शरूपाभावयोरप्रत्यक्षतापत्तेः। न च त्वग्व्यापारानन्तरं वायुर्वातीति सार्वलौकिकक्रियाविशिष्टवायुप्रत्यक्षा-पलापापत्तिः वायुं त्वचासाक्षात्करोमीतिप्रतीतेः कस्याप्यसम्भवेन वायुर्वातीति ज्ञानस्य प्रत्यक्षत्वाऽसिद्धे कथं तर्हि ज्ञानमिति चेत्; अनुमानात्। वायोरप्रत्यक्षत्वे तत्क्रियायास्तज्जन्याभिघातस्य चाप्रत्यक्षत्वात्कथं तदनुमानमिति चेत्, अभिघातजन्यसुखदुःखयोः प्रत्यक्षत्वेनाभ्यामभिघातोऽनुमीयते, तेन क्रिया-

---

1. सुख 2. विनानुपपपत्तिप्रसङ्गे- क मातृकायाम् 3. आकाशवत्, पत्यक्षसंरष्यानाश्रयत्वाच्च
4. द्रव्यचाक्षुषत्वावच्छिन्नं प्रति उद्भूतरूपवत्वेन तादृशस्यशनत्वावच्छिन्नं प्रति मुख्यसम्बन्धेन स्पर्शवत्वेन। 5. प्रत्यक्षत्वम् 7. इन्द्रिय

विशेषमनुमीय च तदाश्रयवाय्वनुमानसम्भवात्। कथं तर्हि वायुविशेष्यप्रतीतिरिति चेत्; असिद्धेः। सुखादिजनकाभिघातजनिकाक्रिया वायुवृत्तिरित्येवानुभवात्। अस्तु वा तादृशानुमानपरम्परानन्तरं वायुविशेष्यको मानसोऽयमुपनयः। न चोपनीतं विशेषणतयैव भासते इति नियमात्कथमुपनये वायोर्विशेष्यत्वेन मानमिति चेत् वहिरिन्द्रियजन्योपनये तथानियमेऽपि मानसोपनये तदभावात्।

तदुक्तम् - मानसन्तु भानेऽनियमः। तत्र द्वयोरपि तदयोग्यत्वात्। उभयोरपि विशेषणतया [1]भाने विशेष्याभावे विशिष्टवुद्ध्यनापत्तेरिति। एवं शीतद्रव्योपनायकत्वेनोपनीते वायौ मनसा शीतरूपाच्छीतो वायुरिति प्रत्ययः। न च वायुत्वरूपविशेषदर्शने कथं शीतत्वारोप इति वाच्यम्, तादृशरूपस्य दोषविशेषजन्यत्वेनात्र विशेषदर्शनस्य प्रतिबन्धकत्वाभावात्।

यत्तु तत्र शीतस्पर्शे न वाय्वनुमानमिति। तन्न। शीतस्पर्शस्य वायवीयत्वाभावात्। न च शीतस्पर्शे वायवीयत्वमारोप्य तेन तदनुमानमिति वाच्यम्, स्पर्शेशीतत्वग्रहे वायवीयत्वमारोप्यानुपपत्तेः। तत्रापि तादृशदोषविशेषकल्पने मानाभाव इति संक्षेपः।

नवीनास्तु- जन्यप्रत्यक्षत्वावच्छिन्नं प्रति इन्द्रियादिना [2]जन्यद्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति महत्त्वादिना वा कारणत्वात् भवतु तदुभयं कार्यतावच्छेदकम्। न च जन्यवहिर्द्रव्यप्रत्यक्षत्वमपि गौरवान्नाभावाच्च। निरुक्तचाक्षुषत्वावच्छिन्नं प्रति उद्भूतरूपवत्त्वेन निरुक्तत्वाचत्वावच्छिन्नं प्रत्युद्भूतस्पर्शवत्त्वेन विशिष्य हेतुत्वम्। तेनोद्भूतस्पर्शवत्त्वाद् वायुः [3]स्पार्शनप्रत्यक्षः। न चैवं ग्रीष्मोष्णादीनामपि त्वक्त्वमिष्टापत्तेश्च। तेषां प्रत्यक्षत्वे योग्यवृत्तित्वात् तद्गतसंख्यासंयोगादीनां प्रत्यक्षत्वापत्तिरिति चेत्, योग्यव्यक्तिवृत्तित्वेऽपि अदृष्टादिवत्प्रतिबन्धकवशेन स्पर्शादिग्रहसामग्र्याऽन्धधर्मग्रहप्रतिबन्धकत्व[4]कल्पनेन वा तदग्रहसम्भवात्। न हि योग्यव्यक्तिवृत्तित्वमात्रेण सामान्यगुणादीनां प्रत्यक्षत्वम्। अर्द्धनिखातवंशपृष्ट-

1. भावे
2. नास्ति
3. स्पर्शनप्रत्यी:
4. कल्पनेन वा

लग्नवस्त्रादिपरिमाणादेर्योग्यवृत्तित्वेऽप्यप्रत्यक्षत्वात्। फुत्कारादौ च संख्यादेः स्फुटतरप्रत्यक्षत्वात्। एवं पितद्रव्यस्योद्भूतरूपवत्वाच्चाक्षुषमिति पीतः शङ्ख इत्यनुभूयमानारोप इति साधु सङ्गच्छते।

अथ पीतद्रव्यस्याचाक्षुषत्वेऽपि योग्यत्वात् तदीयं रूपं चाक्षुषमिति चेत्, तदुष्मादेः योग्यत्वेऽपि अयोग्यत्वात्तदीयं संख्यादिकं न गृह्यत इति किं न रोचते। एवं प्रभालोकादेरपि चाक्षुत्वमेव, उद्भूतस्पर्शाभावान्न त्वक्त्वम्। वायूष्णादेस्त्वाच त्वमुद्भूतरूपाभावान्न चाक्षुषत्वमिति। जन्यवहिर्द्रव्य-प्रत्यक्षत्वस्य [1]कार्यावच्छेदकत्वे सावयवेन्द्रियग्राह्यविशेषगुणत्वमेव तत्र प्रयोजकम्। एवं स्थिते वायुः स्पार्शनसाक्षात्कारविषय उद्भूतस्पर्शाश्रयत्वाद् घटवदित्यादिप्रयोगा अनुसन्धेयाः।

न चोद्भूतरूपवत्त्वमुपाधिः। उक्तन्यायेन त्वाचसाक्षात्कारे [2]तस्याप्रयोजकत्वेनोपाधित्वाभावात्। उक्तरीत्या उष्णादौ साध्याऽव्यापकत्वात्। एवं शीतो वायुर्वातीत्यादौ क्रियाविशिष्टतया त्वाचप्रत्यक्षविषये वायौ त्वाचः शीतारोपः। अन्यथाऽनुमानादिकल्पनागौरवापत्तिः, अनुभवविरोधापत्तेश्च। त्वग्व्यवहारानन्तरं झटिति [3]परामर्शादिविधुरस्य तथाप्रत्ययानापत्तेः एवं शीतो वायुरित्यत्र शीतस्पर्शस्य वायुलिङ्गत्वाभावात्तदनुमानं दुर्लभम्। न च शीतद्रव्योपनायकत्वेनानुमितो वायुः त्वचा शीतारोपः। शीतो वायवीय इति प्रतीत्यापत्तेः। न च तथाप्रत्यक्षानन्तरं मानसोऽप्ययमुपनय इति वाच्यम्, मनसो वहिर्विशेष्यकज्ञानजनताऽसामर्थ्यात्। न च लौकिकतादृशज्ञाने तथानियम इति वाच्यम्, मानाभावात्, ज्ञानद्वयकल्पने गौरवाच्च। तस्माद् त्वाच एव वायुः। फुत्कारादौ संख्यासंयोगादिकं [4]प्रत्यक्षसिद्धमेव।

क्वचित्तु 'वायोर्विष्विग्विसारित्वग्रहेण प्रतिबन्धान्न संख्यासंयोगादिग्रह' इति वर्णयन्ति। ननु वायुरनुद्भूतरूपोनुद्भूतस्पर्शः पृथिवीविशेषः। [5]यथानुद्-

1. कार्यावच्छेदकत्वेऽपि
2. तस्य प्रयाजक
3. त्वग्व्यान्व्यारानन्तरं अटिति परामर्शादि विधुरस्य तथाप्रत्ययानप्पत्तेः। नास्ति - क मातृकायाम्
4. प्रत्यक्षमेव।
5. अनुभूति

भूतस्पर्शोद्भूतरूपो धूम:, न चोद्भूतस्पर्शवत्या: पृथिव्या: उद्भूतरूपवत्त्वनियम इति वाच्यम्, तैजस इव पृथिव्यास्तथानियमाभावात्, धर्म्यन्तरकल्पनापेक्षया तादृशनियमभङ्गकल्पनायार्लघुत्वाच्च। अत एव सुरभि: समीरण इति गन्धवत्त्वादिप्रत्ययोऽप्युपपद्यते। न चायमारोप: अनारोपेणोपपत्तावारोपे मानाभावात्। न च पृथिवीत्वे गुरुत्वापत्ते:। न च वायुपूरितानां चर्मपुटकानामधिकगुरुत्वमुतो गुरुत्वाभावान्न पृथिवीति चेत्, द्रवत्वस्यैव गुरुत्वस्यापि सर्वपृथिवीवायवीयव्यापकत्वात्। अन्यथा गुरुत्वाभावेन धूमस्यापि अपृथिवीत्वापत्ते:। अत एवानुष्णाशीतस्पर्शोऽपि साधु सङ्गच्छते।

भूतानां पञ्चत्वप्रसिद्धिस्तु शरीरा: पञ्चावयवा इतिवद् यथाकथाञ्चिदुपपादनीया। अतएव [1]रुपमरसादौ स्पर्शस्या[2]पाकजत्वेन विजातीयस्पर्शानुभवोऽपि तस्माद्वायुत्वं पृथिवीत्वव्याप्यमेवेति। अतएवास्य रसवत्वमपि। तच्च स्पर्शादिरसनायाश्च गृह्यते, नान्येनेति वस्तुस्वभावात् कल्प्यते, नीरसत्वे च स्पर्शादीनां तत्पानानुपपत्तेरिति चेत्; न; रुपानाश्रय: प्रत्यक्षस्पर्शाश्रयधर्मा न पृथिवीगुरुत्वानाश्रयत्वात् तेजोवदित्यनेन पृथिवीत्वाभावसाधनात्। न च धूमे व्यभिचार:। तत्राप्यलं धूमतादशायामधोऽवनमनादिना गुरुत्वानुमानात्। विजातीयप्रक्रियावत्त्वात् पृथिव्यानोदनादभिघाताऽसमवायिकारणं प्रथमकर्मवायौ तु कर्मोऽसमवायिकारणमेव। एवं विजातीयवेगवत्त्वाच्च न पृथिवीत्वमिति संक्षेप:।

ननु वायोरतीन्द्रियत्वे कथं तस्य ग्रहणमित्यत आह - **स्पर्शेति**। **स्पर्शशब्दतर्कलिङ्गनियमस्य स तथोक्त:**। स्पर्शादिपदं स्पर्शत्वादिपरम्। तस्यैव लिङ्गत्वात्। तथाहि रूपाऽसमानाधिकरण: स्पर्श:क्वचिदाश्रितस्पर्शत्वादुष्णस्पर्शवदिति सामान्यतो दृष्टाऽवतारणाकाशादीनामनारम्भकत्वेन स्पर्शाश्रयत्वबाधे जलानलयोश्च प्रत्यक्षेणानुष्णाशीतस्पर्शबाधे पृथिव्याश्च रूपासमानाधिकरण[3]पाकजस्पर्शबाधे स्पर्शस्य प्रत्यक्षस्याश्रयं विनानुपपत्त्या

1. अ जामुरुवादौ   2. पाकजत्वेन   3. अपाकजस्पर्श

तदाश्रयपृथिव्यादिव्यतिरिक्तवायुसिद्धिः[1] । यद्वा [2]स्पर्शादिपाक्षिकयानुमित्या लिङ्ग्यते ज्ञायते इति स्पर्शब्दादिलिङ्गक इत्यर्थः । तथा चापाकजानुष्णाशीतस्पर्श अष्टद्रव्यातिरिक्तद्रव्याश्रितः अष्टद्रव्यानाश्रितत्वे सत्याश्रितत्वात्, यन्नैवं तन्नैवमिति व्यतिरेकात् सिद्धिः । पर्णादिषु शब्दसन्तानो वेगवत्सावयवद्रव्यसंयोगजन्यः संयोगजशब्दत्वात् भेर्य्यादिशब्दवदिति विशिष्टशब्दत्वलिङ्गकानुमानात् सावयवद्रव्यान्तरसंयोगबाधे तादृशशब्दकारणसंयोगाश्रयत्वेन वायुसिद्धिः । धृतिश्च पतनप्रतिबन्धकसंयोगः, तेन मेघादिप्रतियोगिकस्तत्पतनप्रतिबन्धकः संयोगः स्पर्शवद्द्रव्यवृत्तिः पतनप्रतिबन्धकः संयोगत्वात् [3]पयःपूरधृतनौकादि-प्रतियोगिकसंयोगवदत्र [4]मेघादिप्रतियोगिक संयोगस्य मेघाश्रयाख्याभावात् तदतिरिक्तस्य स्पर्शवतोऽन्यस्य तादृशसंयोगाश्रयस्याभावात्, तदाश्रयत्वेन वायुसिद्धिः । कम्पश्चलनं कर्मेति यावत् । तेन तृणादीनामविभज्यमानावयवानां कर्मस्पर्शवत् वेगवद्द्रव्यसंयोगजन्यं विभागाद्यजन्यकर्मत्वात् जलाद्यहतवेत-सादिक्रियावत् । एवमतीन्द्रियस्यापि वायोः स्पर्शत्वादिलिङ्गचतुष्टयात् सिद्धिः । तिर्य्यग्गमनमित्यनेन भूतान्तरासङ्कर उक्तः । मेघादिधारणसमर्थमित्यनेन सांकर्य्यपारार्थ्यमुक्तम् ।

ननु यथा कार्यत्वलिङ्गकानुमानाल्लाघवतर्कसहकारेणैकस्यैव ईश्वरस्य सिद्धिः । एवं स्पर्शत्वादिलिङ्गकानुमानादपि लाघवादेकस्यैव वायोः सिद्धिः स्यादित्यत आह-

(मू) तस्याप्रत्यक्षस्यापि नानात्वं समूर्च्छनेनानुमीयते । समूर्च्छनं पुनः समानजवयोः विरुद्धदिक्क्रिययोः वाय्वोः सन्निपातः । सोऽपि सावयविनोरुर्ध्वगमनेनानुमीयते, तदपि तृणादिगमनेनेति । प्राणोऽन्तः शरीरे रसमलधातूनां प्रेरणादिहेतुरेकः सन् क्रियाभेदात् प्राणापानादिसंज्ञां लभते ।

1. संयोगः - योगः
2. शब्दादि
3. प्रायः पूर
4. मेषादि

तस्येति । तस्यानुपदं वायोरित्यर्थः । नानात्वं विभाजकोपाधि-समानाधिकरणाऽन्योन्याभावप्रतियोगिकतत्तदव्यक्तित्वमिति यावत् । वस्तुतस्तु वायोरेकत्वे परमाणुत्वं विभुत्वं स्यात्, मनोवदाकाशादिवत् वाताणुरुपत्वे स्पर्शसंयोगत्वेन शब्दादिहेतुर्न स्यात् । विभुत्वे च स्पर्शाद्यनाश्रयत्वापत्तिरिति सावयवत्वसिद्धौ [1]धर्मिग्राहकानुमानेनैव नानात्वं सिद्ध्यत्येव । तथापि तिर्य्यग्गमनस्वभावस्यान्यप्रतिघातिनं ऊर्ध्वगमनं भवतीति व्युत्पादयितुं समूर्च्छनेन नानात्वं साधयति ।

समूर्च्छनपदस्य वैचित्र्यार्थमपाचिकीर्षुमाह- समूर्च्छनं पुनरिति । अधिकवेगेन न्यूनवेगस्य समूर्च्छनं नास्तीति समानजीवयोरित्युक्तम् । विरूद्धे प्राचीप्रतीचित्वयुक्तेऽधिकारणरूपे दिशौ यमोरेवंभूतो क्रिययोरिति बहुव्रीहिश्च गर्भबहुव्रीहि: ।सन्निपातविघात: स्पर्शवद्वेगवद्रव्यप्रतियोगिक: [2]सयोगविशेष: । एवं प्रतिघात्यप्रतिघातकभावेन वायोर्भेदसिद्धि: ।तथा प्रतिहतावायु:, प्रतिघाताद् वायोर्भिन्न: प्रतिहतत्वात् सम्मतवदिति । अत्र प्रतिघातत्वं प्रतिघातजनकक-र्मप्रतियोगित्वम्, प्रतिहेतुत्वञ्च प्रतिघातजनककर्मसमवायित्वमिति वायुना-नात्वसिद्धि: । ननु वायोरतीन्द्रियत्वेन संयोगस्याप्यतीन्द्रियत्वात् कथं तेन नानात्वानुमानमत आह - सोऽपि सन्निपातोऽनुमीयत इत्यर्थ: ।

केनानुमीयत इत्यपेक्षायामाह - सावयवेति । परमाणुरूपयो-स्तयोरभिघातान्न तृणादिक्रियेति । सावयवेति तत्क्रियाया: अप्ययोग्यत्वात्तस्यापि कथं ज्ञानमत आह - तृणादीनामूर्ध्वगमनेनानुमितेनेत्यर्थ: ।तृणादीनामूर्ध्वगमनं स्पर्शवद्देशवद्द्रव्यसंयोगजं प्रयत्नाजन्योर्ध्वगमनत्वात् ।[3]ज्वलदनलक्षिप्ततुलाद् दुर्विनिगमनत्वादिति वायुसद्धिौ वायुरुर्ध्वगमनवान् तृणाद्युर्ध्वगमना-समवायिकारणसंयोगाश्रयत्वात्तदजलदनलवत् । तृणादीनामूर्ध्वगमनेन वाय्वनुमानानन्तरं तादृशवायोरुर्ध्वगतिमत्त्वानुमानमिति भाव: ।

1. धर्मग्रा
2. समानविशेष:
3. जलदनलक्षिप्ततुलाद्

चतुर्थविषयमाह - प्राण इति । शरीराभ्यन्तरचारी वायुः प्राण इति प्राणस्य लक्षणम् । तच्च यद्यपि वाह्यवाय्वावतिव्याप्तम्, तथापि जन्यज्ञानत्वावच्छिन्नकार्यतानिरुपितकारणताश्रयशरीरसंयोगवत्त्वाद् वायुत्वं प्राणत्वम्, तेन [1]नोक्तदोषः इत्यर्थः । शरीरप्राणसंयोगस्य ज्ञानहेतुत्वाल्लक्षणसम्भवः । प्राणशरीरसंयोगस्य ज्ञानहेतुत्वाभावे मृतशरीरावच्छेदेनात्ममनःसंयोगे ज्ञानापत्तेः ।

तस्य प्रयोजकमाह - रसमलादीति । उक्तस्योदनादेः सारविकारो रस मलमूत्रपूरीषादि । आदिप्रदादुदर्य्याग्निदीपनादिपरिग्रहः । ननु शरीराःपञ्चावयवाः इत्यागमप्रसिद्ध्या पञ्चप्राणाः, तेषां च यद्यपि विरलावयवत्वाज्जलालोकादिवत् सामान्यदेशत्वं सम्भवति । कथं प्राणः इत्येकवचनेन तन्निर्देश इति चेत् । न; शरीरान्तरानेकवायुसन्निपाते समूर्च्छेनापत्तौ [2]निरन्तरमाध्याने जीवनदुर्लभत्वापत्तेः एक एव प्राणः वायुः ।

कथं तर्हि संज्ञाभेद इत्यवस्तुत्वमुपपादयति - एक इति । [3]प्रकर्षेणाननात्प्राणः, प्रकर्षेणाननं मुखनासिकाभ्यां गमनम् अपकृष्टतयाऽऽन[4]नादपानः । तच्च मलादीनामधोनयनं सम्यक्प्रकारेणाननात्प्राणाः । तच्च भूक्तानामोदनादीनां समीकरणं नाडीमुखेषु विशेषणाननाद् व्यानः । उर्ध्वगमनादुदानः । तच्च भुक्तिविकारादीनामूर्ध्वनयनम् । एतेन [5]विषयीभूतप्रत्यक्षस्पर्शाश्रयवाय्वपेक्षया वैलक्षण्यमुक्तम् । तेनास्य विषयम[6]ध्ये न प्रवेशः । अदृष्टविशेषजन्यप्राणशरीरसंयोगो जीवनं तच्छरीरसंयोगश्च जन्यात्मविशेषगुणत्वावच्छिन्नं प्रति गुणत्वावच्छिन्नं प्रति हेतुरिति मते सूत्रसम्मतं तस्य वैलक्षण्यापन्नं विषयस्य चातुर्विध्यम् ।

ननु पृथिव्यादीनाञ्च चतूर्णामवयविपरमाणुभेदेन द्वैविध्यमयुक्तम् । पृथिवीत्वादेरवयविमात्रवृत्तित्वस्य प्रत्यक्षसिद्धत्वेन निरवयववृत्तित्वे मानाभावात् ।

1. तावद्दोषः - क मातृकायाम्
2. निरन्तरमध्माने - क मातृकायाम्
3. अननाप्राणः
4. अननादपानः
5. पक्षीभूत
6. मध्येन

न च पार्थिवत्वादिकं[1]निरवयववृत्तिद्रव्यविभाजको[2]पाधि- त्वादात्मवदिति वदति, निरवयवपृथिव्यादिसिद्धौ मूर्त्तवृत्तिद्रव्यत्वव्याप्यजातेर्विभुवृत्तित्वाभावनियमेन [3]विभुवृत्तित्वबाधे परमाणुवृत्तित्वसिद्धिरिति वाच्यम्, अनुकूलतर्काभावे- नोक्तानुमानस्याप्रयोजकत्वात्, अन्यथाऽऽत्मत्वं सावयववृत्तिद्रव्यत्वव्याप्य- जातित्वात् पृथिवीत्ववदित्यादेरपि सुवचत्वात्।

ननु सर्गाद्यकालीनकार्यस्य भावकार्यत्वेन [4]अभावकार्यत्वेन समवाय्यसमवायिरूपा[5]कारणजन्यत्वनियमात्प्रलयस्य जन्यद्रव्यानधिकरण- कालत्वेन तदानीमवयविद्रव्याभावात् सर्गाद्यकालीनकार्यसमवायिकारणत्वेन तदाऽऽरम्भकासमवायिकारणसंयोगाश्रयत्वेन [6]मूर्त्तद्रव्यासिद्धौ [7]धर्मिग्राहक- प्रमाणबलेन परमाणुसिद्धिरिति चेत्। न प्रवाहस्यानादित्वेन सर्गप्रलययो: एवाऽसिद्धिरिति। न च श्रुतिस्मृतीतिहासादित एव तत्सिद्धिरिति वाच्यम्, तयोरविधेयत्वेन श्रुतितात्पर्यविषयत्वाभावात्, इतिहासपुराणादीनामपि श्रवण[8]विध्युपगृहीततया प्रयोजनवदर्थपर्यवसायितया निष्प्रयोजने तस्मिन् तात्पर्य्याभावाच्च। न च कालकपालान्यवृत्तिध्वंसप्रतियोग्यघटत्वं घटानधिकरणवृत्तिध्वंसप्रतियोगिवृत्ति[9]कारणमात्रवृत्तिधर्मत्वात्पटत्ववत् इत्यनुमानं तत्। अत्र पक्षविशेषणान्नाकाशादिवृत्तिधर्मध्वंसप्रतियोगिवृत्तित्वे नार्थान्तरम्। घटानधिकरणत्वं घटाधिकरणभिन्नत्वम्। तच्च कपालस्य न सम्भवतीति पक्षधर्मताबलाद् धर्मानधिकरणतया काल: सिध्यन्निदानीं कालातिरिक्त: प्रलयरूप: सिध्यति।

एवं महाप्रलयसिद्धाविदानीं वर्त्तमानघटप्रतियोगिक: प्रागभाव: प्रागभावाधिकरणघटानधिकरणाधिकरण: प्रागभाववत्त्वात् पटप्रागभाववदिति

---

1. निरवयवि
2. जातित्वात्
3. विभुवृत्तित्वाबाधे
4. अभावकार्यत्वेन - नास्ति
5. कारण
6. मूर्त्तिद्रव्यसिद्धौ
7. धर्म
8. विष्णुपगृहीत
9. कार्यमात्रवृत्ति

अतीतप्रलयसिद्धौ पुनः सर्गस्य प्रत्यक्षत एव सिद्धिरिति वाच्यम्, उक्तप्रथमानुमानस्य ध्वंसत्वे व्यभिचारात्। न च कार्यपदं भावकार्यपरमिति वाच्यम्, मात्रपदवैय्यर्थ्यापत्तेः। न च तद् विना कृतं भाव[1]कार्यवृत्तिधर्मत्वादित्येव हेतुरिति वाच्यम्, तथापि कपालक्रियात्वादौ व्यभिचारात्। न च पार्थिव - [2]परमाणुः कार्यद्रव्यसमानकालीनतैतत्क्रियातिरिक्तक्रियावान् परमाणुत्वात् मनोवदित्यनुमानात् पक्षधर्मबलात्, कार्यद्रव्यसमानकालीनक्रियासिद्धौ अर्थात् कार्यद्रव्यानधिकरणकालरुपखण्डप्रलयसिद्धिरिति वाच्यम्, परमाणुनामेवा-सिद्धत्वेन पक्षाप्रसिद्धेः। प्रलयसिद्धौ परमाणुसिद्धिः। परमाणुसिद्धौ प्रलयसिद्धिरित्यन्योन्याश्रयाच्च। न च कार्यद्रव्यारम्भकवृत्तिपृथिवीत्वादिक-मनारब्धत्वसमानाधिकरणं द्रव्यविभाजकोपाधित्वादाकाशत्ववदित्यनुमानात् कपालादौ आरम्भकवृत्तिद्रव्यविभाजकोपाधेः अनारब्धत्वसामानाधिकरण्य-घटकतया निरवयवपरमाणुसिद्धिरिति [3]वाच्यम् प्रयोजकत्वात्, [4]स्पर्श-सामानाधिकरण्योपाधित्वाच्च। न च निरवद्यावयवावयविप्रसङ्गे [5]वाह्यावय-वारब्धकाविशेषत्रसरेणुचतुरणुक[6]योस्तुल्यपरमाणुत्वप्रसङ्गात् परमाण्वधिको-ऽयमवयविप्रसङ्गः इत्युक्तरीत्या निरवयवपरमाणुसिद्धिरिति वाच्यम्, [7]अवयवानां निविडशिथिलादिभेदेनावयविनामनन्तावयवारभ्यत्वाविशेषेऽपि परिमाण-तारतम्योपपत्तेः।

सृष्टिसंहारनिरूपणम्

तस्मात्प्रमाणाभावात्पृथिव्यादीनां द्वैविध्यमनुपपन्नमित्यतः सर्गाद्य-कालीनकार्यजनकत्वेन परमाणुसिद्धौ तेषां द्वैविध्यसिद्धिरित सर्गप्रलया-वुपपादयति-

1. घटप्रागभाव
2. परमाणुः - क मातृकायाम्
3. वाच्यम् - योगः
4. स्पर्शासामाना
5. बहुन्यावयवारि
6. रणुक्योपरिमाण - क मातृकायाम्
7. अवयवान्न

(मू) इहेदानीं चतुर्णां महाभूतानां सृष्टिसंहारविधिरुच्यते । ब्राह्मणे मानेन वर्षशतस्यान्ते वर्त्तमानस्य ब्रह्मणोऽपवर्गकाले संसारे खिन्नानां प्राणिनां निशि विश्रामार्थं सकलभुवनपतेर्महेश्वरस्य सञ्जीहीर्षासमकालं शरीरेन्द्रियमहाभूतोपनिबन्धकानां सर्वात्मगतानामदृष्टानां वृत्तिनिरोधे सति महेश्वरेच्छाऽऽत्माणुसंयोगजकर्मभ्यः शरीरेन्द्रियकारणाणुविभागेभ्यस्तत्संयोगनिवृत्तौ तेषामापरमाण्वन्तो विनाशः । तथा पृथिव्युदकज्वलनपवनानामपि महाभूतानामनेनैव क्रमेणोत्तरस्मिन्नुत्तरस्मिन् च सति पूर्वपूर्वस्य विनाशः । ततः प्रविभक्ताः परमाणवोऽवतिष्ठन्ते, धर्माधर्मसंस्कारानुविद्धा चात्मानस्तावन्तमेव कालम् ।

चतुर्णामिति - प्राञ्चस्तु ननु अवयवा अवयविनमारभन्त इति विवक्षितविवेकेनोपपादितम् । तत्र किमेतेऽवच्छेदेनारभन्ते ? उत विच्छेदोऽस्तीत्याशङ्क्य प्रलये विच्छेदायारभ्य इति प्रलयं व्युत्पादयन् प्रसङ्गात् सर्गमपि व्युत्पादयति - चतुर्णामिति । तत्र प्रजये विप्रतिपत्तिः । कालत्वमदृष्टत्वव्याप्यम्, नवेति महाप्रलये । जन्यद्रव्यवत्त्वं न वेति खण्डप्रलये । जन्यभावानधिकरणकालत्वं महाप्रलयत्वम् । जन्यद्रव्यानधिकरणकालत्वं खण्डप्रलयत्वम् । महाप्रलये माने तु कालत्वं प्रतियोगिवैय्यधिकरण्यावच्छेदकावच्छिन्नादृष्टात्यन्ताभाववद्वृत्तिधर्मत्वादाकाशवदिति तत्र मानम् अदृष्टानधिकरणकालस्य महाप्रलयत्वात् न चात्मत्वे व्यभिचारः । तत्रापि मुक्तिदशायां साध्यसत्त्वात् । न च यस्यात्मनः कदाचिदपि न मुक्तिस्तदात्मत्वे व्यभिचार इति वाच्यम्, मुक्त्यर्थप्रवृत्त्यनुपपत्तिभयेन सांसार्य्येकस्वभावस्यात्मनोऽभावात् । खण्डप्रलयेऽदृष्टपदस्थाने जन्यद्रव्यपदे प्रत्यक्षे इदमेव बोध्यम् । अतीतप्रलये तु कालकपालाऽन्यावृति[1]घटप्रागभावघटा-

1. घटप्रागभावः - नास्ति - क मातृकायाम्

नधिकरणाऽधिकरणः प्रागभाववत्त्वाद्[1]घटप्रागभाववत्। इदानीमुत्पन्नघटध्वंसं पक्षीकृत्यध्वंसत्वहेतुना घटानधिकरणाऽधिकरणत्वसाधने चागतप्रलय-सिद्धिरिति। सर्वत्र चानुकूलतर्कतयाऽत्रागमो बोध्यः। ग्रन्थकारस्य प्रलयानन्तरं सृष्ट्यभिघातादद्दृष्टानधिकरणत्वे कालस्य मानं नास्तीति महाप्रलयादनिष्प्रमाणिक इत्याशयो लक्ष्यते। [2]तत्तु नाचार्यपदानां सम्मतम्। चतुर्णां महाभूतानां पृथिव्यप्तेजोवायूनां सृष्टिप्रलयो विधिः [3]प्रकारः। द्व्यणुकाद्यप्रक्रमेण सृष्टिः। प्रलयस्तु क्रियाजनितावयवविभागादिद्वारेण परमाणुपर्य्यन्तं कार्यद्रव्याणां नाश इति यावत्। वाह्येति-

चतुर्युगसहस्रन्तु ब्रह्मणो दिनमुच्यते।
रात्रिः चैतावती तस्य ताभ्यां पक्षविकल्पने॥

इत्यागमावकलितपरिमाणानां वर्षाणां [4]शतस्यान्ते वर्त्तमानस्य ब्रह्मण इति। यदि जीवानामेकः क्वचिदतिशयिततपोविशेषादिना [5]समुन्मिलिताशेषकलुषो भगवदनुग्रहादतिविमलमनसो मुक्त्यर्थं ब्रह्मशरीरं गृह्णाति। ब्रह्मशरीरस्य चरमशरीरत्वेन तेन विना मुक्त्यभावात्। ब्रह्मैव भूत्वा [6]उपवृज्यत इत्यागमात्। इति मतं तस्यापवर्गकाले मुक्तिकाल इत्यर्थः।

यदि पुनर्जीवविशेषाणामदृष्टविशेषारब्धेषु [7]ब्रह्मादिशरीरेषु परमेश्वरो 'भूतावेशन्यायेन' प्रविश्य सृष्ट्यादिकं सम्प्रदायप्रवृत्तिञ्च करोतीति मतम्, तदा तस्यापवर्गकाले तदावेशत्यागमकाल इत्यर्थः। संसारे जीवनमरणनरकादि-भोगसन्तानः। निशावन्निशातेजोऽभाव[8]वत्त्वादिसाधर्म्ये प्रलयस्तत्र विश्रामार्थम्। प्राणीनां शरीरप्राणजनकदृष्टवतां तत्तद्दुःखाद्यनुभवनिवृत्त्यर्थम्। सकलभुवनापत्तेः चतुर्दशानामप्यागमसिद्धानां भुवनानामधिपत्तेः। अन्ये हि शेषादयो भुवनैकदशापत्तयः महेश्वरस्याप्रतिहतसर्वविषयकेच्छस्य।

---

1. पटप्रागभावत्
2. तत्तुनागर्यपादानाम्मतम्।
3. प्रकाशः
4. शतशान्ते
5. समुन्मूलिताशेष
6. पवृज्यत
7. ब्रह्मौशरीरेषु
8. भाववत्यादिसाधर्म्येण

संजीहीर्षेति - जन्यद्रव्यमात्रप्रतियोगिक ध्वंसविषयेच्छा। यावन्ति जन्यद्रव्याणि [1]नश्यन्त्येवाकारकै:। यद्यपि भगवदिच्छा नित्या सर्वविषयिण्वेकैवेति, न तु सञ्जीहीर्षादिकृतो वास्तवो भेद:, तथापि संहारसामग्रीसमवहितत्वादिना औपाधिकाभेदो द्रष्टव्य:। तेन सञ्जीहीर्षासमकालं भगवदिच्छाया: संहारजनकसामग्रीसमवहितत्वोपाधानसमनन्तरमित्यर्थ:। महाभूतपदेन विषयपरिग्रह: तज्जन्यज्ञानमित्यर्थ:। सर्वात्मगतानां सर्वेषु जीवात्मसु गतानां समवेतानामदृष्टानां विहितनिषिद्धक्रियाजन्यसुखदु:खजनकव्यापाराणां वृत्तिनिरोधे सति कार्योत्पत्तिसामर्थ्यप्रतिरोधे तत्प्रतिरोधे च साम्ग्र्यभावं एव निमित्तमिति द्रष्टव्यम्।

महेश्वरेच्छा जनितो च आत्माणुसंयोगतज्जनितकर्मभ्य इत्यर्थ:। ईश्वरेच्छा जन्यमात्रं प्रतिहेतुत्वप्रतिपादनार्थं महेश्वरेति। नन्वात्माणुसंयोगो न कर्महेतुव्यतिरेकसहचाराभावात्, अवयविनि सदाकर्मोत्पत्तिप्रसङ्गात्, आकाशादिसंयोगसाधारण्येन विनिगमनविरहाच्चेति चेत्। न। आत्मपदेनादृष्टाविशेषोपलक्षितात्मनो विवक्षितत्वात्, जन्यमात्रं प्रति अदृष्टवदात्मसंयोगस्य व्यतिरेकादिसहचारबलेनापि हेतुत्वात्। [2]आकाशादिसंयोगस्य दृष्टासमानाधिकरणत्वेनाहेतुत्वाद् वस्तुतस्तु आत्मपदेन परमेश्वरस्य परिग्रह:। प्रयत्नवदात्मसंयोगस्य जन्यमात्रं प्रति हेतुत्वात्। प्रयत्नवदात्मसंयोगस्तु न तादृशसंसार्य्यात्मसंयोगस्तेषामा[3]नन्त्यत्वात्। अणुवादावयवमात्रपरम्। अत्र तु आत्माणुसंयोगस्य सार्वकालीनत्वेन सर्वदा तादृशकर्मोत्पत्तेरदृष्टविशेषो नियामको वक्तव्य:। कर्मणश्च संयोगजन्यत्वदर्शनं संयोगजन्यकर्मण: एवारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वमिति व्युत्पादनाय। शरीरेन्द्रिययो: कारणानित्येऽभाव: साक्षात्परम्परया वा आरम्भका अवयवविशेषास्तेषां विभागेभ्य: संयोगनिवृत्तावारम्भकसंयोगनिवृत्तावित्यर्थ:। तेन तेषां शरीरेन्द्रियकारणानां परमाण्वन्तं

1. नश्यन्त्येमाकारकंत्यर्थ: - क मातृकायाम्
2. आकाशादिसंयोगस्य दृष्टासमानाधिकरणत्वेनाहेतुत्वात्। नास्ति - क मातृकायाम्
3. अयत्नत्वात्।

परमाणुपर्य्यन्तं तादृशार्थशरीरवाची, आङ्मर्य्यादार्थम्। शरीरेन्द्रियाणां परम्परारम्भका परमाणवोऽवतिष्टन्तेऽन्ये साक्षात्परम्परारम्भकाः, सर्वेऽवयवाः-नश्यन्तीत्यर्थः।

शरीरेन्द्रिययोः परमाणुपर्य्यन्तं विनाशमुक्त्वा विषयाणामपि तादृश-विनाशमाह - **तथेति**। तथा तेन क्रमेणात्माणुसंयोगादिक्रमेण पृथिव्युदकज्वल-नपवनानामिति विषयोपलक्षणम्। एतेषामपि द्व्यणुकादिक्रमेणौत्पत्तिरवय-वविभागादिक्रमेण विनाशः।

उत्तरस्मिन्निति। जलज्वलनपवनेषु सत्सु [1]पृथिव्यार्विनाशः ज्वलनपवनयोः सतो जलस्य पवने च सति तेजस इत्यर्थः। [2]अयं क्रमः आगमानुसारेण बोद्धव्यः। यद्वा उत्तरस्मिन् कपालादौ सति घटादेर्नाशो घटाद्यपेक्षया कपालानामुत्तरत्वमधिककालत्वेन। एवं कपालिकादौ च सति एवं कपालादेरित्यादिक्रमेण परमाणौ च सति द्व्यणुकस्य नाश इत्यादिक्रमेणेत्यर्थः। [3]अत्र प्रत्यक्षमेव मानमिति द्रष्टव्यम्।

ननु पूर्वावस्थितकार्यद्रव्यनाशेऽपि परमाणुसंयोगात् द्व्यणुकाद्यत्पत्तौ च न प्रलयसिद्धिरत आह - **तत इति**। द्व्यणुकादिक्रमेणारब्धस्य कार्यद्रव्यस्य नाशे सतीत्यर्थः। प्रविभक्ता आरम्भकसंयोगरहिता इत्यर्थः।

ननु तदानीमपि परमाणूनां क्रियात्वात् कथं नारम्भकसंयोगोत्पत्तिरिति। न च तदानीं क्रियाभावान्न संयोग इति वाच्यम्, कालावच्छेदतया परमाणु-क्रियायास्तदानीम[4]वश्यमभ्युपगमात्। अन्यथा प्रलयस्य शतवर्षपरिमितत्वानु-पपत्तौ तावन्तं कालमित्यस्यात्यनुपपत्तेः। न च प्रलयहेतुता दृष्टेन प्रतिबन्धान्न संयोग इति वाच्यम्, प्रलयस्य भोगतत्साधनेतरत्वेन तद्हेत्वदृष्टाभावात्। न च कालविशेष एव तत्र प्रतिबन्धक इति वाच्यम्, साधारणकारणस्य तस्य प्रतिबन्धकत्वायोगात्। तस्मात् कथं न तत्र संयोगोत्पत्तिः इति चेत्। न। विलक्षणक्रियमाणानामेव तादृशसंयोगहेतुत्वेन तदानीं तादृशक्रियायाः अभावेन

---

1. पृथिव्यविनाश
2. रक्तमतागमानुसारेण।.
3. अत्र प्रत्यीमेव मानमिति द्रष्टव्यम् - योगः।
4. अद्‌भूतरूपत्वात्।

संयोगाभावात्। क्रियायां वैलक्षण्यञ्च जातिविशेष:। ब्रह्माभिधानादिकमपि कर्ममात्रे हेतु:। प्रलये च ब्रह्मणस्तादृशसंयोगविशेषहेत्वभिधानाद्यभावाच्च न तादृशसंयोगोत्पत्तिरित्यपि केचित्।

किं परमाणव एवतिष्टन्ते उताऽन्येऽपीति केचिदित्याशङ्क्य आह- धर्मेति। अनुविद्धा: समवायिन:। आत्मपदमाकाशकालादीनामप्युपलक्षणम्। जन्या अपि पृथिवीविशेषगुणा: पाकजा: प्रलये निष्टन्त्येव, तद्विनाश-काग्निसंयोगस्य तदानीमभावात्। अन्यथा प्रलये पार्थिवपरमाणूनां गन्धाद्यभाववत्त्वे सर्गादौ तदारब्धकार्याणामगन्धादिप्रसङ्गात्। वस्तुतस्तु प्रलये पाकजगुणानामभावेऽपि न क्षति:। सर्गादौ तैजस त्रसरेण्वादिसम्बन्धेन तत्र रूपोत्पत्ते: सुकरत्वात् कालावच्छेद्यतया परमाणुक्रियाऽपि तत्र तिष्टतीति द्रष्टव्यम्।

तावन्तं कालमिति - ब्राह्मेण मानेन शतवर्षपर्य्यन्तमित्यर्थ:।

प्रलये क्रममुक्त्वा सृष्टिक्रममाह -

(मू) तत: पुन: प्राणिनां भोगभूतये महेश्वरस्य सिसृक्षा-नन्तरं सर्वात्मगतवृत्तिलब्धादृष्टापेक्षेभ्यस्तत्संयोगेभ्य: पवन-परमाणुषु कर्मोत्पत्तौ तेषां पूर्वदिशा परस्परसंयोगेभ्यो द्व्यणु-कादिप्रक्रमेण महान् वायु:समुत्पन्नो नभसि दोधूयमानस्तिष्टति। तदनन्तरं तस्मिन्नेवाप्येभ्य: परमाणुभ्य: तेनैव क्रमेण महान् सलिल-निधिस्त्पन्न: पोप्लूयमान तिष्टति। तदनन्तरं तस्मिन्नेव जलनिधौ पार्थिवेभ्य: परमाणुभ्यो महापृथिवी समुत्पन्नासंहताऽवतिष्टते। तदनन्तरं तस्मिन्नेव महादधौ तैजसेभ्योऽणुभ्यो द्व्यणुकादि-प्रक्रमेणोत्पन्नो महास्तेजोराशिर्देदीप्यमानस्तिष्टति। एवं समु-त्पन्नेषु चतुर्षु महाभूतेषु महेश्वरस्याभिध्यानमात्रात् तैजसेभ्यो-ऽणुभ्य: पार्थिवपरमाणुसहितेभ्यो महदण्डमुपद्यते। तस्मिन्

चतुर्वदनकमलं सर्वलोकपितामहं ब्रह्मणं सकलभुवनसहित-मुत्पाद्य प्रजासर्गे विनियुङ्क्ते । स च महेश्वरेण विनियुक्तो ब्रह्माण्डा-तिशयज्ञानवैराग्यैश्वर्य्यसम्पन्नः प्राणिनां कर्मविपाकं विदित्वा कर्मानुरुपज्ञानभोगायुषः सुतान् प्रजापतीन् मानसान् मनुर्देवर्षि-पितृगणान् मुखबाहुरूपादतश्चतुरो वर्णान्, अन्यानि चोच्चा-वचानि च भूतानि सृष्ट्वा आशयानुरूपैर्धर्मज्ञान वैराग्यैश्वर्य्यैः संयोजयति इति ।

ततः पुनरिति यावज्जन्यद्रव्यनाशानन्तरं सृष्टिप्रलययोरविच्छेदेन सातत्यसूचनार्थं ततः शब्दः ।प्राणिनां ज्ञानजनकप्राणशरीरसंयोगजनकादृष्टवता-मित्यर्थः । किमर्थं पुनः सृष्ट्युत्पत्तिरत आह - भोगभूतय इति । भोगत्वं नाम ईश्वरगुणदोषावृत्तियोग्यात्मविशेषगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमद्विशेष-साक्षात्कारत्वम्, विषयशरीरसंयोगविशेषजन्ययोग्यात्मविशेषगुणविषयक-साक्षात्कारत्वम्वा । साक्षात्कारश्च विषयजन्यो विवक्षितः, तेन नातीतसुखादि-साक्षात्कारे योगजादिप्रत्त्यासत्त्यादिजन्येऽतिव्याप्तिर्न वाननुगमादिदोषः । यत्तु स्वसमानकालीनस्वसमानाधिकरणसाक्षात्कारविषयताव्याप्यजातिमद्विषयक-साक्षात्कारत्वं भोगत्वमिति । तन्न । योग्यात्मविशेषगुणानां यौगपद्याभावेन सुखसमानकालीनसुखसाक्षात्काराभावेन लक्षणस्यासम्भवात् । अनुगतविषय-तायां मानाभावाच्चेति दिक् ।

एतादृशस्य निष्पत्तये महेश्वरस्य सिसृक्षानन्तरं महेश्वरेच्छायाः सृष्टिजनकसामग्रीसमवधानानन्तरं सर्वात्मगतानि सर्वेषु संसार्य्यात्मसुखसमवेतानि वृत्तिलब्धानि दृष्टसामग्रीसमवधानेन कार्योत्पत्ति[1]सामर्थ्यानि यान्यदृष्टानि, तदपेक्षेभ्यस्तत्सहकृतेभ्यः तत्संयोगेभ्यः आत्मपरमाणुसंयोगेभ्यः आगमानुसारेण जन्यपवनोत्पत्तिपूर्विकां सृष्टिमाह - पवनपरमाणुष्विति । तेषां पवनपरमाणूनां

1. सामर्थ्यानित्यान्वयान्थदृष्टानि - क मातृकायाम्

परस्परमारम्भकसंयोगे सति तेभ्यो द्व्यणुकमादिर्यस्य तेन क्रमेण महान् वायुः अवयवबहुसंख्याजन्यमहत्त्ववान्।

तदा दोधूयमान इति। द्रव्यान्तरसम्बन्धाभावे[1]नाप्रतिहतवायुत्वनियत तिर्यग्गमनविशेषवान्। तदनन्तरं वायूत्पत्त्यनन्तरं तस्मिन् महति वायौ तस्य स्पर्शवत्त्वे तावत्त्वेन पतनप्रतिबन्धकतयाऽधिकरणसम्भवात्तत्र सलिलनिधि-रुत्पन्नस्तिष्ठति इत्यन्वयः। तेनैव क्रमेण द्व्यणुकादिक्रमेण पोप्लूयमानः [2]अप्रतिहतवायुवशेन निरन्तरनानाविधक्रियावानित्यर्थः।

पृथिवीसृष्टेः पूर्वमपां सृष्टि। 'अप एव ससर्जादावि'त्यागमात्। अपामपि निराकारतया स्रष्टुमशक्यत्वात्तदुत्पत्तिसिद्ध्यर्थं पुनः वायोः प्रथमसृष्टिः। तस्मिन्नेव सलिलनिधावेव संहतानिविडावयवसंयोगवती। महोदधिग्रहणं[3]पृथिव्यधिकरण-त्वनिरासार्थं देदीप्यमान इति। अभिभवकान्तराभावादत्यन्तं दीप्तमित्यर्थः।

एवमुक्तक्रमेणाभिधानसङ्कल्पः। तदानीं ब्रह्माण्डं जायतामित्याकारः। यद्यपि भगवदिच्छाया निष्प्रकारकत्वादीदृशाकारत्वं न सम्भवति, तथापि ब्रह्माण्डजनकसामग्रीसमवधानमेव सङ्कल्पे विशेषो वक्तव्यः। मात्रपदेन शरीरव्यापारादिव्युदासः। तथा च भगवान् सङ्कल्पविशेषादेव निर्मिमीते, न च कुलालादिवच्छरीरव्यापारेणेत्यर्थः। तेजसेभ्यः तेजः स्वरूपेभ्यः पार्थिवपरमाणुसहितेभ्य उपष्टम्भकतया पार्थिवपरमाणुसहितेभ्यः, न तु सहकारितया विजातीयानामनारम्भकत्वात् एतेन ब्रह्माण्डस्य सुवर्णमयत्वमुक्तम्। ''तद्दण्डमभवद् द्वैत'' मित्यागमात् पार्थिवोपष्टम्भतेजोभागस्य [4]सुवर्णत्वात्।

तस्मिन्निति ब्रह्माण्डे वदनानि कमलानीव वदनकमलानि, चत्वारि वदनकमलानि। यस्य सस्तत्पुरूषः चाभिबहुब्रीहिः। सर्वस्य लोकस्य पितामहं जनकम्। यद्यपि पितामहशब्दो जनकाजनकवाची साक्षाज्जनकवचनः ब्रह्मार्च्वनसकलस्य जनकजनकः साक्षात्तज्जन्यानां जनकाजनकात्मासम्भवात्,

1. सम्बन्धाभावेनाप्रतिहतं -
2. प्रतिहत --
3. पृथिव्यधिकरणत्वानिरासार्थं।
4. स्वर्णत्वात् - क मातृकायाम्

तथापि पितामहपदं लक्षणया साक्षात्परम्परासाधारणजनकमात्रपरम्, पातालादिभिरधोभुवनैः स्वर्गादिभिरूर्ध्वभूवनैः सहितमुपहितं ब्रह्मणं प्रजानां नियुङ्क्ते।

प्रजासृजेति। प्रजासर्गविषयिणीमाज्ञां ददातीत्यर्थः। यद्यपि भगवतो महेश्वरस्य शरीराद्यभावादाज्ञाज्ञानं न सम्भवति, तथापि सर्गादिजनक-सर्गादिसमवहितभगवदिच्छेव नियोगपदेन विवक्षिता। अत्र ब्रह्मणः संसारिविशेषत्वेन तददृष्टविशेषवशेन तस्य तादृशशरीरोत्पत्तेस्तस्य तत्र तज्ज्ञानित्वाद् वैराग्यादिकमुपपादनीयम्। यदा तु ईश्वर एव ब्रह्मेति मतम्, तदा तादृशब्रह्मशरीरं सर्वेषां जीवानामदृष्टैराररम्भ्यते। तत्र च भूतावेशन्यायेन परमेश्वरस्यावेशस्तत्तत्कार्यानुरोधेन तावत्कालपर्य्यन्तम्। न च तच्छरीरस्य [1]पित्राद्यदृष्टारब्धत्वेऽपि तत्र पित्रादीनां भोगाभावेन तददृष्टारब्धस्य भोगेऽप्रयोजकत्वात्, तदीयत्वस्य स्वरूपसम्बन्धविशेषस्य तत्र प्रयोजकत्वाच्च। तत्र चेश्वरस्यावेशेन न जीवित्वमिति न तत्र जीवानां भोगः। न च तदीयशरीरत्वावच्छिन्नं प्रति तदीयादृष्टस्य हेतुत्वात्कथमन्यदृष्टेरन्यदीयशरीरारम्भ इति वाच्यम्, अन्यथाऽनुपपत्त्या तादृशव्याप्तेरीश्वरानाविष्टशरीरविषयत्वात्।

यत्तु ईश्वरस्य ब्रह्मशरीरग्रहणञ्च शरीरं विना भूतल इत्यादि सम्प्रदायप्रवृत्त्यन्यथानुपपत्त्या कल्पनीयम्। एवं चाद्यशब्दव्यवहारानुरोधार्थं प्रयोज्यप्रयोजकशरीरद्वयेऽपि परमेश्वरावेशः कल्पनीयः। एवञ्च शरीरमात्रं साध्यते, तादृश[2]वद्विरचितार्थमपि भगवतो ब्रह्मादिशरीरपरिग्रह इति द्रष्टव्यम्। ईश्वरेण नियुक्तस्तादृशसामग्रीसमवहितेश्वरेच्छोपहितो ब्रह्मानुपदनिरुक्तः संसारिविशेषः। परिगृहीततादृशब्रह्मशरीरेश्वरो वा ज्ञानसातिशयित्वं योगजधर्मसाचिव्यात् सर्वविषयत्वं पक्षे। अपरत्र च स्वत एव सर्वविषयत्वं वैराग्यञ्च भोगेच्छाविरहः। तस्य चातिशयत्वं यावद्व्यवहारकालमनुवर्त्तमानत्वम्। ऐश्वर्य्यमप्रति-हतेच्छात्वम्। तत्रापीच्छायाः सर्वविषयकत्वमेवातिशयः यदीयोपादानादि-

1. जीवादृष्टारब्दत्वे जीवानां भोग।पत्तेरिति पुत्रादिशरीरस्य - योगः।
2. वेदविरचनार्थमपि

ज्ञानवन्न स्यात्; तत्रैव कर्त्ता न स्यादिति तस्य सर्वविषयकत्वमावश्यकत्वम् । यदि विरक्तो न स्यादिति स्वस्य भोगार्थमन्यथाऽन्यदपि कुर्य्यात् । यदपीश्वरो न स्यात्, तदेच्छाव्यापारेच्छाव्याघातात्तथेच्छुरपि न शक्नुयादिति त्रितयमप्यपेक्षितम् ।

प्राणिनां प्राणसम्बन्धभोग्यानां कर्मणां तज्जन्यदृष्टानाम् । विपाकं विविधं पाकं तत्तत्फलानुकूलत्वम् । भोग: निरुक्त:, आयु: जीवितकाल: । मानसान् सूतान् प्रजापतीन्, मानसान् अयोनिजान् प्रजापतीन्, नियतप्रजास्रष्टॄन् दक्षवान् । मनून् नियतधर्मप्रवक्तॄन् विवस्वताद् देवादीनिन्द्रियादीन्, देवत्वं न हविर्भोक्तृत्वम्, हवि: इतीष्टस्य देवतोद्देश्येन दीयमानद्रव्यरूपत्वेनान्योन्याश्रयात् । किन्तु चतुर्थं तपनोद्देश्यत्वम् । उद्देश्यत्वञ्च तत्स्वरूपयोग्यता । ते नश्यन्ति । होमादौ नष्टेत्यादावव्याप्ति: ।एवञ्च यद्यपि पितॄणामपि देवत्वं भवत्येव, तथा स्वधोद्देश्यत्वं रूपोपाधिभेदात् पृथङ्निर्देश: । ऋषित्वं न प्रथमवेदाध्येतृत्वं स्वर्गानन्तर-मुत्पन्नानामनृषित्वापत्ते: । किन्तु शापानुग्रहादिसमर्थप्रभावविशेषवत्त्वम् । ऋषयश्च गौतमभरद्वाजविशिष्टप्रभृतय: । गणशब्द: प्रत्येकमभिसम्बध्यते ।

चतुरो वर्णान् ब्राह्मणक्षत्रियवैश्यशूद्रान् यथाक्रमं मुखबाहूरुपादत: उत्पाद्य 'ब्राह्मणोऽस्य मुखमासीदित्यागमानुसारेण बोध्यम्, ननु ब्राह्मणत्वादे: विशुद्धमातृपितृयोनिजत्वादिकमेव व्यञ्जकमत एव । तज्ज्ञानं विना तादृशव्यक्तीन्द्रियसन्निकर्षेऽपि न तस्य प्रत्यक्षमिति तादृशाभिव्यञ्जकस्याद्य-ब्राह्मणेऽभावात् कथं तस्य ब्राह्मणत्वम् ? न चापरविषयो ब्राह्मणत्वादेरभिव्यञ्जक: अध्ययनादीनां [1]क्षत्रियादिसाधारण्यात् । न च शमदमतपश्चेत्यादिना निरूक्ताब्राह्मणत्वसमनियतापरिविशेषास्तस्याभिव्यञ्जका इति वाच्यम्, अव्यवस्थापत्ते:, विशुद्धमातृपितृयोनिजज्ञानवतस्तादृशाचारविशेषाज्ञानेऽपि ब्राह्मणत्वादिप्रत्यक्षत्वाच्च । न चाद्यब्राह्मण इति वाच्यम्, तस्य ब्राह्मणत्वे तदुत्पन्नानामन्येषामत्यब्राह्मणत्वापत्ते:, उत्पाद्यस्योत्पादकसजातीयत्वानियमात्, 'ब्राह्मणोऽस्ये'त्यादिश्रुतिविरोधाच्च । तस्माद् ब्राह्मणत्वसमनियताभि-व्यञ्जकाभावात् कथमाद्यस्य ब्राह्मणत्वमिति चेत् । न । गौरवेण व्यभिचारेण तादृशमातृपितृजन्यत्वस्याभिव्यञ्जकत्वात्, विशुद्धत्वस्य निर्वक्तुमशक्यत्वाच्च ।

1. यन्नित्यादिसाधारण्यात् ।

यत्तुक्तमुत्पादस्योत्पादकसजातीयत्वनियम इति चेन्न। सङ्करजातानामपि पञ्चमयुगादौ जात्योत्कर्षस्मरणात्। तथाहि-

"जात्योत्कर्षे युगे ज्ञेयः पञ्चमे सप्तमेऽपि वा।

व्यत्यये कर्मणा साम्यं पूर्ववच्चाधारोत्तरं इति।

किञ्च ब्राह्मणत्वं न जाति, विश्वामित्रत्वक्षत्रियत्वादिना साङ्कर्य्यात्। तथा च नियतव्यञ्जकाभावेऽपि न क्षतिः। वस्तुतस्तु अदृष्टविशेषोपनिवद्धभूत-विशेषजन्यमेव जातिरूपस्याखण्डोपाधिरूपस्य ब्राह्मणत्वादेरभिव्यञ्जकम्। तस्य च [1]विशुद्धमातृपितृजन्यस्यैवोपदेशादेव ज्ञानमिति न किञ्चिदुपपन्नम्। न चादृष्टविशेषस्य सर्वेषामतीन्द्रियत्वात्कथं तस्योपदेशो वेति वाच्यम्, आचारविशेषादीनां तस्यानुमानात्। अन्यथा विशुद्धत्वस्यातीन्द्रियत्वेन तादृशमातृपितृजन्यत्वस्यानुपदेशापत्तिरिति [2]तूह्यम्। तेनाद्यब्रा[3]ह्मणो विश्वमित्रादौ ब्राह्मणत्वमक्षतमिति द्रष्टव्यम्।

यथा गोप्रभववृश्चिक-[4]वृश्चिकप्रभववृश्चिकयोरेकमेव वृश्चिकत्वम्। एवमाद्यब्राह्मणप्रभवब्राह्मणयोः एकमेव ब्राह्मणत्वमिति। एतेन क्षत्रियत्वादिकं व्याख्यातम्। एभ्योऽतिरिक्तानि उच्चावच्चा निनानाजातिप्रभिन्नानि तिर्य्यग्रूपाणि भूतानि प्राणिनः सृष्ट्या उच्चावच्चानि स्वर्गनारकिरूपाणि उत्कृष्टापकृष्टरूपाणि वा। आशये फलपर्य्यन्तं तिष्टतीत्याशयः। संस्कारस्तदनुरूपैः संस्करादिभिः धर्मपदमधर्मादीनामुपलक्षणम्।

एतेन प्रलये सम्प्रदायविच्छेदे सर्वज्ञे न भगवता महेश्वरेण शरीरविशेषं परिग्रहणभूतानामनुकम्पया वेदः प्रणीयते, निरस्तसमस्तविभ्रमाशङ्केन तेन प्रणयनादाप्तोक्तत्वेन वेदस्य प्रामाण्यमिति 'तद्वचनादाम्नायस्य प्रामाण्य'मिति वैशेषिक सूत्रे उपपादितम्। अदृष्टोपेक्षावशाच्च विश्ववैचित्र्यस्याप्युपपत्तिः। एवञ्च प्रकृतेर्महदादिक्रमेण जगदुत्पद्यते ब्रह्मैव जगतः समवायिकारणं निमित्तकारणञ्च। अविधैव समवायिकारणमित्यादीनि ईश्वरो न कारणमित्यत्रैव प्राचीनैः प्रत्युक्तानीति संक्षेपः।

---

1. विशुद्धमानामपि - क मातृकायाम् 2. तुल्यम्। 3. विश्वामि ब्राह्मणे
4. वृश्चिकत्वम्। एवूद्यब्राह्मणप्रभवब्राह्मणयोरेकमेव। नास्ति - क मातृकायाम्

ननु स्तां त्रिसृष्टिप्रलयौ। पञ्च तु महेश्वरेच्छानुरोधेन सृष्ट्यादेरुत्पत्तिरिति न मृष्यामहे प्रमाणाभावेन तस्याऽसिद्धेः, कार्यमात्रस्यादृष्टसापेक्षेभ्य एवं सिद्धिसम्भवेन तत्रापेक्षयाभावाच्च। तथाहि विप्रतिपत्तयः-

(1) कार्यत्वं स्वकर्तृकत्वव्याप्यं न वा (2) कर्त्तृत्वं शरीरमात्रवृत्तिर्न वा (3) आत्मत्वं दृष्टान्ताभावसमानाधिकरणं न वा (4) ज्ञानत्वं जन्यमात्रवृत्तिर्न वेत्यादिकाः।

ननु क्षित्यादीनां कार्यत्वेन सकर्त्तृकत्वानुमानमस्मदादीनाञ्च तत्र कर्त्तृत्वबाधे परिशेषादीश्वरस्यैव कर्त्तृत्वमादाय पर्यवस्यतीति तदेव तत्र मानमिति चेत्, क्षित्यादिकत्वस्यैकस्याभावेन तत्पक्षीकृत्य सकर्त्तृकत्वस्य साधयितुमशक्यत्वात्। न च जन्यकृत्यजन्यपक्षः द्व्यणुकादीनामपि अदृष्टद्वारा अस्मदादिकृतिजन्यत्वेन तादृशस्य प्रसिद्धेः, जन्यात्मविशेषगुणशब्द-फुत्कारादीनामीश्वरकर्त्तृकारणामपक्षत्वे तत्र सन्धिग्धानैकान्तिकत्वाच्च, जन्यात्मविशेषगुणेष्वस्मदादीनां चिकीर्षाभावाच्छब्दादौ चोपादानप्रत्यक्षाभावेन चास्मदादीनामकर्त्तृकत्वाच्च। एवं च घटोत्पत्तिक्षणानन्तरोत्पत्तिके घटरूपे उपादानप्रत्यक्षाभावेन कुलालाकर्त्तृकत्वे तदीयकृतिजन्ये सन्दिग्धानैकान्तिकत्वाच्च। न च द्व्यणुकपक्षः परं प्रत्यसिद्धेः। न च क्षितिपक्षः, अङ्कुरादौ सन्दिग्धानैकान्तिकत्वात्, तावतापि सिषाधयिषतसर्वेश्वरासिद्धेश्च। न च साक्षात्कृतजन्यमेव विपक्षः क्षित्यादीनामप्यदृष्टद्वारा अस्मदादिकृतजन्यत्वेन साक्षात्कृतिजन्यत्वाभावात्। एतेनादृष्टद्वारा जन्यकृत्यजन्यं जन्यं पक्ष इति निरस्तम्, फुत्कारादीनामपेक्षत्वे तत्र सन्धिग्धानैकान्तिकापत्तेश्च।

किञ्च साध्यमपि सकर्त्तुकत्वं, किं कृतजन्यत्वमुत साक्षात्कृतिजन्यत्वम्। आद्येऽदृष्टद्वारा अस्मदादिकृतिसाध्यत्वादीनां सिद्धसाधनम्। द्वितीये दृष्टान्तासिद्धिः, घटादौ व्यभिचारश्च। नापि स्वजनककृतिसमानाधि-करणाऽसमवायिकारणकत्वं तत्। सामानाधिकरण्यञ्च समवायिविषयतान्यतर-प्रत्यासत्त्यैकं बोध्यम्। असिद्धेः नाप्यदृष्टाद्वारककृतिसाध्यत्वमेव तत्। अदृष्टस्यापीश्वरकृतिजन्यत्वात्तज्जन्यत्वेन न तद्व्यापारत्वसम्भवेन क्षित्यादेरपि

तादृशवृत्तिजन्यत्वाभावात् । किञ्चालौकिकेश्वरकल्पनापेक्षया लाघवेनास्मदादि-कृतेरपि क्षितिजनकत्वकल्पनान्तेऽसिद्धसाधनतापत्तेश्च । नाप्युपादानगोचरापरोक्ष ज्ञानचिकीर्षाकृतिमज्जन्यत्वं तत् । तथा चास्मदादेः क्षित्याद्युपादानज्ञानाद्यभावान्न तेन सिद्धसाधनमिति वाच्यम्, उपादानपदस्य यत्किञ्चिदुपादानपरत्वे तस्यैव सिद्धसाधनात् क्षित्याद्युपादानपरत्वेन दृष्टान्तासिद्धिः स्वत्वस्याननुगततया व्याप्त्यग्रहप्रसङ्गः । न चोपादानपदं सम्बन्धकशब्दयोः समभिव्याहत-तत्तदुपादानपरमित्योक्ताशेषदोषनिवृत्तिरिति वाच्यम्, शब्दस्थले तादृश-व्युत्पत्तिकल्पने नान्यत्र तदभावात् । न चोपादानज्ञानकार्ययोः । समवाय-विषयतान्यतरघटितैकार्थप्रत्यासत्त्याकार्यकारणवशादन्योपादानज्ञानं नान्यत्र कार्ये जनकमिति नोक्तदोषापत्तिरिति वाच्यम्, इष्टसाधनत्वकृतिसाध्यत्वज्ञानयोरेव प्रवर्त्तकत्वेनोपादानप्रत्यक्षस्यापि हेतुत्वे मानाभावात् । किञ्च कार्यत्वं न कृतिसाध्यत्वम्, परंप्रत्यसिद्धेः । नापि प्रागभावप्रतियोगित्वम्, ध्वंसे व्यभिचारात् । न च तदनुकूलकृतिमत्त्वमेव कर्त्तृत्वं ध्वंसेऽस्मदादीनां कृतिमत्त्वमेव तदनुकूलकृत्तिमत्त्वादिति वाच्यम्, भारोद्वहनादिकञ्च कर्तुमशक्नुवति तदनुकूलकृतिमतिभारोद्वहनादि- कर्तृत्वापत्तेः । नापि तदुपहितकर्त्तृमत्त्वं कर्त्तृत्वम्, नान्तरोत्पत्तिके कर्त्तृत्वाभावात् । अतएवाबुद्धिपूर्वकोत्पन्नेन मयेदं कृतिमति [1]शिष्टव्यवहारः । न च भावत्वेन कार्यत्वं विशेषणीयम् । तेन वा ध्वंसे व्यभिचार इति वाच्यम्, शरीररूपादौ व्यभिचारात् । न च तस्यापि पक्षत्वान्न तत्र व्यभिचार इति वाच्यम्, साक्षाच्छरीरजन्यमेव पक्षत्वेन तस्य शरीरजन्यत्वेनापक्षत्वात् । एवं चादृष्टद्वारकजन्याजन्यस्य पक्षत्वेऽकृतिसाक्षात्कारे व्यभिचारः । न च तत्रापीश्वरकर्त्तृकत्वसत्वान्न व्यभिचार इति वाच्यम्, असिद्धेः । सिद्धौ वानुमानवैफल्यात्, सन्दिग्धानैकान्तिकत्वस्य दुर्वारत्वाच्च । किञ्च भावत्वं यदि यत्किञ्चिदभावव्यतिरिक्तभिन्नत्वम्, तदा ध्वंसे व्यभिचारः । अभावत्वावच्छिन्नप्रतियोगिताकान्योन्याभावत्व[2]विलक्षणे सिद्धिः । अभावत्वस्य स्वरूपसम्बन्धरूपत्वेन तद्व्यक्तिविश्रान्तत्वेन प्रतियोगितावच्छेदकत्वाभावात् ।

1. शिष्यव्यभिचारः ।

2. विवक्षिते सिद्धिः ।

किञ्च घटादौ कुलालादिव्यापारजन्यत्वग्रहेऽपि कुलालादिजन्यत्वे मानाभावाद् दृष्टान्ताऽसिद्धिश्च। [1]किञ्चात्र शरीरजन्यत्वस्योपाधित्वेन व्याप्यत्वेन व्याप्यत्वासिद्धिश्च। किञ्च [2]विवादपदमकर्त्तृकं शरीरजन्यत्वादित्यादिना प्रतिरोधः। किञ्च पक्षधर्मताबलान्नित्यसर्वविषयकज्ञानसिद्धिर्विवक्षिता। तत्र ज्ञानत्वमनित्यमात्रवृत्तिधर्मत्वाद् दूरत्ववत्। मदितरेऽसर्वज्ञाश्चेतनत्वा-दहमिवेत्यादिना प्रतिरोधः। किञ्च सिषाधयिषताशरीरकर्त्तृकत्वाभावेन कार्यत्वस्य दृष्टान्ते व्याप्तिग्रहेण विरोधश्च, कर्त्तुरनुपलम्भादबाधश्च।

न च परमेश्वरस्य परमाणुरूपमैव शरीरम्, तेन तस्य तद्द्वारा कर्त्तृतोपपत्तिः, [3]पाषाणाद्यन्तः प्रवेशोऽपि घटत इति वाच्यम्, शरीरत्वस्यान्त्यावयविमात्रवृत्तित्वेन परमाणोः शरीरत्वाभावात्, तस्मान्नानुमानं तत्र प्रमाणम्, नाप्युपमानम् - तस्य शक्तिमात्रविषयत्वात्। नाप्यागमः - विश्वतश्चक्षुरित्यादेः [4]मन्त्रत्वेनानुष्टेयार्थ-प्रकाशकत्वेन तस्य तात्पर्य्याभावात्, तस्मात्प्रमाणाभावान्नेश्वरसिद्धिः।

किञ्च ईश्वरस्य सापेक्षत्वेन तत्तत्कार्यकारित्वमुत तन्निरपेक्षत्वेन। आद्येऽदृष्टादेव तत्तत्कार्यसिद्धौ किमीश्वरेण; द्वितीये विश्ववैचित्र्यानुपपत्तिः। न च विश्ववैचित्र्यार्थमदृष्टापेक्षायामपि कार्यस्य कर्त्तुजन्यत्वनियमात्कर्त्तृत्वेन तत्सिद्धिरिति वाच्यम्, ध्वंसादेरिव कर्त्तारं विनापि क्षित्यादेः कार्यस्य कारणमात्रादेव सिद्धिसम्भवात्। तस्मात्प्रमाणप्रयोजनयोरभावात् नास्तीश्वरसिद्धिरिति चेत्; मैवम्। नित्यद्रव्याणि अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्य-साक्षात्कारविषयाणि कार्यात् कपालवदित्यनुमानान्नित्यद्रव्यविषयक-साक्षात्कारसिद्धावस्मदादीनां तादृशज्ञानाश्रयेश्वरसिद्धिः। एवमीश्वरसिद्धौ कार्यं कर्त्तृजन्यमेवेति नियमादित्यादावन्यस्य कर्त्तृत्वसिद्धिः। न च ध्वंसस्य कर्त्तारं विनाप्युत्पत्तिस्तथाक्षित्यादेरपि स्यादिति वाच्यम्, ध्वंसे चास्मदादीनां कर्त्तृत्वात्। ननु ध्वंसस्योपादानाभावेन तदुपादानप्रत्यक्षाभावात्कथं तत्रास्मदादेः कर्त्तृत्वमिति चेत्, तदुपहितकृत्यनुकूलज्ञानत्वस्यैव कर्त्तृत्वेनोपादानप्रत्यक्षस्य तद्घटकत्वा-

1. कि च --- विवक्षिता - नास्ति। 2. विदाध्यासितकर्तृकं
3. पाषणादान्तः 4. मन्त्रत्वेनानुष्टेयार्थप्रकाशकत्वेन - क मातृकायाम्

भावात्। अतएवायमनेन घटो ध्वंस इत्यबाधितोऽनुभवः सर्वेषाम्। स च साक्षात्कारो लाघवात् सर्वनित्यद्रव्यविषय एको विनिगमनाभावादनित्य-द्रव्यविषयोऽपीति सर्वविषयस्तस्य चोत्पादकविनाशसामग्रीकल्पने गौरवाच्च नित्यः। स च ज्ञानं शरीरजन्यमेवेति व्याप्तिः, अनुकूलतर्काभावेनागमादिविरोधेन च व्याप्तेरसिद्धेः। न च कर्त्ता शारीर्य्येवेति व्याप्तेः कथं शरीरं विना कर्त्तृत्वमिति चेत्, ज्ञानेच्छाकृतीनां ज्ञानकृत्योः कृत्तेरेव वा कर्त्तृत्वघटकत्त्वेन शरीरस्य कर्त्तृत्वनिर्वाहकत्वाभावेन तादृशव्याप्तेरसिद्धेः। कार्येह चात्र समवायसम्बन्धेन हेतुः, न च स्पर्शवत्त्वमुपाधिः। आत्मनि साध्यव्यापकत्वात्। न च विशेषगुणवद् द्रव्यत्वम्। कार्यपदेन कार्यद्रव्यस्य विवक्षणात्, तथा च साधनव्यापकत्वमिति नोपाधित्वम्।

किञ्च शाब्दप्रामाण्ये वक्तृयथार्थज्ञानस्य गुणत्वाभ्युपकगमाद् वेदजन्य-शाब्दबोधस्य प्रमात्वसिद्धये वक्तृत्वेन तादृशज्ञानवदीश्वरसिद्धिः। न चाऽध्यापका एव तत्र तादृशा इति वाच्यम्, तेषामतन्त्रत्वात्। मूर्खाध्यापकोच्चारितवेद-जन्यशाब्दबोधस्याप्रमात्वापत्तेश्च। एवं शुक्रोदीरितसम्बन्धादिवाक्यजन्य-प्रमायामपि परमेश्वरीययथार्थज्ञानमेव गुणः। एवञ्च [1]कूटलिङ्गकानुमितेः। [2]साध्यवतांशे प्रमाणत्वात्। प्रमात्वात्तत्रैव चानुमितिप्रामाण्यप्रयोजकं यथा लिङ्गवता ज्ञानस्यानुमानान्तरर्भावाद् भगवदीयेवेति तादृशज्ञानं तथा। एवं यत्र वस्तुतो वृक्षे वृक्षत्वसंशयानन्तरं कररेण्वादौ वृक्षत्वव्याप्यभ्रमवतः शाखादौ करादिभ्रमे पुरुषोऽन्यं वृक्षोऽयमिति निर्णयो जातः। ततो भ्रमसंशयोत्तर-प्रत्यक्षप्रमाविशेषे विशेषदर्शनप्रमायाः हेतुत्वात् पुरुषस्य तादृशविशेषदर्शनाभावाद् भगवदीयमेव तादृशज्ञानं गुण इति तत्तत्प्रमायाः गुणजन्यत्वानुरोधेन गुणत्वेन ईश्वरज्ञानसिद्धौ तदाश्रयेश्वरसिद्धिरित्याचार्यचरणाः।

एवञ्च न तु [3]विदाथ इतिमात्रज्ञानमित्यागमानुसारेण तस्य कार्यमात्रं प्रति कारणत्वसिद्धेः कार्यस्य सततोत्पत्तिप्रसङ्गवारणायादृष्टस्य कारणत्वं कल्पत इति

1. कूटलिङ्गथानुमितेः - क मातृकायाम्

2. साध्यवतांशे प्रमाणत्वात्।

3. विदाथपइमाजजान

न विश्ववैचित्र्यानुपपत्तिः। एवं यागादिना स्वर्गादिहेतुत्वमुपजीव्यतया कल्पमानदृष्टस्य जन्यमात्रकारणत्वं न विरुणद्धीति अदृष्टमिवेश्वरोऽपि जगद्हेतुः। तस्य च [1]निरूपाधिपारदुःखप्रहाणेच्छावतोऽपि तद्धर्मानुसारेण तादृश-स्वर्गनरकादिरूपफलदातृत्वमिति न वैधृत्यापत्तिः।

यत्तु मदितर इत्यादि तत्र यदि असर्वज्ञत्वं सर्वविषयकज्ञानाभाववत्त्वं तदाऽसिद्धिः। यदि लौकिकप्रत्यासत्तिजन्यसर्वविषयकज्ञानभाववत्त्वम्, तदा च नास्मदभिमतेश्वरविरोधः। किञ्चात्मत्त्वं नित्यविशेषगुणतद्वृत्ति द्रव्यत्व-साक्षादव्याप्यजातित्वादिना नित्यज्ञानसिद्धौ लाघवात् सर्वविषयत्वसिद्धिः। वस्तुतस्तु नानाशाखासु पठ्यमानाः सम्बादिन्यः श्रुतय एवानुकूलतर्का इति कृतसप्रयोजनशङ्केति निष्प्रत्यूहेश्वरसिद्धिरिति संक्षेपः।

आकाशनिरूपणम्

उद्देश्यक्रमप्राप्तावाकाशं निरूपयति-

(मू) आकाशकालदिशामेकैकत्वादपरजात्यभावे सति परिभाषिक्यः तिस्रः संज्ञा भवन्ति। आकाशः कालो दिगिति।

आकाशेति - [2]तुल्ययुक्तिकत्वेन कालदिशोरपि पारिभाषिकसंज्ञा-वत्त्वाद् ग्रन्थलाघवात्तयोरपि तत्रोपन्यासः। संज्ञा तु त्रिविधा। नैमित्तिकी, औपाधिकी पारिभाषिकी चेति। तत्र जातिपुरस्कारेणानेकव्यक्तिबोधिनी औपाधिकी, यथा भूतपश्वादि। एवं व्यक्तिमात्रबोधिनी संज्ञा पारिभाषिकी, यथा देवदत्ताकाशादि। संज्ञा च सङ्केतवत् प्रतिपादिकम्। क्वचित् संज्ञा चतुर्विधा, तत्र त्वधिका औपलक्षणिकी। तत्र जातिरूपप्रवृत्तिनिमित्तवती। प्रवृत्तिनिमित्तत्वञ्च वाच्यत्वे सति वाच्यवृतित्वे सति वाच्योपस्थित्यनुकूलत्वम्। शक्यावच्छेदकत्वञ्च शक्यतत्पदजन्यज्ञाने प्रवृत्तिनिमित्तत्वं प्रकारीभूयभासमानरूपत्वम्वा। [3]उपलक्षणबलीयसंज्ञा औपलक्षणिकी, उपलक्षणत्वञ्च अशक्यत्वे सति

1. निरुपाधिपारदुःख 2. तूह्ययुक्ति 3. उपलक्षणवती संज्ञा

शक्योपस्थित्यनुकूलत्वम् । यथा शब्दाश्रयत्वोपलक्षितेऽऽकाशे आकाशसंज्ञेति । उपलक्षणीभूतक्रियाविशेषद्वारेण व्यक्तिविशेषोपस्थित्यनुकूला संज्ञा औपाधिकी, यता पाकादिसंज्ञेति । प्रवृत्तिनिमित्तोपलक्षणाभावे प्रत्यक्षेणोपस्थिते व्यक्तिविशेषे यत्र सङ्केतः, सा पारिभाषिकी संज्ञेति । यथा चैत्रादिसंज्ञेति । [1]यच्चातुर्विध्यमुक्तं तद्भाष्यविरोधादनादेयम् ।

नन्वाकाशादिसंज्ञा कुतो न नैमित्तिकीत्यत आह - अपरजात्यभावादिति । अपरजातिर्द्रव्यत्वव्याप्यजातिः । तत्र हेतुमाह- एकैकत्वादिति । अनेकव्यक्ति-वृत्तेर्धर्मस्य जातित्वादित्यर्थः । तथा चाकाशत्वं न जातिरेकमात्रवृत्तित्वाद्एतद्घटत्ववत् तथा आकाशमात्रवृत्ते द्रव्यत्वव्याप्यजातेरभावादाकाशसंज्ञा न नैमित्तिकी । शब्दाश्रयत्वमष्टद्रव्यातिरिक्तद्रव्यत्वादेराकाशमात्रवृत्तेर्धर्मस्य सम्भवेऽपि तत्पुरस्कारेण नानाव्यक्तिबोधकत्वाभावान्नौपाधिकी । अत्र च समवायसम्बन्धेन शब्द एवाकाशपदप्रवृत्तिनिमित्तम्, न तु शब्दाश्रयत्वम् । अतएव शब्दाश्रयमाकाशमिति सहप्रयोगो नानुपपन्नः । एवं चाकाशपदात्परस्य त्वतलादेः प्रयोग उपपन्नः । शब्दस्यैव प्रकृत्यर्थतावच्छेदकत्वेन त्वतलादेस्तदर्थत्वोपपत्तेः । अतएव आकाशपदान्न निर्विकल्पकोपस्थितिः । यद्धर्मत्वेनोपस्थिते धर्मिणि यस्य पदस्य शक्तिग्रहस्तद्धर्मपुरस्कारेण तस्य पदस्य तद्धर्म्युपस्थापकत्वात् ।

एवञ्च शब्दाश्रयत्वस्याकाशपदवाच्यत्वाभ्युपगमेऽपि न काचित् क्षतिः । तथात्वेऽपि नैमित्तिकत्वाभावस्यैकव्यक्तिमात्रबोधकत्वेन सूपपाद्यत्वात् । न चाष्टद्रव्यातिरिक्तद्रव्यत्वादिभिः विनिगमनविरहान्नास्य तथात्वमिति वाच्यम्, शब्दस्य तदपेक्षया लाघवेन प्रवृत्तिनिवृत्तित्वसम्भवात् । एतेनाधुनिकसंज्ञेतिवत्सं-ज्ञात्वं पारिभाषिकत्वमिति कस्यचित्लक्षणमपास्तम् । आधुनिकसंज्ञताभावे-नाकाशादिसंज्ञायाः पारिभाषिकत्वेनोपपत्त्या भाष्यविरोधापत्तेः ।

प्राञ्चस्तु- आकाशपदे शब्दो वा प्रवृत्तिमिति निमित्तत्वम् । स प्रवृत्तिनिमित्तकत्वे पारिभाषिकत्वानुपपत्तेः । न च शब्दाश्रयत्वं प्रवृत्तिनिमित्तं विनिगमनविरहादष्टद्रव्यातिरिक्तद्रव्यत्वादीनामपि तथात्वात् । न च तदपि

1. तद्भाष्यविराधिना द्रव्यम् - क मातृकायाम्

गुरुत्वात् । [1]शक्तिग्रहोऽप्याकाशपदस्य धर्मिविनिर्मुक्ते धर्ममात्र एव तेनाकाशपदजन्याशब्दबोधेऽपि धर्ममात्रस्यैव [2]भानम् । न चैवं निर्विकल्पकापत्तिः । इन्द्रियस्यैवाकाशशब्दस्यापि निर्विकल्पकजनकत्वे क्षत्यभावात् । अत एव शब्दाश्रय आकाश इति सहप्रयोगोप्युपपद्यत इत्याहु: ।

तस्य द्रव्यत्वसिद्धये गुणानाह - तत्राकाशस्य गुणाः शब्दसंख्यापरिमाणपृथक्त्वसंयोगविभागाः । तत्र शब्दः प्रत्यक्षत्वे सति आकारणगुणपूर्वकत्वाद् अयावद्द्रव्यभावित्वाद् (आश्रया) दन्यत्रोपलब्धेश्च न स्पर्शवद्विशेषगुणः ।

तत्रेति । तासु आकाशकालदिक्षुः इत्यर्थः । आकाशस्य शब्दः संख्यादिपञ्चक चेति षड्गुणा इत्यर्थः । ननु शब्दादीनाकाशगुणत्वमसिद्धम् । प्रमाणाभावेनाकाशस्यैवाऽसिद्धेः । न च तत्र प्रत्यक्षं प्रमाणम्, अरुपिद्रव्यत्वेन बाह्यत्वेन च द्रव्यग्राहकाणां चक्षुस्त्वङ्मनसां तत्राऽप्रवृत्तेः । ननु इदमसिद्धम्, नीलमाकाशमिति सार्वलौकिकप्रत्ययेन तस्य नीलरुपवत्त्वाच्चाक्षुषत्वात् । अतएव इह पक्षी, नेह पक्षी, इहाऽऽलोकः, नेहाऽऽलोक इत्यादयोऽधिकरणत्वेनाकाशमवगाहमानाः प्रतीतय उत्पद्यन्ते । तस्मात् नीलरूपवदाकाशं चाक्षुषमिति न तस्याप्रामाणिकत्वमिति चेत् । मैवम् । नीलरूपस्य पृथिवीमात्रवृत्तित्वेनात्र तदसम्भवात् । न च तत्र मानाभाव इति वाच्यम्, अनन्यथासिद्धान्वव्यतिरेकानुविधानबलेन [3]पृथिवीत्वस्य तत्कारणतावच्छेदकत्वकल्पनाया एव प्रमात्वात् । [4]न च तस्य नित्यत्वात् तद्गुणस्यापि नीलस्य नित्यत्वं पृथिवीपरमाणुरूपेऽपि नित्यताप्रसङ्गात् । किंचाकाशस्य नीलरूपवत्त्वे सन्निहिताकाशेऽपि तत्प्रत्ययप्रसङ्गाच्च । न च प्रभामण्डलरूपेणाभिभवान्न तथा प्रत्यय इति वाच्यम्, तस्य व्यवहितेऽपि समानत्वात् ।

---

1. शान्तिग्रहे - क मातृकायाम्
2. भावनम्
3. पृथिवीत्वस्य - नास्ति क मातृकायाम्
4. न च तस्य नित्यत्वात् तद्गुणस्यापि नीलस्य नित्यत्वं पृथिवीपरमाणुरूपेऽपि नित्यताप्रसङ्गात् । - नास्ति - क मातृकायाम्

किञ्च रूपस्य स्पर्शसामानाधिकरण्यनियमेन तत्र स्पर्शप्रसङ्गश्च। न च तत्रानुभूतः स्पर्शः। [1]नियमस्योद्भूतगर्भत्वेनानुद्भूतस्य अप्रामाणिकत्वात्, निष्प्रयोजनत्वादप्रयोजकत्वाच्च। कथं तर्हि नीलमाकाशमिति चेत्, सुमेरूश्च ज्वलतीन्द्रनीलप्रभया गृह्यमाणनीलरूपस्य तत्रारोपात्तथाप्रत्यय इति प्राञ्च। तदनुपपन्नम्। गृह्यमाणारोपेऽधिष्टानप्रत्यक्षस्य हेतुत्वेन तदप्रत्यक्षतायां तदसिद्धेः। वस्तुतस्तु सूर्य्यमणिनीलरूपस्योपनीतेऽऽरोपात्तथाप्रत्ययः। न चैवं रूपान्तरस्यापि [2]स्मर्य्यमाणस्य तत्रोरोपापत्तिः। आरोपे सति निमित्तानुसरणं, न तु निमित्तमस्तीत्यारोप इति न्यायात्। अदृष्टादिविरहेण तादृशारोपासम्भवात्। अत एव सन्निहिताऽऽकाशेऽपि न तदारोपः।

प्रभामण्डलेऽकाशत्वारोपानन्तरं गृह्यमाणेन्द्रियनीलप्रभारूपस्य तत्रारोपान्नीलमाकाशमिति प्रत्यय इति त्वनन्तमिश्राः। इह[3] पक्षी आलोक इति प्रतीतयस्तु प्रभामण्डलमेवाधिकरणत्वेन विषयीकुर्वन्ति; नाकाशम्। प्रभाव्यक्तीनां भिन्नत्वाप्रभाविशेषे प्रभाविशेषस्याधिकरणत्वमिति इह प्रभेत्यादिप्रतीति। एवञ्च इह पक्षीत्यादौ प्रभामण्डलत्वेन प्रभामण्डलस्याधिकरणत्वेनोल्लेखात्। एतत् पक्ष्यधिकरणत्वेन भासमानप्रभामण्डलस्यान्यत्रगतावपि तथाप्रत्ययोपपत्तिः। तस्मान्न प्रत्यक्षमाकाशेऽप्रमाणम्। नानुमानम्, तस्यावृत्तित्वेन तन्नियत-लिङ्ग्यभावात्। न च शब्देन तदनुमानम्, तस्य विद्यमानाकाशादिगुणत्वात् न च तस्मादाकाशः [4]सम्भूतः इत्यागमात् सिद्धिरिति वाच्यम्, तस्य तत्परत्वात्। तत्परत्वे तदबलेन तस्य जन्यत्वापत्तेः।

तस्मात्प्रमाणाभावान्नास्त्याकाशमिति प्रत्यवस्थिते परिशेषाच्छब्द एव तत्र मानमिति दर्शयति- शब्द इत्यादिना; लिङ्गमित्यनेन वा। अत्र शब्दो न

1. नियमस्योद्भूतगर्भत्वेन अनुभूतस्य - क मातृकायाम्
2. स्मर्यमाणस्य तत्रारोपापत्तिः। आरोपे सति निमित्तानुसरणं, न तु निमित्तमस्तीत्यारोप इति न्यायात् - नास्ति।
3. तथा चारोपाधिष्टानस्य प्रभामन्डलस्य प्रत्यक्षत्वात् तत्र गृह्यमाणारोपेनानुपपन्न इति भावः।
4. समुद्भूतः,

समवायो न विशेष:, लौकिकप्रत्यक्षविषयत्वात् । न सामान्यमेकमात्रवृत्तित्वात्, न च कर्मसंयोगादिकारणत्वाभावात् । न द्रव्यं निगुणत्वा त्।न च महान् शब्द इति प्रत्ययात्परिमाणत्वसिद्धौ हेतुरसिद्ध इति वाच्यम्, तत्र महत्पदस्य वैभवपरत्वेन शब्दस्य नित्यत्वप्रसङ्गाज्जन्यमहत्त्वस्य स्पर्शनान्तरीयकत्वेन तदभावेन बाधात् महत्पदस्योत्कर्षमात्रपरत्वेन परिमाणपरत्वाभावात् । एवञ्च परिशेषाच्छब्दस्य गुणत्वे सिद्धे शब्दो न सामान्यगुण: प्रतिनियतेन्द्रियग्राह्यत्वाद् रूपवदिति विशेषगुणत्वे सिद्धे प्रयुज्यते । [1]अन्यथा सिद्धसाधनतापत्ते: । तथाहि शब्दो न स्पर्शवद्विशेषगुण: प्रत्यक्षत्वे सति कारणगुणजन्यत्वाभावाद् [2]द्वित्ववत् । यो हि स्पर्शवतां घटादीनां विशेषगुणो रूपादि: सकारणस्य कालादेर्गुणजन्य: । अत्र यदि शब्द: शङ्खवीणादीनां गुण: स्यात्, शङ्खादिगुणजन्य: स्यात् । न चैवम्, तस्मान्न शङ्खादीनां गुण इति ।

अत्र सत्यन्ताभावे परमाणुगुणेषु व्यभिचार: स्यादत: सत्यन्तम् । न च पाकजेषु [3]घटादिरुपेषु व्यभिचार: । [4]पाकदशायां घटपूर्वरूपस्य परमाणुरूपपर्य्यन्तं परमाणौ रूपोत्पत्तिस्तत अणुद्व्यणुकादिक्रमेण घटे रूपोत्पत्तिरिति वैशेषिकनये पिठरपाकाभावेन घटादौ पाकजरूपाभावात्, पाकजपरमाणुरूपस्य सत्यन्तेन वारणाच्च । ननु इदमसिद्धम्, शङ्खाद्यवयवानामपि शब्दत्वात् । न च सर्वदा तदुपलम्भापत्ति: । भवन्मत इव मुख्यवायुसंयोगादेरिव तज्जनकत्वात् । मुख्यवायुसंयोग: शङ्खावयवे शब्दमुत्पादयति । स च शङ्ख इति । एवं दण्डाभिघातजन्यो भेर्य्यवयवशब्दो भेर्य्यां शब्दादुत्पादयति कारणगुणपूर्वकत्वं शब्दस्य । न चोक्तहेतोरग्निसंयोगजन्यवृत्तिगुणत्वव्याप्यजातिशून्यत्वादित्यर्थ: । तथा च शब्दस्याग्निसंयोगजन्यत्वाभावान्न सिद्धि: इति वाच्यम्, शब्दत्वस्य दह्यमाणपर्णादिशब्दे वर्त्तमानत्वेन तथैव [5]असिद्धे: सांसाद्धिकद्रवत्वादौ व्यभिचारादिति चेत् । न । भेर्य्यवयवदण्डसंयोगापेक्षया भेरीदण्डसंयोगस्यैव

1. अन्यथा --- पत्ते: - नास्ति 2. बुद्धित्वत् 3. घटादिरूपेषु - योग:

4. वैशेषिकमते पाकदशायां घटपूर्वरूपस्य परमाणुरूपपर्य्यन्तं परमाणौ रूपोत्पत्तिस्तत अणुद्यपुकादिक्रमेण घटे रूपोत्वत्तिरिति - नास्ति - क मातृकायाम्

5. असिद्धिरिति वाच्यम् ।

सामानाधिकरण्यप्रत्त्यासत्त्या भेर्य्याशब्दजनकत्वकल्पनात्। अन्यथा विनिगमनाविरहेण तत्तदवयवेष्वनन्तशब्दसन्तानकल्पनापत्तिरतो यथोक्त एव हेतुः समीचीनः।

[1]उक्तस्वरसाद् वा हेत्वन्तरमाह-अयावदिति। स्वाश्रयसमान-कालीनध्वंसप्रतियोगित्वादिव्यर्थः। ये तु स्पर्शवतां विशेषगुणास्ते यावदाश्रयमनुवर्त्तन्ते। शब्दस्तु भेर्य्यादौ सत्यपि विनश्यतीति न तेषां गुणः स्वाश्रयत्वेनाभिमतपरम्। अत्रापि प्रत्यक्षत्वे सतीति पूरणीयम्। तेन न परमाणुरूपादौ पाकजे व्यभिचारः। [2]इदमपि पीलुपाकनये पीठरपाकादिनये पाकजघटरूपादौ व्यभिचारात्। ननु शब्दोऽपि भेर्य्यादिसमवायमनुवर्त्तत एव। अभिव्यञ्जकाभावात्तु न कालान्तरे तदुपलम्भः, अभिव्यञ्जकन्तु शब्दादिसंयोगः समवायविशेषोऽदृष्टविशेषो वेति नान्यथा तदुपलम्भ इति हेतुरसिद्धिरिति चेत्। न। दण्डादिसंयोगस्याभिव्यञ्जकत्वकल्पनापेक्षया जनकत्वकल्पनाया एव लघुत्वात्।

पिठरपाकादिमतसाधारण्येन हेत्वन्तरमाह - स्वाश्रयेति। स्वाश्रयस्तत्त्वेनाभिमतः शङ्खादि। तथा च शब्दो न शङ्खादिगुणः स्वप्रत्यक्षसमये स्वप्रत्यक्षविषयत्वाद् वा घटवदिति। कथं प्रत्यक्षदशायां शब्दस्य शङ्खाद्यसमवेतत्वेऽपि शङ्खाद्यसमवेतत्वात् तदसमवेतत्वेन प्रत्यक्षविषयत्वाद् घटवत् तत्त्वमिति चेत्, इत्थं भेर्य्यादौ दण्डसंयोगादिक्रमेणोत्पद्यमानशब्दो निमित्तवशाद् वीचीतरङ्गन्यायेन कदम्बगोलकन्यायेन वा वायुवत् कर्णदेशं शब्दसन्तानं जनयति। [3]ये तु स्पर्शवद् विशेषगुणस्तत्स्वाश्रयसमवेतत्वेनैव प्रत्यक्षविषयाः भवन्ति। घण्टानिनादौ तथादर्शनात्। तथा च शब्दः कर्णविच्छेदे नोत्पद्यते। स एव शब्दः कर्णेन गृह्यते, अन्यथा बहिरिन्द्रियाणां स्वसम्बन्धार्थ-ग्राहित्वनियमेन तस्यासम्बन्धार्थग्रहे सामर्थ्याभावात्। सामर्थ्यो वा सदा शब्दग्रहापत्तिः।

1. स्वारसाद्   2. इदं पीलुपाकनये व्यभिचारात्।

3. ये तु स्पर्शवद् विशेषगुणस्तत्वस्वाश्रयसमवेतत्वेनैव प्रत्यक्षविषयाः भवन्ति। नास्ति - क मातृकायाम्

ननु भेरीशब्दः मया श्रुत इत्यबाधितानुभवबलाद् भेर्य्यादिस्तु एव शब्दः [1]कर्णेन गृह्यते । न चेवमतिप्रसङ्गः । कर्णोपघाताभावस्यैव शब्दगतयोग्यतायाऽपि तद्ग्रहहेतुत्वेनातिप्रसङ्गाच्च दूरस्थशब्दानामयोग्यत्वे सन्निधावपि तदग्रहानुपपत्तिः । न हि स एव कदाचित्क्वचित् प्रतियोग्योऽयोग्यश्चेति सम्भवति, तावदव्यवस्थाप्रसङ्गात् । तथा च शब्दस्य शङ्खादिगुणत्वपक्षेऽपि कर्णोत्पन्नः शब्दः कर्णेन न गृह्यते, कर्णश्च वेष्टनमात्रं तस्य च रोगादीनामुपघातेन शब्दग्रहः । एवं विधानोऽपि न च कर्णेन शब्दग्रहोऽसिद्धः, कर्णेन शृणोमीत्यबाधितानुभवात् । न च वीणाजन्यशब्दस्य कर्णेनाग्रहाद् वीणाशब्दो मयाश्रुत इति प्रतीतिर्न स्यादिति वाच्यम्, वीणाजन्यशब्दसजातीयत्वेन तत्र वीणाशब्दत्वोपचारात्तस्मान्नासिद्धो हेतुरिति न तु शब्दो मास्तु मृदङ्गादिगुणः, वायुगुणस्तु भविष्यति, यस्य वायुनिमित्तत्वमङ्गीक्रियते । तत्रैवायं समवेति इति स च वायुर्यदा कर्णेन संयुज्यते, ततः समवेतः शब्दस्तेन गृह्यते, तेन नातिप्रसङ्गः । स च वायुस्तदानीमेव नश्यतीति वायुवद्द्रव्यभावित्वं शब्दस्य । नापि स्वाश्रयादजन्यत्वोपलब्धिः । एवं [2]प्रथमवायुशब्दो द्वितीयवायौ शब्दमारभत इति नाकारणगुणपूर्वकत्वमपि नातिरिक्तधर्म्यन्तकरकल्पनाक्लेशोऽपि तन्निमित्तित्वेन क्लृप्तस्यैव तत्सम-वायित्वकल्पनात् ।

तथा चागमोऽपि वायुरापद्यते शब्दमिति । न च शब्दस्य त्वचा ग्राह्यत्वापत्तिः वायुविशेषगुणत्वस्य त्वचा ग्राह्यत्वनियमादिति वाच्यम्, स्पर्शत्वस्य तत्र प्रयोजकत्वेन वायुविशेषगुणत्वस्य तत्राप्रयोजकत्वात् । वस्तुतस्तु कर्णावच्छिन्नत्वचा शब्दो गृह्यते । श्रोत्रमपि कर्णावच्छिन्नत्वात् एकस्यै-वेन्द्रियस्यावच्छेदकभेदेन संज्ञाद्वयमिति न काचिदनुपपत्तिरिति चेत् । न । शब्दस्य वायुगुणत्वे [3]तारतम्यमन्द्रत्वादिविरुद्धधर्मवत्त्वं न स्यात्, तदीयविशेषगुणस्य स्पर्शस्यैव रूपत्वात् ।

---

1. कर्णे न ।
2. प्रथमवायुशब्दो द्वितीयवायौ शब्दमारभत इति नाकारणगुणपूर्वकत्वमपि - नास्ति
3. तारत्वमन्यत्वादि - क मातृकायाम्

तथाहि शब्दो यदि वायुविशेषगुणः स्यात्, तारतम्यत्वादिविरुद्धधर्मत्वान्न स्यात् तदीयस्पर्शवदिति। किञ्च निमित्तसमवेतत्वमेव शङ्खादिसमवेतत्वमपि स्यात्, विनिगमनविरहात् न चोक्तदोषान्न तेषु समवेतत्वमिति वाच्यम्, अनन्तवायुसन्ताने तादृशकल्पनगौरवत्वमत्रापि तूल्यत्वात्। किञ्च यस्मिन् वायौ शब्द उत्पन्न स शब्दः साक्षात्कारानन्तरं नियमेन नश्यतीत्यत्र मानाभावः, तस्मान्न वायुगुणः। किञ्च त्वचोऽपि वायुत्वाच्छब्दत्वेन, तथापि शब्दग्रहापत्तिः एवञ्च शब्दं स्पृशामीत्यनुभवापत्तिः। किञ्चास्य व्यवस्थापकत्वाभावात् त्वचा न शब्दग्रहणम्। इन्द्रियाणां स्वव्यवस्थापकगुणग्राहित्वनियमादिति, शब्दे च स्वव्यवस्थापकत्वाभावात्। किञ्च एकं भूतमेकस्यैवेन्द्रियस्य प्रकृतीतिनियमः पृथिव्यादौ तथादृष्टत्वात् तथा वायुः कथमिन्द्रियद्वयप्रकृतिः स्यादिति दिक्।

नन्वतः स्वात्मगुण इत्याशङ्क्याह-

(मू) बाह्येन्द्रियप्रत्यक्षत्वादात्मान्तरग्राह्यत्वात्, आत्मन्यसमवायादहङ्कारेण विभक्तग्रहणाच्च नात्मगुणः। श्रोत्रग्राह्यत्वाद् विशेषगुणाभावाच्च न दिक्कालमनसाम्। पारिशेष्याद् गुणो भूत्वाऽऽकाशस्याधिगमे लिङ्गम्। तदनन्तरं शब्दलिङ्गविशेषादेकत्वं सिद्धम्।

बाह्येति। बाह्येन्द्रियत्वं ज्ञानग्राहकेन्द्रियत्वम्, मनोभिन्नेन्द्रियत्वं वा तद्ग्राह्यत्वं हेतुः। शब्दो नात्मगुणः ज्ञानाग्राहकेन्द्रियग्राह्यत्वात्, मनोभिन्नेन्द्रियग्राह्यतादिति हेतुः। ननु शब्दस्य मनोभिन्नेन्द्रियग्राह्यरूपमसिद्धं कर्णाविच्छिन्नेन मनसा तदग्रहणात्। कर्णश्च पृथिव्यामेव शब्दग्रहहेतुः। तेनोपहतपिहितकर्णस्य न शब्दसाक्षात्कारः, न चैवं शब्दज्ञानस्य मानसत्वापत्तिः। मनोसाधारणकारणज्ञानस्यैव मानसत्वादिति वाच्यम्, मनोऽसाधारणकारणगुणत्वस्यैव तादृशज्ञानस्यैव मानसत्वादिति वाच्यम्, मनोऽसाधारणकारणगुणत्वस्यैव तादृशज्ञानत्वस्यैव तत्प्रयोजकत्वे मानाभावादतोऽसिद्धो हेतुः। अतः हेत्वन्तरमात्मान्तरेति। स्वाश्रयातिरिक्तात्मग्राह्यत्वादित्यर्थः। शब्दस्याश्रयः शङ्खादिवादयिता तदन्येनात्मन असौ गृह्यते। आत्मगुणास्तु न स्वाश्रयाति-

रिक्तात्मप्रत्यक्षा इत्यर्थः । ननु भेदीदण्डादिसंयोगाद् भेर्य्यवच्छिन्नेषु सर्वेष्वात्मसु शब्दो जायते। नैकत्र विनिगमनाविरहादत आत्मान्तरग्राह्यत्वमसिद्धत्वम्, स्वकीयशब्दस्य स्वेन ग्रहणात् । न च शब्दानां प्रत्यात्मभिन्नत्वेन च शब्दस्त्वचा श्रुत समयादिति कथमभेदप्रत्यभिज्ञानमिति वाच्यम्, प्रत्यभिज्ञायास्तज्जातीयत्व-विषयत्वात् । एतेन शब्दो नात्मगुणः नानाप्रतिप्रत्त्यसाधारणत्वादिति हेत्वर्थ इति निरस्तम् ।

तस्य प्रत्येकं भिन्नत्वेन साधारणत्वाभावादतो हेत्वन्तरमाह - **आत्मनीति** । शब्दो नात्मगुणः आत्मसमवेतत्वाभावात् । आत्मसमवेतत्वाभाव एव कथमिति चेत्- **अहङ्कारेणेति** । मदीयत्वप्रकारकप्रतीत्यविषयत्वात् आत्मवत् शब्दगुणकः शब्दप्रकारकप्रतीत्यविषयत्वात् शब्दस्यात्मगुणत्वेऽपि अहंशब्दवान् मम शब्द इत्यादयः स्युः ।

द्रव्यान्तरगुणत्वं निराकरोति- **श्रोत्रेति** । शब्दो न दिक्कालमनोगुणो विशेषगुणत्वाद् गन्धवत् । विशेषगुणत्वेऽपि दिगादिगुणत्वमस्त्वित्यत आह - **विशेषेति** । तेषामविशेषगुणशून्यत्वात् । यद्वा दिगादीनि न शब्दगुणकानि विशेषगुणरहितत्वादिति सम्मुखत एव समानाधिकरणो हेतुः कथं विशेषगुणत्वमत आह - **श्रोत्रेति** । श्रोत्रग्राह्यत्वं विशेषगुणत्वे हेतुः । अन्येषां विशेषगुणानां तथात्वाभावात् । तथापि श्रोत्रग्राह्यत्वेन प्रतिनियतेन्द्रियग्राह्यत्वं विवक्षितम् ।

पारिशेष्यादिति । पारिशेष्यादित्युभयत्र अन्येति । परिशेष्यात् पदार्थान्तरेष्वनन्तर्भवन् गुणो भूत्वा सन् परिशेष्याद् द्रव्यान्तराश्रितत्वा-सम्भवादाकाशस्याधिगमो लिङ्गमिति । शब्दः क्वचिदाश्रितो गुणत्वात् रूपवदिति सामान्यतः शब्दाश्रयद्रव्यसिद्धौ द्रव्यमनाशं शब्दवत्त्वात् यन्नैवं तन्नैवमिति व्यतिरेकिणा आकाशरूपाद्रव्यसिद्धिः । एवं शब्दस्याधिगमे लिङ्गत्वम् । यत्तु शब्दोऽष्टद्रव्यातिरिक्तद्रव्याश्रित अष्टद्रव्यनाश्रितत्वे सति द्रव्याश्रितत्वात् यन्नैवं तन्नैवमिति व्यतिरेकिणस्ततूसिद्धिरिति तन्न तत्रानुमाने शब्दस्य लिङ्गत्वाभावेन भाष्यविरोधापत्तेः । एवञ्चाकाशस्वरूपस्य शब्दात् सिद्धिरुक्ता ।

एवञ्चाकाशस्वरूपे सिद्धे का संख्या ? किं परिमाणमाकाशस्य गुण

इत्यपेक्षायां तदुपपादयति- [1]तदन्विति । तदनु आकाशस्वरूपासिद्ध्यनन्तरं शब्दलिङ्गस्य शब्दत्वरूपस्य लिङ्गस्याविशेषादेकत्वात् शब्दलिङ्गस्य आकाशस्याप्येकत्वं सिद्धमित्यर्थः । तथा च ककारो गकाराश्रयाभिन्नाश्रयवृत्तिः शब्दत्वात् शकारवदिति । ककारमकारयोरेकाश्रयसिद्धौ सर्वे शब्दाः स्वाश्रयप्रतियोगिकान्योन्याभावाः समानाधिकरणाः [2]शब्दत्वादेः शब्दवत् इत्यनुमानात् शब्दाश्रयस्यैक्यसिद्धिरित्यर्थः । यद्वा शब्दः क्वचिदाश्रित इति सामान्यतो दृष्टं लाघवतर्कसहकारादीश्वरानुमानमेकत्रैक्यमिव शब्दाश्रयद्रव्यस्याप्यैक्यं विषयीकरोतीत्यर्थः । संख्यावत्त्वादेः वैकत्वसिद्धौ पुनरेकत्वव्यवस्थापकं संख्यान्तरव्यवच्छेदाय । आकाशस्यैकत्वेऽपि अवच्छेदकभेदेन श्रोत्रत्वमनुपदमेव विवेचयिष्यते । एवञ्च प्रतिपुरुषञ्च श्रोत्रभेदोऽवच्छेदककर्णशष्कुलिभेदादिति द्रष्टव्यम् ।

पृथक्त्वे प्रमाणमाह-

(मू) तदनुविधानादेकपृथक्त्वम् । विभुवचनात्परमहत्परिमाणम् । शब्दकारणत्ववचनात् संयोगविभागविति । अतो गुणवत्त्वादनाश्रितत्वाच्च द्रव्यम् । समानासमानजातीयकारणाभावाच्च नित्यम् । सर्वप्राणिनां च शब्दोपलब्धौ निमित्तं (श्रोत्रभावेन) । श्रोत्रं पुनः श्रवणविवरसंज्ञको नभोदेशः । शब्दनिमित्तोपभोगप्रापकधर्माधर्मोपनिबद्धः । तस्य च नित्यत्वे सत्युपनिबन्धकवैकल्याद् वाधिर्य्यम् ।

तदनुविधानादिति - एकत्वपृथक्त्वयोरव्यभिचारितया सामानाधिकरण्यादित्यर्थः । यद्यपि द्रव्यत्वेनैव पृथक्त्वसिद्धिरिति वक्तुं शक्यते, तथापि एकत्वानुविधानादेकपृथक्त्वसिद्धिर्न पृथक्त्वादेरिति दर्शयितुं तदनुविधानादित्युक्तम् ।

परिमाणं साधयति - विभुवचनादिति । 'विभुत्वान्महानाकाशस्तथा-गतात्मे'ति सूत्रात् आकाशं विभुः निरवयवेन्द्रियग्राह्यविशेषगुणवत्त्वात् आकाशवदित्यनुमानाच्च परममहत्त्वं परिमाणं तस्य सिद्ध्यतीत्यर्थः ।

1. तदनन्तरमिति - क मातृकायाम् 2. शब्दावात् ।

परममहदिति भावपरो निर्देश: । महत्त्वस्य परमत्वं सजातीयप्रतियोगिकापकर्षानाश्रयत्वं साजात्यं गुणत्वव्याप्यव्याप्यजात्या अणुपरिमाणवत्त्वे तदाश्रितशब्दस्यायोग्यतापत्ते: मध्यमपरिमाणवत्त्वे स्पर्शवत्त्वापत्ते: विभुत्वसिद्धिरित्यपि वदन्ति । ननु विभुत्वं यदि यावन्मूर्त्तप्रतियोगिकसंयोगाधिकरणत्वं तदा तत्सिद्धावपि न परिमाणसिद्धि: । यदि निरवच्छिन्नपरिमाणत्वं तदाऽसिद्धि:, प्रमाणाभावेनाकाशे परिमाणस्यासिद्धेरिति चेन्न । द्रव्यत्वे तदनुमानात् । स्पर्शवत्त्वं तत्रोपाधिरिति चेत् । तस्य नित्यतानुविधानबलेन हेतो: साध्यव्याप्यतया तद्व्यापकस्य साध्यव्यापकस्य साध्यव्यापकत्वादिति परिमाणत्वमरुपरिमाणभिन्ननित्यद्रव्य-वृत्तिगुणवृत्ति: गुणत्वसाक्षाद्व्याप्यजातित्वात सुखत्ववदित्यतस्तत्सिद्धि: । अत्र कालिकपरत्वयोरेकमेव परत्वमिति कालिकपरत्वं न गुणत्वसाक्षाद्व्याप्यजातिरिति न तया व्यभिचार इति दिक् ।

संयोगविभागौ साधयति- शब्देति । 'संयोगाद् विभागाद् शब्दाच्च [1]शब्दनिष्पत्ति:' (वै.सू .2.2.31) इति सूत्रे शब्दाऽसमवायिकारणत्वेन संयोगादीनामुक्तत्वात् शब्दसमवायिकारणेऽऽकाशे संयोगविभागयो: सिद्धि: । तथाऽऽकाशं यदि शब्दासमवायिकारणसंयोगाश्रयो न स्यात्, शब्दसमवायिकारणं न स्यादिति । एवञ्च आद्यशब्दोऽसमवायिकारणजन्य: शब्दत्वात् मध्यशब्दवदित्यनुमानात् । [2]आद्यभेरीशब्दादौ परिशेषभेर्य्याकाशसंयोगोऽसमवायिकारणतया सिध्यतीति । एवञ्च वंशदलद्वयविभागजन्याद्यशब्देऽसमवायिकारणतया वंशाकाशविभाग इति तयोरेतत्सिद्धिरिति ।

धर्मग्राहकप्रमाणबलेन सिद्धमपि द्रव्यत्वं नित्यत्वं शिष्याणां सुखप्रतिपत्त्यर्थं पुनरुपपादयति- अत इति । अतो गुणवत्त्वात् शब्दादिरुपगुणवत्त्वादित्यर्थ: । तथा च नभो द्रव्यं गुणवत्त्वात् । हेत्वन्तरमाह- अनाश्रितेति । समवायान्यत्वे सत्यसमवेतभावत्वमत् । यद्यप्येकत्वादपि नित्यत्वं सिद्धम् । अन्यथा उत्पन्नोत्पत्स्यमानावेशयो: भिन्नत्वे एकत्वानुपपत्ते: ।

तथापि प्रमाणान्तरेण सामग्र्यभावेन जन्यत्वाभावादनादित्वसिद्धावनादे:

1. शव्दोत्पत्ति: 2. आभेरीशव्दादौ भूर्य्याकाश

भावस्य नाशाभावान्नित्यत्वमिति प्रमाणान्तरेण नित्यत्वं साधयति-**समानेति**। समानजातीयमसमानजातीयञ्च यत्कारणं तस्यासम्भवादित्यर्थः। आकाशस्य हि समानजातीयमाकाशमेव तस्य न तस्मिन् कारणत्वं सम्भवति स्वस्य स्वस्मिन् कारणत्वात्। नाप्याकाशान्तरस्य तस्यासत्त्वात्। एवमसमानजातीयानां चतूर्णामस्मिन् कारणत्वम्। अस्य तत्कार्यत्वे स्पर्शवत्त्वापत्तेः, अन्येषां स्पर्शवत्त्वाभावादेवास्मिन् कारणत्वं सम्भवतीति समानजातीयकारणासम्भवः।

आत्मातिरिक्तानां परार्थ्यं साधर्म्यमुक्तम्। तत्र कः पारार्थ्यस्तेन साधयति इत्यपेक्षायामाह - **सर्वेति**। शब्दोपलब्धौ शब्दसाक्षात्कारो निमित्तकारणम्। श्रोत्रभावेन शब्दसाक्षात्कार इन्द्रियजन्यः साक्षात्कारत्वात् रूपसाक्षात्कारवदिति। शब्दसाक्षात्कारेन्द्रियसिद्धौ तदिन्द्रियं निरवयवत्त्वं विभुत्वविशेषगुण-ग्राहकेन्द्रियत्वात् मनोवदिति निरवयवत्वसिद्धौ बहिरिन्द्रियाणां स्ववृत्तिगुणग्राहकत्वनियमेन शब्दवत्त्वे सुतरां श्रोत्रस्याकाशत्वमिति।

नन्वाकाशस्य श्रोत्रत्वे सर्वदा सर्वशब्दोपलम्भापत्तिरत आह - **श्रोत्रं पुनरिति**। कर्णशष्कुलिविवरसंज्ञकस्तदवच्छिन्नो नभोदेशे नभ एव। अवच्छिन्नप्रदर्शनार्थं देशग्रहणम्। अयं भावः श्रोत्रेण तस्मिन्नुत्पद्यमानः शब्दो गृह्यते। भेरीदण्डादिसंयोगेन भेर्य्याद्यवच्छिन्नेऽऽकाशे उत्पद्यमानस्य शब्दस्य कथं श्रोत्रेऽप्युत्पत्तिरिति चेत्। न। तस्य कथञ्चित्। किन्तु तज्जातीयस्यातथाहि उक्तक्रमेणोत्पद्यमान आद्यशब्दो यदा दशदिक्षु दशनिमित्तावयवो वर्त्तते, तदा वायुभेदाप्रागभावात् चैक एव शब्दः शब्दान् कदम्बगोलकन्यायेनोत्पादयति। ते चान्यास्तेऽपि अन्यानीति। यदि चैक एव निमित्तवायुस्तदाद्यः शब्दः सर्वतो दिक्षुः शब्दान्तरमिति। सोऽपि शब्दान्तरं सोऽपि शब्दान्तरमिति। अत्र च सर्वत्राद्यशब्दान्तरितशब्देषु शब्द एव समवायिकारणम्। एवमुक्तेन अन्यतरन्यायेन यदा कर्णावच्छिन्ननभोदेशे शब्दस्योत्पत्तिस्तदा तेन शब्दस्य ग्रहणम्। न च भेरीशब्दो मया श्रुत इति प्रत्यभिज्ञानं न स्यात्, तस्य तज्जातीयविषय-त्वादित्युक्तत्वात्। एतेन कदम्बगोलकन्यायेन शब्दोत्पादाभ्युपगमे नानादिभावावस्थितपुरुषाणां शब्दाभेदप्रत्यभिज्ञानमनुपपन्नमिति दूषणमनुपपन्नम्।

एवं निमित्तवायुवेगवशेन बहुयोजनान्तरितमेघादिशब्दानामपि श्रवणावच्छिन्नोत्पत्तिकानां ग्रहणम्, येषान्तु तत्र नोत्पत्तिस्तेषां न ग्रहणमिति वातिप्रसङ्गः। केषाञ्चित्तथोत्पत्तिः केषाञ्चिन्न तथेत्यत्रादृष्टमेव विनिगमकं बोध्यम्। अतएव शब्दग्रहे श्रोत्रस्य शब्द एव प्रत्त्यासत्तिर्न तत्समवायादिरिति प्रसक्तत्वादजन्यत्वाच्चेत्, नवीना इति दिक्।

ननु कर्णावच्छिन्ननभोदेशस्य सर्वान् प्रत्यविशिष्टत्वात् बाधिर्यव्यवस्था न स्यादित्यत आह- शब्देति। शब्दनिमित्तशब्दजन्यो यो भोगः प्रियवचनादिश्रवणात् सुखानुभवः अप्रियादिश्रवणाद् दुःखानुभवस्तत् प्रापकौ यौ धर्माऽधर्मौ आभ्यामुपनिबद्ध सहकृत इति।

किमित्यत आह- तस्येति। नित्यत्वे पुरुषव्यापारविषयतया सर्वत्राविशिष्टत्वेऽपीत्यर्थः। उपनिबन्धकौ तादृशधर्माधर्मौ तत्त्वैकतदभावः। इदमुपलक्षणम्। तादृशसत्त्वेऽपि कर्णशष्कुलीमलादिसंयोगस्यापि शब्दग्रहप्रतिबन्धकतया बाधिर्यमेव।अन्यथा तादृशादृष्टाभावस्य बाधिर्यहेतुत्वे तन्निवृत्तित्वं भेषजादिप्रयोगानुपपत्तेरिति प्राञ्चः। वस्तुतस्तु कर्णोपघातः स्वत एव शब्दग्रहप्रतिबन्धकः इति तन्निवृत्त्यर्थमौषधाद्यनुसरणम्।अधिष्टानोपघातस्यापि विषयप्रतिपत्तिप्रतिबन्धकत्वं गोलकादुपघातवदिति [1]न तदुपपन्नम्।

नवीनास्तु - शब्दः क्वचिदाश्रितः इत्यनुमानं शब्दनिमित्तकारणत्वेन क्लृप्तमीश्वरमेव तत्समवायित्वेन विषयीकरोति। न द्रव्यान्तरगौरवादसिद्धिच्चाच्च। श्रोत्रापि कर्णविवरावच्छिन्नमीश्वर एव उपनिबन्धकं तूभयत्र समानम्। न च शब्दस्येश्वरगुणत्वे तदीयज्ञानादीनाममानसत्वे श्रवणेन शब्दग्रहे त्वेवाबाधकाभावात्। तस्य धर्मिग्राहकप्रमाणबलेन तथैव सिद्धिः। एवमाकाशादिपदमीश्वरस्यैव संज्ञान्तरमाहुः।

एकस्य एवेश्वरत्वे न शब्दं प्रतिनिमित्तत्वम्, तेन रूपेण समवायित्वमित्यभिन्ननिमित्तोपादानापत्तौ वेदान्तमतप्रवेशापत्तेः। किञ्चात्मविशेषगुणानां

1. न तदुनपपन्नम्।

मनोभिन्नेन्द्रियग्राह्यत्वाभावात् तस्य श्रोत्रग्राह्यत्वमपि दुर्लभः स्यादिति दिक्। किञ्च शब्दस्यात्मविशेषगुणत्वे च लौकिकमानसत्वावच्छिन्नं तद् वैतदितरात्मविशेषगुणत्वे कारणत्वकल्पने गौरवापत्तिश्च।

कालनिरुपणम्

उद्देश्यक्रमप्राप्तं कालं निरुपयति-

(मू) कालः परापरव्यक्तिकरयौगपद्यायौगपद्यचिरक्षिप्रप्रत्ययलिङ्गम् । तेषां विषयेषु पूर्वप्रत्ययविलक्षणानामुत्पत्तावन्यनिमित्ताभावाद् यदत्र निमित्तं स कालः। सर्वकार्याणां चोत्पत्तिस्थितिविनाशहेतुस्तद्व्यपदेशात्। क्षणलवनिमेषकाष्ठाकलामुहूर्त (क) यामाहोरात्रार्द्धमासर्त्वय नसम्बत्सरयुगकल्पमन्वन्तरप्रलयमहाप्रलयव्यवहारहेतुश्च ।

अत्र यद्यपि काल इत्यादिकाले प्रमाणप्रतिपादनार्थो ग्रन्थः काललक्षणान्तरमेव कर्तुं सूचितस्तथापि काल इत्यनेन लक्षणसूचनात्तदनन्तरं प्रमाणप्रदर्शनम्। कालत्वञ्च विजातीयपरत्वाऽसमवायिकारणसंयोगाश्रयविभुत्वम्। मूर्त्तविशेषेऽविक्रियोपनायकद्रव्यत्वम्। ज्येष्ठत्वादिव्यवहारसाधारणकारणत्वं वेत्यादिकमूहयम्। परापरे धर्मपरो निर्देशः। व्यतिकरशब्दो विशेषवचनः, तेन दैशिकपरत्वापरत्वाभ्यां विजातीये ये परत्वापरत्वे यौगपद्यादिप्रत्ययश्च लिङ्गप्रमाणं यस्य तादृश इत्यर्थः। तेनाष्टद्रव्यातिरिक्तद्रव्यात्मकस्य एतादृशप्रमाणसिद्धत्वाल्लक्षणेनाश्रयसिद्धिरित्यर्थः।

ननु परत्वापरत्वयोः गुणविशेषयोः स्थविरयुवपिण्डवर्त्तिनोः कथं काललिङ्गत्वमिति चेत्। इत्थम्। स्थविरपिण्डे हि बहुतरपतनपरिस्पन्दनयोगेन परत्ववत्त्वं तद्वशादेव तत्र त[1]त्रापामरं परत्वप्रत्ययः। तत्र एतादृशपतन-

1. पामरं परत्वप्रत्ययः।

परिस्पन्दयोगेऽस्य साक्षान्न सम्भवतीति परम्परया संयुक्तसमवायेन कल्पनीय: । तथाहि स्थावरपिण्डं युवपिण्डापेक्षया स्वनिष्टबहुपतनतरक्रियोपनायकपतनसंयुक्त द्रव्यसंयुक्तं [1]तदन्येषु व्यक्तिनिरूपितपरत्ववत्त्वात् यन्नैवं तन्नैवमिति व्यतिरेकिणि परत्वस्य लिङ्गत्वम् । अत्र च रविमण्डलपिण्डोभयसंयुक्ततया यद्द्रव्यं सिध्यति स एव काल: । [2]तस्य स्थविरपिण्डपतनसम्बन्धितया पक्षधर्मताबलाद् विभुत्वसिद्धि: । अतएव तादृशपरत्वे उक्तप्रमाणोपपादितकालपिण्ड-संयोगोऽसमवायकिारणम्, न पतनक्रियादिव्यधिकरणत्वात् ।

न च तथापि कालवृत्तिगुणान्तराणां तत्र कथं [3]नासमवायित्वम्, विभुगुणेषु संयोगस्यैव स्वविजातीयगुणसामान्यसमवायिकारणत्वकल्पनात् । ननु रविमण्डलस्थविरपिण्डस्थविरसंयुक्तस्याकाशस्यात्मनो वा पिण्डे रविक्रियोप-नायकत्वमस्तु किमतिरिक्तेन द्रव्यान्तरेणेति न च विशेषगुणवत्त्वान्न तयोस्तदुपनायकत्वमिति वाच्यम्, तथा चाकाशमात्मा वा [4]पिण्डेन रविक्रियोपनायकं विशेषगुणवत्त्वात् पृथिवीवदिति वाच्यम्, रविमण्डलाऽ-सम्बन्धत्वस्य तत्राप्रयोजकत्वात् । तस्मान्नाष्टद्रव्यातिरिक्तद्रव्यरूपकालसिद्धिरिति चेन्न । आकाशस्य शब्दसमवायित्वान्यथानुपपत्त्या क्लुप्तस्यान्यत्रान्यधर्मोपक्रमेण शक्त्यभावात् । भावे वा एकस्यां भेर्य्यां जायमानदण्डसंयोगं भेर्य्यन्तरेऽपि [5]संक्रामयेत् । ततश्च दण्डसंयोगाविशेषात् भेर्य्यान्तरेऽपि शब्दापत्ति: । आत्मनस्तथात्वेऽपि प्रयत्नं विना न तदुपनायकत्वं न चास्मदादीनां तदुप-नयनविषयकयत्नसम्भव: । न चास्मदादीनां तथात्वाभावेऽपि ईश्वर: एतादृशप्रयत्नवत्त्वात् तदुपनायक इति वाच्यम्, तस्य साधारणकारणत्वे-नासाधारणकारणान्तरं विना तदनुपपत्ते: । असाधारणतया तादृशद्रव्य-क्रियोपनयनसमर्थतदतिरिक्तद्रव्यकल्पनात् । अतएव प्रभामण्डलस्य वायुविशेषस्य वा तादृशक्रियोपनायकतास्तु तयो रविमण्डलपिण्डोभय संयोगसम्भवाद्

1. तन्निरूपितपरत्ववत्वात् - क मातृकायाम्
2. तस्य स्थविरपिण्डतपनसम्बन्धितया
3. नात्मसमवायिकारणत्वम् - नास्ति क मातृकायाम्
4. पिण्डे न
5. संक्रमयेति - क मातृकायाम्

द्रव्यान्तरकल्पने गौरवादिति परास्तम्। तयोरपि तादृशशक्त्यकल्पनाद् वा रविक्रियोपनायकत्ववदूपाधेरपि पिण्डादावुपनयापत्तिः। उभयेन वा तत्र प्रतिबन्धकान्तरकल्पने गौरवापत्तिः। कालस्य तु धर्मिग्राहकप्रमाणबलेन क्रियामात्रोपनायकतयैव सिद्धिरिति नातिप्रसङ्गसम्भवनमपि। एवञ्च तादृश-रविक्रियायाः स्वरूपसम्बन्धेन पिण्डवृत्तित्वात्तत्र न तदुपनायकापेक्षेति निरस्तम्। पिण्डस्य स्वरूपसम्बन्धेन रविक्रियात्वे मानाभावात्, भावे वा रवेरिव तस्यापि तत्क्रियाविशिष्टबुद्ध्यापत्तेश्च। तस्मादस्ति स्थविरपिण्डादौ रविक्रियोपनायकं द्रव्यम्। तस्य पिण्डेन संयोगः। परत्वापरत्वयोर- समवायिकारणमिति भवत्युक्तप्रकारेण परत्वालिङ्गत्वानुमानात् कालसिद्धिरिति संक्षेपः।

अत्राष्टद्रव्यातिरिक्तद्रव्यरूपस्य कालस्यैकत्वात् [1]तदिदानीमिति नानाप्रत्यक्षजनकत्वाभावेऽप्युपाधीनां तथाविधनानाव्यवहारजनकत्वम्, उपाधयश्च रविक्रियाः, तासाञ्च प्रलयेऽभावाज्जन्यमात्रं कालोपाधिः, महाप्रलये च ध्वंसा एव कालोपाधय इति नवीनाः। यौगपद्यादिप्रत्ययानाञ्च विषयतया काललिङ्गत्वम्, तत्र बहूनामेकाधिकरणसम्बन्धो यौगपद्यम्। अयौगपद्यञ्चानेकेषां क्रमेण नानाधिकरणसम्बन्धः। चिरत्वमनेकमनेककालोपाधिसम्बन्धः। क्षिप्रत्वं चाल्पकालोपाधिसम्बन्धः। कालश्चात्र रविक्रिया। यत्किञ्चिन्नान्यं वा। ततश्च युगपज्जायते युगपत् तिष्टतीत्यादावेकरविक्रियावच्छिन्नोत्पत्तिका इत्यर्थः। स्व यद् वा यत्किञ्चित् एकजन्यावच्छिन्नोत्पत्तिका इत्यर्थः। तत्र रविक्रियादिना घटादेः साक्षात्सम्बन्धाभावात्तदवच्छिन्नं घटादुत्पत्त्यादीनां न सम्भवतीति तदुपनायककालसम्बन्धद्वारा तदवच्छिन्नत्वादिकं वक्तव्यम्। चैत्रघटपटाः स्वस्मिन् यन्नैवं रविक्रियोपनायकरविसंयुक्तद्रव्यसंयुक्ता एकरविक्रियावच्छिन्नोत्पत्तित्वा-प्रकारकप्रतीतिविषयत्वात्। [2]चैत्रघटपटाजन्य संयुक्तद्रव्यसंयुक्ताः एकजन्या-वच्छिन्नोत्पत्तिकत्वप्रकारकप्रतीतिविषयत्वात्। यन्नैवं तन्नैवमिति व्यतिरेकिणि यौगपद्यादिप्रत्ययः सलिङ्गत्वमित्यपि केचित्। जन्यमात्रस्य कालोपाधिपक्षे

1. एकत्वात् अवयवानामिति नानाप्रत्यय - क मातृकायाम्
2. चैत्रघटपटाजन्य प्रतीतिविषयत्वात् - नास्ति क मातृकायाम्

नानाघटादिनिष्ठोत्पत्तीनामेकजन्यावच्छिन्नत्वं साक्षान्न सम्भवतीति तत्संयुक्त-संयोगद्वारा वक्तव्यम् । तत्संयुक्तस्यान्यस्य चाभावात् परिशेषात् कालसिद्धिः ।

ननु कालस्यातीन्द्रियत्वेनैककालावच्छिन्नोत्पत्तिकत्वप्रकारकप्रत्यय-विषयत्वं घटादीनामसिद्धम् । न चात्र प्रत्ययपदेनानुमानादिसाधारणं प्रत्ययमात्रं विवक्षितमिति वाच्यम्, घटाद्यंशे प्रत्यक्षात्मनिश्चये सर्वसाधारणस्य वक्तुमशक्यत्वान्न चैकस्य ज्ञानस्य विशेष्यांशे प्रत्ययत्वम्, प्रकारांशे [1]अनुमितित्वप्रत्यक्षत्वयोः जातिसङ्करप्रसङ्गादिति अनुमानस्मरणादिनोपस्थितस्य कालस्योपनयनेन तथा[2]प्रत्ययोपपत्तिः । अतएव इदानीं घट इतिप्रत्यक्षेऽपि उपनीततयैवेदानीं कालो भासते । तत्रेदानीत्वेन [3]व्यपदेशस्य रविक्रियाविशेषस्य घटे साक्षाद्विशेषणत्वासम्भवाद् विशेषणतानिरूपकत्वेनापि कालसिद्धिः ।एतेन षडिन्द्रियवेद्यः काल इत्युपपादितम् । अतीन्द्रियस्यापि कालस्य स्वयोग्य-विशेष्यकतदिन्द्रियजन्यज्ञानेषूपनायकसम्भवेन तथाव्यपदेशादिति दिक् ।

ननु पूर्वत्वादियोगपद्यादिप्रत्ययान्यथानुपपत्त्या कालसिद्धिरित्युक्तम् । तदयुक्तम् । कालमन्तरेणापि पूर्वत्वादेः वक्तुमशक्यत्वात् । तथाहि यो यदपेक्षया स्वस्वरूपसम्बन्धेन बहुतरक्रियावान् स तत्पदापेक्षया पूर्वः । एवं स्वरूपसम्बन्धेन एकस्याः रविक्रियायास्तत्तदुत्पाद्यवच्छेदकत्वेन यौगपद्यस्याप्युपपत्तिरिति न तत्प्रत्ययानुरोधेन कालसिद्धिरित्याह-तेषामिति । पूर्वप्रत्ययविलक्षणानां द्रव्यगुणादिविशिष्टप्रत्ययविलक्षणानामित्यर्थः । साक्षात्परम्परया मुख्यसम्बन्धे सत्त्वेव तद्विशिष्टबुद्धेरित्यर्थः । अन्यस्य स्वरूपसम्बन्धादेः द्रव्यगुणविशिष्ट-बुद्धिहेतुत्वासम्भवात् । सम्भवे वा संयोगादिना दण्डविरहिणि चैत्रादौ स्वरूपसम्बन्धेन दण्डादिविशिष्टबुद्ध्यापत्तिः । परम्परासम्बन्धोपपादकतया तादृशविशिष्टबुद्धौ यदेव निमित्तं स एव कालः ।

परिशेषमाह - अन्यस्येति । अन्यस्य स्वरूपसम्बन्धविशेषस्य पृथिव्याकाशादेर्वा अतिप्रसङ्गेन निमित्तत्वाभावादिति भावः । न च कालसिद्धौ

1. अनुमितित्वं सम्भवति - क मातृकायाम्

2. प्रत्यक्षोपपत्तिः - क मातृकायाम्

3. उपदेशस्य

पिण्डादौ [1]तपनस्पन्दादिविशिष्टबुद्धिर्यौगपद्यादिप्रत्ययश्च। तादृशबुद्ध्यन्यथानुपपत्त्याकालसिद्धिरित्यन्योन्याश्रय इति चेत स्थविरपिण्डादिः रविक्रियावैशिष्ट्योपपादकयत्किञ्चित्सम्बन्धवान् तद्वैशिष्ट्यप्रकारकप्रमाणविषयत्वात्सामान्यतः सम्बन्धसिद्धौ परिशेषात् तद्वैशिष्ट्यप्रकारकप्रमाणविषयत्वात्सामान्यतः सम्बन्धसिद्धौ परिशेषात् संयुक्तसयुक्तसमवायघटककालसिद्धिः। [2]तथा च सामान्यसिद्धिविशेषसिद्ध्योरन्योन्याश्रयत्वं न दोषायेति भावः अन्यथा समवायातिन्द्रियत्वे उक्ताऽन्योन्याश्रयात्समवायसिद्धिः दुर्लभा [3]अस्य स्यादिति दिक्।

प्रमाणान्तरमप्याह - **सर्वकार्याणामिति**। अष्टद्रव्यातिरिक्तद्रव्याभावे रविक्रियादीनां घटाद्युत्पत्त्यादिव्यधिकरणत्वाभावात् अन्यं जात इदानीं जात इत्यादिसाधिकरणकोत्पत्त्यादिप्रत्ययो न स्यादिति भावः। आत्मातिरिक्तानां पारार्थ्यं साधर्म्यमुक्तम्। तत्कथमस्य इत्यत आह - **सर्वकार्याणामिति** केचित्। यद्वा दिक्कालयोः सर्वोत्पत्तिमन्निमित्तकारणत्वमुक्तम्। तच्च उत्पत्त्यादिसाधारण्यम्, नापि तेषामुत्पत्तिमत्त्वादिति दर्शयति - **सर्वकार्याणामिति**। उत्पत्तिश्च यद्यपि न स्वाधिकरणसमवायध्वंसानामनधिकरणसमवाय सम्बन्धः। महाप्रलयोत्पत्तावव्याप्तेः। स्वातन्त्र्यस्वाधिकरणस्याष्टद्रव्यातिरिक्तद्रव्यस्य कालस्य ध्वंसरूपकालोपाधेर्वा ध्वंसासम्भवात्। अत एव न स्वसमानकालीनपदार्थप्रतियोगिकध्वंसानधिकरणसमवायसम्बन्धस्तत्रैवाव्याप्तेः। तथापि तदीयसमवायसम्बन्धसामान्यो न यत्समवायवृत्तिध्वंसप्रतियोगित्वम्, तस्य तत्समवायसम्बन्ध उत्पत्तिः। भवति हि घटाधिकरणसम्बन्धसामान्यस्य घटादिक्षणेन ध्वंसः। अतस्तत्क्षणसम्बन्धस्तस्योत्पत्तिः। एवं महाप्रलये रूपस्य चरमध्वंसस्याष्टद्रव्यातिरिक्तद्रव्यरूपमहाप्रलयस्य च यः सम्बन्धो महाप्रलयाद्यक्षणवृत्तिघटादिध्वंसे प्रतियोगी न सम्भवतीति तस्य तत्समवायसम्बन्धः उत्पत्तिः। केचित्तु महाप्रलये मानाभावादाद्यमेव लक्षणं समीचीनमिति। स्थितिश्च

1. येन स्पन्दनादि - क मातृकायाम्
2. तथा च सामान्यसिद्धिविशेषसिद्ध्योरन्योन्याश्रयत्वं न दोषायेति भावः - योगः
3. नास्ति

ध्वंसप्रागभावानधिकरणसमवायसम्बन्ध: । ध्वंसो विनाश: अद्य जात इत्यादौ एवं क्षणादिरूपकालोपाधीनामप्यधिकरणत्वेन प्रत्ययाधिकरणत्वस्य च कारणत्व-घटितत्वेन कारणत्वञ्चाभिभवादित्यर्थ: ।अत्र यद्यपि कालोपाधीनामेवाधिकरणत्वं न यथा विवक्षितकालस्यापि कालोपाधीनामप्यधिकरणत्वं तादृशकालनिरूपितं घटादौ साक्षाद्द्रविक्रियादेस्तत्सम्बन्धत्वात्तस्यापि कारणत्वमित्युक्तमेव साधर्म्ये इति द्रष्टव्यम् ।

किं तत्र प्रमाणमत आह - **तद्व्यपदेशादिति** । तेन कालेनोत्पत्त्यादीनां व्यपदेशात् 'अद्य जात:' 'श्वो भविष्यती' त्यादिसहप्रयोगात् कालस्योत्पत्त्या-धिकरणत्वेन व्यपदेशाद् व्यवहारादित्यपि केचित् ।

एवं सिद्धस्य कालस्य प्रयोजनमाह - **क्षणेति** । कालोपाधि-व्यापककालोपाधि: क्षण इति न लक्षणम् । एतल्लक्षणात्पूर्वं क्षणद्वयव्यापकस्यापि कालोपाधेरेकक्षणकत्वापत्तेश्च । स्वस्यातिरिक्तेति विशेषणे गौरवात् । सर्वेषां कालोपाधीनां क्षणघटितत्वेनान्योन्याश्रयापत्ते: । विभागप्रागभावविशिष्टा क्रिया कार्यप्रागभावविशिष्टासामग्रीगुणद्वयभावविशिष्टं द्वयमित्यादिकमननुगमाल्ल-क्षणम् । विनिगमनाविरहेण सर्वेषां लक्षणत्वे क्षणपदनानार्थत्वापत्तेश्च । स्ववृत्तियावत्पदार्थविशिष्टसमवायत्वं क्षणत्वमिति प्रतिक्षणं कस्यचिदुत्पत्ति: कस्यचिद् विनाश इति सिद्धत्वान्न कस्यापि कालोपाधेस्तथात्वमिति न तत्रातिव्याप्ति: । तस्यापि स्वत्वघटितत्वेनानुगतत्वात्, क्षण: क्षणिकोऽतिरिक्त: कालोपाधेरिति नवीना: ।

लव: क्षणचतुष्टयं, अक्षिपक्ष्मैकं निमेष: ।
अष्टादशनिमेषास्तु, [1]काष्टास्त्रिंशस्तुता: कला: ॥ १ ॥
त्रि[2]शत्काला: मुहूर्त्तं स्यात्, त्रिशद्रात्र्यहनि च ते ।
अहोरात्रा: पञ्चदश: पक्षो मासस्तु तावुभौ ॥२॥
ऋतुमासद्वयं प्रोक्तमयनन्तु ऋतुद्वयम् ।
अयनं द्वित्रयवर्षो मानुषोऽयमुदाहृत ॥३॥

1. काष्टास्त्रिंशद भूता: काला: - क मातृकायाम् 2. त्रिंशत्कालो

इत्यादिगणितशास्त्रानुसारेणायनद्वयव्यापकः कालोपाधिविशेषो वर्षश्च। एवं व्यवहारोपाधिः कालविशेषः कल्पश्च। नियतमनुविशेषाधिकारकः कालोपाधिर्मन्वन्तरं प्रलयमहाप्रलयौ निरुक्तौ। एतेषां परिमाणविशेषः आगमादनुसन्धेयः।

एतद्विषयको यो व्यवहारस्तद्विषयकशब्दप्रयोगस्तद्हेतुस्वज्ञानद्वारा। व्यवहारस्य व्यवहर्त्तव्यः ज्ञानाधीनत्वादिभावः न चात्मन एव तथाव्यवहारहेतुत्वम्। रात्रौ जातो दिवा जात इतिवन्मयि जीवः, ईश्वरे जातः इत्यादि प्रत्ययापत्तेरिति भावः। तथा चैतद्व्यवहारान्यथानुपपत्त्या कालसिद्धिरिति काले प्रमाणसूचनम्।

एतस्य धर्मग्राहकप्रमाणबलेन द्रव्यत्वे संयोगादिमत्त्वे सिद्धे गुणान्तरपरिसंख्यार्थं गुणविशेषान् दर्शयति-

(मू) तस्य गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागाः । काललिङ्गाविशेषादेकत्वं सिद्धम् । तदनुविधानात्पृथक्त्वम् । कारणे काल इति वचनापरममहत्परिमाणम् । कारणपरत्वादिति वचनात्संयोगः । तद्विनाशकत्वाद् विभाग इति ।

तस्यैति। द्वित्वादिसंख्याव्युदासार्थमाह- काललिङ्गेति। काललिङ्गस्य विलक्षणपरत्वादिप्रत्ययविषयत्वरूपलिङ्गस्य सर्वत्र स्थविरपिण्डादौ समानत्वात् तद्बलेन तपनसंयुक्ततया सर्वमूर्तिसुंयक्तं लाघवादेकमेव द्रव्यं साधयतीति संख्यान्तरव्यवच्छेदः। तदनुविधादिति । यद्यपि घटकालौ घटपटकाला इत्यादिप्रतीतेः काले द्वित्वादिकमपि वर्तत एव, तथापि एकत्वमेव कालत्वावच्छिन्नापर्य्याप्त्यधिकरणता न द्वित्वादिकमपीत्यर्थः। तद्विधानादेकत्वव्याप्यत्वात् तथैकं पृथक्त्वमिति भावः।

वैभवं प्रमाणं दर्शयति - कारणेति। कारणे कालाख्य इति सूत्रे परत्वाद्यसाधारणकारणे कालसंज्ञेति तात्पर्य्यात्। तादृशकालसंज्ञकद्रव्यस्य विभुत्वे सकलमूर्त्तिसमवेततत्तत्परत्वासाधारणकारणत्वं न स्यादित्यर्थः। अव्यापकस्य तस्य यावन्मूर्त्तेषु सूर्य्यक्रियोपनायकत्वाभावादित्यर्थः। वैभवरूपं परममहत्त्वं नित्यमहत्त्वं साधयतीत्यर्थः। महत्पदं महत्त्वपरम्। परमपदं नित्यपरमनिरवच्छिन्नपरम्वा।

धर्मिग्राहकप्रमाणबलेन सिद्धयोरपि संयोगविभागयोरनुकूलतर्कमाह - कारणपरत्वादिति । 'कारणपरकारणपरत्वापरत्वाच्च' (वै.सू.7.2.22) 'परत्वापरत्वयो: परत्वापरत्वाभावोऽणुत्वमहत्त्वाभ्यां व्याख्यात: (वै.सू.7.2.23) इति सूत्रे कारणस्य कालस्य मूर्त्तेषु संयोगद्वारा बहुतरविक्रियोपनायकत्वापरत्वोत्पत्ति: । एवमल्पक्रियोपना[1]यकत्वेनापरत्व-सिद्धिरिति सूत्रे तात्पर्यविवरणात् संयोगसिद्धि: । यदि [2]मूर्त्तद्रव्यं रविसंयुक्तं न स्यात्, परत्वादिमन्न स्यादिति तर्कोपवृंहिताद् धर्मिग्राहकप्रमाणसूत्र-कारवचनात्संयोगसिद्धि, [3]तर्कविनाशकत्वात् ।संयोगविनाशकत्वाद् विभागभावे आश्रयनाशादेश्च भावात् उत्पन्नस्य संयोगस्य नाशो न स्यादतस्त-स्मान्नाशसिद्ध्यर्थमङ्गीकरणीयमिति संयोगनाशानुपपत्त्या विभागसिद्धि: ।

धर्मिग्राहकप्रमाणबलेन सिद्धमपि नित्यद्रब्यत्वं शिष्यानुजिघृक्षया पुन: व्युत्पादयति-

(मू) तस्याकाशवद्द्रव्यत्यनित्यत्वे सिद्धि । काललिङ्गावि-शेषादञ्जसैकत्वेपि सर्वकार्याणां प्रारम्भक्रियाभिर्निवृत्तिस्थितिनिरो-धोपाधिभेदाद् मणिवत् पाचकावद्वा नानात्वोपचार इति ।

तस्येति । तस्य कालस्याकाशवद् द्रव्यत्वं गुणवत्त्वात् । तद्वच्च नित्यत्वम् । एकत्वेन कारणाभावादित्यर्थ: न चैकत्वेन समानजातीय-कारणाभावेऽपि असमानजातीयकारणं किं न स्यादिति वाच्यम्, समवेतद्रव्यस्य समवायिकारणद्रव्यवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वनियमेन पृथिव्यादेस्तत्र समवायित्वाभावाद् भावे वा तद्वदेवरुपवत्त्वमूर्त्तत्वादिप्रसङ्गाच्च । तस्मात्का-रणाभावाद् विनाशकाभावाच्च नित्य: ।

एवं धर्मिग्राहकप्रमाणबलेन कालस्यैकत्वे सिद्धे भाविष्यत्त्वादि-व्यवहारोप्यौपाधिक एवेत्याह - काललिङ्गादिति । अत्र साधर्म्यग्रहसमनन्तरं

1. उपनायकत्वे परत्वसिद्धिरिति सूत्रेण - क मातृकायाम्
2. सूत्रं 3. तद्वविनाशकत्वात् - क मातृकायाम्

तद्दशायां वा तेनैव प्रमाणेनैकत्वे सिद्धेऽपि तादृशोपाधिभेदान्नानात्वोपचार: प्रारम्भ:, प्रागभाव: । स च क्वचिद् धर्मिण: क्वचिद् धर्मस्यापीति एव सामान्यत: प्रागभावोपलक्षितकालत्वं भविष्यत्त्वम् । [1]य: कालो यस्य प्रागभावोपलक्षितम्, सस्तस्य भविष्यत्त्वं यो भावनान्य इति संख्यावत् आख्यातप्रत्ययवाच्य: । कालोऽपि तमन्वेति व्युत्पत्त्यङ्गीकरणपक्षे देवदत्तो घटं करिष्यतीत्यादौ वर्त्तमानप्रागभावप्रतियोगिघटानुकूलव्यापाराश्रयो देवदत्त: इत्याद्यबाधे धर्मस्य घटानुकूलव्यापारस्य वर्त्तमानप्रागभावप्रतियोगित्वेन देवदत्तस्य [2]भविष्यत्त्व- व्यपदेश: ।

नवीनास्तु - वर्त्तमानप्रागभावप्रतियोगित्वमात्रं न भविष्यत्त्वम् । श्वोभाविन्यपि घटेऽऽद्य भविष्यतीति प्रत्ययापत्ते: । किन्तु वर्त्तमानप्रागभाव-प्रतियोग्युत्पत्तिकत्वं भविष्यत्त्वं [3]अद्य सम्बन्धिनी तादृगुत्पत्तिर्यस्येत्यर्थ: । ननु अद्यसम्बन्धिनी तादृशप्रतियोगित्वमेवास्तु श्वो भाविनि घटस्याद्यसम्बन्धा-भावादेव नाद्य भविष्यतीति प्रत्यय: । किन्तूत्पत्तिपर्यन्तानुधावनेनेति चेत् । सत्यम् । तथाद्यभविष्यतो घटस्य श्व: सम्बन्धसम्भवात्, श्वो भविष्यतीति प्रत्ययस्य दुर्वारत्वात् उत्पत्त्यन्तं तेन यस्य श्वो भाविनि उत्पत्तिस्तत्राद्यभविष्यतीति न प्रत्यय: । तेन श्वो भाविन्युत्पत्तिस्तत्राद्य भविष्यतीति न प्रत्यय: । एवमेकपदो-पात्तत्वप्रत्यासत्त्याऽऽख्यातार्थयो: कालविशेषभावनयोरेव परस्परमनयोर्न भावनान्वयिन: कालस्यान्वय इति । एवं प्रागभावप्रतियोग्युत्पत्तित्वोपाधिना भविष्यत्त्वम् ।

वर्त्तमानत्वव्यवहारे उपाधिमाह- क्रियेति । क्रियाधात्वर्थस्तस्या: अभिनिवृत्ति: फलसम्बन्धस्तदुपाधिको वर्त्तमानव्यवहारस्तेन यो यद्ध्वंस-प्रागभावावच्छिन्न: स: तस्य वर्त्तमान: काल इति प्राचीना: । आत्मा तिष्टतीत्यादावात्मादे: ध्वंसप्रागभावाऽसिद्धे: वर्त्तमानत्वव्यवहारानुपपत्तिप्रसङ्गात् स्वावच्छिन्नकालत्वं वर्त्तमानत्वमिति नव्या: ।

---

1. य: कालो यस्य प्रागभावोपलक्षित:, स:तस्य भविष्यन् य: भावनेति संख्यावदाख्यातप्रत्ययवाच्च: ।
2. पित्तविषत्व व्यपदेश: - क मातृकायाम् ।
3. अद्यसम्बन्धिनी --- न प्रत्यय: । नास्ति क - मातृकायाम्

अतीतत्वे तूपाधिमाह - **स्थितिविरोधेति** । स्थितिविरोधो ध्वंसस्तथा चोत्पन्नध्वंसप्रतियोगित्वमतीतत्वम् । न तु ध्वंसप्रतियोगित्वमात्रम्, आद्ये नष्टेऽपि श्वो नष्ट इत्यादिप्रतीत्यापत्तेः । तथास्यैव कालस्य प्रागभावावच्छिन्न-ध्वंसावच्छिन्नत्वोपाधिभेदात् नानात्वोपचार इत्याशयः । नन्वेकस्य नानोपाधिवशात् नानाद्रव्यव्यवहारविषयत्वं क्व दृष्टमित्यत्र दृष्टान्तमाह - **मणिवदिति** । यथा एक एव मणिः पीतनीलाद्युपाधिभेदान्नानादिव्यवहारं भजते, तद्वदित्यर्थः । तद्वन्नामभविष्यत्वादिव्यवहारस्य भ्रान्तत्वं स्यादत आह-**पाचकवदिति** । यथा एक एव देवदत्तो नाम पाकादिरूपक्रियोपाधिभेदात् पाचकत्वादिनानात्वं भजते तद्वत् कालोऽपीत्यर्थः । ननु कालोपाधिरेव विलक्षणकालव्यवहारसिद्धौ किमतिरिक्तेनाखण्डदण्डायमानेनैकेन कालेनेति चेत्, [1]एकाकारककालप्रत्ययस्य विरूद्धोपाधिभेदेऽपि एकमवलम्बनं विनाऽसिद्धेः । तथाहि यदा इह मध्याह्नस्तदा कुरुषु अर्द्धरात्र इत्यादिव्यवहारस्यैककालाव-लम्बनत्वादिति दिक् ।

नवीनास्तु- 'धर्मिकल्पनातो धर्मकल्पनाया एव लघुत्वा' दितिन्यायेन विभोरीश्वरस्यैव स्थविरपिण्डादौ रविक्रियोपनायकत्वं कल्प्यतेऽत एव सन्निकर्षाविप्रकर्षादिबुद्धिः । न तु तद्वै[2]धर्म्यन्तरकल्पनम् । न चेश्वरो न सूर्य्यक्रियोपनायकः विशेषगुणवत्त्वात् पृथिवीवदित्यतोऽनुमानान्न तस्य तदुपनायकत्वमिति वाच्यम्, तत्र सूर्य्यसंयुक्तत्वस्योपाधित्वात् । धर्मिग्राहक-प्रमाणबलेन रविक्रियोपनायकत्वेऽपि धर्मान्तरोपनायकत्वेऽपि बाधकाभावादिति । किञ्च [3]धर्म एवाक्षय कालः । 'इत्यागमादीश्वरस्यैव कालादिसंज्ञानधर्म्य-न्तरस्ये'त्याहुः ।

वस्तुतस्तु ईश्वरात्मसंयोगस्य मूर्त्तिसमवायिकारणकपरत्वापरत्वा-समवायिकारणत्वं न स्यात् । आत्मगुणानां मूर्त्तिवृत्तिगुणासमवायिकारण-त्वाभावात् । न च परत्वापरत्वे एव न स्तः संयोगकल्पीयभूयस्त्वाभ्यां

1. एककारकालप्रत्ययस्य - क मातृकायाम् ।

2. धर्म्यान्तर ।

3. अहंमेवाक्षयः कालः ।

तद्बुद्ध्युपपत्तेरिति वाच्यम्, तादृशसंयोगस्यातीन्द्रियत्वे न परत्वादि-प्रत्यक्षानुपपत्तेः, क्वचिदपेक्षाबुद्धिनाशानन्तरं तदनाशापत्तेश्च। किञ्चान्यस्मिकाले जात इति वदन् अस्मिन्नीश्वरे जात इत्यादिप्रत्ययापत्तेश्च। ईश्वरस्य कालमात्रवृत्तित्वेन तस्याप्युत्पत्त्याद्यवच्छेदकत्वसम्भवात्। न च कालमात्र-वृत्तित्वेन तस्य तदवच्छेदकत्वं मानाभावात् तेषामवच्छेदकार्थं निमित्तान्तर कल्पने गौरवात्। न च तादृश प्रत्यये इष्टापत्तिः सर्वानुभवविरोधादिति दिक्।

दिशो निरुपणम्

उद्देश्यक्रमप्राप्तं दिशं निरूपयति-

(मू) दिक् पूर्वापरादिप्रत्ययलिङ्गा । मूर्त्तद्रव्यमवधिं कृत्वा मूर्त्तष्वेव द्रव्येष्वेतस्मादिदं पूर्वेण, दक्षिणेन, पश्चिमेन, उत्तरेण, पूर्व-दक्षिणेन दक्षिणापरणेन, अपरोत्तरेण, उत्तरपूर्वेण, चाधस्तादुपरिशिष्टा-च्चेति दशप्रत्ययाः यतो भवन्ति सा दिगिति। (अन्यनिमित्तसम्भवात्) । तस्यास्तु गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागाः । कालवदेते सिद्धाः ।

दिगिति । अत्र दिक्सिद्धावाश्रयसिद्धिः लक्षणे स्यादिति प्रमाणं दर्शयति - पूर्वेति । संयोगापेक्षपरत्वापरत्वासमवायिकारणसंयोगाश्रयविभुत्वम्। [1]तेषामवच्छेदकत्वार्थं निमित्तान्तरकल्पने गौरवात् कालिकपरत्वापरत्वापेक्षया दैशिकयोः परत्वापरत्वयोः वैलक्षण्यप्रदर्शनार्थं संयोगेत्यादि। [2]कालान्यत्वे सति विशेषणगुणशून्यविभुत्वम्वा। संयोगोपनायकनिष्क्रियद्रवत्वं वेत्यादि। यद्यपि दैशिके परत्वापरत्वे दिशो लिङ्गे। तथाहि एकस्यामेव दिशि क्रमेण वर्त्तमानयोरपि घटपटयोः परापरबुद्धी जायेते। [3]एवमथुरातो वाराणासीपराऽल्पयोजनान्तरितं

1. तेषामवच्छेदकत्वार्थं निमित्तान्तरकल्पने गौरवात्। नास्ति
2. कालान्यत्वे --- विभुत्वम् - नास्ति
3. मधुरातोद्बहुयोजनान्तरिता

शीघ्रमपरमिति प्रत्ययो जायते, तत्र संयोगाल्पवायुस्त्वं भूयस्त्वेन निमित्तम् । तथा चायं घट एतद्घटापेक्षया मदधिकबहुपदार्थसंयुक्तद्रव्यसंयुक्तः । तदपेक्षया-परत्वप्रकारकप्रत्ययविषयत्वादिति तादृशे परत्वे दिग्दण्डसंयोगोऽसमवायि-कारणमिति भवति । परत्वापरत्वाभ्यां दिक्सिद्धिः । न च तादृशकालेनान्यथासिद्धेर्न दिक्सिद्धिरिति वाच्यम्, कालस्य क्रियोपनायकतामात्रेणि क्लृप्तत्वाद् घटादौ तत्तत्पदार्थ[1]प्रतियोगिसंयोगस्योपनयाभावेन अयमेतदपेक्षया सन्निकृष्ट इत्यादि प्रत्ययानुपपत्तेः । एवञ्च भवत्येव परत्वादिलिङ्गकानुमानादपि दिक्सिद्धिः । तथापि स्पष्टत्वादुपेक्ष्य प्रमाणान्तरमप्यदर्शितम् । पूर्वादीत्यादिपदाद् दक्षिणपूर्वादि-परिग्रहः ।

पूर्वादिप्रत्ययान्यथानुपपत्त्या कथं दिक्सिद्धिरत आह - मूर्त्तद्रव्यमिति । पूर्वादिप्रत्ययस्यापेक्षाबुद्धिनिमित्तत्वात्; अपेक्षाबुद्धेश्च नियमतोऽवधिविषय-त्वात्, अवधित्वस्य च प्रतिभिन्नत्वेन तदधिकरणवृत्त्यत्यन्ताभावप्रतियोगि-स्वाधिकरणत्वरूपत्वेन विभुद्रव्येऽधिकरणप्रसिद्धात्तदसम्भवान्मूर्त्तद्रव्यमिति ।

परत्वापरत्वयोः मूर्त्तगुणत्वेऽन्यत्र तदसम्भवात् । व्यापकस्य पूर्वादि-व्यावस्थानुपपत्तेः ग्रहमूर्त्तद्रव्येष्विति । इदमस्मात् पूर्वेणेति प्रकृत्यादित्वात् प्रथमार्थे तृतीया । इदमस्मात्पूर्वमित्यर्थः । अस्मदनन्तरं वर्त्तमानमिदं पूर्वेण पूर्वस्मिन् तिष्टति । एवमन्यस्याऽदूरे पञ्चम्येति [2]सप्तम्यर्थे एनप् । अनन्तरशब्दाद् व्यवहारादस्मादिति पञ्चमी । अन्यथा एनपा योगे द्वितीया । षष्ट्योतरापत्तेरित्यपि केचित् ।

उदयाचलसन्निहिता दिक्पूर्वा । अस्ताचलसन्निहिता दिक् पश्चिमा । पूर्वाभिमुखस्य पुरुषस्य दक्षिणभागावच्छिन्ना दिक् दक्षिणा । पूर्वाभिमुखपुरुषस्य वामभागावच्छिन्ना दिक् उत्तरा । दक्षिणवामत्वे शरीरावयववृत्तिजातिविशेषं पतनासमवायिकारणसंयोगाश्रयादि अधः । पतनं गुरुत्वासमवायिकारण-क्रियात्वमदृष्टं विशेषजन्याग्निज्वलनावच्छिन्ना दिगुर्ध्वम् । दक्षिणपूर्वयोरन्तराल-वर्त्तिनो दिक् दक्षिणपूर्वा । एवं क्रमेण तिस्रोऽवान्तरदिगिति दशदिगुपाधिमालम्भ देशैते इति प्रत्यया: भवन्ति ।

1. प्रतियोगिकसंयोगेभावेन - क मातृकायाम्
2. सप्तम्यर्थे एनप् ।

तथाहि उदयाचलसन्निहितत्वं [1]तच्च उदयाचलावधिकान्यतरपदार्थ-संयोगवत्त्वं तत्संयुक्तसंयोगाल्पीयत्स्वतन्त्रतत्तत्संयुक्तसंयोगादीनां घटादौ साक्षादभावात् संयुक्तसंयोगसमवायवानयमिति प्रत्ययानुपपत्तेः घटादौ संयोगोपनायकं किञ्चिद्द्रव्यं कल्पनीयम्। तत्र न पृथिव्यादिव्यभिचारात् [2]आकाशादावपि तद्व्यवहारात् नाकाशमात्मा वा तस्य चान्यत्र धर्मो-पनायकत्वाभावात्तथाभावे वा संयोगवदन्येषां रूपादीनामप्युपनयनप्रसङ्गात्। न च कालस्तथा तस्य नियमतः क्रियोपनायकत्वेन सिद्धस्य संयोगापनयने शक्त्यभावात्। किञ्च कालोपाधिनां सर्वेषां सर्वान् प्रतिपत्तॄन् प्रत्येकरूपम्। न हि वर्त्तमानत्वादिरूपः कालोपाधिः पुरुषविशेषेऽन्यथा भवति, दिगुपाधिस्तु प्रतिपुरुषं भिद्यते। या हि एकस्य प्राची, सैका अन्यस्य प्रतीचीति सार्वलौकिकमेतत्। ततश्च पूर्वत्वादिर्न कालोपाधिः पुरुषभेदेन भिन्नत्वेन प्रतीयमानत्वादित्यतोऽपि न पूर्वत्वादेः कालोपाधित्वमिति। न चेश्वर एव[3] न तथा तस्य साधारण-कारणत्वेनासाधारणकारणं विना तदनुपपत्तेः। न च मनस्तथा। तस्य परमाणुरूपतया घटसंयोगदशायां तस्य द्रव्यान्तरसंयोगाभावाद् वा। अत उदयाचलारम्भ एकदेशवृत्तिघटपर्य्यन्तं तन्नानापदार्थसंयुक्तं द्रव्यं सिध्यद्धर्मि-ग्राहकप्रमाणबलेन विभुरुपतया पर्य्यवस्यति। त्वाच्चाष्टद्रव्यातिरिक्तद्रव्यरूपा दिगिति। [4]तस्याः उदयाचलावधि कल्पसंख्याकपदार्थसंयोगित्वं स्वत एवेति पूर्वत्वम्। तथाहि उदयाचलसन्निहिता दिक् पूर्वेत्यादि।

प्राञ्चस्तु – प्रथमादित्यसंयोगावच्छिन्ना पूर्वा। चरमादित्यसंयोगावच्छिन्ना पश्चिमा। तत्र पूर्वोऽयं घट इतिप्रतीतेः प्रथमादित्यसंयोगावच्छिन्नो घट इत्यर्थः। तत्र घटादीनामादित्यसंयोगावच्छिन्नत्वं साक्षान्न सम्भवतीति संयुक्तद्रव्यवहारा

---

1. तच्च उदयाचलावधिकान्यतरपदार्थसंयोगवत्वं – नास्ति।
2. आकाशादावपि तदझव्यवहारात् – नास्ति।
3. तत्तसंयोगोपनायकः, तस्य साधारणकारणं विना।
4. तस्या उदयाचलावधि कल्पसंख्याकपदार्थसंयोगित्वं स्वत एवेति पूर्वत्वम्। तथाहि उदयाचलसन्निहिता दिक् पूर्वेत्यादि – योगः नास्ति क मातृकायाम्

परम्परया [1]तस्या आदित्यसंयोगावच्छिन्नत्वं स्वत एवेति पूर्वसिद्धिरित्येतत्-सिद्धिरिति [2]आदित्यघटोभयसंयुक्तसंयोगोपनायकद्रव्यसिद्धिः। तस्य च द्रव्यान्तरेष्वनन्तर्भावाद् दिग्रूपत्वमिति वदन्ति।

ननु भवतु तादृशप्रत्ययान्यथानुपपत्त्या, यत्तु किञ्चिन्निमित्तसिद्धिस्तथापि दिक्सिद्धिः कुत आह - अन्येति। उक्तरीत्या आकाशादीनां निमित्तत्वासम्भवेन तादृशप्रत्ययनिमित्तत्वेन दिक्सिद्धिरिति भावः।

एतस्या धर्मिग्राहकप्रमाणबलेन द्रव्यत्वसिद्धावपि गुणान्तरपरिसंख्यार्थं गुणान् विशिष्य दर्शयति - तस्या इति। पञ्चानामपि गुणानां द्विप्रकारमाह- कालवदिति। दिक्लिङ्गाविशेषादेकत्वम्। तच्च स्वविभाजकोपाध्यवच्छिन्ना-पर्य्याप्तः, द्वित्वादिकत्वमित्यर्थः। तेन पृथिवीदिगादिप्रतीतिबलेन तदुभय-वृत्तिद्वित्वादिसत्त्वेऽपि न क्षतिः। तदनुविधानात्पृथक्त्वम्। सर्वोत्पत्तिम-त्कारणत्ववचनाद् धर्मिग्राहकमानाद् विभुपरिमाणम्। ननु गृहे जातो गोष्टे जात इत्यादिप्रतीतेः गृहादीनामेव अधिकरणत्वेन निमित्तत्वम्, न तूक्तरूपाय चेत्, गृहादीनामपि दिक्त्वेनैव हेतुत्वात्। अन्यथा प्रातिस्विकरूपेण कारणत्वे नानाकार्यकारणभावप्रसज्यात्। न चैकदेशवर्त्तिनः सर्वकार्यहेतुत्वं सम्भवतीति विभुत्वसिद्धिः। आदित्यादिसंयोगाभावे तत्संयोगोपनायकत्वं न सम्भवतीति संयोगसिद्धिः। तद्विनाशकत्वाच्च विभाग इति पञ्चानामपि सिद्धिः।

ननु दिशोऽवान्तरभेदाभावे लोकवेदयोः दिशसंख्याश्रयत्वेन तद्-व्यवहारोऽनुपपन्न इत्यत आह-

(मू) दिग्लिङ्गाविशेषादञ्जसैकत्वेऽपि दिशः परममहर्षिभिः श्रुतिस्मृतिलोक (सं) व्यवहारार्थं मेरुं प्रदक्षिणमावर्त्तमानस्य भगवतः सवितुर्ये संयोगविशेषाः तेषां लोकपालपरिगृहीतदिक्प्रदेशानामन्वर्थाः प्राच्यादिभेदेन दशविधाः संज्ञाः कृताः। ततः भक्त्या दशदिशः

1. तस्या आदित्यसंयोगावच्छिन्नत्वं स्वत एवेति पूर्वसिद्धिरिति - नास्ति - क मातृकायाम्
2. आदित्यु --

सिद्धाः । तासामेव देवतापरिग्रह(वशा)त् पुनः दशसंज्ञाः भवन्ति । माहेन्द्री, वैश्वानरो, याम्या, नैऋती, वारुणी, वायन्या, चान्द्रकौ-नरीमसी ऐशानी, ब्राह्मी, नागी चेति ।

दिग्लिङ्गविशेषादिति । यद्यपि दिग्लिङ्गानां पूर्ववत्त्वादिप्रत्ययानां विशेषोऽस्त्येव, तथापि दैशिकपरत्वापरत्वरूपस्य सर्वत्राविशेष इति तदभिप्रायेणाविशाषादित्युक्तम् । अञ्जसाऽविलम्बेनैकत्वस्य धर्मिग्राहकप्रमाण-सिद्धित्वेन प्रमाणान्तरापेक्षादिविलम्बाभावादित्यर्थः । एवं दिशः एकत्वे सिद्धेऽपि महर्षिभिः सर्गाद्यकालीनैः मरीचिदक्षप्रभृतिभिः प्राच्यादिभेदेन दशविधाः संज्ञाः कृता इत्यन्वयः ।

किमर्थं तादृशसंज्ञाकरणमत आह- श्रुतीति । [1]प्राग्वंशं करोतीति पुरस्तादुक्तम् । प्राचीनप्रवणे यजतेत्यादिश्रुतिव्यवहारः । आयुष्यं प्राङ्मुखो भुङ्क्ते न प्रतीचिशिराः । शयतेत्यादिस्मार्त्तः । ग्रामो दक्षिणेन चाहीत्यादिस्तु लौकिकः । नन्वासां संज्ञानां निमित्तान्तरकल्पने गौरवापत्तिरत पाचकादिसंज्ञावद् दैशिकत्वमित्याह - अन्वयार्थ इति । अर्थमनुगतोऽन्वर्थी, यौगिकाः । तथा च पाचकादिवत् प्रथमरविक्रियादिकमात्रनिमित्तमित्यर्थः । प्रथमस्यां रविः रञ्जतीति प्राची । [2]ऋत्विग्दधृगितिनिपातनादधिकरणे क्विन् । केषामेताः संज्ञा इत्यपेक्षायामाह - लोकपालपरिगृहीतानामिति । लोकपाला इन्द्रादयस्तैरात्मीयत्वेन [3]निमित्तत्वमुपपत्तौ परिगृहीतानामित्यर्थः । लोकपालपरिग्रहोऽव्यवच्छेदभेदं विना कथं घटत इत्याह- मेरूमिति । मेरुः भूगोलमध्यवर्त्तिनं प्रदक्षिणेन भ्रमतः सूर्य्यस्य ये संयोगविशेषाः प्राथम्यादिविशिष्टास्तदवच्छिन्नानामित्यर्थः । संयोगादित्यनन्तरं तदवच्छिन्नानामिति पूरणीयम् । इदमापाततः । प्रथमादित्यसंयोगादेरभावेऽपि प्राच्यादिव्यवहारस्य सर्वसिद्धत्वात् । न चोपलक्षणतया तादृशसंयोग-स्तद्व्यवहारहेतुरिति वाच्यम्, उपलक्षितावच्छेदकान्तरभावात्, सद्भावे वा

1. प्राग्वंशकरोति
2. ऋत्विग्दधृगितिनिपातानादधिकारणे वचम् - क मातृकायाम्
3. निमित्तत्वौपपत्तो - नास्ति क मातृकायाम्

तस्य [1]संज्ञायामयोगार्थासम्भवाच्च निमित्तान्तरकल्पने मानाभावात्, पूर्वत्वादिसं[2]ज्ञायामेतादृशतयाप्यर्थासम्भवाच्च, (पार्थसम्भवात्) तस्मात्पूर्वोक्त-रीत्या उदयाचलादिसन्निध्यादिकमेव प्राचीत्वादिनिमित्तमिति द्रष्टव्यम्। ननु संज्ञाभेदेऽपि भिन्नदिग्व्यवहार कुत इत्याह - तत इति । भक्त्या उपचारेण। तथा दिश एकत्वेऽपि संज्ञाभेदेन भिन्नव्यवहार औपाधिक इत्यर्थः ।

ननु प्राच्यादिसंज्ञाभेदाभावेऽपि प्राच्यादीनां माहेन्द्रादिसंज्ञाभेदोऽपि भिन्नव्यवहारः स्यादित आह - तासामेवेति । तथा चोदयाचलसन्नि-धानादेकनिमित्ताक्रान्तानामौपाधिकसंज्ञाद्वयनिवेशो न भिन्नव्यवहारप्रयोजक इत्यर्थः। तासामेवोपचारेण दशत्वेन प्रतिभासमानानां दिशामित्यर्थः। तेन न बहुवचनानुपपत्तिः। नवीनास्तु उदयाचलसान्निध्योपपादनत्वं विभोरीश्वरस्यैव कल्प्यते। न द्रव्यान्तरस्य धर्मिकल्पनातो धर्मकल्पनायां लघुत्वादिति न्यायात्। न चेश्वरस्य संयोगोपनायकत्वे रूपाद्युपनायकत्वाद्युपपत्तिरिति वाच्यम्, अदृष्टादेरपि प्रतिबन्धकत्वेन तदुपनायकसम्भवात्, अन्यथा दिशोऽपि तथात्वप्रसङ्गात्। न च धर्मिग्राहकप्रमाणबलेन तस्यास्तन्मात्रोपनायकत्वेनैव सिद्धिरिति न गुणान्तरोपनायकत्वेनैव सिद्धिरिति न गुणान्तरोपनायकत्वमिति वाच्यम्, [3]धर्मग्राहकमात्रस्य संयोगोपनायकत्वमात्रोपक्षीणतया। धर्मान्तरोप-नायकत्वनिराकरणे तस्य [4]सामर्थ्याभावात्। तस्माद् दिगितरेभ्यो भिद्यते इत्यादिकमाश्रयसिद्धिः। एकस्यैवेश्वरस्य निमित्तभेदेन संज्ञासमावेशान्नाना-व्यवहारजनकत्वं भवतामेकस्याः दिशानानाप्राच्यादिव्यवहारजनकत्वमिवा-विरुद्धमित्याहुः ।

---

1. संज्ञायामयोगार्थासम्भवाच्च
2. नास्ति क मातृकायाम्
3. धर्मिग्राहकमानस्य
4. सामान्याभावात्।

आत्मनिरूपणम्

[1]उद्देश्यानुरोधेन दिग्लिङ्गानन्तरमात्मलक्षणमाह-

(मू) आत्मत्वाभिसम्बन्धादात्मा । तस्य सौक्ष्म्यादप्रत्यक्षत्वे सति करणैः शब्दाद्युपलब्ध्यनुमितैः श्रोत्रादिभिः समधिगम क्रियते । वास्यादीनामिव करणानां कर्तृप्रयोज्यत्वदर्शनात् शब्दादिषु च प्रसिद्ध्या च प्रसाधकोऽनुमीयते । न शरीरेन्द्रियमनसामज्ञत्वात्, न शरीरस्य चैतन्यं घटादिवद् भूतकार्यत्वान्मृते चासम्भवात् । नेन्द्रियाणां करणत्वात्, उपहतेषु विषयासान्निध्ये चानुस्मृतिदर्शनात् । नापि मनसः करणान्तरानपेक्षित्वे युगपदालोचनस्मृतिप्रसङ्गात् स्वयं करणभावाच्च। परिशेषादात्मकार्यत्वात्तेनात्मा समधिगम्यते ।

आत्मत्वेति । आत्मपदशक्यतावच्छेदकत्वेन सिद्धमात्मत्वं नाम सामान्यविशेषः, तेनाभिसम्बन्धः समवायस्तस्मादित्यर्थः । ननु [2]पदस्वल्पतावच्छेदकत्वं न जातित्वसाधकं विभुत्वादेव तथात्वापत्तेः । तेषां च कारणतावच्छेदककार्यत्वावच्छेदकत्वाभावात् जातित्वमसिद्धमिति अक्षादिपदशक्यतावच्छेदकतापदशक्यतावच्छेदकतया पाशकविभीतकादि साधारण्यैकतज्जात्यापत्तेश्च । न च तत्र तथात्वेऽपि मानाभावान्न जातित्वमिति वाच्यम्, प्रकृतेऽपि मानाभावस्य तूल्यत्वात् । न च [3]मानासत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतया तत्सिद्धिः इति[4] वाच्यम् ज्ञानत्वादेः कार्याकार्यवृत्तित्वेन कार्यत्वावच्छेदकत्वात् । नापि मानसत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतया तत्सिद्धिः । ईश्वरावृत्तित्वप्रसङ्गात्, न चेश्वरेऽपि योग्यतया तत्सिद्धिरिति वाच्यम्, तस्य स्वरूपयोग्यत्वे फलावश्यंभावापत्तेः, नित्यस्येत्यादिव्याप्तेः । न चेयं व्याप्तिः अप्रयोगिका, बाधकमन्तरेणाप्रयोजकमात्रस्य वक्तुमशक्यत्वात् । एवञ्च [5]ज्ञानादिसमवायितावच्छेदकतया

1. हे श्रुतिसिंह - क मातृकायाम्
2. पदस्वल्पतावच्चेदकत्वं -पदशक्यतावच्छेदकता - योगः - ख मातृकायाम्
3. ज्ञानत्वा
4. इति वाच्यम् --- तत्सिद्धिः - योगः - ख मातृकायाम्
5. सुखादि ।

तत्सिद्धिरिति परास्तम्। [1]नापि ज्ञानादिसमवायितावच्छेदकतया तत्सिद्धिः। कार्यकारणव्यवस्थापकानामिति ग्रन्थे कार्यतावच्छेदकत्वकारणतावच्छेदकत्व-योरेव जातित्वव्यवस्थापकत्वेनोभ्युपगमात्। अन्यथा समवेततावच्छेदकत्वेन सामान्यादिष्वपि एकजातिसिद्ध्यापत्तेः।

अत्र केचित् - ब्रह्माण्डदिसाधारणे हि विनिगनविरहेण प्रयत्नवदात्म-संयोगोऽदृष्टवदात्मसंयोगानामुभयकारणम्। तत्र तत्तत्संयोगानामननुगतत्वादेक-रूपेण ब्रह्माण्हादिसाधारणं प्रति हेतुत्वसिद्ध्यर्थं ब्रह्माण्डादिसाधारणत्वा-वच्छिन्नकार्यतानिरुपितकारणतावच्छेदकतया तत्संयोगेषु जातिविशेषः कल्पनीयः। स चान्यतरकर्मजन्यतावच्छेदकसंयोगत्वव्याप्यव्याप्यः तत्त्वावच्छिन्नकार्यतानिरुपितकारणतावच्छेदकतया संसारीश्वरसाधारण्यात्म-त्वसिद्धिरित्याहुः।

केचित्तु - क्रियाजन्यविभागपूर्वसंयोगनाशे पुनरपि पूर्वदेशे संयोगापत्तौ तत्तत्प्रतिबन्धकतया प्रयत्नादृष्टसमानाधिकरणस्वयोगस्यैव प्रतिबन्धकत्वं वाच्यम्, तादृशसंयोगानां चाननुगतत्वात्तत्तत्प्रतिबन्धकतावच्छेदकत्वेन जातिविशेषोऽङ्गीकरणीयः। [2]तादृशसंयोगत्वावच्छिन्नकार्यतानिरूपितकारण-तावच्छेदकतया आत्मत्वसिद्धिरित्याहुः।

नवीनास्तु - संसारीश्वरसाधारणं ज्ञानत्वमेव ईश्वरात्मपद-प्रवृत्तिनिमित्तमनुगतधर्माभावेऽनुगतस्यापि प्रवृत्तिनिमित्तत्वात्। [3]ज्ञानत्वरूपेणा-नुगमाच्च द्रव्यविभाजकोपाधिरपि तदेव नात्मत्वं सामान्यरूपम्। अतो नेश्वरस्य नवभिन्नत्वापत्तिः। आत्मत्वन्तु मानसत्वाद्यवच्छिन्नकार्यतानिरुपितकारण-तावच्छेदकत्वेन सिद्धसंसारमात्रवृतिस्तत्र [4]चानुगतप्रत्यक्षाभावेऽपि कार्य-तावच्छेदकत्वेन तत्सिद्धिरित्याहुः।

---

1. --नापि -- तत्सिद्धिः - क मातृकायाम् नास्ति
2. तादृशसंयोग --- रित्याहः। नास्ति क मातृकायाम्
3. ज्ञानत्वरूपेणानुगमाच्च- नास्ति क मातृकायाम्
4. मानसत्वाद्यवच्छिन्नकार्यतानिरूपितकारणत्वावच्छेदकत्वेन।

नन्विदमात्मलक्षणमाश्रयासिद्धं[1] शरीरव्यतिरिक्तस्यात्मनो मानाभावेनासिद्धत्वात्, न च गौरोऽहमित्यादिप्रतीतेः शरीरस्यापि त्वात्मत्वमिति वाच्यम्, तस्य ज्ञानादिसमवायित्वाभावेनात्मत्वाभावादतस्तत्साधकप्रमाणमुपनेस्यति।

शरीरातिरिक्ततयात्मानमनुमानेन साधयति - तस्येति। [2]आत्मत्वं प्रत्याश्रयः किञ्चिदस्तीत्यत शरीरातिरिक्तमात्मनमनुमानेन साधयति-तस्य अत्र केचित् तस्यात्मनः निरवयवत्वादप्रत्यक्षत्वेऽपि बाह्येन्द्रियप्रत्यक्षत्वेऽपि मानसः प्रमाणं तु आत्मसिद्धेः पूर्वमसिद्धमित्यर्थः। अत्र स्वात्मनः प्रत्यक्षादीश्वरस्य च प्रागनुमानेन साधितत्वात्परमात्मसाधक स्वयं ग्रन्थ इति मन्यमानाः आत्मपदं [3]अपरात्मपरम्। सौक्ष्म्यं चेन्द्रियग्रहणायोग्यतेत्याहुः। तस्याप्रत्यक्षत्वेऽपि श्रोत्रादिभिः करणैस्तस्य समधिगम क्रियत इत्यन्वयः।

ननु श्रोत्रादीनामतीन्द्रियत्वेनानुपस्थितत्वात् कथं तैरात्माधिगम इत्यत आहुः- शब्दाद्युपलब्ध्यनुमितैरिति। शब्दोपलब्धिः सकरणिकाक्रियात्वादित्यनुमानायोपस्थितैरित्यर्थः। अत्र श्रोत्रादिपदं श्रोत्रादिपक्षकानुमानपरम्। तथा च व्यासज्यकालीनश्रोत्रं स्वजन्यफलगोचरेच्छावदधिष्ठितत्वं कारणत्वाद् वास्यादिवत्। अत्र कदाचिदिच्छाविरहेऽपि आकस्मिकघ[4]नगर्जितादिसाक्षात्कारसम्भवादंशतो बाधवारणाय पक्षविशेषणम्, साध्यमात्रोपादानान्नेश्वरमादाय सिद्धसाधनम्। न च तथापि शरीरेण सिद्धसाधनं तस्येच्छाराहित्यस्याग्रे साधयिष्यमाणत्वात् कारणानामिति। 'करणं खलु सर्वत्र कर्त्तृव्यापारगोचर' इत्यभियुक्तस्मृतेः कर्त्तृव्यापारं विना कारणत्वलक्षणव्याघातेन तदनुपपत्तेरित्यर्थः। तेन श्रोत्रादिनि नानाकारणानि यस्य कर्त्तृव्यापारविषयाः स आत्मेत्यभिप्रायः। न च शरीरस्येन्द्रियाधिष्टानत्वं भूतत्वाद् घटवदित्यनुमानेन बाधादिति द्रष्टव्यम्।

---

1. आश्रयस्यात्मनोऽभावेनासिद्धत्वात्।
2. आत्मत्वं --- अत्रकेचित् - योगः ख मातृकायाम्
3. परात्मपरमा - क मातृकायाम्
4. मानगर्ज्जनादि - क मातृकायाम्

नन्विन्द्रियाण्यपि शरीरावयवविशेषा इति तेषामतीन्द्रियत्वमसिद्धम्, स्फुटञ्च तेषां शराराधिष्टानत्वम्, कथञ्च नेच्छादेः शरीरगुणत्वमतस्तत्र प्रमाणान्तरमाह- शब्दादिष्विति । आदिपदेन विषयमात्रपरिग्रहः । सप्तम्यर्थो विषयताप्रसिद्धिः ज्ञानम् । [1]प्रसाधकः सिद्ध्याश्रयो ज्ञानसमवायिकारणमिति यावत् । तेन ज्ञानं क्वचित्समवेतं भावत्वे सति ध्वंसप्रतियोगित्वाद् घटवदिति सामान्यतो दृष्टादितरदिक्सहकृतादेव तत्समवायिकारणत्वेन यत्सिद्ध्यै तदेव आत्मेत्यर्थः । यदि ज्ञानं भावत्वे सत्यसमवेतं स्यादनुपपन्नमित्यबाधितानुभवबलेन तस्य जन्यत्वावधारणात् ।

ननूक्तानुमानाज्ज्ञानाय समवेतत्वसमवेतत्व[2]सिद्धावप्यात्मसमवेतसिद्धिः कुतः शरीरादिसमवेतत्वस्यापि सम्भवादित्याशङ्क्य शरीरादिसमवेतत्वक्रमेण निरस्यति - न शरीरेति । मनस इन्द्रियत्वेऽपि युक्तिविशेषप्रदर्शनार्थं पृथगुपादानम् । युक्तिविशेषश्च इन्द्रियान्तरेष्ववृत्तावपि तस्यानुवृत्तिः । चैतन्यमित्यग्रे तेन न सम्बध्यते । [3]अज्ञत्वात् धर्मिग्राहकप्रमाणबलेन ज्ञानभाविवत्तया सिद्धत्वा-ज्ज्ञानविरोधिधर्मवत्त्वाद् वा । तेन शरीरादीनि न ज्ञानवन्ति । नानाभाववत्तया धर्मिग्राहकमानसिद्धत्वात् ज्ञानविरोधिधर्मवत्त्वाद् वा घटवदिति ।

एवं सामान्येनोक्त्वा विशेषतस्तदुपपादयति - न शरीरस्येति । भूतपादं प्राणिपरम् । लक्षणया विलक्षणप्राणिसंयोगपरम् । तेन तादृक्प्राणसंयोगजन्य-त्वादित्यर्थः । घटादिपदं शरीररूपादिपरमिति । व्यतिरेकिदृष्टान्तः शरीरगुणानां रूपादीनां प्राणसंयोगासाधारणकारणत्वाभावादित्यर्थः ।

कथं ज्ञानस्य तथात्वमत आह - मृते चेति । मृते शरीरे विलक्षणप्राणसंयोगाभावादेव ज्ञानस्याभाव इत्यन्वयव्यतिरेकाभ्यां ज्ञानस्य विलक्षणप्राणसंयोगजन्यत्वमिति । परे तु भूतकार्यत्वादिति हेतुद्वयम् । भूतत्वात् कार्यत्वादिति । तेन शरीरं न ज्ञानसमवायिकारणं बहिरिन्द्रियग्राह्यविशेष-गुणत्वाजन्यत्वाद् वा । नन्वनुकूलतर्काभावादस्याप्रयोजकमिति चेत्; न ।

1. प्रसाधनः - क मातृकायाम्
2. त्वात्मसमवेत - क मातृकायाम्
3. अज्ञातत्वात् - क मातृकायाम्

शरीरविशेषगुणवृत्तिगुणत्वव्याप्यजातेर्घटादिवृत्तित्वनियमेन ज्ञानस्यापि घटादिवृत्तिप्रसङ्गेनास्य बलवत्त्वात्[1] ।

हेत्वन्तरमाह - मृते चेति । ज्ञानं न शरीरविशेषगुणः शरीरसमानकालीनध्वंसप्रतियोगित्वाच्छब्दवदिति । [2]नन्विदं पीलुपाकनये पृथिवीपरमाणुरूपादावनैकन्तिकं तेषां स्वाश्रये परमाणौ सत्यपि पाकजन्यध्वंसप्रतियोगित्वादिति पिठरपाकनयेनेदं यद्वा भूतकार्यत्वादिति । भूतं जन्मान्तरे जातम्, यतः स्तन्यपानेष्टसाधनादिज्ञानं तदधीनत्वादिति । तथाहि जातमात्रस्य स्तन्यपानादौ प्रवृत्तिर्जायते । सा चेष्टसाधनता ज्ञानजन्या । दृष्टसाधनताज्ञानञ्च तत्र नानुभवरूपमनुभावनसामग्र्यभावादतः स्मृतिरूपम् । स्मृतिश्च पूर्वानुभवं विना न सम्भवति । तथा चैत्रस्यैतद्भावीयमाद्यं स्तन्यपाने प्रवृत्तिजनकं तदीयमिष्टसाधनताज्ञानं स्थितिरिरिति जनकानुभवज्ञानं वेतच्छरीरसमवेतं व्यापाराजन्यत्वादेस्तज्जन्यत्वाद् वा घटरूपादिवत् न च शरीरान्तरे उत्पन्नेऽनुभवः शरीरान्तरे स्मृतिं जनयतीति वाच्यम्, ज्ञानस्य शरीरसमवेतत्वपक्षे शरीरनाशेन तन्नाशे हेतुत्वाभावेन तदुदयानापत्तेः । तथा च तज्ज्ञानस्य शरीरासमवेतत्वसिद्धौ तद्दृष्टान्तबलेन ज्ञानमात्रस्यापि तत्समवेतत्वसिद्धिरिति भावः ।

नेन्द्रियाणां चैतन्यमित्याह- नेन्द्रियाणामिति । इन्द्रियपदं बहिरिन्द्रियपरम् । न चैतन्यमिति पूर्वेणान्वयः करणत्वादिति । यद्यप्यात्मानमात्मनावेत्युत्पादौ आत्मनोऽपि करणत्वात्करणत्वं न चैतन्याभावव्याप्यं परेणेन्द्रियाणां कर्त्तृत्वाभ्युपगमादसिद्धम्, तथापि करणत्वादित्यनेन ज्ञानत्वावान्तरसामान्यावच्छिन्नकार्यतानिरुपितकारणताश्रयत्वं विवक्षितम् । तथा च चक्षुरादिकं न समवायिचाक्षुषत्वमात्रावच्छिन्न (मात्राद्यवच्छिन्न) कार्यतानिरुपितकारणताश्रयत्वात् आलोकादिवदिति । केचित्तु करणत्वादित्यस्य इन्द्रियत्वादित्यर्थः । इन्द्रियत्वं स्मृतिजनकज्ञानजनकमनःसंयोगाश्रयत्वं चक्षुरादिप्रत्यक्षं पक्षः ।

1. तस्य भङ्गेनास्य वलवत्वात् - योगः - ख मातृकायाम् ·

2. नन्विदं पीलुपाकनये --- पिठरपाकनयेनेदम् । नास्ति - क मातृकायाम्

ननु चक्षुरादीनां जन्यज्ञानतावच्छिन्नं प्रति कथं न कारणतेत्याह-[1]उपहतेष्विति। अनुभवानन्तरं जन्यमानत्वात् स्मृतेरेवानुस्मृत:। न च जन्यज्ञानमात्रे चक्षुरादीनां हेतुत्वम्। तदा गन्धादीनां चक्षुराद्यभावात् स्मृतिर्न स्यात्, तेन स्मृतिर्न चक्षुरादिजन्या, तेन विनापि जायमानत्वात्।

हेत्वन्तरमप्याह - विषयेति। तथा च स्मृतिर्न तज्जन्याविषयकसन्निकर्षं विनापि जायमानत्वात्। चक्षुरादीनां विषयसन्निकर्षदशायामेव ज्ञानजनकत्वात्। तथा च चक्षुरादीनां ज्ञानजन्यमात्रं प्रति कारणत्वाभावान्न तत्समवायित्वमिति।

प्राञ्चस्तु - रूपाद्यनुभवानन्तरं चक्षुराद्युपघातेऽपि रूपादिस्मृतिदर्शनात् चक्षुरादिजन्योऽपि रसाद्यनुभवो न चक्षुरादिवृत्ति:। तथा च चक्षुरादिजन्यो रूपानुभवो यदि चक्षुरादिवृत्ति: स्यात्, चक्षुर्नाशानन्तरमन्धस्य जायमानस्मृतिहेतुर्न स्यात्, समानप्रकारकानुभवस्य सामानधिकरण्यप्रत्यासत्त्या समानप्रकारकस्मृतिं प्रति हेतुत्वात्, अन्यथातिप्रसङ्गात्। तेन रूपानुभवस्मृत्यो: यदेकमधिकरणं सिध्यति स एव आत्मेति। ननु मास्तु ज्ञानमिन्द्रियसमवेतं विषयसमवेतन्तु स्यादिति तटस्थशङ्कानिराकरणार्थं विषयेति। तथा च विषयनाशेऽपि स्मृतिदर्शनात्स्मृतेर्निर्विषयजन्यत्वमिति पूर्वानुभवोऽपि न विषयवृत्तिरित्याहु:। तन्न। विषयत्वादे: [2]आनन्तत्वापत्ते:। तत्तदरूपादिस्मृतिं प्रति भेदरूपानुभवस्य विशिष्ट(विशिष्य)हेतुत्वाङ्गीकारेणैवातिप्रसङ्गभङ्गे सामानाधिकरण्यप्रत्यासत्त्यायां तन्मते प्रवेशाच्च। चक्षुरादीनां ज्ञानसमावायित्वेऽपि चक्षुश्चाक्षुषज्ञानमात्रस्यैव समवायि स्यान्न ज्ञानमात्रस्य मानाभावात्। तथा च योऽहमद्राक्षम्, सोऽहं स्पृशामीतिदर्शनस्पर्शनयो: सामानाधिकरण्यानुभवो न स्यात्। एवञ्च इन्द्रियाणामतीन्द्रियत्वेन ज्ञानविशिष्टाप्रत्यक्षं न स्यात्, तस्मान्न बहिरिन्द्रियाणां [3]चेतनत्वमिति। यत्तु जीवनभावादेषाम[4]चेतनत्वमिति। तत्र जीवनपदं यदा आत्ममन:संयोगपरम्, तदा [5]तदासिद्धि: इन्द्रियातिरिक्तात्मनोऽसिद्धे:। किञ्च

1. तेज्विति।
2. रनार्जितनींवापत्ते: - क मातृकायाम्
3. चेति नत्वमिति।
4. अचैतन्यमिति
5. तदासिद्धि: --- आत्ममनं: संयोगरूपस्य - नास्ति क मातृकायाम्

शरीरानवच्छिन्नप्रदेशेऽऽत्ममनःसंयोगरुपस्य जीवनचैतन्यसाधकत्वाभावात् जीवनाभावस्यापि न चैतन्याभावसाधकत्वमप्रयोजकत्वात्। न च शरीरावच्छेदेऽऽत्ममनः संयोगस्य हेतुत्वाभ्युपगमे शरीरावच्छिन्नमनःसंयोगस्यैव हेतुत्वम्। यदि पुनर्जीव्यत इति व्युत्पत्त्या जीवनपदं यत्नपरं तदाऽसिद्धिः। ज्ञानवद् यत्नस्यापि धर्मत्वाभ्युपगमात्।

निरवयवत्वेनोपघाताभावादुक्तदोषाभावेन मनस एवास्तु चैतन्यमित्याशङ्क्य निराकरोति- **नापि मनस इति**। यदि मनसो ज्ञानसमवायित्वं स्यात्, कर्त्तृत्वमेव स्यात्, न करणत्वम्। किञ्च विनिगमनाविरहेणादृष्टाश्रयत्वमपि तस्य स्यात्। तथा च युगपन्नानाविषयेन्द्रियसन्निकर्षे युगपन्नानाज्ञानोत्पत्तिप्रसङ्गः। एवं युगपन्नानास्मृतयोऽपि जायेरन् सहकार्यान्तराभावेन तदसम्भवात्। मनसो ज्ञानाश्रयत्वे तेन सहेन्द्रियसम्बन्धस्य सार्वकालिकत्वात्। श्रोत्रसम्बन्धाभावेऽपि न क्षतिः। नानादेशावच्छेदेन नानाकार्योत्पत्तिसिद्ध्यर्थं विभुत्वाङ्गीकारस्तथा च चाक्षुषज्ञानवतो मैत्रस्य तत्तद्विषयरसनादिसंयोगदशायां रासनज्ञानोत्पत्तिर्दुर्वार एवेति वाच्यम्।

ननु चाक्षुषादीनां परस्परं प्रतिबध्यप्रतिबन्धकभावकल्पनैव एकज्ञानदशायामपरानुदयेन न युगपन्नानाज्ञानोत्पत्तिप्रसङ्गः। एवमुद्बोधकाभावान्न युगपत्स्मृत्त्यापत्तिरत आह - **स्वयमिति**। ज्ञानाश्रयासिद्ध्यनन्तरं युगपन्नानेत्यादि तदन्यथानुपपत्त्या कल्पमानस्य मनसो ज्ञानाद्याश्रयत्वेन कर्त्तृत्वं धर्मिग्राहकमानबाधितमित्यर्थः। वस्तुतो [1]धर्मिग्राहकप्रमाणबलेन मनोऽणुत्वसिद्धौ तत्समवेतानां ज्ञानादीनामयोग्यत्वापत्तेः। न चाश्रययोग्यत्वं गुरुयोग्यतायाः न तन्त्रम, तथात्वे शब्दस्याप्ययोग्यतापत्तेः कथमेतदिति वाच्यम्। विनिगमनाविरहेण सुखादीनामप्यणुमनःसमवेतत्वेऽऽभिमानिकसुखादेः सर्वशरीरव्यापित्वान्नुपलम्भविरोधः स्यात्। एवं मनसो ज्ञानाश्रयत्वे [2]व्यासज्यवृत्त्यर्थं किञ्चित् करणान्तरं कल्पनीयमिति। [3]व्यासज्योपपादकज्ञानाश्रययोश्च भेदसिद्धौ लाघवात् किमपूर्वकल्पनयेत्यत्र तात्पर्य्यम्।

1. धार्मिप्रमाणवलेन - क मातृकायाम् 2. व्यासङ्गव्युत्त्यर्थं 3. व्यासङ्गोपपाद -

एवञ्च ज्ञानं विशेषगुण: सामान्यवत्त्वे सत्येकेन्द्रियग्राह्यत्वात् । [1]न च घटमहं जानामीत्याकारकत्वाज्ज्ञानस्य चाक्षुषादिज्ञानेऽपि स्वविषय इति ज्ञानस्यैकेन्द्रियग्राह्यत्वमसिद्धमिति वाच्यम्, चक्षुर्न चाक्षुषज्ञानग्राहकं बहिरिन्द्रियत्वाद् रसनवदिति, चक्षुष: स्वजन्यज्ञानग्राहकत्वसिद्धौ घटादिज्ञानस्य जानामीत्याकारकानुपपत्ते: । किन्तु चक्षुरादिना ज्ञानोत्पत्त्यनन्तरं मानसोऽप्यमनुव्यवसायो जानामीति तस्मादेकेन्द्रियग्राह्यत्वं ज्ञानस्य । ततश्च ज्ञानं न स्पर्शवद्विशेषगुण: बहिरिन्द्रियग्राह्यत्वात् नाप्याकाशगुण:, अहंत्वसमानाधिकरणतया प्रतीयमानत्वात् न दिक्कालमनोगुणो विशेषगुणत्वादिति प्रसिद्धद्रव्यानाश्रितत्वसिद्धौ पृथिव्याद्यष्टकानाश्रितं ज्ञानं तदतिरिक्तद्रव्याश्रितम्, तदनाश्रितत्वे सति द्रव्याश्रितत्वात् यन्नैवं तन्नैवमिति व्यतिरेकिणा पृथिव्याद्यतिरिक्तज्ञानाधिकरणात्मसिद्धि: ।

यत्तु ज्ञानाश्रयो द्रव्यं पृथिव्याद्यष्टद्रव्यभिन्नं तदवृत्तिधर्मवत्त्वादिति । तन्न । पृथिव्यादीनां द्रव्यत्वेन पाक्षीकरणे बाधात्, तदतिरिक्तस्योक्तानुमानात् पूर्वमसिद्धे सिद्धौ साधनावैय्यर्थ्यात् । अग्रे परिशेषश्च सुखादिसाधारण्येन करिष्यत इति न पौनरुक्त्यम् । यद्वात्मज्ञानस्य कार्यत्वपुरस्कारेणात्मसाधकत्वमग्रे च गुणत्वपुरस्कारेणेत्यपौनरुक्त्यम् । अत उक्तमात्मकार्यत्वमिति तेन तत्पक्षकानुमानेनाऽत्मन: परमात्मनो विप्रतिपत्तौ सत्यामात्मनोऽपि समधिगमोऽनुमानम् । ननु ज्ञानेनात्मानुमानमयुक्तम्, अतीन्द्रियत्वात् परात्मवत् [2]परकीयज्ञानस्याप्यतीन्द्रियत्वात् । [3]भट्टमते ज्ञानमात्रस्यापि तथात्वाच्च । न च चेष्टया ज्ञानमनुमीयते नात्मानुमानमिति वाच्यम्, तर्हि चेष्टानुमितयत्नेनैवानुमानमस्तु किं मध्ये ज्ञानानुमानेनेत्याहु: ।

(मू) शरीर (नित्य) समवायिनीभ्यां च हिताहितप्राप्तिपरिहारयोग्याभ्यां प्रवृत्तिनिवृत्तिभ्यां रथकर्मणा सारथिवत् प्रयत्नवान् विग्रहस्याधिष्टाता अनुमीयते । प्राणादिभिश्च इति कथम् ? शरीर-

---

1. न च घट - तदतिरिक्तद्रव्यासिद्धित्वम् - नास्ति । **2.** न - योग: **3.** भट्टमते - तथात्वाच्च - नास्ति ।

परिगृहीते वायौ विकृतकर्मदर्शनात् भस्त्राध्मापयितेव, निमेषोन्मेष-कर्मणा नियतेन दारुयंत्रप्रयोक्तेव, देहस्य बृद्धिक्षतभग्नसंरोहणादि-निमित्तत्वाद् गृहपतिरिव अभिमतविषयग्राहककरणसम्बन्धानिमित्तेन मनःकर्मणा गृहकोणेषु पेलकप्रेरक इव दारकः, नयनविषयालोचना-नन्तरं रसानुस्मृतिक्रमेण रसनविक्रियादर्शनादनेकगवाक्षान्तर्गतप्रेक्षक-वदुभयदर्शी कश्चिदेको विज्ञायते ।

शरीरेति – प्रवृत्तिनिवृत्तिपदे क्रियाविशेषपरैस्तयोरेव शरीरसमवेतत्वात्, हितप्राप्तिरिष्टलाभः अहितपरिहारोऽनिष्टं नाशादिकम् । तद्धेतुत्वञ्च तद्योग्यताऽतो मध्येऽन्तराले फलाजननेऽपि न क्षतिः । न चानिष्टपरिहाराय प्रागभावरूपत्वे नानादिवत्त्वात् क्रियायाः हेतुत्वसम्भवादिति वाच्यम्, प्रागभावस्यानादित्वे तदग्रिमक्षणसम्बन्धे प्रकृतिक्रियायाः हेतुत्वेन तद्धेतुत्वोपचारात् । अत्र हितप्राप्तिहेतुक्रियात्वात् अहितपरिहारहेतुक्रियात्वादिति हेतुद्वये तात्पर्यम् । प्रत्येकस्यैव गमकत्वे नाधिकस्य व्यर्थत्वात् । विग्रहस्य जीववच्छरीरस्य प्रयत्नवानधिष्ठितेति प्रकृतचेष्टासाधारण [1]प्रयत्नवत्संसर्गाश्रयकारणसंयोगाश्रयः इत्यर्थः । अत्र जीववच्छरीरमात्रं पक्षः, तेन जीववच्छरीरं प्रकृतमात्रकारणप्रयत्नवत् संयुक्तम् । तदिष्टप्राप्तिहेतुक्रियावत्त्वात् यो हि (यदिष्टप्राप्तिहेतुक्रियावान् भवति) यदिष्टहेतुक्रियाप्राप्तिहेतुक्रियावान् भवति, यथा [2]सारथीष्टप्राप्तिहेतुक्रियावान् रथस्तादृशप्रयत्नवत् सारथिसंयुक्ते इति सामान्यतो [3]दृष्टान्तम् । अत्र साध्ये मात्रपदोपपादानान्नेश्वरेण सिद्धसाधनम् । क्रियावत्त्वमात्रं तृणादौ व्यभिचारीति विशिष्टो हेतुरुपात्तः । यदत्र परकीयं जीववच्छरीरं पक्ष इति । तन्न । अहं प्रत्यक्षशरीरविषयत्वविप्रतिपत्तौ स्वात्मन्यपि प्रमाणाभावात् । एवं मदवच्छेदक-तासम्बन्धेन प्रयत्नाधिकरणत्वमपि न [4]साध्यम् । शरीरे मे सुखमिति, शरीरे मे

1. प्रयत्नवत्संसर्गाश्रय – नास्ति क मातृकायाम्
2. सारथीष्टप्राप्तिहेतुक्रियावान् – क मातृकायाम्
3. दृष्टान्तः ।
4. साध्ये – क मातृकायाम्

प्रयत्न इत्यनुभवेन शरीरस्य प्रयत्नावच्छेदकत्वाभावात् । एवं चेष्टावत्त्वमपि न हेतुः दृष्टान्ते [1]चेतनव्यापारस्यैव चेष्टात्वात् साधनवैकल्यापत्तेः । न च रथकर्मण इत्यादिनानुमातृशरीरमेव । उक्तं [2]भाष्यस्यैवमत्यन्तमुदक्षरापत्तेः । न च यथाश्रुतेनैवोपपत्तौ कल्पनान्तरे मानमस्ति ।

लिङ्ग्यान्वरमाह - **प्राणादिभिरिति** । आदिशब्देन प्राणापाननिमेष-जीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेष-प्रयत्नाश्चात्मनो लिङ्गानीति पूर्वोक्तानां हेत्वन्तराणां परिग्रहः ।

अनुमानप्रकारं प्रश्नपूर्वकमुपपादयति - **कथमिति** । कथं केन प्रकारेण प्राणेनानुमानमित्यर्थः । उत्तरमाह - **शरीरेति** । शरीरं परिगृह्यते शरीरान्तस्संचारिणि शरीरव- ज्ज्ञानजनकमनःसंयोगवतीत्यर्थः । [3]शरीरक्रियाप्रसादज्ञानादेव मनःसंयोगजातीतिसूत्राद् विकृतविविधक्रिया उध्र्वदेशसंयोगकालिकायाः क्रियागमनादिरूपात्तस्यादर्शनात् तत्तत्संसर्गादिक्रियायास्तदनुमानादित्यर्थः । तथा च मलोत्सर्गादिजनिका शरीरपवनक्रियाजन्यप्रयत्नजन्या सजातीयाभिघाताद्य-जन्यपवनक्रियात्वात् उभयपवनक्रियावत् आदिपदाभिज्ञाद्यभिघातपरिग्रहः । तेन तादृशपवनक्रियायां न व्यभिचारः । भस्त्राचर्मयन्त्रविशेषो, यथा तद्गत-वायुक्रियायाः यथा तदुपहतवायुक्रियायास्तद्विषययत्नवान् कश्चिदमुमीयते । इत्यर्थः ।

आत्मानुमाने प्रकारान्तरमप्याह- **निमिषेति** । अक्षिपुरुषाणां विभागहेतुः क्रियोन्मेषः । निमेषजनकः पक्ष्मविभागो वा उन्मेषः । ननु व्याधिजनिततादृश-कर्मविशेषादेस्तज्जन्यत्वानियमेन नात्मापेक्षत्वमाह - **नियतेनेति** । कर्मण्य-प्रत्ययवशेन नियतेनेत्यर्थः । रोगविशेषाद्यजन्यत्वेन स्वाभाविकेनेत्यर्थः, तेन नयननिमेषादिजनकं कर्मन्यप्रयत्नजन्यं विलक्षणक्रियात्वाद् [4]दारुयन्त्रक्रियावत् । क्रियायां वैलक्षण्यञ्च यत्नजन्यतावच्छेदको जातिविशेषः । तेनाभिघात-

1. दृष्टान्ते चेष्टात्वात् - नास्ति - क मातृकायाम्
2. भाष्यस्यैवोदक्षरतापत्तेः
3. शरीरक्रियाप्रासादज्ञानादेव मनः संयोगजाती इति सूत्रात् विकृतविविधक्रिया । नास्ति - क मातृकायाम् ।
4. दारु यन्त्र क्रियावत् - क मातृकायाम्

जन्यक्रियादौ न व्यभिचारः। न च प्रयत्नजन्यत्वासिद्धावपि प्रयत्नस्य शरीरगुणत्वाभ्युपगमेनोक्तप्रकारेणातिरिक्तात्मसिद्धिरिति वाच्यम्, तस्य शरीरत्वाभावस्याग्रे साधनीयत्वात्। न चोपजीव्यत्वात्तेनैवेदं गतार्थमिति वाच्यम्, प्रपञ्चार्थत्वेनैव एतद्प्रघटकस्योपन्यासात्।

सूत्रे जीवनमात्मनो लिङ्गत्वेनोक्तम्। तदुपपन्नम्। जीवनस्यादृष्टविशेषजन्यात्ममनःसंयोगरूपस्यातीन्द्रियत्वेन तत्र व्याप्तेरग्रहात्। जीवनपदन्तु कार्यदेहबुद्ध्यादिपरम् अतस्तदेव लिङ्गत्वेनोपन्यस्यति - देहेति। देहपदं देहावयवानामपि उपलक्षणम्। बुद्धिः पूर्वावयवापेक्षयाऽधिकपरिमाणावयवोत्पत्तिः। क्षणञ्चावयवाविभागो भङ्गश्च। अवयवत्वपर्य्याप्त्यधिकरणप्रतियोगिको विभागः। संरोहणं तज्जन्यव्रणनाशः। देहतदवयवबुद्धिजन्यप्रयत्नजन्योऽवयवकतासम्बन्धेन सुखाधिकरणबुद्धित्वाद् गृहबुद्धिवत्। एवं क्षतसंरोहणादिकं पक्षीकृत्यापि साध्यम्। अत्र हेतावधिकरणान्तविशेषणान्न पाषाणबुद्ध्यादौ व्यभिचारः। अत्र गृहे सुखमिति प्रतीत्या गृहस्यापि सुखावच्छेदकत्वमिति न दृष्टान्ताऽसिद्धिः। वृक्षादीनाञ्च प्राणित्वेन तद्बुद्धिपक्ष एव। अत्र संरोहणादीत्यादिपदं सुषुप्तिकालीनक्रियापरम्। तथाहि सुषुप्तिकालीनपवनक्रियाजन्यप्रयत्नजन्या नोदनाद्यजन्यक्रियात्वात्। [1]यन्त्राधिष्टितदारूपुत्रक्रियावदिति। तदानीं प्राणिक्रियाभावे जीवनविलोपापत्तेस्तत्कारणजीवनयोनियत्नसिद्धिः।

सूत्रे मनोगतेरात्मलिङ्गत्वमुक्तम्। तदुपापादयति - अभिमतेति। अभिमतो वुभुत्सितो यो विषयस्तस्य ग्राहकं यत् करणमिन्द्रियं नयनादिसम्बन्धनिमित्तेन तादृशेन्द्रियेण सह मनः संयोगजनकेन मनः कर्मणेत्यर्थः। पेलुकं [2]जतुपुटकं यथा गृहकोणे स्थितं जतुपुटकं बालकः [3]तादृशजतुपुटकपातेनाभिमतदेशं प्रापयति। तद्वदेवात्माश्रययत्नवशेन मनोबहिरिन्द्रियेण संयोज्यते। तद्वुभुत्सितार्थज्ञानजननोन्मुखीकरोति।

1. यन्त्राधिष्टित -- क मातृकायाम्।
2. यत्तु पुटकम् - क मातृकायाम्
3. दृशजतुपुटक पातेन

अयमाशयः । घ्राणादिषु चतुर्ष्विन्द्रियेषु स्वस्वविषयसम्बन्धिष्वपि चाक्षुषमेव ज्ञानं वुभुत्सात्वाज्जायते । नेन्द्रियान्तरजन्यं ज्ञानम् । तत्र न वुभुत्सामात्रहेतुः । अनेकविषयकवुभुत्सायां नानेन्द्रियकजन्यविलक्षणैकज्ञानापत्तेः । तस्माद् येनेन्द्रियेण सह मनःसंयोगस्तदेवेन्द्रियं स्वविषयसाक्षात्कारजनकम् । अत एव मनोऽणुत्वसिद्धिः । तादृशश्च मनःसंयोगक्रियाजन्या सा च प्रयत्नजन्येति । तथा च तादृशमनःक्रियाऽनित्यप्रयत्नजन्या विलक्षणक्रियात्वाद् बालकप्रेरितपेलुकक्रियावदिति । [1]तथा च तादृशी मनः क्रियता अनित्यप्रयत्नजन्या विलक्षणक्रियात्वाद् । ननु प्रत्यक्षविषयस्य प्रयत्नविषयत्वनियमान्मनसोऽप्रत्यक्षत्वे कथं प्रयत्नविषयत्वम् । कथं वातक्रियायाः प्रयत्नविषयत्वमिति चेत् । न । वायवीयशरीरक्रियादावप्रत्यक्षविषयस्यापि शरीरावयवादेः प्रयत्नविषयत्वदर्शनेन प्रत्यक्षविषयत्वस्य तत्राप्रयोजकत्वात् ।

केचित्तु- मनःपदेन मनोवहनाडी विवक्षिता तस्यास्त्वचा प्रत्यक्ष विषयत्वात् तद्विषययत्नोपपत्तिः । न च चाक्षुषविषयत्वमेव प्रयत्नविषयतायां प्रयोजकम् । मलाद्युत्सर्गहेतुनाडीनां कदाप्यचाक्षुषत्वेन तद्विषयकप्रयत्नानुपपत्तिप्रसङ्गात् । न च सर्वदा शरीरत्वाच्च त्वापत्त्याऽऽगन्तुकस्त्वक्संयोगस्त्वाच् हेतुः मनोवहनाड्यास्वागन्तुकतत्संयोगाभावान्न त्वचूत्वमिति वाच्यम्, अदृष्टविशेषजन्यत्वक्संयोगस्य तद्हेतुत्वेन तस्य तद्हेतुत्वाभावादित्याहुः ।

इन्द्रियान्तरविकारस्यात्मलिङ्गत्वं सूत्रोक्तं तदुपपादयति - नयनविषयेति । नयनस्य विषयो रूपं तदालोचनानन्तरं तद्विषयकसाक्षात्कारानन्तरं रसस्यानुस्मृतिस्तद्रसस्य तदूपसहचरितत्वेन संस्कारो बाधकत्वात् तद्रूपसाक्षात्कारानन्तरं तद्रसस्मृतिस्तदनन्तरमिन्द्रियान्तरस्य रसनस्य रसविकारो लीलासम्प्लवादिस्तद्दर्शनात् ।

अयमाशयः- परिणतजम्बीरफलादाववलोकितमात्र एव तद्रससहचरिततद्रूपदर्शनाद् बुद्धिसंस्कारजनितत्त्वद्रूसविषयकस्मृतिमतः पुंसो रसनविकारोऽन्यान्यसम्प्लवो जायते । तत्र रूपसाक्षात्काररसस्मृतिः एकस्यैव

1. तथा च विलक्षणक्रियात्वात् - नास्ति - क मातृकायाम् ।

धर्मिणोऽङ्गीकर्त्तव्येऽन्यथाऽन्यस्य पुरुषस्य रूपज्ञानेऽन्यस्य रससाक्षात्कारापत्तेः । य एव रूपमनुभवामि, स एव रसं साक्षात्करोमीत्यनुभवाच्च । यथा एकस्यैव पुंसो गवाक्षविवरभेदेन भिन्नभिन्नविषयकज्ञानाश्रयत्वं तद्वदत्रापि स्मृत्यनुभव-रूपज्ञानाद्याश्रयत्वमिदमेवाभिप्रेत्यो आह - उभयदर्शनात् अनुस्मृति-रित्युपलक्षणम् । तद्रूपस्य तद्रसव्याप्यत्वाद् दर्शनान्तरं तदनुमानस्यापि सम्भवात् तेनैतद्रूपसाक्षात्कारानन्तरं जायमानमेतद्रसानुस्मृत्यादिकमेतद्रूपसाक्षात्कार-समानाधिकरणमेतज्ज्ञानजन्यज्ञानत्वात् तद्रूपस्मृतिवत् । न च ज्ञाने तयोः समामानाधिकरण्यमिति वाच्यम्, ज्ञानादीनां [1]शरीरसमवेतत्वस्याग्रे निषेत्स्य-मानत्वात् ।

यत्तु नयनं न ज्ञानसमवायितेजस्त्वादिति तदग्रे पुनरुक्तम् । यत्तु परबुद्ध्याश्रयः इन्द्रियभिन्नः प्रतिसन्धातृत्वादिति तत्र यदि परबुद्ध्याश्रयत्वे-नात्मनः पक्षत्वं तदासिद्धसाधनं, यदा शरीरस्य तदाऽसिद्धिरिति द्रष्टव्यम् । ननु यथा श्रुतेः भस्रादौ शरीरवदेवाधिष्टातृत्वं, शरीरेऽपि तादृशस्यैवाधिष्टा-तृत्वमनव्यवस्थात्, शरीरेऽशरीरवतोऽधिष्टातृत्वमिति लाघवात् शरीरस्यैव प्रयत्नादिकर्मास्त्विति चेत् । न । अग्रे निराकरिष्यमाणत्वात् । वायुयौवनयोः शरीरभेदेऽपि बाह्यनुभूतस्य यौवने स्मरणात् शरीरस्य पूर्वानुभवानाश्रयत्वेन तदाश्रयत्वे शरीरातिरिक्तस्याभ्युपगमे तस्यैव ज्ञानमात्राधिकरणत्वकल्पनात् चेति दिक् ।

एवं बुद्ध्यादीनामात्मलिङ्गत्वं सूत्रकृतोक्तम् । तत्र बुद्धिलिङ्गकत्वस्य पूर्वमुक्तत्वात् सुखादीनामात्मलिङ्गकत्वमुपपादयति-

(मू) सुखदुःखेच्छाद्वेषप्रयत्नैश्च गुणैः गुण्यनुमीयते । ते च न शरीरेन्द्रियगुणाः । कस्मात् ? अहङ्कारेणैकवाक्यताभावात्प्रदेश-वृत्तित्वाद्यावद्द्रव्यभावित्वाद् बाह्येन्द्रियाप्रत्यक्षत्वाच्च तथा 'अहम्' शब्देनापि पृथिव्यादि शब्दव्यतिरेकादिति ।

सुखेति । सुखादीनामुत्पत्तिं विना शरीरित्वादुत्कर्षापकर्षवत्त्वा-त्सामान्यवत्त्वाच्च न सामान्याद्यन्यतमत्वम् । संयोगविभागासमवायिकारणत्वाद्

1. शरीर समवेतत्वस्याग्रेनि --- त्समानत्वात् ।

चलनात्मकत्वाच्च न कर्मत्वम् । परिमाणाभावान्न कुत्रापि समवायिकारणत्वा-भावान्न द्रव्यत्वमिति स्थितौ बुद्ध्यादयो गुणाः सामान्यवत्त्वे सत्यनेकेन्द्रियग्राह्यत्वे सति जन्यत्वाद् जन्यत्वे सति एकेन्द्रियग्राह्यत्वाद् रूपवदिति गुणत्वसिद्धौ सुखत्वादिकमष्टद्रव्यातिरिक्तद्रव्याश्रितमुदयानाश्रितं तदनाश्रितत्वे सत्याश्रितत्वाद् यन्नैवं तन्नैवमिति व्यतिरेकिणा सुखसमवायिकारणं द्रव्यम् । पृथिव्याद्यष्टकातिरिक्तं तद्वृत्तिधर्मवत्त्वाद्रूपवदित्यन्वयिना वा पृथिव्याद्यष्टकातिरिक्तद्रव्यसिद्धिः पूर्ववदित्यर्थः । प्रयत्नादिभिरित्यस्य पक्षभूतैरिति [1]शेषः ।

ननु [2]सूक्ष्मादीनां पृथीव्याद्यष्टद्रव्यानाश्रितत्वमसिद्धम्, तेषां शरीरेन्द्रिय-गुणत्वसम्भवादित्याशङ्क्य निषेधेति - ते चेति । ते च सुखादयः । च पुनरर्थे । ननु बाह्यमते भूतानि चेतयन्ते इति भुतमात्रस्यैव चेतनाभ्युपगमात् सर्वभूतातिक्रमेण तन्मात्रगुणत्वाशङ्कानुमितिचित्तेति चेत्, गौरोऽहमिति प्रत्ययेन शरीरस्याप्यात्मत्वेन विषयकरणादिन्द्रियाणां ज्ञानकरणत्वेन क्लृप्तानां तत्समवायिकल्पने लाघवात् तदावयोर्मनो जानाति घ्राणं गृह्णाति सौरभ्यादिव्यवहाराच्च शरीरेद्रियगुणत्वस्य शङ्काविषयत्वात्, अन्यभूतगुणत्वस्य सम्भावयितुमशक्यत्वात् ।

अहङ्कारेति - अहङ्कारोऽहंपदं प्रवृत्तिनिमित्तमुच्चारयितृत्वमिति यावत् तेनैकवाक्यत्वं तत् सामानाधिकरण्यमेकवाक्यत्वस्य शब्दधर्मत्वेन यथा श्रुतोऽसम्भवात् । तथा च ज्ञानादिकञ्च न शरीरेन्द्रियगुणः । उच्चार्ययि-तृमात्रवृत्तिधर्मत्वात् उच्चारयितृत्ववत् । नोच्चारयितृत्वमपि शरीरधर्म एवेति वाच्यम्, शरीरं चलतीतिवत् शरीरमुच्चारयतीति कस्याप्यप्रतीतेः मृतशरीरे तदापत्तिः । न चोच्चारयितृत्वस्याहंपदवृत्तिनिमित्तत्वेऽनुच्चारणदशायां तत्प्रत्ययानापत्तिरिति वाच्यम्, तदानीमपि योग्यतासम्भवात् ।

केचित्तु- बुद्ध्यादयो न शरीरादिगुणाः स्वसमानध्वंसप्रति-योगिपदार्थसमानाऽधिकरणत्वेन प्रतिसन्धीयमानत्वात्स्मृतिवत् । तादृशप्रतिसन्धानं योऽहं [2]बाल्ये सुखसाधनार्थं यत्नं कृतवान्, सोऽहमिदानीं सुखवान् इत्याकारकमिति नासिद्धिः । ननु शरीरगुणेष्वपि योऽहं पूर्वं गौर आसम्, सोऽहमिदानीं श्याम इति

1. अतिशेषः

2. सुखादीनां - क मातृकायाम्

प्रतिसन्धानसत्त्वेन व्यभिचार इति वाच्यम्, प्रमात्वस्य विवक्षितत्वात्, तत्र [1]गौरत्वादेरहंपदवाच्यत्वात् प्रवृत्तितत्त्वप्रत्ययस्य भ्रमत्वात्। एवं स्मृतं प्रतिपूर्वानुभवस्य सुखं प्रति धर्मस्य दुःखं प्रति अधर्मस्य सामानाधिकरण्य-प्रत्यासत्त्यैव कार्यकारणभावोऽन्यथातिप्रसङ्गात्। न च शरीरादेर्धर्माश्रितत्वं तन्नाशे स्वाश्रयनाशाद् धर्मनाशापत्तौ जन्मान्तरीयसुखाद्यनुत्पत्तिप्रसङ्गात्। तस्माच्छरीरोतिरिक्तधर्माधिकरणसिद्धौ तत्समवेतत्वमेव सुखादिकमिति न सुखादीनां शरीरगुणत्वाशङ्कापीत्याहुः।

[2]नन्वहं गौर अहं श्याम कृश स्थूल युवा बुद्धो गच्छामीत्यादिप्रत्ययवदहं जानेऽहं सुखादिप्रत्ययोऽपि शरीरमेवाहंत्वेन विषयीकरोति। अहंकारैकवाक्यत्वेन शरीरगुणत्वाभावः साधयितुं शक्येत इत्यतो हेत्वन्तरमाह - **प्रदेशवृत्तित्वादिति**। अव्याप्यवृत्तित्वस्याप्यत्यन्ताभावसमानाधिकरणत्वमिति यावत्। तथा च सुखादयो न शरीरविशेषगुणाः स्वात्यन्ताभावसमानाधिकरणत्वात् शब्दवत् रूपादयो हि शरीरविशेषगुणाः, न स्वात्यन्ताभावसमानाधिकरण इति।

ननु पाकरक्तघटादावन्तराश्यामिकोपलब्धेः, रूपादीनामप्यव्याप्य-वृत्तित्वाद् व्यभिचारहेतुरतो हेत्वन्तरमाह - **अयावदिति**। स्वाश्रयसमान-कालीनध्वंसप्रतियोगित्वादित्यर्थः। अत्र पाकजरूपादौ व्यभिचारवारणाय प्रत्यक्षत्वं हेतौ पूरणीयम्। अयावद्द्रव्यभावित्वादित्यस्य यावत्पृथिव्याद्य-वृत्तित्वात्। तथाहि सुखवत्त्वं न शरीरवृत्तिरागवृत्तिजाति घटवृत्तिवृत्तित्वाभावात् शब्दवदित्याहुः।

ननूक्तहेतुद्वयेन शरीरगुणाभावसाधनेऽपि नेन्द्रियगुणत्वाभावः साधयितुं शक्यते, शब्दे निरुक्तहेतुद्वयसद्भावेऽपीन्द्रियगुणत्वसत्त्वादतो हेत्वन्तरमाह-**बाह्येति**। मानसप्रत्यक्षविषयकादित्यर्थः। शरीरगुणो हि रूपादयो न मानस-प्रत्यक्षविषयाः, [3]अन्धादिभिर्ग्रहणप्रसङ्गात्। सुखनयनचक्षुरादिग्राह्याः। चक्षुरादिविरहेऽपि अन्धादीभिस्तदनुभवात्, तेन शरीरगुणापेक्षायास्तेषां

1. वाह्ये - क मातृकायाम्
2. नन्वहं --- करणत्वमिति यावत् - नास्ति।
3. अर्धादिभिः।

वैलक्षण्यान्न तद्गुणत्वम्। सुखादयो हि न शरीरगुणाः मानसप्रत्यक्षविषयत्वाद् बुद्धिवदिति प्राञ्चः। अत्र तद्दृष्टान्तस्या[1]प्रसाध्याङ्गकत्वम्। भावनादीनामसंग्रहणापत्तिश्च। तस्माद् यथाश्रुतमेव मनोभिन्ने क्रियाग्राह्यत्वं हेतुः। तथाचानुभूयमानं सुखादिकं न शरीरविशेषगुणो मनोभिन्नेन्द्रियग्राह्यत्वाद् गुरुत्ववदित्याहुः।

एवञ्चानुमाने शरीरातिरिक्तसिद्धौ प्रत्यक्षविषयत्वेन स्वात्मानमुपपादयति - तथेति। तथा च पृथिव्याद्यवाचकेनाहंशब्देनात्मनो विषयीकरणादात्मा पृथिव्याद्यतिरिक्त इत्यर्थः। पृथिवीसामान्यस्याहंपदवाच्यत्वमहं पृथिवीति-[2]प्रत्यक्षापत्तेः न च पृथिवीविशेषस्तद्विषयः। अहं घट इति प्रत्ययापत्तेः। न च पार्थिवविशेषस्य शरीरस्य तत्पदवाच्यत्वं तस्य पूर्वमेव निराकृतत्वात्। तस्मात्सर्वानुभवसिद्धं पृथिव्याद्यविषयकमहमिति प्रत्यक्षमेव स्वात्मनि प्रमाणमिति भावः। एवं [3]स्वशरीरदृष्टान्तेनापि परकीयशरीरेषु स्वात्मैकत्वं साध्यमिति शरीराद्यतिरिक्तात्मसिद्धिः। एवं वातरागजन्मादर्शनादिन्यायेन नानादित्वग्रहसिद्धावनादिभावस्य नित्यत्वादात्मनो नित्यत्वसिद्धिः।

अत्र बाह्याः। अस्तु शरीरातिरिक्त आत्मा, तथापि क्षणिक एव; न नित्यः। स्पर्शभावानां क्षणिकत्वात्। क्षणिकत्वञ्च ध्वंससामग्रीसहबहितोत्पत्तिकत्वं न चोत्पन्नस्य घटस्य द्वितीयक्षणे नाशकाभावात् कथं नाश इति वाच्यम्, घटान्तरस्यैव नाशकत्वात्, घटान्तरेऽपि पूर्वघटस्यैवोत्वादकत्वात्, तस्य कुर्वद्रूपत्वात् कार्ये कारणमात्रस्यैव प्रयोजकत्वात्, सहकार्यपेक्षायां मानाभावात्, कारणस्य सामर्थ्यः; सामर्थ्ये वा सहकारिकृतोपकारस्य वैय्यर्थ्यापत्तेः। किञ्च [4]कूसूलस्थवीजस्यानागताङ्कुरजनकतावीजाभिन्नहेतुत्वे [5]कुसूलस्थतादशायामपि अङ्कुरजनकतापत्तेः। न च सहकार्यभावान्न

---

1. प्रसाध्याङ्गकत्वम्
2. प्रत्याभत्तापत्तेः क मातृकायाम्
3. स्वशरीरदृष्टान्तेनापि परकीयशरीरेषु सातमकत्वं साध्यमिति - नास्ति - क मातृकायाम्
4. कुसूलस्थता
5. ...य्यर्थ्यस्योक्तत्वात्। - क मातृकायाम्।

तत्राङ्कुरोत्पत्तिरिति वाच्यम्, सहकारिणो व्यर्थत्वात्, [1]वैय्यर्थ्यस्योक्तत्वात्, तस्मात् सत्त्वात् सर्वमेव वस्तु क्षणिकमिति [2]यत्सत्क्षणिकत्वमिति व्याप्तेः । सत्वञ्च वर्त्तमानार्थविक्रियाकारित्वं [3]विधिमुखप्रत्ययवेधत्वं वा अस्तीति प्रत्ययविषयत्वम् वा तथा च प्रयोगः । विवादाध्यासितं सर्वं क्षणिकं सत्वात् [4]अन्त्यशब्दवत् । एवं क्षणिकत्वे सिद्धे क्षणिकत्वाद् विज्ञानकारत्वमेवात्मनः सर्वस्यैव ज्ञानाकारत्वेन तदातिरिक्तस्य वस्तुनोऽभावात् प्रवृत्तिविज्ञानान्तःपातिकादाचित्कत्वाहंप्रत्ययस्यैव सत्त्वाच्च । तथा च क्षणिकं पूर्वपूर्वमेव ज्ञानमुत्तरोत्तरज्ञानं प्रति कारणमित्यनादिप्रवृत्तिकी ज्ञानधारा । तन्मध्यस्य कादाचित्काहंप्रत्यय आत्मा[5] आलयविज्ञानसन्तानस्तु प्रवृत्तिविज्ञानोपादानं मुक्तिरिपि प्रवृत्तविज्ञानसन्ताननिवृत्तौ । शुद्धालयविज्ञानसन्ततिरिवेत्याहुः ।

तदसत् । व्याप्तिग्राहकप्रमाणाभावेन सत्त्वस्य क्षणिकत्वेन सह व्याप्त्यभावेन तस्य व्याप्त्यत्वासिद्धत्वेन तेन तत्साधनयोगाद् भवदुक्तक्षणिकत्वस्याप्रसिद्धत्वेन साधयितुमशक्यत्वाच्च । किञ्च क्षणिकत्वे पूर्वेद्युः यो मया दृष्टः स [6]एवायमाद्रियत इति प्रत्यभिज्ञानुपपत्तिः । न च स एवायं गकार इतिवत् प्रत्यभिज्ञाताज्जातीयविषयान्तरकल्पने मानाभावाद् भवन्मते जातेरलीकत्वाच्च । [7]अंकुरादिकार्यविलक्षणस्य सहकारिविलम्बेनापि सम्भवान्न तन्मात्रेण वस्तुभेदासिद्धेश्च । स्वरूपयोग्यस्यापि कुठारादेस्तै क्षण्याद्यतिशयं विना च्छेदाजनकत्वेन स्वरूपयोग्यस्याप्युपकारापेक्षणाच्च अस्थिरत्वे उपकारार्थं प्रवृत्त्यनुपपत्तेश्च । वर्त्तमानस्य क्षणिकत्वे कस्य तैक्ष्ण्यार्थं प्रवर्त्तितधर्मिण एव तत्कालेऽभावत्वात्, कुठारान्तरस्य पूर्वानुपस्थितत्वाच्च ।

1. व्यय्यर्थ्यस्योक्तत्वात् - क मातृकायाम्
2. यत्सत्तत्क्षणिकत्वमिति व्याप्तेः नास्ति - क मातृकायाम्
3. विधिमुखप्रत्यथवेद्यत्वं वा अस्तीति प्रत्ययविषयत्वम्वा । नास्ति - ख मातृकायाम्
4. शव्दवत्
5. आलयविज्ञानसन्तानस्तु प्रवृत्तिविज्ञानोपादानं मुक्तिरपि प्रवृतिविज्ञानसन्ताननिवृत्तौ - नास्ति क मातृकायाम्
6. एवायमाद्दियत
7. कार्यं

किञ्च ज्ञानेच्छादीनां समानविषयत्वेन कार्यकारणभावो भवताभ्युपेय: अन्यथातिप्रसज्यात्। क्षणिकत्वे च कथमन्यविषयकघटज्ञानात् तदन्य-विषयकेच्छोत्पत्तिः। न च समानप्रकारकत्वेनैव ज्ञानेच्छयोः कार्यकारणभावो न समानविषयत्वेन। तथा च क्षणिकत्वपक्षेऽपि न दोष इति चेत् घटत्वादेरलीकत्वेन विशिष्ट्याभावेन [1]प्रकारकत्वाभावात् [2]भासमानवैशिष्ट्यप्रतियोगित्वप्रकार-कत्वात्। एवञ्च घटादीनामपि न क्षणिकत्वम्। किं पुनः धर्मिग्राहकप्रमाण-सिद्धनित्यस्यात्मनः, किञ्चात्मनःक्षणिकत्वे स्मृत्यनुपपत्तिः। सामानाधिकरण्य-प्रत्यासत्त्यैव कार्यकारणाभावादिति पूर्वोक्तत्वात्। वर्षाऽशनादिसंग्रहानुपपत्तेश्चेति अलमसिद्धवादेन।

[3]यत्तु आत्मनो ज्ञानरूपत्वमुक्तं तत्प्रत्यक्षविरुद्धम् अहं जाने इति ज्ञानाश्रयत्वेनात्मनोऽनुभवात्। यत्तु पूर्वज्ञानस्योत्तरज्ञानं प्रत्यपादानत्वं तदति-तुच्छम्। [4]ज्ञानगुणत्वे न तस्य ज्ञानं प्रत्युपादानत्वाभावात् तस्माद् बुद्धिर्न बुद्धेरुपादानं गुणत्वादिति ज्ञानस्य गुणत्वेन तस्य गुणं प्रत्यपादानत्वाभावात्। तस्माद्बुद्धिर्न बुद्धेरूपादानं गुणत्वादिति ज्ञानस्य गुणत्वं तु पूर्वमेव साधनमिति संक्षेपः। ननु लिङ्गत्वेनोक्ताः सुखादयः एवास्य गुणार्न तु गुणान्तराण्यपि सन्ति मानाभावात्। ततश्च संयोगाभावे द्रव्यत्वमेव न सिद्ध्येत् संयोगत्वावच्छिन्नकार्यतानिरुपित-कारणतावच्छेदकतयैव सिद्धेः।

किञ्च क्षित्यादिकात्मनां चतुर्दशगुणवत्त्वमिति पूर्वविरोधश्चेति आशङ्क्य नास्य बुद्ध्यादिमात्रगुणवत्त्वं किन्तु गुणान्तराण्यपि सन्तीत्याह।

(मू) तस्य गुणाः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्म-संस्कारसंख्यापरिमाणपृथक्त्वसंयोगविभागाः । आत्मलिङ्गा-धिकारेबुद्ध्यादयः प्रयत्नान्ताः सिद्धाः । धर्माधर्मावात्मान्तर-

---

1. प्रकारत्वाभावात्
2. भासमानवैशिष्य प्रकारकत्वात् - नास्ति
3. यतु आत्मनो ज्ञानरूपत्वमुक्तं तत्प्रत्यक्षविरुद्धं अहं जाने इति ज्ञानाश्रयत्वेनामनोऽनुभवात्। नास्ति - क मातृकायाम् - क मातृकायाम्
4. ज्ञानगुणत्वे --- गुणत्वादिति - नास्ति क मातृकायाम्

गुणानामकारणत्ववचनात् । संस्कारः स्मृत्युत्पत्तौ कारणवचनात् । व्यवस्थावचनात्संख्या पृथक्त्वमप्यत एव । तथा चात्मेति वचनात् परममहत्परिमाणम् । सन्निकर्षजत्वात् सुखादीनां संयोगः । तद्विनाशकत्वाद् विभाग इति ।

गुण इति । एषु प्रामाण्यं दर्शयति - **आत्मलिङ्गेति** । यद्यप्येषामात्मगुणत्वे प्रत्यक्षमेव सम्भवति, अहं जानेऽहं सुखीत्यनुभवात्, तथाप्यहङ्कारस्य शरीरादि-विषयत्वं विप्रतिपत्तौ न तन्मात्रेणात्मगुणसिद्धिरिति सूत्रकारसम्मतच्छलेनो-पपत्तिर्दर्शिता । सा च पूर्वोक्तैव बुद्धिलिङ्गाधिकारे प्राणापानादिसूत्रे ।

यद्यप्यत्र बुद्धिर्न साक्षादुपपन्ना, तथापीन्द्रियान्तरविकारपदेन तद्हेतुस्मृतिदर्शनात् तस्यात्मगुणत्वसिद्धिरिति भावः । यत्तु सुखादिग्रहणेनैव बुद्धेरपि ग्रहणम्, सुखादिकं प्रति पुत्रादिज्ञानस्य सामानाधिकरण्यप्रत्यासत्त्या हेतुत्वात् अन्यथातिप्रसङ्गात् । ततश्चात्मसुखादेरात्मगुणत्वे सिद्धे सामानाधिकरण्यप्रत्यासत्त्या सुखादिकं प्रति हेतुत्वेन उक्तयुक्त्या तयोरप्यात्मगुणत्वसिद्धौ सूत्रान्तरद्वारेण तदुपपादनस्य वैय्यर्थ्यात् ।

धर्माधर्मयोरात्मगुणत्वे सूत्रकारसम्मतिमाह - **धर्माधर्माविति** । धर्माधर्मात्मगुणौ सिद्धावित्यर्थः । कुत इति ? हेत्वपेक्षायामाह - **आत्मान्तरेति** । 'आत्मान्तरगुणानामान्तरेऽकारणत्वात्' (वै.सू.6-2-5) सूत्रकारवचनादित्यर्थः । नन्वात्मगुणानां ज्ञानादीनामन्यात्मसुखादिजनकत्वाभावेऽपि सूत्रासिद्धेऽपि धर्माधर्मयोरात्मगुणत्वे किं साधनमिति चेत्, इत्थं कालान्तराभावि-देहान्तरोपभोग्यफलप्रदसमभिव्याहृतवैदिकलिङ्गादिपदबोधित तादृशफल-साधनताकयागादिक्रिया । तादृशसाधनत्वानुपपत्त्या ततसिद्ध्यर्थं धर्मरुपं व्यापारं जनयति । चिरध्वस्तवारणतायाः व्यापारगर्भित्वनियमात् । अनुभवादौ स्मृत्यादिहेतुतायास्तथात्वदर्शनात्, एवं नञायादिसमभिव्याहृतवैदिक-लिङ्गादिसमभिबोधितानिष्टसाधनताकानिषिद्धक्रिया स्वस्यातादृशसाधनत्वा-सिद्ध्यर्थमधर्माख्यं व्यापारं जनयतीति कल्प्यते । तत्र च विहितनिषिद्धक्रियाभ्यां-

कुत्र धर्माधर्मौ जन्येते इत्यपेक्षायां न शरीरे जन्येते, क्रियावच्छरीरस्य फल-समवायवृत्तित्वाभावात् । किन्तु तच्छरीरावच्छिन्नेऽऽत्मनि, तत्र शरीरे बहूनामात्मनां सम्बन्धसत्त्वेऽपि तच्छरीरं यददृष्टारब्धं तदेवं तस्यात्मनोऽवच्छेदकं नात्मान्तरस्य तेन [1]तदवच्छिन्नया ज्ञानादिरूपया यागादिक्रिया शरीराव-च्छिन्नेऽऽत्मनि शरीरसमवेततया क्रियया शरीराऽवच्छिन्नेऽऽत्मनि अदृष्टं जन्येते, नान्यत्रेति नातिप्रसङ्गः । [2]तथा च धर्मः आत्मगुणः स्वसमवायिजन्यसमवेत गुणाजनकत्वाद् अनुभववदिति स्वरूपासिद्धिः तद्गुणसिद्धिस्तु देवदत्तीयशरीरं देवदत्तविशेषगुणपूर्वकं तद्भोगसाधनत्वात् । तन्निर्मित्तदुपभोगसाधनस्रगादिवत् ।

वस्तुतस्तु यागादिक्रियापि [3]इदमिन्द्रियस्येत्यादिरूपज्ञानविशेष एवेति तस्य सामानाधिकरण्यप्रत्यासत्त्यैव धर्महेतुत्वं तीर्थयात्रादावपि तत्प्रयत्न-स्यैवादुष्टहेतुत्वं न चातिप्रसङ्गः । तत्क्रियोपधाने वा तस्य जनकत्वात् । ननु विहितनिषिद्धक्रिये स्वध्वंसद्वारैव तादृशफलजनकेन तु धर्माधर्माख्यव्यापारद्वारा मानाभावात् । तादृशकारणमन्यथानुपपत्तेः । व्यापारमात्रकल्पनेनैवोपक्षीणत्वात् । तथा च धर्माधर्मयोस्तादृशक्रियाध्वंसस्वरूपत्वान्नात्मगुणत्वम् । न च यागादेः स्वर्गकारणीभूताभावप्रतियोगित्वेन प्रतिबन्धकत्वापत्तिरिति वाच्यम्, यत्संसर्गाभावत्वेन फलं प्रति न कारणत्वम्, तत्त्वस्य कार्यानुत्पादप्रयोजकत्वस्य वा प्रतिबन्धकत्वेन तत्र तदभावात् । न च ध्वंसप्रतियोगिनोरेकत्राजनकत्वदर्शनात् कथमेवमिति वाच्यम्, शब्दध्वंसप्रत्यक्षे [4]सन्निकर्षस्य समवायस्य नित्यत्वेन व्यापारत्वासम्भवात् तत्र शब्दस्य श्रोत्रव्यापारत्वेनोभयोरपि जनकत्वात्, दर्शनेन प्रकृतेऽपि तथात्वेऽक्षत्यभावात् । न च ध्वंसस्यानन्तरत्वेन फलस्याप्य-नन्तरत्वापत्तिः । अपूर्वकल्पनापक्षेऽपूर्वस्य फलनाश्यत्वाभ्युपगमेन न तदानन्त्यापत्तिरिति वाच्यम्, ध्वंसे सत्यपि सहकार्यान्तरविरहादेव फलभावोपपत्तेः, न च 'धर्मः क्षरति कीर्त्तनादि' ति धर्मस्य कीर्त्तननाशत्वं स्मृत्या प्रतिपद्यते, ध्वंसे

1. तदवच्छिन्नयाज्ञानादिरूपया भागादिक्रियाशरीरवच्छिने आत्मनि ।
2. तथा च --- सगादिवत् - नास्ति - क मातृकायाम्
3. इदमिन्द्रियस्येत्यादिरूपज्ञानविशेष - नास्ति ।
4. सन्निकर्षस्य समवायस्य नित्यत्वेन व्यापारत्वासम्मत्वात् तत्र - नास्ति ।

च नाश्यत्वाभ्युपगमाभावादयागादिजन्यं (जन्यफलोपादकं) फलोपपादानं कीर्त्तनादिनाश्यं वस्त्वन्तरं कल्पनीयम्, तदेवापूर्वमिति वाच्यम्, कीर्त्तनादेस्तत्फलप्रतिबन्धकत्वेन क्षरतीत्यस्य स्वजन्यफलोपहितं न भवतीत्यर्थकल्पनेन धर्मस्य कीर्त्तननाश्यत्वाभावात्। एवं धर्मेण पापमपनुदतीत्यादावप्यपनोदनं तज्जन्यफलप्रतिबन्धः पदार्थान्तरकल्पनापेक्षया एतादृशकल्पनाय लघुत्वात्। एतेन देवदत्तस्य जरायुजं शरीरं तदीयविशेषगुणजन्यमुपभोगसाधनत्वात्। तस्मिंन्न तदीयभोगसाधनस्रगादिवदिति परास्तम्। अप्रयोजकत्वा[1]त्संसारे सिद्धसाधनाच्च। तस्माद् धर्माधर्मयोऽध्वंसरूपत्वान्नात्मगुणत्वमिति चेत्। न गङ्गास्नानादौ तत्तदवयवावच्छिन्नानां संयोगानां स्वस्वध्वंससव्यापारकल्पने गौरवात्। तत्तत्संयोगजन्यमेवापूर्वकं कल्प्यते लाघवात्। न च तत्र जलावयवशरीरावयवसंयोगादेक एव जलशरीरसंयोगो जायते। स एव ध्वंसद्वारा स्वर्गहेतुरिति न कल्पनागौरवम्। कोटिहोमादौ [2]कलीकापूर्वे एकं परमाणुत्वं अभ्युपगम्यते इति वाच्यम्, विनिगमनाविरहेण सर्वेषामेव हेतुत्वात्, धर्मेण पापमपनुदति धर्म क्षरतीत्यादौ लक्षणतापत्तिश्च। पापनाशार्थं प्रायश्चितादिवैय्यर्थ्यापत्तेश्च। किञ्चापूर्वानभ्युपगमेऽङ्गप्रधानयोः फलं प्रति अविशेषापत्तिः। न च प्रयाजादिध्वंसस्य न प्रधानध्वसजनकत्वं मानाभावात्। यत्र प्रयजादिकं नानुष्ठितम्, तत्रापि तद्ध्वंसदर्शनात्। एवं दर्शपौर्णमासादौ नानाक्रियादिध्वंसानां फलकल्पनापेक्षया एकमेव परमापूर्वकफलजनकं कल्प्यत इति संक्षेपः।

एवं देवताप्रीतिरपि न यागस्य व्यापारः। प्रीतेः सुखरुपत्वे फल पर्य्यन्तमनवस्थानादेव विहितनिषिद्धक्रियाभ्यां धर्माधर्मावात्मनि जन्येते। आभ्यां सामानाधिकरण्यप्रत्यासत्त्या सुखदुःखे जन्येते। प्रत्यासत्त्यान्तर्भावेन जनकत्वेऽन्यधर्मेणान्यत्र सुखजनने कृतहान्यकृताभ्यामागमप्रसङ्गात्। तदिदमुक्तमात्मान्तरगुणानामात्मान्तरगुणेष्वेव कारणत्वमिति।

नन्विदमसिद्धम्। जातेष्टस्थले पितृगणतुष्टेन पुत्रे श्राद्धस्थले च पुत्रगणतुष्टेन पितरि स्वर्गादिदर्शनात्। अत एव पितुर्मुक्तत्वे पितृकृतगयाश्राद्धस्य न

1. संस्कारेणासिद्ध्यसाधनाच्च। 2. कालिकापूर्वे वाच्यम्। नास्ति।

वैकल्यं पुत्रेऽदृष्टजनादिति चेत्। न। स्वर्गोपपादकमपूर्वं स्वर्गाश्रये कल्प्यते लाघवात्। अत: पुत्रादिकृतकर्मणापि [1]पित्रादौ इष्टस्वीकारात्। तथा च तत्प्रत्यासत्ते: व्यभिचार:। कथमन्यकृतेन कर्मणान्यत्रादृष्टं [2]नियमादिति चेन्न। तत्र यस्मिन् जात इत्यागमबलेन कर्तुरन्यत्रापि दृष्टाभ्युपगमात्। शास्त्रफलं प्रयोक्तरीत्यस्य तदतिरिक्तविषयत्वात्। अत एव तत्त्वज्ञानिना पुत्रेण कृतस्य गयाश्राद्धादेर्न वैय्यर्थ्यम्। तथाभूते पितरि तेनादृष्टजननान्न चैवं मुक्ते पितरि पुत्रकृतसाङ्गगयाश्राद्धस्यापि वैफल्यम्, तेन पितृगतादृष्टासम्भवादिति वाच्यम्, तत्र पितृगणदोषस्याप्यङ्गत्वेन साङ्गत्वाभावादिति संक्षेप:।

संस्कारे प्रमाणमाह- संस्कारश्चेति। संस्कारश्चात्मगुण सिद्ध इति कुत इत्यपेक्षायां [3]स्मृत्योत्पत्ताविति। [4]निमित्तसप्तमीयं। स्मृत्या निमित्तत्वेन सिद्धमित्यर्थ:। संस्कारस्यातीन्द्रियत्वेन तत्र प्रत्यक्षाभावेऽपि स्मृत्यन्यथानुपपत्या संकल्पत इत्यर्थ:। संस्कारपद चात्र भावनापरम्। संस्कारमध्ये तस्यैवात्मधर्मत्वात्। अयमाशय:- पूर्वानुभवं विना स्मरणाभावात्तस्य स्मृतिं प्रति कारणत्वम्। तदपि नानुभवत्वेन कारणत्वम्। सुकृदनुभूतस्य स्मरणोत्तरस्मरणप्रसङ्गात्, अनुभवस्य व्यापाराभावेन द्वितीयस्मृतौ तस्य जनकत्वाभावात्। संस्कारस्य स्मृतिनाशत्वेन स्मृत्या संस्कारनाशात्। न चैवं चरमस्मृतिरेव संस्कारनाशिका चरमत्वं स्मृतिनिष्ठो जातिविशेष:, तेन प्रथमस्मृत्या तदीयसंस्कारनाशाद् द्वितीयादिस्मृत्योपपत्तिरिति वाच्यम्, तथा च झटिति स्मरणे पुन: पुन: स्मरणस्य हेतुत्वेन स्मरणमात्रेऽनुभवहेतुत्वे व्यभिचारात्, स्मृतौ च चरमत्वमेव नाशकतावच्छेदकत्वमिति दुर्वचमेव। तस्मात् पूर्वानुभवस्तु प्रकारस्मृतिं प्रति तत्प्रकारकनिश्चयत्वेन कारणम्। तत्र च सामानाधिकरण्यप्रत्यासत्ति:। अन्यथाऽतथाज्ञानेऽन्यस्य [5]स्मरणापत्ते:। [6]तत्राशुविनाशिस्तादृशज्ञानस्य कालान्तरभाविस्मृतिं प्रति साक्षात्कारणत्वाभावात् चिरध्वंस्तकारणताया: सव्यापार-

1. पित्रादाष्टस्वीकारात्। 2. नियमादिति तदातिरिक्तविषयत्वाद्। नास्ति क मातृकायाम्
3. उत्पत्ताविति। 4. निमित्तसप्तमीयम्
5. तथाज्ञानेऽन्यस्य स्मरणापत्ते:। 6. तत्राशु ---

त्वव्याप्यत्वाच्च। तद्व्यापारत्वेन तत्समानप्रकारसंस्कार कल्प्यते। व्यापारिणोरेकरूपेण जनकत्वनियमात्। अत एव संस्कारस्य सर्वविषयत्वमपि। न च संस्कारस्य व्यापाररूपत्वेनादृष्टादिवत्। सविषयत्वमेव व्यापारव्यापारिणोरित्यादिव्याप्तेः अप्रयोजकत्वात्। न च संस्कारस्य निर्विषयत्वे स्मृत्या समानविषयकसंस्कारस्यैव नाश इति नियमो न स्यादिति वाच्यम्, न स्यादिति को दोषः। [1]घटविषयकज्ञानात्पटविषयानुभवजन्यसंस्कारनाशापत्तिः रूपस्य अतिप्रसङ्गस्य जन्यत्वप्रत्यासत्त्या स्मृतिः। संस्कारनाशकेति एतादृशकल्पनेनैव निरसनीयत्वात्, तस्मात्संस्कारो न सविषय इति वाच्यम्। संस्कारस्य सर्वविषयत्वाभावे सप्रकारकत्वानुपपत्तौ [2]घटत्वप्रकारकसंस्कारत्वेन प्रतिबन्धकत्वकल्पनानुपपत्तौ घटत्वप्रकारकस्मृतिं प्रति घटत्वाभावप्रकारकसंस्कारत्वेन प्रतिबन्धकत्वकल्पनानुपपत्तौ यत्र घटत्वप्रकारकानुभवानन्तरं दाषाद् घटाभावप्रकारकं ज्ञानम्। [3]तत्रोभयोः बोधकसामग्रीसमवधाने सङ्गत्यात्मकस्मृत्यापत्तेः दुर्वारत्वापत्तिः। न च तत्र सप्रतिपक्षवत् उभयसामग्र्ययोरेव परस्परं प्रतिबन्धकत्वकल्पनान्न सङ्गत्यापत्तिरिति वाच्यम्, सामग्रीमात्रे प्रतिबन्धकत्वकल्पनापेक्षया संस्कारे तु तत्कल्पनायाः लघुत्वाच्च। अतः संस्कारस्य सविषयत्वसिद्धिः।

यत्तु संस्कारस्य सर्वविषयत्वाभावे पूर्वानुभवस्य स्वजन्यसंस्कारद्वारा स्मृतिं प्रति हेतुत्वं वक्तव्यम्। तथा यत्र घटपटाविति समूहालम्बनं पटांशे उपक्षेपणात्मकं तत्र तादृशानुभवात् घटस्यैव पटस्यापि स्मरणापत्तिः। पूर्वानुभवस्य स्मृतिजनकतायामुपेक्षान्यत्वप्रवेशे [4]गौरवादित्याहुः। तन्न। संस्कारजनकतायामुपेक्षान्यत्वप्रवेशस्यावश्यं वाच्यत्वात्। अन्यथा प्रत्येकविषयापेक्षज्ञानपिण्डानन्तरसंस्कारोत्पत्तेर्दुर्वारत्वात्। [5]तथाच संस्काराजनकत्वमुपेक्षात्वं

1. घटविषयकज्ञानात् अतिप्रसङ्गस्य। नास्ति।
2. घटत्वप्रकारकसंस्कारत्वेन प्रतिवन्धकत्वकल्पनानुपपत्तौ - नास्ति - क मातृकायाम्
3. तत्रोभयोरुवोधकसामग्री --- ।
4. उपेक्षान्यत्वप्रवेशे - भोगः।
5. तथा च --- संस्कारस्थाप्यकल्पनात्। नास्ति - क मातृकायाम्

उपेक्षान्यत्वेन संस्कारजनकत्वमित्यर्थोऽन्याश्रय: । स्मृतिजनकतायां तु तत्प्रवेशेन काप्यनुपपत्ति: । संस्कारजनकतायां तदप्रवेशेऽपि तपर्णान्तरं संस्कारकल्पनापत्ति: । संस्कारस्य स्मृत्यन्यथानुपपत्त्या कल्पनीय तयोपेक्षाज्ञानास्मृत्यनुत्पत्तौ तत्र संत्कारस्याप्यकल्पनात् । एवञ्च स्मृतिं प्रति पूर्वज्ञानस्य व्यापारत्वेन कल्प्यमान: सामानाधिकरण्यप्रत्यासत्त्यैव तद्‌हेतु: ज्ञानं चात्मगुण इति साधितमधस्तात् । तत: संस्कारोऽप्यात्मगुण: । तदुक्तं सूत्रकृता 'संस्कारादात्ममन:संयोगाच्च स्मृत्युत्पत्तिरिति' ।

ननु पूर्वज्ञानस्य सहध्वंसद्वारैव स्मृतिहेतुत: क्लृप्तत्वात् चिरध्वंसकारणताव्यापारगर्भेत्यादिव्याप्तेस्तावतैव पर्य्यवसानात् । न च ध्वंसप्रतियोगिनोरेकत्राजनकताजनकत्वमितिव्याप्ते: कथमेवेति । व्याप्ते: व्यभिचारित्वस्य पूर्वमेवोक्तत्वात् । न च ध्वंसस्यानन्तत्वे सर्वदा स्मरणापत्ति: [1]उद्‌बोधकाद्यभावेन स्मरणाभावोपपत्ते:, शास्त्रेषु संस्कारत्वेन तस्यैव व्यपदेशो न गुणान्तरस्य तस्यासिद्धिरत: संस्कारस्यात्मगुणत्वं सिद्धमिति चेत् । ध्वंसस्यानन्तत्वेन ध्वंसाभावे तस्य भोगात् कालाद् वा विनाश इति वार्त्तिकविरोधापत्ते: । किञ्च यत्र सुकृदनुभूतस्योपेक्षात्मकं स्मरणं जातम्, तत: पुनस्तादृशस्मरणद्वितीयक्षणे पुन: स्मरणापत्ति: । स ध्वंसद्धारा पूर्वज्ञानस्य विद्यमानत्वादुद्‌बोधकसत्त्वात्, प्रतिबन्धककल्पने गौरवात् । अस्मन्मते तु प्रथमस्मरणेन संस्कारनाशाद् द्वितीयस्य चापेक्षात्मकत्वेन संस्कारजनकताभावात् स्मृत्यानुपपत्ति: । अत: सिद्धमात्मगुणत्वमस्येति संक्षेप: ।

संख्यायामर्मानमिति - व्यवस्थावचनादिति । नानात्मनो व्यवस्थादिति (वै.सू.3.2.20) सूत्रकारवचनात् सुखित्वदु:खित्वव्यवस्थावशेनात्मनां बहुत्वसिद्धौ संख्यासिद्धिरित्यर्थ: । यद्यप्येकत्वे प्रत्यक्षमेव मानं सर्वेषामहमेकमित्यनुभवात् । तथापि स्वात्मनि तथा । संख्यासम्भवेऽपि नात्ममात्रे संख्या, तेन रूपेण संख्या साधयितुं शक्यते । परात्मन: परस्यातीन्द्रियत्वात् न च तस्यापि प्रत्यक्षात् तत्सिद्धिरिति तथापीश्वरे तदसिद्धिप्रसङ्गात् । ईश्वर-

1. उद्योकाद्यभावेन ।

स्तद्विषयकज्ञानस्यास्मदादिभिः ज्ञानुमशक्यत्वात् । न च द्रव्यत्वेन संख्यानुमेयेति वाच्यम्, संज्ञात्वावच्छिन्नं प्रति द्रव्यत्वेन हेतुत्वाभावेन द्रव्यत्वस्य संख्यावत्त्वे प्रयोजकत्वाभावात् । बद्धत्वजीवनत्वनित्यमुक्तत्वव्यवस्थाबलाज्जीवात्म-परमेश्वरात्मनोः परस्परं भेदसिद्धौ धर्मिग्राहकप्रमाणबलात् तस्यैकत्वसिद्धौ नानात्वसिद्धिरिति व्यवस्थावचनात्संख्येत्युक्तम् ।

वस्तुतस्तु [1]संख्यापदं विशेषवत्त्वपरं तथा च प्रमाणान्तरेणात्मन्ये-कत्वसिद्धावपि बहुत्वसंख्याव्यवस्थावचनादेव सिध्यतीत्यर्थः । अतः व्यवस्थापदेन प्रत्यक्षदृष्टस्य प्रपञ्चस्य विशेषकारेणावस्थानं व्यवस्था, तद्वशेन नानात्वमात्मनामित्यर्थः । यदि हि एक एवात्मा स्यात्, ततश्च शुकस्य श्रवणादिक्रमोत्पन्नतत्त्वज्ञानेऽविद्यानाशे तत्कार्यप्रपञ्चाभावात्सपदि संस्कारनिवृत्तौ पुनस्तदवस्थानं न स्यादिति प्रपञ्चप्रत्यक्षोपलम्भविरोधः आत्मनां भेदे तु शुक्लतादृशकालेन शुकस्यैवाविद्यानाशितानामान्तरस्येति न प्रपञ्चनिवृत्तिः । न च यच्छरीरावच्छेदेन तत्त्वज्ञानमुत्पन्नं तच्छरीरावच्छिन्नामविद्यां नाशयति । अतः शुकशरीरावच्छेदेनोत्पन्नं ज्ञानं तच्छरीरावच्छिन्नामविद्यां नाशयति । 'न तु सर्वमिति' न प्रपञ्चावस्थानविरोध इति वाच्यम्, अवच्छेदकभेदेऽपि स्वरूपस्य भेदाभावेन तस्या एव कुत्रचिन्नाशं कुत्रचिन्नेति विरोधेन वक्तुमशक्यत्वादिति तन्मते नैषा व्यवस्थोपपादनीया । यद् वा जीवत्वादिव्यवस्थावचनादपि आत्मनां भिन्नत्वम् । एकत्वे हि अहं जीवो नाहमीश्वर इति व्यवस्था न स्यात्, न चाविद्याप्रतिविम्बत्वाविद्यावच्छिन्नत्वादिना जीवत्वादिव्यवस्थेति वाच्यम्, अविद्यायाः जीवाश्रयत्वेन जीवत्वव्यवस्थातः पूर्वमाश्रयसिद्धौ तदसिद्धेः ।

अस्मन्मते तु सर्वज्ञत्वकिञ्चिज्ज्ञत्वादिना विरूद्धधर्मेण भगवति व्यवस्था एव देवदत्तयज्ञदत्तात्मनोऽपि परस्परं सुखदुःखादिपरस्परं विरुद्धधर्मव्यवस्थायाः भेदसिद्धौ नानात्वम् । तथाहि देवदत्तयज्ञदत्तात्मनौ परस्परं भिद्येते सुखदुःखा-दिविरुद्धधर्मत्वादिति घटवदिति । [2]नचावच्छेदभेदेन विरुद्धधर्मसुखदुःखवत्त्वं

1. संख्या - क मातृकायाम् ।
2. न चावच्छेदभेदेन विरुद्धधर्मसुखदुःखत्वं योऽहं पादे दुःखी, सोऽहं शिरसि सुखीत्यादिवदिति वाच्यम् । देवदत्ती यसुखस्यातमीयत्वेन प्रतिसन्धकापत्तेः । नास्ति - क मातृकायाम् ।

योऽहं पादे दुःखी, सोऽहं शिरसि सुखीत्यादिवदिति वाच्यम्; देवदत्तीय-सुखस्यात्मीयत्वेन प्रतिबन्धकापत्तेः । न चाविद्यावशात् तथा न प्रतिसन्धानम्, तत्त्वज्ञानादीनां तथा भवत्येवेति वाच्यम्, अविद्यायास्तादृशप्रतिबन्धक-त्वादिकल्पनापेक्षयाऽऽत्मभेदकल्पनस्य लघुत्वात् । न चाभेदश्रुतिविरोधः श्रुतेरन्यत्र तात्पर्यात् । [1]द्वौ सुपर्णावित्यादिश्रुतेः ज्योतिष्टोमादिश्रुतेश्च विरोधेन आत्मैकत्वे तात्पर्याभावात् । एवं गुरुशिष्टत्वादिव्यवस्था प्रायश्चित्ततर्पणादिव्यवस्थापि द्रष्टव्या । एवं देवदत्तस्येदं शरीरं न यज्ञदत्तस्येत्यादिव्यवस्थापि आत्मभेदकसाधिका द्रष्टव्या । आत्माभेदे तद्दृष्टारब्धत्वेन विशेषस्य वक्तुमशक्यत्वात् । अतएव नानात्वादेरेव । पृथक्त्वं पृथक्त्वरूपगुणसिद्धि । पृथक्त्वस्य भेदनियत-त्वादित्यर्थः । द्रव्यत्वेन तस्य सामान्यतः परिमाणत्वं सिद्धम् । अणुत्वे चाप्रत्यक्षत्वापत्तिः । मध्यमत्वे सावयवत्वेऽनियतापत्तौ धर्मग्राहकमान-सिद्धनित्यबाधः । एवं परिशेषादपि विभुत्वसिद्धिः । एवं जन्यद्रव्यप्रत्यक्षत्वा-वच्छिन्नं प्रति महत्त्वेन कारणत्वकल्पनान्मानसप्रत्यक्षविषयेणात्मनि महत्त्वसिद्धौ जन्यमहत्त्वासिद्धौ सावयवत्वापत्तेः विभुत्वसिद्धिः । एवमहं महानिति प्रत्यक्षादप्युक्तरीत्या तत्सिद्धिः । न चाहं गृह एव तिष्ठामि शय्यायामेव स्वपिमीत्याद्यनुभवेन परिच्छिन्नपरिमाणवत्त्वमेवात्मनो न विभुत्वमिति वाच्यम् अहं गौरववदिति तादृशप्रतीतेरपि भ्रमत्वात् ।

एवं विभुत्वे सिद्धेऽपि सूत्रकारवचनादपि तत्साधयति- तथा चेति । 'विभवान्महानाकाशस्तथा चात्मेति' (वै.सू.-7-2-22) सूत्रेऽऽकाशवद् विभुत्वेन महत्त्वमिति प्रतिपादनादात्मनो महत्त्वसिद्धिरित्यर्थः । वैभवञ्चात्र सर्वत्र तत्तत्कार्यारम्भकत्वम् । तच्च सर्वत्रात्मसमवेतादृष्टकार्यसाधनोपलम्भादवसेयम् । एवमीश्वरस्य विभुत्वमवश्यमङ्गीकर्त्तव्यम् । अन्यथा तस्य ब्रह्माण्डाद्या-सम्भवकत्वानुपपत्तिः, अस्य महतो भूतस्येत्यागमानुपपत्तिश्च ।

संयोगे प्रमाणमाह - सन्निकर्षवत्त्वादिति । यद्यप्यात्मा बाह्यद्रव्यसंयोगो न प्रत्यक्षः, तयोरेकेन्द्रियवेद्यत्वाभावात् । तथापि सुखादेः सन्निकर्षजन्यत्वेन

1. द्वौ सुपर्णा --- तात्पर्याभावात् - ख मातृकायाम्

सोऽनुमेयः। तथाहि सुखादीनां प्रादेशिकत्वे समवायिकारणप्रादेशिकस्य नियामकत्वात्। तेन सुखादिकमसमवायिकारणजन्यं प्रादेशिकत्वात् शब्दवदिति आत्मसमवायिकारणवत्त्वसिद्धौ परिशेषादात्मनः संयोगः एवासमवायिकारणमिति भवत्यात्मनि संयोगसिद्धिः। एवं प्रयत्नवदात्मसंयोगोऽदृष्टवदात्मसंयोगो वा ब्रह्माण्डादिपतनप्रतिबन्धहेतुरिति वेश्वरसाधारणसंयोगसिद्धिः। एवञ्च क्रियामात्रे प्रयत्नवदात्मसंयोगस्य कारणदर्शनात् प्रलयकालीनपरमाणुक्रियादौ प्रयत्नवदीश्वरसंयोगः कारणमस्मदाद्यात्मनां तत्तप्रयत्नाभावादीश्वरे संयोगासिद्धिः। सर्वसंयोगित्वेन विभुत्वसिद्धिरपि। अतएव 'यो लो[1]कमात्रमाविश्य विभर्त्त्यव्यय ईश्वर' (गी 15/12) इत्यादि साधु सङ्गच्छतीति वदन्ति।

विभागे मानमाह - तद्विनाशकत्वादिति। अन्यथा आश्रयनाशाभावे सुखाद्यसमवायिकारणसंयोगस्य नाशापत्तौ सुखादेः सतोत्पत्तिप्रसङ्गात्।

उच्छृङ्खलास्तु। सुखादीनां प्रादेशिकत्वस्य तत्र तत्रानुत्पादस्यादृष्टविशेषोपपत्तेः। न तन्निबाहिकत्वेनासमवायिकारणप्रादेशिकत्वाद्यपेक्षो येनात्मनि संयोगादिकं [2]सिध्यति। [3]सततानुत्पत्तौ च चन्दनादिसमवधानाभावो हेतुर्न चात्मनः शरीरेण संयोगाभावेऽपि शरीरावच्छिन्नं न स्यात्। संयोगं विनान्यस्यावच्छेदकस्याभावादिति वाच्यम्, वने सिंहनाद इत्यादौ वनसिंहनादयोःसम्बन्धाभावेऽप्यवच्छेदव्यवच्छेदकत्ववत् प्रकृते सम्बन्धान्तराभावोऽपि रूपसम्बन्धेनावच्छेद्यावच्छेदकभावोपपत्तेः। एवं जन्यात्मविशेषगुणेषु शरीरस्यापि कारणत्वान्न तदवच्छिन्नात्मनि सुखाद्युत्पत्तिरिति। न च संयोगाभावे द्रव्यत्वमप्यात्मनो न स्यात्। अहं द्रव्यमिति कस्याप्यप्रतीतेः। न च सुखादिकमसमवायिकारणकं समवायिकारणत्वं भावत्वे सति जन्यत्वाद् घटवदित्यनुमानात् सामान्यतः तत्पदार्थादित्यन्यस्यासम्भवात् परिशेषादात्मनः संयोगस्य तथात्वमिति तत्सिद्धिरिति वाच्यम्, द्वित्वादौ परार्द्धपर्यन्तं एकस्यासमवायिकारणत्वे मानाभावेन भावकार्यमात्रस्यासमवायिकारणजन्यत्वे

1. लोकत्रयमाविश्य विभर्त्ति। 2. सिध्येत। 3. स तत्रोत्पत्तौ

मानाभावात् । तथात्वनिबन्धे वा सुखादौ ज्ञानादेरसमवायिकारणत्वासम्भवाच्च । न तथात्वेन संयोगसिद्धिः । असमवायिकारणलक्षणेऽऽत्मविशेषगुणान्यस्यापि प्रवेशे मानाभावादित्याहुः ।

मनोनिरूपपणम्

उद्देश्यक्रमप्राप्तं मनो निरुपयति -

(मू) मनस्त्वाभिसम्बन्धा(योगा)न्मनः । सत्यप्यात्मेन्द्रियार्थ-सान्निध्ये ज्ञानसुखादीनामभूत्वोत्पत्तिदर्शनात् करणान्तरमनुमीयते । श्रोत्राद्यव्यापारे स्मृत्युत्पत्तिदर्शनाद् बाह्येन्द्रियगृहीतसुखादिग्राह्यान्तर-भावात् चान्तःकारणम् ।

मनस्त्वेति । मानसत्वावच्छिन्नकार्यतानिरुपितकारणतावच्छेदकत्वेन सिद्धो जातिविशेषो मनस्त्वम् । तेषामतीन्द्रियत्वेऽप्यनुगतकार्यस्यानुगतकारण-जन्यत्वनियमात् संयोगस्य तथात्वमिति तत्सिद्धिः । ननु मनसोऽ-सिद्धमसिद्धत्वादिदं स्वरूपासिद्धं मनसत्वमत आह- सत्यपीति । इन्द्रियात्ममनोरर्थेन्द्रिययोश्च सन्निकर्षे सतीत्यर्थः । अभूतत्वोत्पत्तिदर्शनात् कादाचित्कत्वदर्शनादित्यर्थः । [1]तेन सत्यपि बाह्येन्द्रियसन्निकर्षेऽपि कदाचिज्ज्ञानमुत्पद्यते । कदाचिन्नेति सर्वानुभवसिद्धम् । एवं सत्यपि स्रगजन्यादिसंयोगे कदाचित्सुखमुत्पद्यतेऽनुभवसिद्धम् । [2]तत्रेतरहेतूनां सर्वेषां सद्भावेऽप्यसमवायिकारणाभूतमनःसंयोगविरहादेव न भवतीति व्यास-ज्योपपादकतया मनःसिद्धिः । तथाहि स्वविषयसाक्षात्कारजनकं स्वविषय-द्रव्यसम्बन्धं चक्षुस्वविषयद्रव्यसाक्षात्कारहेतुः किञ्चित्संयोगशून्यं विषये-न्द्रियसमवधाने तादृशज्ञानाजनकद्रव्यत्वादन्धकारस्थघटवद्हेतौ द्रव्योत्पादो-पादानाद् योग्यानुपलब्धौ न व्यभिचारः । न च तादृशसुवर्णे तादृशव्यवहारः ।

1. अभूत्वोत्पत्तिर्दानात् कादाचित्कत्वदर्शनादित्यर्थः । योगः
2. तत्तेजत्वहेतूनां

तत्राप्यालोकस्य सुवर्णप्रत्यक्षेऽपि आलोकसंयोगहेतुताया उक्तत्वात्। न च [1]पुटकरूपं सुवर्णस्याभिव्यञ्जकमन्धकारदशायां व्यञ्जकवद्रूपग्रहादेव न सुवर्णप्रत्यक्षमिति तत्रालोकसंयोगो न हेतुरिति वाच्यम्, नियतान्वय-व्यतिरेकानुविधानेन तत्रापि तस्य हेतुत्वात्। अन्यथा सर्वत्र रुपग्रहेणालोको हेतुः रूपाग्रहादेवान्धकारे घटाद्यग्रह इति कुत्रापि द्रव्यग्रहे नालोके हेतुः स्यादिति। [2]स्वविषयत्वं व्यापारानुबन्धनतया द्रष्टव्यम्। अतो न दृष्टान्तसाधनवैकल्यम्। प्रकृते च विषयत्वं व्यापारानुविधितया द्रष्टव्यम्।

अतो दृष्टान्तेन साधनवैकल्यम्। प्रकृते च विषयसन्निकर्षादि-सामग्रीसमवधानेऽपि तादृशज्ञानोत्पत्त्यर्थं किञ्चिदपेक्षणीयम्। यदभावात्तदभाव इति मनःसंयोगस्तथेति। तत्प्रतियोगितया मनःसिद्धिः। सुषुप्तिकाले च मनसः पुरीतत्यनुप्रवेशे ज्ञानसामान्यहेतुत्वत्वङ्मनःसंयोगाभावादेव न शुद्रात्मज्ञानमिति तद्देशादेवात्ममनःसंयोगसिद्धिरित्यपि वदन्ति। एवञ्च योग्यविभुविशेषगुणानां यौगपद्याभावोऽनुभवसिद्धश्च।

शृणोमीति। नन्वेवं कथं विंशतावङ्गुलिषु विरूद्धनानाक्रियाजनकानां नानाप्रयत्नानां युगपन्नानाकरचरणादिसमुदायनृत्यताजनकानाञ्च युगपदुत्पाद इति चेत्। न। यच्चिकीर्षाजन्यो यः प्रयत्नः सत्क्रियाहेतुरितिव्याप्तेस्ता-दृशक्रियाकलापविषयचिकीर्षया चैक एव प्रयत्नमुत्पद्यते। चिकीर्षा च स्वजन्यप्रयत्नद्वारा तादृशक्रियासमुदायहेतुरतो नोक्तो व्यभिचारः।

यद्वा- नानाजातीयत्वेन वा विशेषगुणाः विशेषणीयाः। तेन नानाप्रयत्नानां यौगपद्येऽपि न क्षतिः। एतेनैकस्मात्प्रयत्नं कथं नानाक्रियोत्पत्तिरिति निरुक्तम्। तेनैकस्य देवदत्तस्य स्वस्वविविषयसम्बन्धेषु पञ्चस्वपीन्द्रियेषु यत्किञ्चिदेवेक-मिन्द्रियसाक्षात्कारं जनयति नान्यानीति सर्वसिद्धं स्वविषयसन्निकर्षाद्यतिरिक्तमिति यत्किञ्चित्कारणं कल्पनीयम्। तच्च नादुष्टम्। दृष्टसामग्रीसद्भावेऽदृष्टविलम्बेन

1. गुटकरूपं - क मातृकायाम्
2. स्वविषयत्वं व्यापारानुबन्धनतवा द्रष्टव्यम्। अतो न दृष्टान्तसाधनवैकल्यम्। नास्ति - क मातृकायाम्।

कार्यविलम्बस्य कुत्रप्यदृष्टत्वात् । न च चक्षुरादिविषयतदाश्रयसंयोगेषु चाक्षुषादिप्रयोजको जातिविशेष: कल्पनीय: । स च चक्षुरादिविषयतदाश्रयसंयोगेषु चाक्षुषादिप्रयोजको जातिविशेषः कल्पनीयः । स च फलोन्नेय इति तदा तादृशत्वक्तादृशत्वगादिसंयोगाभावान्न त्वचादिसाक्षात्कार इति वाच्यम्, अन्यतरकर्मजन्यत्वादिना साङ्कर्य्येण तादृशविशेषस्य जातित्वाभावादनुगतत्वात् श्रोत्रे तादृशवैलक्षण्यस्य वक्तुमशक्यत्वात्तत्र समवायस्यैकप्रत्यासत्तित्वाच्छब्दस्य सन्निकर्षत्वपक्षेऽपि तत्र वैलक्षण्यानुभावाच्च । न च वुभुत्सावशान्नियम इति वाच्यम्, अबुभुत्सितस्यापि ध[1]नगर्जितादेः ग्रहणेन न वुभुत्साया विषयग्रहमात्रे व्यभिचारात् । तस्मात्परिशेषादात्ममन:संयोग एव हेतुत्वेन कल्प्यते ।

एवं द्रव्यचाक्षुषज्ञानवतो मैत्रस्य स्वस्वविषयसन्निकृष्टं रसनादि-स्वविषयसाक्षात्कारहेतुः । यत्किञ्चित्समवधानशून्यं तदानीं स्वविषय-साक्षात्काराजनकद्रव्यत्वादन्धकारस्थघटवत् । स्वविषयत्वं स्वजन्यज्ञान-विषयत्वमतो न दृष्टान्ताऽसिद्धिरित्यतो रासनसाक्षात्कारहेत्वभावः [2]सिध्यन्नि-तरहेतूनां ग्रहान्मन:संयोगाभावरूप एव सिध्यतीत्य[3]खण्डार्थः । किञ्च सुखादिकं समवायिकारणकं भावत्वे जन्यत्वाद् घटवदित्यनुमानात् सुखाद्यसमवायि-कारणसंयोगाश्रयत्वेन मन:सिद्धिः । न च प्राणात्मसंयोगः शरीरात्मसंयोगो त्वचात्मसंयोगो वाऽत्राऽसमवायिकारणत्वमिति वाच्यम्, प्राणशरीरात्मसंयोगयो: रससमवायिकारणत्वे सुषुप्तिदशायां चन्दनादिसंयोगे सुखोत्पत्त्यापत्तेः । न च संयोगे सुखादिजनकतावच्छेदको जातिविशेषाऽन्यतरकर्मजन्यतावच्छेदक-जात्यसङ्करात् । त्वगात्मसंयोगस्य तथात्वे सुखादेः सर्वशरीरव्यापित्वापत्तेः, विभुविशेषगुणानामसमवायिकारणसमानदेशत्वनियमात् । न चैवं सुखादेरव्याप्य-वृत्तितापत्तिरिष्टापत्तेः । कथं तर्हि पादे मे सुखमिति वैषयिकसुखादीनां पादावच्छिन्नत्वं मनोरथिकसुखादीनां शरीरावच्छिन्नत्वमिति चेत्, असिद्धेः । तत्र हि मनसो वेगातिशयेन सञ्चारादवलम्बोत्पन्नानां तत्तदवच्छिन्नत्वभ्रमः । अतएव क्वचिन्नेन्द्रियजन्यज्ञानानामपि यौगपद्यभ्रमाः । क्रियादिसंयोगान्तानां यौगपद्य-

1. घटगर्जितादे: 2. साध्यन् इतरहेतूनां 3. अखण्डार्थः,

भ्रमवतः [1]ननु ज्ञानादीनां कादाचित्कत्वं नात्ममनःसंयोगस्तद्भावाधीनमात्ये-न्द्रियसंयोगवैलक्षण्याधीनम्, तादृशवैलक्षण्यस्य च [2]जातित्वाभावेऽपि अनुगतकार्यं प्रयत्नानुगतोपाधिरपि हेतुत्वमिति रिक्तमनः कल्पनापेक्षया लघुवात्।

श्रोत्रापीति - स्मृत्युत्पत्तिदर्शनात् कारणान्तरमनुमीयते इत्यन्वयः। स्मृतिः स्वसमवायिसंयुक्तद्रव्यजन्याकारणगुणापूर्वकत्वे सति जन्यविशेषगुणत्वात् पाकजरुपादिवदिति।

ननु श्रोत्रादीनां तादृशेऽन्यथासिद्धिरत आह- श्रोत्राद्यव्यापारेति। तथा च स्मृतिर्न श्रोत्रजन्यश्रोत्रव्यापारं विना जायमानत्वात् घटवदिति। श्रोत्रा-दिव्यापाराभावश्च सम्बन्धाभावादिना कल्पनीयः।

हेत्वन्तरमाह - बाह्येति। बाह्येन्द्रियैरात्मग्राहकभिन्नेन्द्रियैः जन्यसाक्षात्कारासाधारणकारणैः चक्षुरादिभिरगृहीतस्य तद्ग्रहणायोग्यस्य सुखादेः ग्राहकान्तरस्याभावादपि करणान्तरमनुमीयत इति [3]प्राक्तनन्यायः। तथा च सुखघटसाक्षात्कार असाधारणकारणजन्यः जन्यसाक्षात्कारत्वाद् घट-साक्षात्कारवत्। न चात्मना सिद्धसाधनम्, तस्य कर्त्तृत्वेन व्यापार-विषयत्वाभावात्। कारणस्य च तद्व्यापारविषयत्वनियमाच्च। कथं तर्हि आत्मानमात्मना वेत्सीत्यादावात्मनः करणत्वमुपाचारात्। न च सुखसाक्षाकारे चक्षुरादिकमेवासाधारणकरणमस्तीति उक्तम्बाह्येति, बाह्येन्द्रियाणां स्ववृत्ति-गुणग्राहकत्वनियमेन स्ववृत्तिसुखादिग्रहे तेषामसामर्थ्यात्। किञ्च चक्षुरादिभिः सुखादिग्रहेऽर्थादिभिस्तद्ग्रहप्रसङ्गः। एवं मनःसिद्धौ मनस्त्वमपि तदाश्रितं सिध्यतीति नाश्रयासिद्ध्यादि।

यद्यपि धर्मिग्राहकप्रमाणबलेन मनसि संयोगादिकं सिद्धमेव, तथापि वैशेषिकप्रसिद्धास्तदीया अष्टौ गुणास्तावत् न सिध्यन्तीति तान् विशेषाकारेण दर्शयति-

1. एतेन अष्टाविधानित्वभ्रमोऽपि व्याख्यातः।
2. ज्योतित्वाभावे।
3. प्राक्तेन न्यायः - क मातृकायाम्।

(मू) तस्य गुणा: संख्यापरिमाणपृथक्त्वसंयोगविभाग-परत्वापरत्वसंस्कारा: । प्रयत्नज्ञानायौगपद्यवचनात्प्रतिशरीरमेकत्वं सिद्धम् । पृथक्त्वमप्यत एव । तदभाववचनाद (गु) णुपरिमाणम् । अपसर्पणोपसर्पणवचनात् संयोगविभागौ । मूर्त्तत्वात्परत्वापरत्वे संस्कारश्च । अस्पर्शवत्त्वाद् द्रव्यानारम्भकत्वम् । क्रियावत्त्वान् मूर्त्तत्वम् । साधारणविग्रहवत्त्वप्रसङ्गादज्ञत्वम् । करणभावात् पारार्थ्यम् । प्रयत्नादृष्टपरिग्रहवशादाशुसञ्चारि चेति ।

तस्य गुणा इति । अत्र द्रव्यत्वेन परिमाणवत्त्वे संख्यावत्त्वे सिद्धेऽपि सूत्रकारसम्मत[1]व्याजेन धर्मिग्राहकमानादेवाणुत्वमनेकत्वञ्च दर्शयति - प्रयत्नेति । 'प्रयत्नायौगपद्याज्ज्ञानायौगपद्याच्चैकम्' (वै.सू.3.2.3) इति सूत्रेण धर्मि-ग्राहकमानबलेनैव मनस: प्रतिशरीरं भिन्नत्वे सिद्धेऽर्थादिनैकत्वं सिद्धमित्यर्थ: । तथाहि व्यासज्यानुपपत्तिरेव मनसि मानम् । सा चैकस्मिन् शरीरे मनसां बहुत्वे पञ्चभिरिन्द्रियै: पञ्चानां मनसां संयोगसम्भवेऽनुत्पद्यमाना प्रतिशरीरं तस्यैकत्वं साधयतिकिञ्चैकस्मिन् शरीरे नानामनसोऽङ्गीकारे लाघवात् शरीरसमपरिमाणं विभुत्वपरिमाणं वा मन: स्यात् । तथा च व्यासज्यानुपपत्तिस्तदवस्था । सर्वेषु शरीरेष्वकमेव मन इति पक्षे च स्वशरीरावच्छेदेन देवदत्तादे: सुखाद्युत्पत्तिदशायां यज्ञदत्तादे: सुखाद्युत्पत्तिर्न स्यात्, असमवायिकारणसंयोगाभावात् । तस्मात्प्रतिशरीरमेकैकं मन: इति मनसां विभुत्वसिद्धि: । अतएव मनस्त्वं जाति: अनेकवृत्तित्वात् । अतएव संख्यानुविधानादेव [2]दिग्द्विपृथक्त्वादीनां द्वित्वानुविधायित्वात् । वस्तुतस्तु द्रव्यत्वादेव पृथक्त्वसिद्धि: ।

अणुत्वे मानमाह - तदभावेति । 'तदभावादणुमन:' इति (वै.सू.7.1.3) सूत्रे तच्छब्देन वैभवस्य परामर्शादिवैभवाभावान्मनोऽण्वित्यर्थ: । मध्यम-परिमाणवत्त्वे सावयवत्वापत्तेर्न तथेति भाव: । ननु मनसोऽवैभवमसिद्धम् । तथाहि मनो विभुज्ञानाऽसमवायिकारणसंयोगाश्रयत्वात् आत्मवत्, निरव-

1. व्याजेन - क मातृकायाम्

2. द्वित्वानुविधायित्वात् ।

यवेन्द्रियत्वात् श्रोत्रवद् विशेषगुणशून्यद्रव्यत्वात्, स्पर्शशून्यद्रव्यत्वात्, आकाशवत् । न च मनसो विभुत्वे क्रियाभावादात्मना विभुना सह संयोगाभावात् सुखाद्यसमवायिकारणसंयोगाश्रयत्वं न स्यादिति वाच्यम्, क्रियाभावेऽपि नैरन्तर्य्यसंयोगसम्भवात् । न चैवं सर्वदा सुखापत्तिः, निमित्तचन्दनाद्यभावात् । न च सुषुप्तिदशायां चन्दनादिसंयोगे तदापत्तिः, अदृष्टविरहात्तदानीं तदुत्पत्तेः । किञ्च मनसो वैभवाभावे सकलशरीरस्य पुंसः सर्वाङ्गस्यापि सुखानुत्पत्तिप्रसङ्गः । अणुमनःसंयोगस्य सर्वत्राभावादसमवायिकारणस्य स्वावच्छिन्नविभु-कार्यजनकत्वनियमात् । एवं नृत्यादावपि नानावयवक्रियाजनननाना-प्रयत्नोत्पत्तिरणुत्वेन सम्भवन्ति । तद्वैभवमाक्षिपति ।

न च तदनुरोधाच्छरीरपरिमाणमेवास्तु मन इति वाच्यम्, अनारब्धत्वेनास्य सावयवत्वाभावात् । अनारब्धत्वञ्च स्पर्शाभावात् । एवं शरीरादावपि नानाप्रयत्नजन्यनानाक्रियावशादपि तद्वैभवमवसेयम् । न चादृष्टपरिगृहीतान्तः-करणान्तरसंयोगास्तत्प्रयत्नहेतुरिति वाच्यम्, अन्योपगृहीतान्तःकरणस्यान्यत्र जनकत्वाभावात् । न च मनोवैभवे व्यासज्यानुपपत्तिः, अणुपक्षे च येनेन्द्रियेण मनःसंयोगस्यैकज्ञानजनकत्वं नान्यस्येति युगपज्ज्ञानानुपपत्तिरिति वाच्यम्[1], क्वचित्तु दीर्घांशशष्कुलिभक्षणादौ यौगपद्यस्येष्टत्वात् क्वचित् चक्षुषादिसम्प्रयादृष्ट-विशेषघटितत्वेन रासनादिसाक्षात्कारादिकं प्रतिबन्धककल्पनात् । नियामकयोः दृष्टविशेषस्याणुत्वपक्षेऽपि कल्पनीयत्वात् । अन्यथा प्रथमतः श्रोत्र एव संयोगो न चक्षुषि इति विनिगमनानुपपत्तेः । एवं रससाक्षात्कारदशायां युगपद्रासन-तदाश्रयत्वानुपपत्तिः । ज्ञानसामान्यकारणस्य त्वङ्मनोयोगस्य तदानीं सत्त्वात् ।

यत्तु मनोऽणुत्वपक्षेऽपि वुभुत्स्यैव विषयग्रहनियामिका कथमन्यथा श्रोत्रे नानाशब्दसमवायेऽपि बुभुत्सित एव शब्दो गृह्यते नान्य इति । एवं [2]वैभवपक्षेऽपि बुभुत्सावशात् ज्ञाननियम इति । तन्न । बुभुत्सायां शब्दग्रहहेतुत्वेऽपि विषयमात्रहेतुत्वेऽपि मानाभावात् ।

1. एवं त्रेधा --- नुपपत्तिरिति वाच्यम् - नास्ति 2. एवं

यत्तु एव ज्ञानकरणमेकत्रात्मनि एकमेव ज्ञानं जनयतीति नियमान्न युगपज्ज्ञानापत्तिरिति । त[1]न्न । दीर्घशष्कुलीभक्षणादौ तदानीं यौगपद्यस्य दर्शनेन तादृशनियमे मानाभावात् तस्माद् विभ्वेव मनः । [2]अतएव भवन्मते कायव्यूहदशायां नानाशरीरावच्छेदेन युगपन्नानाज्ञानोत्पत्तिरपि साधु संगच्छते । ज्ञानायौगपद्यं क्वचित् चाक्षुषादिसामग्र्या उक्तरीत्या बलवत्वादिति चेन्न । सुखादिकं मूर्तसंयोगाऽऽसमवायिकारणकं नित्यवृत्तिनित्यविशेषगुणवत्त्वात् शब्दवत् । [3]घटादिरूपे व्यभिचारवारणाय नित्यवृत्तिः इत्यतः सुखादेः मूर्त्तसंयोगाऽसमवायिकारणकत्वे सिद्धे शरीरादिसंयोगस्य तथात्वे बाधस्योक्तत्वात् मनःसंयोगे तदसमवायिकारणस्य सर्वसिद्धत्वात्प्रतियोगिनो मनसोऽमूर्त्तत्वसिद्धौ वैभवद्वयसंयोगाभावात् । कथञ्चित् तदभ्युपगमे वा तस्य नाकाशाभावेन सर्वदा ज्ञानादुत्पत्तिप्रसङ्गः । तद्वारणार्थं प्रयोजनान्तरकल्पनाया गौरवाच्च । एषां [4]ज्ञानेन्द्रियाणां नानाविषयसम्बन्धे युगपन्नानाज्ञानापत्तिः । सर्वेष्वपीन्द्रियेषु विभुमनःसंयोगस्य विद्यमानत्वादेकं ज्ञानकरणमित्यादिनियमे तु नेन्द्रियजन्यविजातीयचित्रज्ञानापत्तिर्दुर्वारा । न चाक्षुषत्वादिसंस्कारापत्त्या तादृशज्ञानं न जायत इति वाच्यम् । प्रतिबन्धकाभावे सामग्र्याऽवश्यं कार्यजनकत्वनियमात् । न हि प्रयोजनक्षितिभित्या सामग्रीकार्यमर्ज्जयति इति न्यायात् । [5]तस्मान्मूर्त्तमेव मनः कथं दीर्घांशशष्कुलिभक्षणादौ नानाज्ञानोत्पत्तिः युगपदिति चेत् । न । कथञ्चित् यौगपद्यभ्रमस्तु [6]ज्ञानानामशुभत्वात् ।

[7]एव नृत्यादावपि नानाक्रियाचिकीर्षा[8]प्रयुक्ताद् विलक्षणमनःसंयोगान्नानाप्रयत्नानां युगपदुपपत्तेर्न चासमवायिकारणं स्वावच्छिन्न एव कार्यं जनयतीतिनियमात्कथं तदवच्छिन्नप्रदेशे यत्नोत्पत्तिरिति वाच्यम्, तादृशव्याप्तौ मानाभावात् । एवं मनसोऽविभुत्वसिद्धौ धर्मिग्राहकमानबाधितावैभव[9]-

1. तन्न । दीर्घशुष्कुलीभक्षणादौ दर्शनेन - क मातृकायाम् ।
2. अतएव भवन्मते साधुसंगच्छते । नास्ति ।
3. घटादिरूपे - नित्यवृत्तीति - क मातृकायाम्
4. वचनेन्द्रियायां --
5. अस्मन्मूर्तिमे
6. ज्ञानाशुभात्वात् - क मातृअकायाम् ।
7. एवमित्वादावपि
8. प्रयुक्तत्व
9. साधका हेतव

साधकहेतुवदिति । सुष्टूक्तं तदभावादणु मन इति । किञ्च मनसो महत्त्वे तस्य प्रत्यक्षतापत्तिः जन्यद्रव्यसाक्षात्कारसामान्यहेतोः महत्त्वस्य सत्त्वादिति दिक् ।

संयोगविभागयोर्मनोवृत्तित्वे मानमाह - **अपसर्पणेति** । उपसर्पणं पूर्वापगृहीतशरीरविभागहेतुः क्रिया । अपसर्पणं चोत्तरशरीरसंयोगहेतुः क्रिया । तादृशाक्रियेऽदृष्टविशेषकारिते मनसि वर्तते इति सूत्रकारेणोक्तमतस्तयोः सिद्धिरन्यथा प्रेत्यभावानुपपत्तेः । इदमुपलक्षणम् । वस्तुतस्तु सुखादौ शरीर-प्राणादिसंयोगस्याऽसमवायिकारणत्वे सुषुप्त्यादावपि तदापत्तिः । परिशेषा-न्मनःसंयोग एवासमवायिकारणमिति सुखादीनामसमवायिकारणत्वेन संयोगसिद्धौ तद्विनाशकत्वेन विभागसिद्धिरिति द्रष्टव्यम् ।

ननु वैशेषिकप्रसिद्धा मनसोऽष्टौ गुणा इति तदयुक्तम् । परत्वापरत्ववेगेषु मानाभावादत आह- **मूर्त्तत्वादिति** । मनः परत्वापरत्ववत् मूर्त्तत्वाद् घटवदित्य-नुमानात्तत्सिद्धिरित्यर्थः । वेगो मूर्त्तत्वादेव सिद्धः । यद्यपि वेगमुत्पाद्य विनष्टे मूर्त्तत्वं व्यभिचार, तथापि संयोगाऽसमवायिकारणतया क्रियासमवायिकारणतया वेगोऽनुमेयः । न चादृष्टवशादेव क्रियास्विति वाच्यम् । तस्यां साधारण-कारणत्वेनासाधरणकारणं विना तदुपपत्तेः ।

ननु मनसोऽणुत्वेन पार्थिवपरमाणुवदारभकत्वं स्यात् । ततश्च तद्द्वैविध्यापत्तिरतोऽणुमात्रवृत्तित्वं मनस्त्वस्य सिद्धिमत आह- **अस्पर्शवत्त्वाच्चेति**। द्रव्यारम्भे हि नाणुत्वं प्रयोजकं न वा मूर्त्तत्वम्, किन्तु स्पर्शवत्त्वम् । तथा स्पर्शाभावात्मनो नारम्भकमित्यर्थः । यत्वपि स्पर्शवत्त्वं नारम्भकत्वे प्रयोजकम् । अन्त्यावयविनोऽप्यारम्भकापत्तेः । तथाप्यन्त्यावियविभिन्नस्पर्शवत्त्वं तत्र प्रयोजकमित्यर्थः । वस्तुतस्तु न च मूर्त्तत्वेन तत्र स्पर्शोऽप्यनुमातव्यः । मूर्त्तत्वस्य तत्प्रयोजकत्वे मानाभावेन व्याप्यत्वासिद्धत्वात् ।

ननु मूर्त्तत्वे सिद्धे तेन क्रियावत्त्वमनुमातव्यम् । तदेव कुत इत्याह- **क्रियावत्त्वादिति** । क्रियावत्त्वं स्पर्शवत्संयोगेनैवानुमेयमित्यर्थः । ननु तदावयोर्मनो जानातीति [1]प्रत्ययान्मनसोऽपि ज्ञानवत्त्वाद् वा न च ज्ञानं प्रति

1. प्रत्यक्षात्

कारणत्वान्न कर्त्तृत्वमिति वाच्यम्, कारणत्वकर्त्तृत्वयोरविरोधेनैकत्र तदुपपत्तेरित्याह - **साधारणेति** । विग्रहे उभयोरप्यधिष्टातृत्वापत्तेरित्यर्थ: । तथा यदि उभयोरेकत्रैव ज्ञानेच्छाकृतयस्तदान्यत्र कल्पनं व्यर्थम् । यदुभयोर्भिन्नविधयेच्छाकृतयस्तदा विरुद्धप्रयत्नद्वयविरुद्धक्रियातयापत्ति: स्यात् । उभयोर्विग्रहे सम्भवादित्यभिप्राय: ।

ननु अतिरिक्तानां पारार्थ्यमुक्तं तत्कथं मनस इत्यत आह - **करणत्वादिति** । करणकर्तुर्व्यापार्य्यत्वेनैव न परार्थत्वनियमादित्यर्थ: । ननु द्रव्यत्वाभावात्कथं क्रियावत्त्वम्, क्रियाया: द्रव्यत्वव्याप्यत्वात्तदभावे वा कथं मूर्त्तत्वमत आह- **गुणत्ववदिति** । तच्च धर्मिग्राहकमानसिद्धमित्यर्थ: । तथा च मनो द्रव्यं गुणवत्त्वादित्यतस्तत् सिद्धिरित्यर्थ: । ननु मन: प्राथमिकी क्रिया कथं स्यात्, वेगक्रियाजन्यत्वेन प्रथमं तदभावान्नापि नोदनादिकं स्पर्शाभावाच्च सम्भवतीति कुतस्तस्य विलक्षणसञ्चारवत्त्वमत आह - **प्रयत्नेति** । यद्यपि मनसोऽतीन्द्रियत्वात् तद्गोचराक्रियां न प्रयत्न: सम्भवतीति, तथापि [1]नाडीबहनाभ्यांनादिवासनादिवशेन त्वचा प्रत्यक्षसम्भवात् क्रियाविषयकप्रयत्नात् क्रियोत्पत्तावर्थान्मन:क्रियासिद्धि: । तथा चाद्यमन:क्रियानाडीद्वारे प्रयत्नजन्या वा अदृष्टविशेषादणुसञ्चारितेत्यर्थ: ।

स्वतन्त्रास्तु - अदृष्टाविशेषोपग्रहादनारब्धद्रव्यावायुपरमाणवस्तदीयत्रसरेणवो वा मनांसि तेषां तत्त्वेनैव सुखादिकं प्रति करणत्वम् । अनन्तानामतिरिक्तानां धर्मिणामतिरिक्ताया जाते: कल्पनामपेक्ष्य क्लृप्तेष्वेव सुखादिकरणत्वकल्पनायां लघुत्वात् । तस्य च वायवीयत्वेऽपि [2]त्वक्त्वभावान्न स्पर्शग्राहकत्वम् । तत्त्वस्यैकस्पर्शग्रहे प्रयोजनकत्वादित्याहु: । [3]इति शब्दो द्रव्यपदार्थसमाप्त्यर्थ: ।

---

1. नाडीयहनाभ्यासनृत्यानादिवासना - क मातृकायाम्
2. त्वचाभावान्न
3. इति शब्दो द्रव्यपदार्थसमाप्त्यर्थ: ।

यस्साक्षात्कुरुते समाधिषु सदा [1]नारायणाख्यं महो,
यद्व्याख्याविशदीकृतं विजयते तज्जैमीनीयं मतम् ।
[2]यस्सोमाध्वरदीक्षितो [3]विभुजगन्नाथः समुज्जृम्भते,
प्राशस्त्यं विवृणोत्यमुष्यतनयो भाष्यं कृतं प्रीतये ॥

प्रशस्तभाष्यभावार्थप्रकाशोऽयं मया कृतः ।
[4]अनेकतमसि ध्वस्ते सञ्चरन्तु सुखं बुधाः ॥

इति श्रीगोपीनाथमिश्रविरचितो द्रव्यभाष्यभावप्रकाशः समाप्तः ।

'क' मातृकायाः अन्ते-

मतानि यः खण्डयितुं श्रुतानां, तथैव संस्थापयितुं समर्थः ।
श्रीगोपीनाथाभिधवाजपेयी, भूर्लोकभाष्यमणिरेष जायात् ॥

वीरश्रीहरिकृष्णदेवस्य पञ्चमाङ्के चैत्रमासि कृष्णपक्षे नवभ्यां भृगुवासरे रघुनाथेन लिखितमिदं पुस्तकम् ।

'ख' मातृकायाः पुष्पके -

लक्ष्मीसिंहे अवतु मां लक्ष्मीसम्भोगलालसः ।
तद्वक्त्र्यचन्द्रिकापानश्चकारायितलोचनः ॥

गिरीशोऽवतु मां नित्यं, गिरीशवसतौरतः ।
गिरीशतनयाक्रान्तो गिरीशार्चितविग्रहः ॥
3.4.1922 दिनाङ्के समाप्तोऽयं ग्रन्थः ॥

---

1. नारायणाख्यामहे - क मातृकायाम्
2. योऽसावप्ययदीक्षितः क मातृकायाम्
3. प्रभुजगन्नाथ - ख मातृकायाम्
4. अनेन तमसिध्वस्ते - संचरितुं सुखाद् बुधा - क मातृकायाम् ।

परिशिष्टम्

द्रव्यभाष्यभावस्य पारिभाषिकपदानामनुक्रमणिका

क्रमसंख्या	पृष्टासंख्या	नामानि	सज्ञा
1.	89	अकार्यत्वम्	प्रागभावप्रतियोगित्वे पदार्थ-विभाजकोपाधिशून्यभावत्वम्
2.	87	अनित्यत्वम्	भावत्वे सति ध्वंसप्रतियोगित्वम्
3.	57	अनुवृत्तिप्रत्ययत्वम्	नानाधर्मविशेषकत्वे सत्येक-धर्मप्रकारकनानाज्ञानत्वम्
4.	85	अनेकत्वम् (क)	स्वविभाजकोपाधिव्याप्य-धर्माविच्छिन्नभेदवत्त्वम्
	96	(ख)	एकद्रव्यविभाजकोपाधिसमा नाधिकरणबहुसंख्याश्रयत्वम्
5.	49	अपक्षेपणम्	तादृशस्य मुसलादेरधोदेश-संयोगजनिका क्रिया
6.	56	अपरत्वम्	व्याप्यत्वमल्पव्यक्तिवृत्तित्वम्
7.	255	अपसर्पणम्	उत्तरशरीरसंयोगहेतुः क्रिया
8.	141	अपाकजत्वम्	शतशः पच्यमानानामप्यपा-मत्यन्तानलसंयोगेऽपि पूर्व-रूपविजातीयरूपादर्शनात्तत्त-द्रूपस्यापाकजत्वम्
9.	83	अभिधेयत्वम्	शब्दशक्तिविषयत्वम्
10.	66	अयुतसिद्धम्	यदुभयसत्ताधिकरणं काल-व्यापकं यदुभयासम्बन्धाधि-करणकालत्वं तत्त्वम् ।

11.	153	अयोनिजम्	शुक्रशोणितसन्निपातानपेक्षम्
12.	41	अवतमः	घटग्राहकतेजः सहकृतघट-रूपग्राहकयावत्तेजःसंसर्गाभावः
13.	15	अत्यन्ताभावः	तदुभयान्यत्वे सति संसर्गाभावः
14.	15	अन्योन्याभावः	तादात्म्यसम्बन्धावच्छिन्न-प्रतियोगिताकोऽभावः ।
15.	142	अव्यक्तत्वम्	मधुरत्वावान्तरजातिराहित्यम् ।
16.	41	अर्थतासमत्वम्	परप्रकाशकतया यावत्तेजः संसर्गाभावत्वम्
17.	49	आकुञ्चनम्	प्रसारितवस्त्रचर्मादेरन्योन्या-वयवाभिमुखेन संयोगविशेष-जनिका क्रिया
18.	130	इन्द्रियत्वम्	जन्यज्ञानाजन्यजन्यज्ञान-त्वावच्छिन्नकार्यतानिरूपित-कारणताश्रयत्वम् ।
19.	98	इन्द्रियप्रकृतित्वम्(क)	इन्द्रियानिन्द्रियोभयवृत्ति-द्रव्यविभाजकोपाधिमत्त्वम् ।
		(ख)	बहिरिन्द्रियवृत्तिद्रव्य-विभाजकोपाधिमत्त्वम् ।
20.	193	उपलक्षणत्वम्	अशक्यत्वे सति शक्योप-स्थित्यनुकूलत्वम्
21.	255	उपसर्पणम्	पूर्वापगृहीतशरीरविभागहेतुः क्रिया
22.	49	उत्क्षेपणम्	हस्तस्थितस्य मुसलादेः हस्तविभागपूर्वकोर्ध्वदेश-संयोगजनिका क्रिया

23.	49	उत्क्षेपणत्वम्	तादृशसंयोगविशेषजनकतावच्छेदिका क्रियात्वव्याप्यजातिः
24.	184	ऋषित्वम्	शापानुग्रहादिसामर्थ्यप्रभाव - विशेषवत्त्वम्
25.	102	एकदेशवृत्तित्वम्	स्वात्यन्ताभावसमानाकिरणत्वम्
26.	192	औपाधिकी	जातिपुरस्कारेणानेकव्यक्ति-बोधिनी
27.	49	कर्मत्वम् (क)	जातिविशेषः सत्तासाक्षाद्-व्याप्यः कर्मत्वा-कारानुगतप्रतीतिसाक्षिकश्च
		(ख)	नित्यमात्रवृत्तिसत्तासाक्षाद्-व्याप्यजातित्वम्
28.	205	कालत्वम्	विजातीयपरत्वासमवायि-कारणसंयोगाश्रयविभुत्वम्
29.	7	कायिकः	करशिरः संयोगादिदण्डवत् पतनादिः ।
30.	156	काष्टत्वम्	दाहजन्यभस्मप्रकृतित्वम्
31.	78	क्रयत्वम्	उद्यत्कीर्त्तनपूर्वकधर्मशास्त्रा-भ्यनुज्ञातद्रव्यविनियोगोपायत्वम् ।
32.	78	क्रयादिलक्षणम्	स्वकायविनियोगाऽविषय-त्वेनोद्दिष्टस्य द्रव्यस्य विनि-योगहेतुमतो व्यापारविषयत्वम्
33.	102	क्षणिकत्वम्	स्वोत्पत्त्यधिकपञ्चमक्षण-व्यापित्वम्
34.	207	क्षिप्रत्वम्	अल्पकालोपाधिसम्बन्धः

35.	113	गन्धत्वम्	घ्राणजन्यलौकिकसाक्षात्कारविषयताव्याप्यगुणत्वव्याप्यजातिसमवायत्वम्
36.	49	गमनत्वम्	निरवच्छिन्नसंयोगविशेषजनिका उत्तरसंयोगजनिका वा क्रिया
37.	48	गुणत्वम्	विभुवृत्तिसत्तासाक्षाद्व्याप्यजातिमत्वम्
38.	41	छाया	घटरूपग्राहकतेज:सम्बलितशुक्लत्व (क) व्याप्यजातिग्राहक्यावत्तेज:संसर्गाभाव: । (ख) देशविशेषावच्छिन्नत्वेनैव प्रतीयमानस्तेजोभावो वा
39.	83	ज्ञेयत्वम्	ज्ञानविषयता
40.	41	तामसच्छायात्वम्	आलोकजन्यनीलविशिष्टरूपवदिन्द्रियसाक्षात्कारविषयत्वम्
41.	136	द्व्यणुकम्	परमाणुद्वयारब्धजन्याणुत्वाधिकरणद्रव्यविशेष: ।
42.	60	द्रव्यत्वम् (क)	सत्ताश्रयैकदेशवृत्तिवद्व्याप्यम्
		(ख)	संयोगत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदको जातिविशेष: ।
43.	15	ध्वंसत्वम्	उत्पत्तिमदभावत्वम्
44.	7	नमस्कार:	स्वापकर्षबोधानुकूलव्यापार:
45.	91	नित्यत्वम्	ध्वंसाप्रतियोगित्वम्
46.	16	नि:श्रेयसत्वम्	समानाधिकरणदु:खप्रागभावासमानकालीनदु:खध्वंसत्वम्

47.	14	पदार्थत्वम्	पदजन्यप्रसीतिविषयत्वम्
48.	56	परम्	व्यापकम्, बहुव्यक्तिवृत्तिः ।
49.	216	पश्चिमा	अस्ताचलसन्निहिता दिक् ।
50.	121	पाकजत्वम्	अनुष्णशीतपदस्य पाकजस्पर्शे ऽनुष्णशीततात्पर्यग्राहकत्वम् ।
51.	192	पारिभाषिकी (क)	व्यक्तिमात्रबोधिनी
	193	(ख)	प्रवृत्तिनिमित्तोपलक्षणाभावे प्रत्यक्षेणोपस्थितेः व्यक्तिविशेषः यत्र संकेतः
52.	9	पूर्वकालत्वम्	तत्प्रागभावाधिकरणकालत्वम्
53.	15	पूर्वत्वम्	तदधिकरणकालध्वंसानधि-करणकालत्वम्
54.	217	पूर्वा	प्रथमादित्यसंयोगावच्छिन्ना
55.	99	प्रत्यक्षत्वम्	विशेषगुणवदिन्द्रियलौकिक प्रत्यासत्तिजन्यप्रत्यक्षविषयत्व-व्याप्यद्रव्यत्वव्याप्यजातिमत्त्वम्
56.	192	प्रवृत्तिनिमित्तत्वम्-	वाच्यत्वे सति वाच्यवृतित्वे सति वाच्योपस्थित्यनुक्तत्वम्
57.	49	प्रसारणम्	आकुञ्चितावयवानां विभाग-विशेषजनिका क्रिया
58.	15	प्रागभाववत्वम्	प्रतियोग्युत्पत्तिपूर्वकालाव-च्छिन्नाभावत्वम्
59.	89	बुद्धिलक्षणम्-	अनुकूलवृत्तिबुद्धिव्यावृत्ति-बुद्ध्यन्तरबुद्ध्यसाधारण-कारणगुणान्यभावत्वम् ।

60.	60	व्यापकः		यदाश्रययावद्व्यक्तिवृत्तित्वे सति तदनाश्रययत्किञ्चिद्व्यक्तिवृत्तिः सस्तद्व्यापकः ।
61.	52	भूतत्वम्-		पृथिव्यादिचतुर्ष्वेव मूर्त्तत्व-समानाधिकरणमपि आकाशे तदभावसमानाधिकरणम् ।
62.	195	भोगत्वम्	(क)	ईश्वरगुणादोषावृत्तियोग्यात्मविशेषगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमद्विशेषसाक्षात्कारत्वम् ।
			(ख)	विषयशरीरसंयोगविशेषजन्ययोग्यात्मविशेषगुणविषयकसाक्षात्कारत्वम् ।
63.	50	भ्रमणम्-		अव्यवस्थायाः नानादेशावच्छिन्नसंयोगजनिका क्रियाः ।
64.	4	मङ्गलत्वम्	(क)	विघ्नध्वंसकामनया तत्पूर्वकसमाप्तिकामत्वाद्वेदबोधितविषयः ।
	4		(ख)	समाप्तित्वावच्छिन्नकार्यतया वा तत्कारणतत्तदवच्छेदकत्वेन सिद्धजातिविशेषः ।
65.	178	महाप्रलयत्वम्		जन्यभावानधिकरणकालत्वम्
66.	7	मानसत्वम्		आत्मन्यस्मदपकृष्टत्वज्ञानवत्वम्
67.	52 96	मूर्त्तत्वम्		मनसि तदभावसमानाधिकरणमिति क्रियात्वावच्छिन्नकार्यता निरुपितकारणतावच्छेदकतया सिद्धौ जातिविशेषः ।

68.	137	मूर्त्तिकात्वम्	(क) स्वाधिकगुरुत्ववद्द्रव्याभिघातक जन्यविभागवदवयव: ।
	”		(ख) जलसंयोगविशेषक्लिद-मानावयवत्वम् ।
	”		(ग) विजातीयगन्धवद्द्व्यणु-कादिक्रियोत्पन्नपृथिवीत्वम् ।
69.	7	वाचनिकत्वम्	मानसनमस्कारानुमापकशब्दत्वम्
70.	166	वायुत्वम्	प्रत्यक्षवृत्तिद्रव्यविभाजकोपाधि-शून्यत्वे सतिस्पर्शवत्वमतान्तर-तारतम्याभाववत्स्पर्शवत्त्वम् ।
71.	166	विलक्षणत्वम्	कालिकसम्बन्धेन सजातीयविशेषो-त्पत्तिव्याप्यध्वंसप्रतियोगित्वम् ।
72.	131	विषयत्वम्	ज्ञायमानत्वेनैव सुखदु:खान्य-तरसाधनत्वम् ।
73.	13	वैधर्म्यम्	यो यस्मात् निवर्तते ।
74.	50	रेचनम्	मूर्त्तद्रव्यान्तरस्य मूर्त्तद्रव्या-न्तराद् विभागविशेषपूर्विकाध: -संयोगजनिका क्रिया ।
75.	141	शुक्लत्वम्-	अपाकजत्वमभास्वरत्वम् । पाकजरूपप्रतिबन्धकताव-च्छेदक: शुक्लत्वाद्यवान्तर-जातिविशेष: ।
76.	67	समवायत्वम् (प्राञ्चमते)	प्रागभावाऽप्रतियोगिसम्बन्धत्वम्
77.	84	समवायित्वम्	समवेतवृत्तिपदार्थविभाज-कोपाधित्वम्
78.	62	समवेतत्वम् (क)	अनित्यवृत्तिवृत्तिभिन्नपदार्थ विभाजकोपाधिभिन्नमत्त्वम्

	”	(ख)	एकव्यक्तिमात्रसमवेतमात्रवृत्ति-पदार्थविभाजकोपाधिमत्त्वम्।
79.	147	समुद्रत्वम्	परिमाणविशेषावच्छिन्न-जलत्वरूपम्।
80.	12	संग्रहणम्	आकारे नानास्थानवितताना पदार्थानां परस्परसङ्गतिम-त्त्वेनैकत्र निरूपणम्।
81.	15	संसर्गाभावत्वम्	संसर्गारोपजन्यप्रतीतिविषया-भाववत्वम्
82.	52	साङ्कर्य्यम्	परस्परात्यन्ताभावसमानाधि-करणत्वेसत्येकाधिकरणवृत्तित्वम्
83.	13	साधर्म्यम्	यो यत्रानुवर्त्तते सस्तस्य साधर्म्यम्।
84.	51	सामान्यम्	नित्यत्वे सति अनेकसमवेतत्वम्
85.	143	सांसाद्धिकत्वम्	असंयोगासमवायिकारणक-द्रवत्वान्यद्रवत्वम्
86.	99	स्पर्शवत्वम्	स्पर्शसमवायिकारणवृत्ति-विभाजकोपाधिमत्त्वम्।
87.	50	स्यन्दनम्	निरवच्छिन्नसंयोगजनिका क्रिया
88.	67	सम्बन्धत्वम्	विशेषणविशेषाभ्यामन्यत्वे सति विशिष्टधीविषयत्वं विशिष्टधीनियामकत्वम्।
89.	78	स्वत्वम्	यद्व्यतिरेके यथेष्टविनियोग विषयत्वानिर्णयस्तद् विषयत्वम्
90.	137	स्थावरत्वम्	भोगविशेषावच्छेदकत्वे सति चेष्टानाश्रयत्वम्।
91.	147	हिमत्वम्	स्पर्शविशेषजनकतावच्छेदको जातिविशेष:

द्रव्यभाष्यभावग्रन्थे उद्धृतवाक्यानामनुक्रमणिका

23.	113	नोदनाद्यमिषो: कर्म तत्कर्मकारित्वाच्च ।
24.	212	परत्वापरत्वयो: परत्वापरत्वाभावोऽणुत्वमहत्वाभ्यां व्याख्यात: ।
25.	71	पिण्डादीनां स्वजनोऽपि इत्यादि
26.	195	प्रभामण्डलेऽऽकाशत्वारोपानन्तरं गृह्यमाणेन्द्रिय इति अनन्तमिश्रा: ।
27.	252	प्रयत्नायौगपद्याज्ज्ञानायौगपद्यादेकम् ।
28.	22	प्रेयो ब्रह्म तस्मात्तदननृतं यद्‌यमात्मा
29.	66	युमि श्रितौ
30.	24	वेदानुवचनेन ब्राह्मणा विविदषन्ति यज्ञेन
31.	246	वैभावान्महानाकाशस्तथा चात्मा ।
32.	55	व्यक्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थिति:
33.	111	रूपरसगन्धस्पर्शवती पृथवी ।
34.	140	रूपरसस्पर्शवत्यापो द्रवा: स्निग्धाश्च
35.	101	रूपं गन्ध: रस: स्पर्श: स्नेहसांसाद्धिको द्रव: । बुद्‌ध्यादिभावानान्तश्च स्पर्शो वैशेषिको गुणा: ।
36.	210	लवक्षणचतुष्टयम्, अक्षिपक्ष्मैकनिमेष: ।
37.	119	लोहितो यस्तु वर्णेन मुखे पृच्छे च ...डर: श्वेत: खुरविषाणाभ्यां स नीलो वृष उच्यते ॥
38.	138	श्मशाने जायते वृक्षम्, एकं कण्ठं प्रतिष ।
39.	25	सत्येन लभ्यस्तपसो द्वेषाणामातमसम्यग्पदेन ब्रह्मचर्येण ।
40.	111	संख्या परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे चाक्षुषाणीति ।
41.	112	संयुक्तसमवायेन जलीयं क्षीरतैलयो: द्रवत्वं घृतजत्वादौ स्वकीयं वह्नियोगजम् ।

42.	202	संयोगाद् विभागाद् शब्दाच्च शब्दनिष्पत्तिः
43.	244	संस्कारादात्ममनःसंयोगाच्च स्मृत्युत्पत्तिः
44.	165	स्पर्शवान् वायुः
45.	110	साध्याप्रसिद्धिवैषम्यं व्यर्थतोपनयस्य चान्वये नैव सिद्धिश्च व्यतिरेकिणि दूषणम् ॥

द्रव्यभाष्यभावग्रन्थे साङ्केतिकशब्दविवरणम्

1.	अ.प.	अग्निष्टोमपद्धतिः
2.	क.मी.	काव्यमीमांसा
3.	कि.	किरणावली (प्रशस्तपादभाष्यस्य)
4.	कि.भा.	किरणावलीभाष्करः
5.	को.का.	कोशलानन्दकाव्यम्
6.	कौ.अ.	कौटिल्य-अर्थशास्त्रम्
7.	क्र.दी.	क्रमदीपिका
8.	त.सं.	तर्कसंग्रहः
9.	द्र.भा.भा.	द्रव्यभाष्यभावः
10.	ध.प्र.	धर्मप्रदीयः
11.	नि.प्र.	नित्याचारप्रदीपः
12.	न्या.क.	न्यायकन्दली
13.	न्या.कु	न्यायकुसुमाञ्जलिः
14.	न्या.को.	न्यायकोशः
15.	न्या.भा.	न्यायभाष्यम्
16.	न्या.ली.	न्यायलीलावती
17.	न्या.सू.	न्यायसूत्रम्
18.	प्र.प.	प्रकरणपञ्जिका
19.	प्र.भा.	प्रशस्तपादभाष्यम्
20.	प्र.वा.	प्रमाणवार्त्तिकम्
21.	प्र.स.	प्रमाणसमुच्चयः
22.	बृह.उ.	बृहदारण्यकोपनिषत्
23.	व्यो.	व्योमवतीटीका
24.	ब्र.सू.	ब्रह्मसूत्रम्

25.	भ.पु.	भविष्यपुराणम्
26.	भा.द.	भारतीयदर्शन (हिन्दी)
27.	भा.द.इ.	भारतीयदर्शन का इतिहास (हिन्दी)
28.	म.स्मृ.	मनुस्मृतिः
29.	मी.सू.	मीमांसासूत्रम्
30	मु.	मुक्तावली
31.	यो.सू.	योगसूत्रम्
32.	वा.पु.	वायुपुराणम्
33.	वै.सू.	वैशेषिकसूत्रम्
34.	ल.व.	लक्षणावली
35.	श्लो.वा.	श्लोकवार्त्तिकम्
36.	ष.द.स.	षड्दर्शनसंग्रहः
37.	स.द.कै	सर्वदर्शनकौमुदी
38.	स.द.स.	सर्वदर्शनसंग्रहः
39.	सा.का.	सांख्यकारिका
40.	सा.त.कौ	सांख्यतत्त्वकौमुदी
41.	सा.भू.	साहित्यभूषणम्
42.	सा.सू.	सांख्यसूत्रम्
43.	सू.	सूक्तिटीका
44.	से	सेतुः
45.	B.G.N.V.	Bibliography of Nyaya & Vaisesika.
46.	D.C	Dharmasastra Catalouge of Orissa.
47.	D.C.S.M.	Descriptive Catalogue of Sanskrit Manu-script of Orissa.
48.	E.N.Phy	Encyclopediea of Nyaya & Vaisesik Philosophy.
49.	H.B.	History of Bengal

50.	H.I.L.	History of Indian Logic
51.	H.I.Phy	History of Indian Philosophy
52.	H.Ind.Phy.	History of Indian Philosophy
53.	H.I.P.	History of Indian Philosophy
54.	H.P.E.W.	History of PhilosophyEastern and Western
55.	I.H.Q.	Indian History Quaterely
56	I.I.P	Introduction to Indian Philosophy
57.	J.A.S.B.	Journal of Asiatic Socity of Bengal.
58.	O.h.R.J.	Orissa Historical Research Journal.
59.	O.I.P	Outline of Indian Philosophy.
60.	S.H.L.	Sugiuar's Hindu Logic.
61.	V.P.P.P.	Vaisesika Philosophy according to Prasasthapada Sastra.
62.	V.Phy.	Vaisesika Philosophy.